॥ श्री [redacted] तीयस्कन्धः ॥

श्रीमद्भागवतम् ॥

महर्षिप्रवर श्री[redacted] प्रणीतम् ।

[redacted] मार्कण्डेय-दीपिका श्रीराधारमणदास गोस्वामि विरचित [redacted] विभाषया
[redacted] तभागवतपुष्टिका श्रीमद्विजयध्वजतीर्थकृतपदरत्नाख्य [redacted] श्रीमद्वल्लभाचार्यकृत
[redacted] वल्लभाचार्यप्रकरण श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ [redacted] श्रीमद्विश्वनाथचक्रवर्ति
[redacted] टीकाश्च तथा श्रीनिम्बार्क सम्प्रदायि श्रीमत्पुरुषोत्तमाचार्य [redacted] सिद्धान्तप्रदीपाख्य
टीका समेतम् ।

[redacted] परिव्राजकाचार्य श्रीमत् [redacted] श्रीमदानन्दसरस्वतीपूज्यपादशिष्य

श्रीनिरञ्जनस्वरूपब्रह्मचारिणा ।

सम्पादितम् ।

[redacted] गीत दासस्य [redacted] श्रीराधारमण [redacted] प्रेम सेवा परायण राजर्षि राव

[redacted] श्रीनवमल्लि [redacted] राव बहादुरस्य ।

सम्पूर्ण साहाय्येन

प्रकाशितम् ।

[redacted] निगमकल्पतरोर्गलितं फलं, शुकमुखादमृतद्रवसंयुतम् ।
[redacted] भागवते रसिकाः सदा, मुहुरहो रसिका भुवि भावुकाः ॥

[redacted] वृन्दावनधामनि ।


श्रीमद्वल्लभीय [redacted] यन्त्रे श्रीनिरञ्जनस्वामिना ।

मुद्रितम् ।

[redacted] १९[redacted]

S/O
294.5925
P 985b.n
V:2

THE ASIATIC SOCIETY
CALCUTTA-700016
ACC NO B 5198
DATE 25.1.90



[illegible]यतम्

द्वितीयस्कन्धः ।

प्रथमोऽध्यायः ।

ॐ नमो भगवते वासुदेवाय ॥

श्रीशुक उवाच । वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ।
आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥
श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥
निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ।
दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥ ३ ॥
देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ।
तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यन्नामकीर्त्तनं दानतपोयोगादिसत्फलम् । तं नित्यं परमानन्दं हरिं नरमहं भजे ॥
द्वितीये तु दशाध्यायैः श्रीभागवतमादितः । उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥
तत्र तु प्रथमाध्याये कीर्त्तनश्रवणादिभिः । स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥
उक्तः पूर्वमुपोद्घातः सप्रसङ्गः शुकागमः । राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ॥ ० ॥

राज्ञः प्रश्नमभिनन्दति वरीयानिति । ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठः प्रश्नः कृतः एष वरीयान् । यतो लोकहितमेतत् मोक्षहेतुत्वात् । आत्मविदां मुक्तानाञ्च सम्मतो यतः ॥ १ ॥

तत्र तावत् स्वाभाविकक्रियाणामनर्थहेतुतां वदन् ब्रूहि यद्वा विपर्य्ययम् इत्यस्योत्तरमाह श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानाम् अतएव गृहमेधिनां तद्गतपञ्चसूनापराणाम् । मेधतिर्वधार्थः ॥ २ ॥

तेषां वृथैवायुर्व्ययो भवतीत्याह निद्रयेति । नक्तं रात्रौ यत् वयः आयुः तन्निद्रया व्यवायेन स्त्रिया वा ह्रियते । दिवा अह्नि यद्वयः तत् अर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे कुटुम्बभरणेन वा । [illegible] आयुः समुत्थायको ॥ ३ ॥

ननु स्वकुटुम्बार्थं कथमायुर्व्ययं कुर्य्यात् तत्राह । देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

उद्देशेति—नाममात्रेण सङ्कीर्त्तनमुद्देशः । लक्ष्यते ज्ञायते अनेनेति लक्षणम् असाधारणधर्म्मकथनमित्यर्थः । तद्द्विविधम्—इतरभेदानुवापकं व्यवहारप्रयोजकञ्च । उपोद्घात इति—[illegible] न्यायशास्त्रे षोढा निरूपिता—सप्रसङ्गः उपोद्घातो हेतुतावसरस्तथा । [illegible] सङ्गतिरिष्यते ॥ इति वचनात् । तत्र स्मृतस्योपेक्षणानर्हत्वं प्रसङ्गत्वम् । चिन्ता प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः । हेतुता कारणता [illegible] तरावश्यकत्वमवसरः । निर्वाहकं कारणतानिर्व्वाहकं कार्य्यत्वम् । एककार्य्यत्वमेककार्य्यस्यानुकूलत्वं कार्य्यत्वञ्चात्रार्थ [illegible] यावत् । तथाहि प्रकृतप्रस्तावे उपोद्घातत्वं प्रसङ्गत्वं वा कथमस्तीति पाठकः स्वयमेव चिन्तयम् ॥ १ ॥

ब्रह्मेति प्रथमस्कन्धीयैकोनविंशाध्यायस्य [illegible] श्लोकः ॥ पञ्चसूनेति । पञ्चप्रकारप्राणिवधस्थानं यथा—पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च [illegible] इति । [illegible] वाहयेत् ॥ इति शुद्धितत्त्वम् । तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति । तस्य प्रायश्चित्तं वैश्वदेवः । यथा—लौकिके वैदिके [illegible] स्थले स्थितौ । वैश्वदेवन्तु कुर्व्वीत पञ्चसूनाऽपनुत्तये ॥ इति आह्निकतत्त्वधृतशातातपवचनम् ॥ अशौचकालोत्पन्न [illegible] पापस्य दानादिनाशयत्वं यथा—दशाहानु परं सम्यक् विप्रेभ्योयीत धर्म्मवित् । दानञ्च विधिना देयमशुभात् तारयेद्धि [illegible] इति शुद्धितत्त्वधृतसंवर्त्तवचनम् ॥ २—४ ॥

श्रीहयग्रीवायनमः ॥ वेदान्तोपबृंहणा[illegible]

[illegible] प्रतिराजापृष्टश्रेयोनिरूपणं [illegible] शुकः श्रोतव्यादिषु प्रश्नमभिनन्दति। वरीयानिति। [illegible] पुंसां श्रोतव्यादिषु श्रोतव्यमतत्त्वनिर्धा-रणव्यार्थपुरुषः गोचरः श्रोतव्यार्थतत्त्वविषयः। लोकहितमितिपाठेप्रतीतिशेषः लोकहितंप्रतियः प्रकृतएषः प्रश्नोवरीयान्श्रेष्ठः कुत-स्तत्यत्यतआह। यतः। आत्मविद्संमतः आत्मज्ञानिनांसंस्तुतः। ननुनायमात्मविषयकश्रवणाद्यनुष्ठानादिप्रश्नः। यच्छ्रोतव्यमथोजाप्यंवूहि यद्वा-वपर्य्ययमितिसामान्येनपृष्टत्वाद्तः। कथमात्मवित्संमत्याप्रश्नाभिनंदनमितिचेन्मैवं। किमयंपृष्टा आत्मविषयकश्रवणादीनां मुक्तिसाधनम-जानातिनवा। नाद्यः म्रियमाणस्ययत्कर्त्तव्यं यच्छ्रोतव्यमिति पुरुषविशेषकर्तृकप्रश्नायोगात्। नाद्यःसुतरांप्रश्नानुपपत्तेरतः सामान्या-कारेणात्मश्रवणादीनां मुक्तिसाधनत्वंजानतो विशेषतआत्मनः। श्रवणादीनां च स्वरूपमजानतोऽयं प्रश्न इति प्रश्नस्यविशेषनिष्ठत्वादात्म-वित्संमत्याभिनन्दनोपपत्तेः ॥ १ ॥

अथबृहद्व्रताविपर्ययमित्यस्यप्रश्नस्यश्लोकत्रयेणोत्तरमाह। श्रोतव्यादीनीति। हे राजेन्द्र! गृहमेधिनां। नृणांश्रोतव्यादीनिसहस्रशः संन्ति। मुमुक्षोस्तुतत्रैकमेवेत्यभिप्रायः। तदनुबंधित्वेनोपासनादीनां श्रवणमर्थसिद्धं। गृहमेधिनांतद्रहितपंचसूनापरागांमेधःहिंसार्थः। यद्वा। मेधावुद्धिःगृहेषुमेधाएषामस्तीतिगृहमेधिनः गृहासक्ताः। यद्वामेधः पशुः "उपनयनमेध परआशासानामेधपतिष्यामेध"मितिवैदिक-प्रयोगात्। तत्संबंधिव्यापारोपिउपचारान्मेधः स एषामस्तीतिगृहमेधिनः पशुर्हियज्ञांगभूतैः [illegible]दीनांप्रीतिजनकः तद्वदेतेऽपिकेवलकर्मानु-ष्ठानासक्तास्तत्प्रीतिसंपादकाइतिपशुसाम्यमुच्यते। केवलैहिकामुष्मिकफलासक्तागृहस्थाइति यावत्। अतएवात्मतत्त्वमात्मयाथात्म्यम-जानन्तोदेवतारूपेणबहुशः संतीत्यनेन "बहुशास्त्राध्ययनाश्चबुद्धयोऽव्यवसायिना"मितिरीत्यासांसारिकफलसाधनानामानन्त्यं तारतम्यंचाभिप्रेतं २

एतैश्चदृष्टैर्व्यापोढ्यत्याह। निद्रयेति। नक्तंरात्रौयद्व्यस्तन्निद्रयाव्यवायेन मिथुनीभावेन वा ह्रियतेयाप्यतेदिवायद्व्यस्तदर्थेहया अर्थाजनानुकूलयेष्टया संपादितैश्चकुटुंबभरणेन कुटुंबपोषणेनचकारणाकारणवनुक्तसमुच्चयार्थैरुक्तातिरिक्तव्यापारांतरंगृह्यापीत्यर्थः ॥३॥

ननुश्वरकुटुंबाद्यर्थंकथमायुर्व्यर्थंःस्यात्तत्राह। देहेति। आत्मसैन्येषुआत्मनः स्वस्यपरिजनेष्वसत्सुअंतवत्स्वपिदेहापत्यकलत्रादिषु-असत्कः। अन्येषां निधनं। अंतवत्त्वंस्वांतत्वेनपश्यन्नपितेषां देहादीनामंतवत्त्वंस्वात्मनिनपश्यतिनानुसंधत्ते ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः। श्रीगुरुभ्योनमः। श्रीवेदव्यासायनमः। वरीयानुप्रष्टुर्योनिगमविषयोयोऽस्यजनकोवराहाधा-त्मायोऽवतरतिसुरारातिहृतये। अदाद्ब्रह्मज्ञानंसकलविषयंयश्चविनुतस्तमंगोपास्त्वंहृदयमतनंस्वैप्रकृतये ॥ १ ॥

संप्रतिपरीक्षित्प्रश्नं परिहरिष्यन्स्तौति वरीयानिति श्रीभागवतसंहिताप्रारंभकारणसविस्तरमभिधायेदानींश्रीभागवतसंहिताप्रारभ्य-तइत्याह वरीयानिति यच्छ्रोतव्यमथोजाप्यमित्यादिनायस्त्वयाकृतःसएषप्रश्नोवरीयान् अङ्गीकार्यतमः सर्वोत्कृष्टत्वात् लोकहित-मितिक्रियाविशेषणं यथालोकस्यहितंभवतितथाकृतइत्यनेननकेवलंतवैवहितकरोऽयंकिंतुसर्वस्यैत्युक्तंभवति उत्कृष्टत्वेहेतुगर्भविशेषणमाह आत्मविदिति मुख्यतआत्मविदोब्रह्मादयस्तेषामपिसंमतत्वात् तत्रैवमत्राह पुंसामिति आत्मविद्त्यनुवर्त्तते इहजगतिनृणांसहस्रशः श्रोतव्यानि संतिम्रियमाणानामम्रियमाणानांचपुंसांश्रोतव्यादिषु परःपरमात्मासएवात्मविद्संमतइतियत्तस्मादित्यर्थः "आत्माद्यरे-द्रष्टव्य"इत्यादिश्रुतेः अनेनपरमात्मविषयत्वेनास्यवरीयस्त्वमित्युक्तंभवति इतोऽपिपरमात्मश्रवणादिकमंतरंगसंसारक्षयतद्ज्ञाननिबंधन-स्यदुरुच्छेद्यत्वात्मएवतेषुमुख्यत्वेनसंमतइत्युपसंहरन्नश्लोकप्रवृत्तिप्रकारमाह अपश्यतामित्यादिना हृच्छ्रवणज्ञानार्थः आत्मनःपरमात्मन-स्तत्त्वमनारोपितरूपंज्ञानादिलक्षणं आत्मनांलक्ष्मीब्रह्मादिचेतनानांकदाप्यनभिभूततरतमभावेनावस्थितिंचापश्यतामजानतां निद्रये*-त्यत्राप्यनुसंधेयं गृहमेधिनां गृहमेधा गृहाश्रमएवकर्तुंयोग्याःपंचमहायज्ञाः स्मृतिविहितप्रत्यवायपरिजिहीर्षयातान्कर्तुंशीलमेषामस्तीति-गृहमेधिनः तेषांगृहेषुगृहाश्रमेष्वेववर्त्तमानानांपुंसाम् ॥ २ ॥

निद्रयाव्यवायेनचस्त्रीभोगेनचनक्तंरात्रिर्नवैवयोह्रियते दिवाचाहश्चार्थेहयाश्रीनारायणाराधनानुपयोगिहिरण्यादेरापादनायासेन "अन्य-कार्य्यशतंकृत्वाभर्त्तव्यामनुव्रजे"दितिवचनात् कुटुंबभरणेनवा ह्रियतइत्यन्वयः ॥ ३ ॥

आत्मतत्त्वाज्ञानेकारणमाहदेहेत्यादिना अपिगर्हार्थः आत्मनःस्वस्यदीनत्वंक्षीणत्वमापादयंतीत्यात्मदैन्यानि तेषु दीक्ष्मश्रयद्वनिधातोः यद्वास्वतएवदीनभावोयेषांतेतथातेषु अतएवासत्स्वभद्रेषुतुक्तं "सद्भावेसाधुभावेचे"ति निधनेनाशे प्रकर्षेणासक्तःप्रसक्तः नपश्यतिस्वस्यैवं शः अपिनाऽसच्छब्दस्वमिथ्यार्थाभिधायित्वं गर्हितमितिदर्शयतितेषुप्रमत्तोनिधनमितिपाठोऽनन्वितः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

द्वितीयैकमसन्दर्भे सन्दर्भाणां समाहृतिः। क्रियते यत्रिदंतेन स मेऽनन्यगतेर्गतिः ॥ ० ॥

"अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः" इत्यादिना श्रीकृष्णे एव स्वरतिं व्यञ्जयन् म्रियमाणानां श्रोतव्यादिप्रश्नेषांस्व-श्रीकृष्ण एव मय्युदिदृक्षतामिति श्रीराजाभिप्रायानन्तरं शुक उवाच वरीयानेष इति। तं त्वया पुंसां श्रोतव्यादिषु मध्ये यः श्रीकृष्णश्रवणाभिप्रायेण परमः प्रश्नः कृतः यद्वा त्वया कृतः यः प्रश्नोऽपि श्रोतव्यादिषु परः यस्य प्रश्नस्यापि श्रवणादौ परमपुरुषा-स्मिध्यतीत्यर्थः एष वरीयान् सर्व्वावतारावतारिप्रश्नेभ्यः परममहान्। स च लोकहितं यथा स्यात् तथैव कृतः। स्वन्तु तथाभूत श्रीकृष्णैकनिर्व्वाह्यप्रेमत्वात् कृतार्थ एवेति भावः। तदुक्तम्—वैयासकिरिति वचस्तदनिश्चयमात्मनः। उपश्रुत्य मतिं कृष्ण औत्तरेयः सतीं व्यधात् ॥ इति। सतीं विद्यमानां श्रीकृष्णे या मतिस्तामेव विशेषेण धृतवान् व्यधात्। एतदेव व्यक्तीकरिष्यते राज्ञा—"हरेरुदार-वीर्य्यस्य कथाकेलिकसुमङ्गलाः। कथयस्व महाभाग यथाहमखिलात्मनि। कृष्णे नि[illegible]य नि[illegible]सङ्गं मनस्यधिये कलेवरम्" ॥ इति। एवमेवः

* तथाचात्रनिद्राशब्दोऽविद्यापरपर्यायबंधकप्रकृतिपरइतिभावः ॥

तत्र भगवदाविर्भावमात्रस्य श्रवणादरावश्यकत्वेन कमुत्थमाह श्रोतव्यादीनीति चतुर्भिः। आत्मतत्त्वं भगवत्तत्त्वं, तस्मात् इत्युपसंहरिष्यणत्वात्, तदपश्यतां परमश्रोतव्यत्वेनाजानतामित्यर्थः ॥ २ ॥

अति प्राकृतानान्तु निद्रयेत्यादि ॥ ३—४ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

ॐ श्रीकृष्णायनमः ॥

स्कन्धेतु प्रथमे प्रोक्ता[illegible]धिकारिणः। तेषां कर्त्तव्यनिर्द्धारो द्वितीये विनिरूप्यते ॥ १ ॥
तस्मिन्निर्द्धारिते [illegible] संकथा। श्रद्धया च तां प्रवक्ष्यामस्तृतीयादिभि रत्नैः ॥ २ ॥
निर्द्धारणे [illegible] पुरा। श्रद्धाचैव विमर्शश्च वस्तु निर्द्धारणं [illegible]
प्रमाणेन प्रमेयेण [illegible] च। एकत्र मानमेयेहि फलं साधनमेव [illegible]
अतोऽत्र वस्तु [illegible] तृतयं मतं। श्रद्धापि द्विविधालोके [illegible]
फलोपका[illegible] तो विशेत्। विमर्शोपि द्विधापूर्वं उत्त[illegible]
त्रिविधे द्वेतत्र [illegible] तोदश। तत्रतु प्रथमेऽध्याये कर्त्तव्यं [illegible]

वस्तुनस्तत्त्व निर्द्धारो मानमेय विभेदतः पूर्वस्कन्धे अधिकार निरूपणे परीक्षितो मुख्याप्रेक्षायां [illegible] मित्यपेक्षायां [illegible] रूपयासत्संगे सति सर्वं तत्त्व जिज्ञासार्थे प्रश्नः कर्त्तव्य इति प्रथमं प्रश्नत्रयं कृतं सर्वात्म[illegible] म्रियमाणैश्च किंकर्त्तव्यमिति, [illegible] मनाकर्त्तव्यं नाम यस्मिन्नकृतेऽपि पुरुषार्थो नसिध्यति। तत्सर्वात्मनाकर्त्तव्यं तत्राधिकारिणो ननिर्द्धारिताः। सच्चोत्तरदानसमये [illegible] रणीयः। म्रियमाणानां कर्त्तव्यनिर्द्धारो द्वितीयः ये पुनः श्रोतव्यादि पंचपदार्थाः पृष्टाः ते यथायथं एताम्निरूपणानैव निरूपिता [illegible] ष्यंति। कांश्चिदग्रेनिरूपयिष्यामः। अतोद्वयंनिरूपणीयं सर्वात्मनाकर्त्तव्यं म्रियमाणैश्च कर्त्तव्यमिति। तदर्थंसर्वेषां वस्तूनांयाथात्म्यं [illegible] एवं फलमुखमंगंश्रद्धांनिरूप्य विचारश्चनिरूप्यः। एतेषामावश्यकत्वं तत्तत्प्रकरणेनिरूपयिष्यामः तत्रसर्वात्मनाकर्त्तव्यनिर्द्धारंचतुर्दशकैराह वरीयानित्यादिभिः। कर्त्तव्यनिरूपणात्पूर्वं अभिनंदनंकर्त्तव्यं प्रश्नत्रयहेतुत्वार्थं यथा क्षुधितस्यान्नदानं। तथासाकांक्षस्यकर्त्तव्यं अधिकारनिर्द्धारश्चकर्त्तव्यः धिशेषतः पूर्वप्रश्नशेषतया अनिरूपणात्। प्रेक्षापूर्वकारिणां प्रवर्त्तयनुफलमनिरूप्यावाधिः प्रवर्त्तयितुंनहीति। अतःफलनिर्द्धारार्थं अधिकारोनिरूपणीयः तत्रदोषत्रयं निराकार्यंतदर्थंत्रयश्लोकाः। तत्र प्रथमंप्रश्नमभिनंदति। वरीयानिति। तत्रादिषु प्रश्नेषुमध्येयः प्रथमतः पृष्टः सर्वात्मना कर्त्तव्यमिति। एषप्रश्नोवरीयानश्रेष्ठः उत्तमत्वेहेतुमाह यतः सतु तत्रोपकाराय [illegible] वश्यंयां अस्मिन्नर्थेमहतांसंमतमिति आह। आत्मचित्संमतइति। आत्मविदामप्ययंप्रश्नःसंमतः अनेनाग्रप्रश्नोत्तरंगणबुद्धेर्भारादयइतिसूचितं। पुंसां सर्वेषामेव विचारकाणांश्चेतनाणां अयंप्रश्नःसंमतइतिसंबंधः। तस्मादत्रोत्तरं कथयिष्यामीतिभावः ॥ १ ॥

इदानींफलप्रेप्सुमधिकारिणं निर्द्धारयितुं सर्वेषामेक कर्त्तव्यनास्तीत्याह। श्रोतव्यादीनीति। अग्रिमप्रश्नाभिनंदनात् गौणतासूचितैव। [illegible] पियदिराज्ञस्तत्राकांक्षाद्दाभवेत् तदाप्रथमोत्तरमुख्यमानं न सम्यगवगम्येत अतोऽधिकारानिरूपणाप्रस्तावे श्रोतव्यादीन्यर्थापनिरा[illegible] ति। राजेन्द्रेतिसंबोधनात् बहुविधा पुरुषास्त्वर्थवहष्टाः बहुनिश्चशास्त्राणि। तत्रतत्रतांनकोऽपिपुरुषार्थःसिद्ध इति तदनुभवस्य[illegible] तिः प्रदर्शिता। प्रश्नर्नृभारतिश्चनात् तदज्ञापनायोत्तरेण्याह तर्हितानिकुतोनश्चक्तव्यानि तत्राह संतिसहस्रशइति मत्कथनात्पूर्वमेव [illegible] नमनपेक्ष्यसहस्रशःसंति। सामान्येषु स्वामिप्रेमानामप्रवेशार्थमाह अपश्यतामात्मतत्त्वमिति। आत्मनस्तत्त्वमनारोपितरूपं तच्छा[illegible] मोवादपश्यतां लोकव्यवहारेण आत्माआरोपितोदृश्यतेदेहादिरूपःसंवलितोवा ननुकथमुपाये विद्यमानेतेआत्मतत्त्वंनजानंति तत्राह [illegible] गृहमेधिनामिति। तैर्विविक्तात्मस्वरूपंज्ञात्वाकिंकर्त्तव्यं तेहिगृहमेधिनः गृहएवपर्यवसितमतयः तेषां गृहोपयोगियद्भवेत् तदेव[illegible] र्यं विविक्तात्मातुगृहरूपबाधकः अतोनज्ञातव्य [illegible] ष्वितिनिमित्तसप्तमी तेषांगृहेषुबुद्धिरास्त गृहैकनिष्ठाभविष्यामइति अतोगृहाः [illegible] व्याः। तस्माद्यथैवबुद्ध्वागृहासिद्धातामेवबुद्धिं [illegible] सत्सङ्गे ह्यस्मिन्नर्थेरेवपुराणास्मद्वाक्यमपेक्षते अतस्तद्विषयकस्तवप्रश्नान[illegible] ः। अनेनस्त्रियमार्गाविषयकोयः प्रश्नः सनस्तुत्यर्थानि[illegible] तिनउत्तरमग्रेवक्ष्यतीतिसंभाव्यते ॥ २ ॥

ननुकेवलंगृहार्थेकथंतेषांबुद्धिः सद्बुद्धिसाधनानां [illegible] त्वात्। तत्राह। निद्रयाहियतेनक्तमिति सत्संगेनाभूतः समयएव[illegible] स्ति। तत्समयस्यान्यैरेवापहारात्। तदाह। निद्रा [illegible] शःआयुर्हतवत्योनत्रनिद्रयानक्तंक्षयःहियतइत्यादिसंबंधिभाय अज्ञा[illegible] च्छति। दिवाचदिनसंबंधिभायुःअर्थेहयागच्छति। [illegible] सौख्यपाज्ञानाच्च सर्वमायुर्गच्छतीत्युक्तंभवति ननुसर्वांरात्रिर्निद्रयागच्छति। [illegible] व्यवायेनचवेति चकारात्तत्साधनेनच [illegible] पक्षस्तेषुसंभाव्यः वयःशब्देनपुरुषार्थसाधनीभूतमायुस्तारुण्य[illegible] तच्चतंजरठःकिंनुसाधयेत् बालोवा अर्थे [illegible] चकारान्निद्रया अर्थार्थंप्रयत्नेन सिद्धेऽर्थेकुटुंबभरणेनवा ॥ ३ ॥

ननु वैराग्यसाधनानां जायमानत्वात्कथं [illegible] न्निह्यानजायते। तत्राह देहापत्येति। त्रयो गृहमुख्याः। देहः पुत्रोभार्याच्च। [illegible] लकाश्चान्ये तच्चस्वभावतो गुणतश्च दु [illegible] नाशकाः। येहियस्य परिकरामवन्ति तेतंपोषयंति। एते आत्मसैन्यानि अपि [illegible] नमेव शकुनिमर्घतयंति अतो ऽसंतः। [illegible] तात्मघातदोषेण धनेनपोषिता निधनंनाशं प्राप्नुवंति। तदादुष्टानांनाशात् [illegible] निष्ठोभवेत्। तदंतेस्मदोषाज्जायतइ [illegible] यथाअत्यंतंमदिरामत्तः गतमपि वस्त्रंस्पृशन्नपि देहंवस्त्रगमनं नानु संधत्त [illegible] ष्यमपि मृतानपितॄन् पश्यन्जीवत [illegible] त्वात् यावांतरदोषव्यामत्वात् आयुर्वृथाक्षयात् गृहएवपरं वस्मितबुद्धित्वात् [illegible] श्रोतव्यादिन प्रष्टव्यमित्यर्थः। "बुद्धि [illegible] भवः कारणंमतः। यस्य नैतेभविष्यंति तस्य नास्त्यधिकारिता" ॥ ४ ॥

[redacted]
गोपरामाजनप्रायं प्रेयसेऽस्पृहमूचुषे । तदीयप्रियदास्वाय मां महापुरुषं श्रये ॥
दशाध्याये द्वितीयेऽस्मिन्नुक्तो भागवतार्थवाक् । प्रकृतस्यास्य शास्त्रस्य क्रमं व्यासनन्दनः ॥
अध्यायेस्मिन्मिथस्तत्कर्षो भक्तैरेकेन सन्नतिः । हरेर्धातुर्नारदस्य संवादस्त्रिभिरुच्यते ॥
प्रश्न एकेन विष्णूपदेश एकेन धातरि । एकेन लक्षणाम्यस्य दशेति स्कन्धसंग्रहः ॥
तत्र तु प्रथमेऽध्याये यमाद्यष्टाङ्गयोगिनः । वैराजमूर्त्तेः पातालपादमूलादिधारणा ॥ ० ॥

पूर्वस्कन्धान्ते "अतः पृच्छामि संसिद्धिम्" इति पुरुषस्येह यत् कृत्यमिति वाक्याभ्यां सम्यक् सिद्धिः का अत्र साधनञ्च [illegible] तत्रापि अश्वजप्यादिकं किं तथैवाश्वाजप्यादिकञ्च किमिति राज्ञः प्रश्नमभिनन्दति । वरीयान् श्रेष्ठः ते त्वया कृतः प्रश्न एव लोकानां हितम् । न चायं प्राकृतः प्रश्न इत्याह आत्मविदाम् एषां युष्मत्सभोपविष्टानां सम्मतः एतदर्थमेवैतेषामत्रागमनादिति भावः । यतः श्रोतव्यादिष्वति सतां प्रश्नोऽपि श्रूयते कीर्त्यते स्मर्यते इत्यतः श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रश्नः परः इतोऽन्यस्यातकृष्टस्याभावात् सर्व्वान्तिमः इमं प्रश्नमेव श्रुत्वा कीर्त्तयित्वा स्मृत्वा पुमांसः सर्व्वतोऽप्यतिकृतार्था भवन्ति किं पुनरेतत्प्रश्नस्योत्तरं मया दत्तं श्रुत्वा स्वं कृतार्थो भविष्यसीति भावः । इत्थमेवाग्रेऽपि वक्ष्यते—वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति [illegible] । वक्तारं प्रच्छकं श्रोतृंस्तत्पादसलिलं यथा ॥ इति ॥ १ ॥

[illegible]मिरेव संसिद्धिस्तत्र कृत्यं तन्नामलीलाश्रवणकीर्त्तनाद्येव सर्व्वोत्कृष्टमित्यग्रे [illegible]तिपादयिष्यन् प्रथमं मूढं यद्वा विषयमय इत्यस्योत्तरत्वेन कर्म्मयोगमाह श्रोतव्यादीनीति त्रिभिः । आत्मनां तत्त्वं के वयं किं कुर्म्मः किमुदकौ भविष्यामः कथं निस्तारं प्राप्नुम इति अपश्यतां किन्तु गृहेषु रक्तानां गृहमेधिनां गृहगतपञ्चसूनापराणाम् । मेधृ हिंसायाम् ॥ ५ ॥

तेषां वृथैवायुर्व्ययो भवतीत्याह । नक्तं यद्वयस्तन्निद्रया ह्रियते इति रात्रेः प्रायः कर्म्मानर्हकालत्वात् । व्यवायेन रमणेन वा इति कर्म्मिणां स्त्रीसङ्गस्यानिषिद्धत्वात् । अर्थेहया अर्थस्पृहया अर्थान् विना कर्म्मासिद्धेः । सिद्धे चार्थे कुटुम्बभरणेन वेति कर्म्मयोग कुटुम्बभरणस्य विहितत्वात् ॥ ३ ॥

अपश्यतामात्मतत्त्वमिति यदुक्तं तद्विवृणोति । देहादिषु आत्मनः सैन्येषु स्वसैन्यतुल्येषु कालेन सह योद्धुमिवेति भावः । असत्स्वपि जीवात्मनो देहादिसम्बन्धाभावान्मिथ्याभूतेष्वपि तेषु प्रमत्तः प्रसक्तः । यद्वा असत्स्वपि असाधुष्वपि बहिर्मुखत्वादसमर्थेष्वपीत्यर्थः । प्रमत्तः अनवहितः । यतस्तेषां निधनं कालेनैव नाशम् अनष्टानामपि पित्राद्यिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते । तस्मात् कालेनैव ग्रस्यते भगवद्भक्तस्तु भगवदुन्मुखैर्देहादिभिरप्रमत्तः कालमपि जयतीति भावः ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

श्रीकृष्णायनमः ॥ श्रीनिवासैकनमस्कृत्यवेदांतार्थप्रकाशकम् । द्वितीयस्कंधसिद्धान्तप्रदीपोऽयंविरच्यते । जन्माद्यस्येत्यादिश्लोकत्रयी सर्व्वस्यश्रीमद्भागवतस्यसूत्रम् तदधिवरणाभूतः प्रथमस्कंधः । तद्विस्तारः सर्व्वोप्यग्रिमोग्रंथः तत्रापिमूलरूपा द्वितीयस्कंधः विवरणाभूतः अन्यस्कंधाः । सोऽयंद्वितीयःस्कंधोयथामतिव्याख्यायते अतिक्रांतस्कंधांते राज्ञाकृतंप्रश्नमभिनंदतिभगवान्शुकः । वरीयानिति । हे नृप ! एषतेप्रश्नः वरीयान् । अतिशयेनवरःश्रेष्ठः श्रेष्ठत्वादेवात्मविस्संमतः नन्वनात्मविदामयाकृतः कथमात्मविस्संमतोभवेदित्यत्रभवाननात्मवित् किन्त्वात्मविदेवभवतापरोपकारायप्रश्नःकृतइत्याह कृतोलोकहितमिति लोकहितंप्रतीत्यर्थः । पुंसां श्रोतव्यादिषुमध्येयःपरः उपादेयतयाश्रेष्ठः ॥ १ ॥

राज्ञायत्पृष्टंग्रहियद्वाविपर्य्ययमिति तस्योत्तरमाह श्रोतव्यादीनीतिश्लोकत्रयेण । हे राजेंद्र ! गृहमेधिनां"कंडनीपेषणीचुल्हीउदकुंभीवमार्जनीपंचसूनागृहस्थस्यतताभिः स्वर्गंनगच्छती"ति इत्युक्तसूनाशब्दार्थोगृहेषु मेधोमेधतेर्हिंसार्थत्वाद्धिंसारूपोव्यापारः एषामस्तीतिगृहमेधिनस्तेषांगृहेषुश्रोतव्यादीनिसहस्रशःसन्ति अतएवबहिर्द्दृष्टित्वादात्मतत्त्वमपश्यताम् ॥ २ ॥

अतएवनक्तंरात्रोयद्वय आयुस्तन्निद्रयाऽथवाव्यवायेनमैथुनेनचकारादसन्मनोरथादिनादिवाऽहिंसार्थेहयाऽर्थार्जनचेष्टयासत्यर्थे कुटुंबभरणेनवाह्रियते ॥ ३ ॥

ननुकुतःकुटुंबादेरनित्यत्वमाज्ञायनिर्विण्णाः । सन्हरिभजनपरोनस्यादत्राह देहेति आत्मनः सैन्येषुभोगायतनतदुपकरणेषुदेहतद्बंधिषु असत्स्वपि । अहं ममेत्यपप्रमतः तन्नित्यत्वबुद्ध्याग्रांतं तेषांनिधनंलोकतः पश्यन्नपि न पश्यतिनानुसंधत्ते ॥ ४ ॥

भाषा टीका ।

हे नृप ! 'मनुष्योंके श्रोतव्यादिको में क्या श्रेष्ठ है' यह तुमने प्रश्न जो किया [illegible] उत्तम है, क्योंकि मोक्ष का हेतु है । लोक का हित है । और आत्मवित् मुक्तों का संमत है ॥ १ ॥

राजेन्द्र ! आत्म तत्व के न जाननें वाले गृहों में पड़े गृहस्थि जनो को हजारों [illegible] ज्ञातव्य विषय है ॥ २ ॥

राजन् ! ऐसे पुरुषों की वय रात्रिमें स्त्री प्रसंग और निद्रासे व्यतीत होती है [illegible] धनों पार्जन की चेष्टा अथवा कुटुंब भरण में व्यतीत होती है ॥ ३ ॥

असत्य देह पुत्र स्त्री आदिक आत्मा के परिकर में प्रसक्त पुरुष ! इन सबका [illegible] देखकर भी नहीं देखता है ॥ ४ ॥

श्रोतव्यः कीर्तितव्यश्च ध्येयश्चेच्छताभयम्
एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ६ ॥
प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः ।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ७ ॥
इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नयोरुत्तरमाह तस्मादिति । हे भारत भरतवंश्य । सर्वात्मेति प्रत्यगात्मत्वात् सौन्दर्यम् ईश्वर इति आश्रयकत्व हरिरिति पापघ्नत्वम् । अभय मोक्षम इच्छता ॥ ५ ॥

अतः परमन्यत् श्रेयो नास्तीत्याह । एतावानेव जन्मना लाभः फलम् । तमाह नारायणस्मृतिरिति । अन्तकाले हि सम्यग् [illegible] तेषां स्वातन्त्र्येण लाभत्वं वारयति । सांख्यम् आत्मानात्मविवेकः योगः अष्टाङ्गः । अस्तु तु स्मृतिः [illegible] तत्साधनमात्रं तु कर्तव्यम इत्यर्थः ॥ ६ ॥

तत्र सदाचारं प्रमाणयति प्रायेणेति । विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि (हरेर्गुणानुकथने कीर्तने रमन्ते) । स्म प्रसिद्धम ॥ ७ ॥

किमिदमपूर्वं कथयसि । सत्यम् । अन्यपूर्वमेवेदमित्याह । इदं भगवतप्राक्तं तन्नामैकप्रधानं पुराणं ब्रह्मसम्मितं सर्ववेदतुल्यम् । यद्वा ब्रह्म सम्यक्मितं येन । कुतस्त्वया प्राप्तम अत आह अधीतवानिति ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

प्रेष्ठत्वमिति । प्रियतमत्वमित्यर्थः । अतिशयविशिष्टार्थवृत्तेः प्रियशब्दात् स्वार्थे अतिशायने तमबिष्ठनौ (पा ५ । ३ । ५५) इति सूत्रेण इष्ठन् प्रत्यये प्रिय-स्थिर-स्फिरोरु-बहुल-गुरु-वृद्ध तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ स्फ-वर्-बंहि-गर्-वर्षि-अप्-द्राघि-वृन्दाः (पा ६ । ४ । १५८) इति सूत्रेण प्रियशब्दस्य प्रादेश प्रेष्ठशब्दः साधनीयः ॥ ५—७ ॥

[द्वापरादाविति । अत्र विजयध्वजः—द्वापरादौ कृष्णावतारापेक्षया द्वापरे आदौ च न तु द्वापरस्य आदाविति । व्यासः षट्शतवर्षीया धृतयष्टिव्रजीजनदिति वचनम् द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्चेति ॥ किञ्चात्र कृष्णावतारादनन्तिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावात् द्वापरादाविति न सङ्गच्छते । तस्मात् द्वापरशब्देनात्र द्वापरान्ते एव लक्ष्यते ॥ ८—१५ ॥

श्रीमद्वीरराघवाचार्यैकृतभागवतचन्द्रिका ।

विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादि प्रश्नस्योत्तरमाह तस्मादिति । हे भारतभरतवंश्य सर्वात्मासर्वजीवानामंतर्यामी "अंतःप्रविष्टः शास्ताजनानां"मिति श्रुतिप्रत्यभिज्ञानात् । जनशब्दस्यचेतनमात्रेश्वरस्यात् । हरिः । आश्रितदुरितहर्त्राअनेनोपासकानां स्वप्राप्तिविरोधिदुरितनिवर्त्तकत्वमुक्तंभवति भगवानित्यनेन देवतांविशेषउक्तः । भगवानितिशब्दोऽयमितिस्मरणात्ईश्वरः कार्यकारणावस्थचेतनाचेतननियंतानेनकारणत्वममिप्रेतं "कारणंतुध्येयः [illegible] । अभयंमोक्षंकामयमानेनश्रोतव्यइत्यादिविषयीकर्त्तव्यः । स्वरूपरूपगुणविभूतिविशिष्टपरमात्मविषयक श्रवणा[illegible] मुमुक्षुणाकार्यत्वेनान्यविषयकामित्यर्थः । "आत्माचारेद्द्रष्टव्यः तमेवैकमात्मानंजानथ । अन्यावाचोविमुंचथ"इतिश्रुतेः । एवंचशारीरक[illegible] "अथातोब्रह्मजिज्ञास"इति प्रथमसूत्रार्थोनुसंहितोभवति ॥ ५ ॥

एतस्मादन्यत्कर्त्तव्यंनास्तीत्याह । एतावा[illegible] सांख्यंसम्यग्दर्शनं योगफलाभिसंधिरहितकर्मयोगः । (ज्ञानयोगौ "ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिना"मिति भगवद्वचनात् । [illegible] त्तिः । तदुपासनमितियावत् तस्यपरिनिष्ठयापरिसमाप्त्याच्च । अंतेदेहावसाने नारायणस्मृतिः । साध्येति[illegible] जन्मलाभः फलज्ञानकर्मयोगानुगृहीतभगवदुपासनासाध्या नारायणस्मृतिरंतकालेसंपाद्येत्यर्थः ॥ ६ ॥

अत्र सदाचारप्रमाणयति । प्रायेणेति [illegible] निषेधात्मकवेदबोधितात्काम्यात्कर्मणोनिवृत्ताः । नत्वावश्यकात्पंचमहायज्ञादनुष्ठानकपात्कलंजभक्षणादिनिषेधा[illegible] यज्ञादिश्रुतेरभवत् । तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति । क्रियावानेषब्रह्मविदांवरिष्ठः । नाविरतोदुश्चरितात्[illegible] ति विधिनिषेधानुवर्त्तनाभावेतदुपासनानिवृत्त्यभाव प्रतिपादनात् । न च तस्माद्ब्राह्मणः पांडित्यंनिर्विद्यबाल्येनति[illegible] निर्विद्याथमुनिरितिबालस्ययत्कर्मकामचारादिकंतद्विदुषउपादेयतयाश्रुतमितिवक्तुंशक्यं अनादिकुवंशन्यायादि[illegible] माहात्म्यानाविष्कारकपंकर्मतदंबविदुषउपादेयं नतुकामचारादिकमिति विद्वांसंतितस्माद्ब्राह्मणाविद्यायाम्पांडित्यांम[illegible] परिशुद्धपरिपूर्णो । बालिदित्वावेदनंप्रतिलभ्ययत्स्वभावानाविष्कारकपं कर्मनशब्दवदनोवर्त्तेतेतितस्यार्थः । मुनयःशु[illegible] तन्त्विदंश्रवणानंतरभाविमननं विद्यापांडित्यवदत्रापिश्रवणानंतरभाविनोमननं

[illegible] हरेराश्रितदुरितहारिणीर्गुणानुकथनगुणानुवादैरमस्तेस्म ॥ ७ ॥

नकेवलंपूर्वपदवरमहंतेऽहमपितत्रैवरमहंत्याहहृदमिनिद्वयेन। भगवत्प्रोक्तंभागवतंचतुःश्लोक्यामूलभूतायास्तत्प्रोक्तत्वात्। यद्वा भगवत्स्वरूपरूपादिप्रतिपादकत्वेनभागवतंब्रह्मवेदस्तेनसंमितंतुल्यं। यद्वाब्रह्मसम्यग्मितंप्रमितंयेनतादृक्पुराणंकर्मापितुर्द्वैपायनाद्व्यासाद्वापरादौद्वापरमादिर्यस्यसः द्वापरादिः कालयुगादिः। तस्मिन्नंशतनुचक्रवर्त्तिसमकालत्वप्रसिद्ध्यांसावतारस्यमहमर्थीतवान् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पूर्वस्व तत्रापि अ हितम्। श्रोतव्यादि सर्वान्तिरा कृतार्थो भ सुखा ॥ इ

यतः श्रीनारायणश्रवणादिविनानसंसारनिवृत्तिस्तस्मात्सर्वात्मासर्वव्यापी। सर्वप्रभाष्टमाद्दानोवा। भगवान्निरतिशयैश्वर्यादि गुणवान्ब्रह्मादिचेतनराशिपूज्योवा हरिःस्मरणमात्रेणाशेषसंसारक्लेशसंहर्ता सर्वजगद्गाश्वरोनित्यभयरूपादस्मात्संसारादभयंमोक्ष मिच्छतापुरुषेणश्रवणादिविषयःकर्त्तव्यइत्यन्वयः श्रवणादित्रयेणाज्ञानसंशयादिनिरासंकरोति "श्रुत्वामत्वातथाध्यात्वातदज्ञानविपर्ययं संशयंचपराणुदतिभक्तंब्रह्मदर्शन" मितिवचनात् श्रवणेनाज्ञानं। कीर्त्तनापरपर्यायंमननेनसंशयविपर्ययौ निरस्यस्मरणलक्षणध्यानेनब्रह्मा वरोक्षज्ञानंलभतइति। श्रोतव्योन्वेष्टव्यइतिशंकानिरासार्थश्रवणादीनांचतुर्णामेकविषय इत्यंतर्यितुंसर्वात्मेत्यादिविशेषणचतुष्टय मुपात्तम् अहंकारकार्येणसर्वव्यापित्वेनसर्वात्मारुद्रःकिंनस्यादित्यतउक्तं हरिर्भगवानिति तथापि सूर्याद्यन्यतमःकिंनस्यादतउक्तमीश्वरइति ईशानरुद्रादरद्र[illegible]नस्यरुद्रप्रसिद्धिरपिनिरस्तेतिज्ञातव्यं ॥ ५ ॥

प्रणम्य टर्थयम् इ प्राप्नुम इ तेषां कर्म्मिणां कुटुम्बभं अप स्यपि जी पीत्यर्थः कालेनैव

एवंहेसर्वंहेदंतिहासे[illegible]क्षुतात्पर्य्येणप्रतिपादितमितिदर्शयति एतावानिति अन्तेमरणकालेनारायणस्मरणंयथास्यात्तथाबहुशास्त्रा ण्यः कर्त्तव्यइतिभावेनेत्यतोआह एतावानिति सांख्यशास्त्रोक्तसांख्यनतत्त्वज्ञानेनयोगशास्त्रोक्तभगवत्पूजादियोगानुष्ठानेन तथास्वधर्मपरि निष्ठयास्वविहितवर्णाश्रमोक्तस्वधर्मानुष्ठानेनचांतेमरणकालेनारायणस्मृतिरितियावानेवानियानेवपुंसांपरउत्कृष्टोजन्मलाभः। मनः सा फल्यमित्यन्वयः अतोवेदादिशास्त्रेषुश्रियमाणेनसर्वथानारायणस्मरणकर्त्तव्यतान्यदितिप्रतिपाद्यतइति अतःप्रभुःपरिहारःसुप्रसिद्ध इतिसिद्धं ॥ ६ ॥

सर्वथानारायणश्रवणादिकार्यमित्यत्रकैमुत्यन्यायमाह प्रायेणेति मुनयःस्वस्वयोग्यज्ञानहेतोर्विधिनिषेधाख्यानिवृत्ताः निर्गुणोभगवान् तेनहेयमानत्वात्तत्संबंधिनोगुणानैर्गुण्यंतत्स्थामुक्ताहरेर्गुणानुकथनेरमंतइत्यन्वयः गुणानुस्मारंस्मारंकथयंतइत्यस्मिन्नर्थेस्मेतिपदं कदा चिद्ध्यानाभिप्रायेणोक्तंप्रायेणेति अतोज्ञानार्थिभिर्मितरंतरहरिगुणश्रवणादिकार्यमितिकिंवाक्तव्यमित्यर्थः ॥ ७ ॥

इदानींभागवतप्रतिपाद्यमर्थंतस्माद्धारतेत्यादिश्लोकत्रयेणाभिधायपुनस्तद्विस्तरेणाबन्धुमुपक्रमते इदमिति बुद्धिस्थंनिहितत्वादिदमि त्युच्यते ब्रह्मसंमितंवेदसमं। तदर्थव्याख्यानरूपत्वात् द्वापरादौकृष्णायनारोपेक्षयाद्वापरेभार्वाच्च। ननुद्वापरस्यादाविति "व्यासःषट्शत वर्षीयोधृतराष्ट्रमजीजनदिति"वचनात् द्वापरान्तेभारतकथाप्रवृत्तिकथनाच्च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

श्रीम सर्वस्यश अन्यस्कं एषतेप्रश्न वित् किं प्राप्ते इत्यर्थः। यद्वा द्वापर एवादिर्यस्य तत्र तदीयान्ते सन्ध्यांशे इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

अभयं सर्वभयनिवारकसर्व्यानन्दमयपुरुषार्थं गतघानभयं हरिम् इति वक्ष्यमाणात् मर्त्यो मृत्युव्यालभीत इत्यादेश्च ॥ ६—६ ॥


तदेव कैमुत्येन दर्शयति प्रायेणेति ॥ ७ ॥

ब्रह्मसम्मितं नराकृतिपरब्रह्मणः श्रीकृष्णस्य तुल्यं कृष्णं स्वधामोपगते इत्यादेः। द्वापरादौ वृक्षशाखादिवत्तदप्रत्वव्यवहारेण द्वाप

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी।

राज जर्नापंच धिनस्ते अत भरणेन नरं वंधिषु

एवंप्रथममिनंथसाधारण्यं परिहृत्यअभयमिच्छतामुपायमाह। तस्मादिति। यस्मादाद्यएवप्रश्नःसमीचीनः यस्मादन्यविषयकआक्षमी चीनः तस्माद्येसंसाराद्भयमस्तितद्भयनिवृत्यर्थंचयतंते। तेषामभयमिच्छतांभगवान्श्रोतव्यः। यद्यप्यत्रयुक्तिर्वक्तव्या तथापिबहिर्मुखस्य बुद्धिर्युक्तिमपिनगृह्णातीति स्वभावतोधिकारोवक्तव्यस्तदाह। भारतेति। विशिष्टाधिकारार्थोतकं उक्तविश्वासाय दार्ष्टान्तिकन्यगाम्याया मिति भरतस्यमायामोहाभावात्तद्धर्मपुरःसरं तद्वंशोत्पन्नानामपि मायामोहाभावादुक्तविश्वासः। ननुवैदिकविधयोधिनानां अग्निहोत्रा दीनां आत्मजिज्ञासायाश्च कथंपरित्यज्य कथं भगवच्छ्रवणंविधीयते। वेदवाक्येयंकश्रवणं तस्याधिक्यानादित्यर्थः अर्थादेकाधात्मेति। सर्वात्मेति। प्रमाणबलात्प्रमेयबलंमहदित्यग्रेवक्ष्यते प्रमेयेचयुक्तिर्बलिष्ठा तत्रैवयुक्तिः अभयोप्सवस्त्रैवर्णिकाएवभवंतीतिनास्तिनियमः। अन्येषामपिश्नपुंयययुंजानां अभयेच्छासंभवात् अतस्तेषामुपायोवेदेनोक्त इति तत्रैवयुक्त्यसाधनेनैव साधनेनत्रैवर्णिकानामपि पुरुषार्थ सिद्धौभावश्यकत्वाल्लाघवायसर्वोपयोग्येकएवोपायोवक्तव्यः। स च सर्वात्मकत्वात्सर्वः तद्विषयएवकश्चिद्वक्तव्यः। नहिस्वस्यात्माक स्यचिन्नश्रोतव्यः आत्मलाभान्नपरंविद्यते तरतिशोकमात्मविदितिश्रुतेः। तत्र [illegible] श्रवणोध्यमाने बोधकस्य वाक्यार्थपर्यवसान मेवस्यात्। आत्मनुप्रकृतिविकृतिभावाभावाच्च। तस्मात्सर्वेषामेकोय आत्मामवति। सएवश्रोतव्यः श्रुतावप्यात्मपदं सर्वात्मपरम्। ननुजाति हित हे रा वाचकत्वमात्मपदस्य तथा सतिव्यक्तिरूपस्य स्वस्यगौणत्वेनाश्रोतव्यत्वात् क्रियायाश्च [illegible] पयस्यभावाच्चनात्मनः कार्यसिद्ध्येत्। संज्ञाते मे व्या प्यात्मज्ञानस्य विद्यमानत्वात् श्रुतौ प्रकारविशेषस्यानुक्तत्वात् ज्ञानार्थं प्रयासोव्यर्थः [illegible] विधिरोपचरितोभवेत् अतःसर्वात्मैवश्रोतव्यः। तस्यचशारीरस्यच भेदाभावात् न स्वस्यगौणता। किंच फलमतउपपत्तेरितिन्यायेन [illegible] ज्ञानमात्रेणफलम्। किंतु श्रवणादिनिर्वर्त्ते ब्रह्मणि तत्फलंप्रयच्छति तच्चनिर्दुर्मकंशाद्दारुवैवास्यात्फलदाने असमर्थमेवस्यात् अतःफलदानसमर्थरूपएवआत्माश्रोतव्यइत्याह। आत्मे वेति। यद्गुणश्रवणेपि ननुतेशास्त्रैःप्रतिपन्नः वेदार्थोप्ययमेवेत्यवादर्थः किंच कुटुंबभरणादेः सुखंच। तत्र प्रथमदुःखाभावस्यः



त्तीपरमानंदोनस्यात् । परमानंदवास्वर्गादिवदुःखानिवृत्तिर्नस्यात् साक्षयोगाशिष्टत्वेपि फलदातृत्वाद्भगवतःदर्शयमप्रयच्छेत् हारपृथक्त्वन्यायोभज्येत अतः श्रवणएवतादृग्विषयोवक्तव्यः यस्तूभयरूपोभवति तदाह हरिरीश्वरइति । हरित्वेनसर्वदुःखेश्वरत्वेन सर्वफलदातृत्वेन च श्रोतव्यः । "तं यथायथोपासत"इति श्रुतेः । अतोधर्मचतुष्टयमुक्तत्वेन गुणोपसंहारन्यायेन तादृशः तत्तद्विषयव्यावर्तकधर्मैःपरिच्छिद्य तत्र कर्तव्यमाह श्रोतव्यादित्रयं । नन्वस्यशास्त्रस्यभाक्तफलकत्वात् श्रवणादिकं न धर्मरूपं । तत्रकथनाच्च । अतोनवविधापिभक्तिःकर्तव्यत्वेनवक्तव्या तत्कर्तव्यत्रयमेवोच्यत इतिचेत् सत्यं नवविधभक्तेर्वक्तव्यत्वेपि प्रेमानंतरयेषांत्रयमेवोक्तं । त्रिभिःस्नेहजाते अन्येषांकर्तव्यता अनुक्तसिद्धैव । ननुभगवान्श्रोतव्यइतिकोऽर्थः तद्वाचकाःशब्दाः श्रोत्रेणामर्थोज्ञातव्यः । अभिप्रायोवा सर्वेषांवाकेषांचिदेवेषा आद्येविधिर्व्यर्थः प्रमाणवस्तुपरतंत्रत्वेनज्ञानस्य श्रोत्रेन्द्रियवतःउच्चारितेज्ञानंभविष्यत्येव । गृहीतसंकेतस्यतुपुनःअर्थज्ञानमपिभविष्यति । न च तत्संपादनेयत्नःकर्तव्य इति वैयर्थ्यं तत्संभवात् अथ सर्वदा अशक्तत्वसंभवात् जीवनानुपपत्तिश्च । किंच भगवद्वाचकानांसर्वेषां पदवाक्यानां यत्किंचित्पदवाक्यमात्रस्य सर्वज्ञानेनत्वादवक्तव्यत्वं अथवा शक्तितात्पर्यनिर्द्धारपदवाक्यानामनुपस्थितौ सर्वेषांपदवाक्यानामनुपस्थितौ शक्तिद्वारस्याशक्यत्वात्यत्किंचित्पदवाक्यमात्रस्यतु मैवं । विषयत्वेनलीलादशविधापुरुषः उक्तश्चवासुदेवस्यतदर्थमपराकृतिः शक्तितात्पर्यनिर्द्धारः एवात्रतेननात्रोक्तकृष्णां भगवान्दशावधलीलायुक्तः श्रोतव्यः अन्यथाविषयवाचक यदचतुष्टयेनैव विदशस्कंधकृतिवैयर्थ्यंच एतावतायुक्तितात्पर्यनिर्द्धारः सामान्यन्यायेनव्याकरणावन्मीमांसावच्चात्रैव चत्वारःगुणाः अधिकारिफलानुरूपकत्वेनोक्ताः ननुश्रोतव्यत्वेन अवच्छेदकत्वेनैवतदुपयोगात् । गुणप्रवेशः तथोत्तरत्र वक्ष्यते । अनुप्रवेशेऽपियथाऽनैक्यं तथापिवक्ष्यते । अथात्र त्रयं नविधातव्यं । एकेनैव अभयसिद्धेः । नन्वमिलितानां त्रयाणां स्वाश्रयत्वं परीक्षितं तदभावेनाभयाभावप्रसंगात् । श्रवणस्यावैधत्वाज्जनविकल्पेनानेकविधानमिति वाच्यं । अत्रोच्यते । त्रयाणामन्योन्यनिर्वाहकत्वेनविधानं तथाहिकीर्तनाविधानेश्रवणमेव ननिर्वहेत् । नचाध्ययनविधिवद्वेकविधानेनान्यप्राप्तिरिति वाच्यं । अध्ययनस्य संसारिकर्तव्यत्वेन विधिविनापि वृत्तित्वेन प्राप्तत्वात् । नचात्रतथा श्रवणेनकृतार्थस्य कीर्तनेप्रवृत्त्यनुपपत्तेः तर्हिकीर्तनमेव विधीयतांश्रवणार्थं देवभविष्यतीति । नापरीक्षितं तदभावात् । अभयेवैलक्षण्याभावाच्च तस्माच्छुकादीनामपि निरपेक्षाणामपि कीर्तने प्रवृत्तिसिध्यर्थं कीर्तनविधानं तदैवश्रवणसिद्धेः । फलंतुप्रत्येकमेव अभयंतुभगवत्प्रवेशरूपं तदैवसर्वभयनिवृत्तेः । तर्हिस्मरणानविधातव्यं नचश्रवणानंतरमस्मरणाविस्मरणात् कीर्तनानुपपत्तिरितिवाच्यं । अन्यलभ्यत्वेन विध्यनुपपत्तेरितिचेत् न सकृत् कृतकीर्तनस्यापि विस्मरणसम्भवात् न कीर्तनशेषत्वेन स्मरणमायाति विहितेतुस्मरणे श्रवणकीर्तने सदाभवतः । दोषांतराप्रवेशश्च किंच त्रयाणांदेह पातपर्यंतमावृत्तानामेवाभयसाधकत्वं उत्तरावधिर्देहपातएव । पूर्वावधिः संसारभयज्ञानं "आवृत्तिरसकृदुपदेशा" दिति न्यायेनस्मरणांतर व्यावृत्त्यर्थं यद्यपि श्रुतजातिआवृत्तिर्नविधातव्या स्वतएवतत्संभवात् । अथापि भरतवत्कदाचिदन्यासक्तिर्भवेत् नचतथास्मृतिअधिकारिणाभावादेवविधिर्व्यर्थइतिवाच्यं तदभावार्थमेवविधानात् । तस्माद्यथासंभवंदेहपातपर्यंतं त्रयाणामावृत्तिःकर्तव्या । ननुमननंनिदिध्यासनंकुतो नविहितं ज्ञानसाध्यत्वंकुतोनोक्तं "ज्ञानादेवतुकैवल्य"मिति श्रुतिविरोधश्च । नचज्ञानस्यार्थात्सिद्धिः । तथासतिज्ञानस्य व्यापारत्वंस्यात् । अव्यापारस्यैवयत्नेतिवक्षितत्वाच्चेति चेन्न । मननंनिदिध्यासनयोरंगत्वेन श्रवणमध्यपातात् । तत्रैवोत्तरत्रवक्ष्यते ज्ञानंतु शाब्दंसिद्धमेव प्रेम्णाक्रियमाणेत्रिभिर्भगवत्साक्षात्कारोपि संभवति । तथापि श्रवणादीनामेवकारणत्वं । अंतिमसाक्षात्कारस्य तुफलनांतरीयकत्वात् फलमध्यपातः नचाध्यात्मिकश्रवणवत् । श्रवणाद्याहितसंस्कारसभ्रीचीनेनमनसाशरीरात्मसाक्षात्कारवत् भगवत्साक्षात्कारोवक्तुंशक्यः । नार्हवेदैरितिवाक्यात् । नचशारीर साक्षात्कारएवफलं संघातादुद्गतस्य कैवल्यप्राप्तस्य भगवच्छ्रवणमुख्याधिकारात् । एतावदरेखल्वमृतत्वमिति ब्रह्मप्रकरणस्थत्वात् ब्रह्मात्मविषयकमेव । भगवतश्च स्वतंत्रत्वात् नान्येनप्रकारेणाविर्भावः संभवति । यत्तुवाक्यात्स्वप्रब्रह्मात्मभावस्फूर्त्तिः तेनवासनाविद्यानिवृत्तिः स्वचरितार्थतावा तत्तुज्ञानदुर्बलानांमनोरथमात्रमेव । शुकसनकादीनामप्यपि परिभ्रमणात् तस्मात्सायुज्यएवसर्वभयनिवृत्तिः । ब्रह्मैवसन् ब्रह्माप्येतीति श्रुतिश्चतमेवार्थंवक्ति नचोपनिषद्वाक्यैक्यार्थं अस्यैवार्थस्य अधिकारिभेदेनविधानात् । फलंत्वेकमेव "तेप्राप्नुवंतिमामेव" इत्यादेः । "वेदैश्च सर्वैरहमेव वेद्य" इति च "सर्वेवेदायत्पदमामनंति । तद्विष्णोःपरमंपदमिति च" । तदेवब्रह्मपरमंकवीनामिति च । तत्र [illegible] भगवतिप्रवेशस्त्रैविध्यिकानां अन्येषांतुभागवतप्रकारेणैव नवव्यूहस्थितविग्रहकल्पः । किंपुनर्ब्राह्म [illegible] कृशोधिकतरस्तेषामिति च । अतोन्यांतर्यप्रतिषेधोपिनास्ति । शांडिल्यस्य तथावचनं पूर्वचित्तशुद्धिस्तथा [illegible] शुद्धिः फलोदयः । चित्तशोधकानांवैदिकमार्गे क्लेशाधिक्यात् अतः स्वपक्षस्थापनामात्रपरत्वादितरपक्षनिन्दावचनानां [illegible] विरोधः संभवति तस्मात्सूत्रविचारानुसारि वैदिकमार्गेण भागवतमार्गेण वायथाधिकारं सर्वेषांपरमपुरुषार्थप्राप्तेः स [illegible] विशेषोपि [illegible] कर्तव्यः तत्यप्रत्ययस्य विधावविधानात् लिङ्लोटूपंचमलकाराणामेवविधावविधानात् लोकवेदप्रसिद्ध [illegible] संभवति भक्तिशास्त्रत्वाच्च फलसाधनतातुनादर्थ्येनविधानात्समस्विष्यहारादवलभ्यते वाक्यार्थस्यापूर्वत्व [illegible] पूर्वमीमांसाभाष्यएव निराकृतः अयंचतव्यप्रत्ययः आवश्यकेविहितः कृत्याधिकरणसूत्रेण प्रश्नानुगुणश्चायं तस्म [illegible] यावज्जीवंयथासंभवं त्रयाणामावृत्तिः कर्तव्येति सिद्धं श्रोतव्यः कीर्तितश्च कीर्तितव्यः श्रोतव्यश्च स्मर्तव्यः [illegible] चकारश्चयं इच्छतेति पदात् श्रवणाद्यकरणे अभयमेव नभविष्यति ननु इकरणाकृतः प्रत्यवायोपीति सुस्थितं [illegible] स्वतंत्रत्वात् ॥ ५ ॥

•स्मरणकीर्तनयोः फलहेतुत्वं साधम [illegible] निरूपणाय तत्रप्रथमंइतरापेक्षत्वात् स्मरणस्य फलसाधकत्वं साधयति एतावानिति पंचमसिद्धांतः स्वतंत्रतयाधि [illegible] रणयोः मप्रधानत्वेनोक्तोपशुपति मतस्य कल्पभेदेन तामसपरत्वेन उत्कर्षजनन-द्वारापरं परायद्यायथमुपयोगः क्रममु [illegible] तः परमैश्वर्ययोगोधर्मशास्त्रं च सर्वांगत्वेनप्रतिपादितं स्वतः श्रुतयाब्रह्ममीमांसायां

[illegible] हरेराश्रितपुरतत्सहाराणुष्य [illegible] ॥ ७ ॥

नकेवलं पूर्णंपवरमं तेऽहमपितत्त्ववरमहत्त्व [illegible] येन । [illegible] मतोत्पत्तौ [illegible] तत्मोकत्वात् । यद्वा [illegible] रूपरूपादिप्रतिपादकत्वेनभागवतंब्रह्मवेदस्तेनसंमितंतुल्यं । यद्वा ब्रह्मणस्यमितंप्रमितंयस्मतादेवपुराणं कर्मपितुर्द्वैपायनाद्व्यासात् [illegible] परस्मादिर्यस्यसः द्वापरादिः कालयुगादिः । तस्मिन्नृतातुष [illegible] र्तिसमकालत्वप्रसिद्धं [illegible] साधतारस्यमहमर्थातवान् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यतः श्रीनारायणश्रवणादिविनानसंसारनिवृत्तिस्तस्मात्सर्वात्मासर्वव्यापी । सर्वप्रभाव [illegible] वा । भगवानितिवा [illegible] गुणवान्ब्रह्मादिचेतनराशिपूज्योवा हरिः स्मरणमात्रेणापिसंसारक्लेशसंहर्ता सर्वज्ञ [illegible] रोनित्यम [illegible] तस्मात्संसार [illegible] मिच्छतापुरुषेणश्रवणादिविषयःकर्तव्यइत्यन्वयः श्रवणादिविषयेणाज्ञानसंशयादिनिरासक इति "श्रुत्वामत्वा [illegible] "मितिवचनात् ध्येयो [illegible] । कीर्तनापरपर्यायम [illegible] निरस्य [illegible] [illegible] । [illegible] कानिराशार्थं श्रवणादीनांचतुर्णामेकविषयं [illegible] [illegible] स्मात्तद्रूपःकिमस्यादिस्यतउक्तं हरिर्भगवानिति तथापि [illegible] [illegible] पिनिरस्तंतिज्ञातव्यं ॥ ५ ॥

[illegible] तात्पर्यंप्रतिपादितमितिदर्शयति एतावानिति अन्तेमरणकाले [illegible] [illegible] एतावानिति सांख्यशास्त्रोक्तसांख्यनतत्त्वज्ञानेनयोगशास्त्रोक्त [illegible] पूजादियोगानुष्ठानेन [illegible] निष्ठयास्वविहितवर्णाश्रमोक्त [illegible] नेनचांतेमरणकालेनारायणस्मृतिरितियावानेतावानिवानकपुंसांपरउत्कृष्टोजन्मला [illegible] लाभ इत्यन्वयः अतोवेदादिशास्त्र [illegible] सर्वथानारायणस्मरणंकर्तव्यनान्यदितिप्रतिपादनादिति अतःअन्तःपदिति [illegible] इतिसिद्धं ॥ ६ ॥

सर्वथानारायणश्रवणादिकार्यमित्यत्रकैमुत्यन्यायमाह प्रायेणेति मुनयःस्वस्वयोग्यज्ञानदंतांविधिनिषेधात्रिवृत्ताः [illegible] तेनहीयमानत्वात्तत्संबंधिनिर्गुणनैर्गुण्यंतत्कथामुक्ताहरेर्गुणानुकथनेरमंतइत्यन्वयः गुणानुस्मारंस्मारंकथयंतइत्यभिप्रायेरमंतएवं [illegible] विदुषामभिप्रायेणोक्तं प्रायेणेति अतोज्ञानिभिरनिरतरंहरिगुणश्रवणादिकार्यमितिकिंवाच्यमित्यर्थः ॥ ७ ॥

इदानींभागवतप्रतिपाद्यमर्थंतस्माद्वारेत्याद्विश्लोकत्रयेणाभिधायपुनस्तद्विस्तरंवक्तुमुपक्रमते इदमिति [illegible] त्युच्यते ब्रह्मसंमितंवेदसमं । तदर्थव्याख्यानरूपत्वात् द्वापरादौकृष्णावतारापेक्षयाद्वापरंआदौच । ननुद्वापरस्यादावितिं "व्यासःकृष्ण [illegible] यतराष्ट्रमजीजनदितिवचनात् द्वापरान्तेभारतकथाप्रवृत्तिकथनाच ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।


अभयं सर्वभयनिवारकतत्त्वांनन्दमयपुरुषार्थं गतवानभयं हरिम् इति, वक्ष्यमाणात् मत्वौ मृत्युव्यालभीत इत्यादेश्च ॥ ५—६ ॥

तदेव कैमुत्येन दर्शयति प्रायेणेति ॥ ७ ॥

ब्रह्मसम्मितं नराकृतिपरब्रह्मणः श्रीकृष्णस्य तुल्यं कृष्णे स्वधामोपगते इत्यादेः । द्वापरादौ [illegible] द्वाप- रान्ते इत्यर्थः । यद्वा द्वापर एवादिर्यस्य तत्र तदीयान्त सन्ध्यांशे इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवंप्रथममभिमंगलसाधारणं परिहृत्यअभयमिच्छतामुपायमाह । तस्मादिति । यस्मा [illegible] एवप्रश्नःसमीचीनः यस्मादन्य [illegible] चीनः तस्माद्येषांसंसाराद्भयमस्तितद्भयनिवृत्त्यर्थं यतंते । तेषामभयमिच्छतांभगवा [illegible] । यद्यप्यत्रयुक्तिर्वक्तव्या तथापि [illegible] बुद्धियुक्तिमपिनगृह्णातीति स्वभावतोधिकारोवक्तव्यस्तदाह । भारतेति । [illegible] उक्तविश्वासाय [illegible] मिति भरतस्यमायामोहाभावात् तद्धर्मपुरःसरं तद्वंशोत्पन्नानामपि [illegible] । ननुवेदैःकार्याणांविधानां [illegible] दीनां आत्मजिज्ञासायां [illegible] कथनंपरित्यज्य कथं भगवच्छ्रवणंविधीयते । [illegible] लद्व्याविधानादित्यर्थः [illegible] । सर्वात्मेति । प्रमाणबलात्प्रमेयबलंमहदित्यग्रेवक्ष्यते प्रमेयेचयुक्तिर्वक्तव्या [illegible] [illegible] पामपिक्षतपुण्यपुंजानां अभयं [illegible] अतस्तेषामुपायोवेदेनोक्त [illegible] तेनैव साधनंनैवर्णिकानामपि [illegible] सद्भीभावइयकत्वाल्लाघवायसर्वोपयोग्येकएवोपायोवक्तव्यः । स च सर्वात्म [illegible] यएवकश्चिद्वक्तव्यः । [illegible] स्यचिच्छ्रोतव्यः आत्मलाभात्परंविद्यते तरतिशोकमात्मविदितिश्रुतिः [illegible] बोधकस्य वाक्यार्थ [illegible] मेयस्यात् । आत्मसुप्रकृतिविकृतिभावाभावाच्च । तस्मात्सर्वेष्वेकोय आत्मा [illegible] सर्वात्मपदम् । [illegible] वाचकत्वमात्मपदस्य तथा सतिव्यक्तिरूपस्य [illegible] श्रौतत्वात् [illegible] आत्मनः कार्यसिद्धेः । [illegible] प्यात्मज्ञानस्य विद्यमानत्वात् श्रुतौ प्रकारविशेषस्यानुक्तत्वात् [illegible] [illegible] तस्यचशारीरस्य च भेदाभावात् न [illegible] फलमतउपपत्तं [illegible] फलम् । किंतु [illegible] [illegible] तत्फलमपच्छति तन्नित्यमंशादीरूपैवास्यात्फलदाने असमर्थमे [illegible] वातीति । [illegible] प्रतिपन्नाः [illegible] । [illegible]



[illegible]

[illegible] एवमेव परोजन्मलाभः तथमैत्य पेयाप्रिप्रियाप्रकारेण [illegible] तथापीनस्यापि मुर्खानां श्रीमतांमित्येवम [illegible] इत्यादपथमेऽजन्मसंसिद्ध स्ततोयातिपरांगति मित्युपसंहारात योगिनाप्यति [illegible] साधकेऽपि बहूनां जन्मनामंते [illegible] इति वाक्यात् ज्ञानिष्याप्यधिकामनइति योगप्रशंसावाक्याच्च तमजन्मसाधकत्वमत्र भगवत्स्मरणस्यापि [illegible] साधकत्वं मतोऽन्नमदं देहे सर्वे उपदेशाः [illegible] स्वरूपभूतः समफलसाधकः [illegible] सागतिरिति न्यायात् [illegible] भावमिति भगवद्वाक्याच्च अंतेभगवत्स्मरणहेतुत्वेन तदुपयोगः सर्वदुस्मरणप्रकारेणयस्मिन् कस्मिन्नपि देहे अंतेभगवत्स्मरणमयं तदापूर्वापरबलीयस्त्वमितिन्यायनसएवदेहः अंतिमोऽपि अतिमत्वमापद्यमानः लाभत्वेनसंपद्यतेयोगादयश्च स्वस्वमार्गेण दूरफलाः [illegible] अत्रैवप्रविशंतिः अतोदेहसाधकानांयोगादीनांदेहस्य चायमेवलाभः यदंतेनारायणस्मृतिरिति अतोऽस्य साक्षाद्भगवत्प्रबंधकत्वं [illegible] विधिशेषतया श्रुतिसंवादापेक्षितः यद्यपिभगवदीयत्व मपिजन्मलाभः तथापिततोऽप्ययंपरः पुंसामिति साधारणानामपि अतीमहा [illegible] स्मरणस्य सर्वदाभगवान्स्मर्तव्यइति सिद्धं ॥ ६ ॥

इदानींकीर्तनस्य तथात्वंसाधयति प्रायेणेति कीर्तनंतु ततोऽप्यधिकं नेममंति नजन्मजा जीवन्मुक्ताः केवलगुणातीताएव [illegible] पुनरावृत्तिसंभावनारहिताः तेपिहरेर्गुणानुकथनेश्रवणानंतरभाविनि कीर्तनेपरमानंदरसमुपल भमानाः साधनदशायामेवंसुखं [illegible] [illegible] दशायांकीदृशं सुखं भविष्यतीतिमन्यमानाः रमंतेस्मेतिप्रसिद्धेः केवलपुनः मननएवपर्यवसितमतयः [illegible] [illegible] भावायनरमन्ते तद्व्यावृत्त्यर्थं । प्रायग्रहणम् राजन्निति संबोधनम् तद्भूत शमीकस्मरणाय [illegible] [illegible] तेहिकृतिगुणदोष संबंधरहिताः तदाह निवृत्ताविधिषेधतइति विधिसहिता निषेधात्रिवृत्ताः [illegible] [illegible] भयातीतवाक्यात् विधिसहितनिषेधकथनेन च एतद्ज्ञापयति शुभेबालकवत् क्रीडंतीति वाक्यानि यद्यपि विधिरूपाणि तथाप्यस्याप्रेनिषेधाभावाप्रेतेषांग्रहणमिति नैर्गुण्येगुणत्रयातीतेब्रह्मण्येवस्थिताः विरोधाभासबोधनार्थं गुणग्रहणं तस्मात्स्वतंत्र पुरुषार्थं त्वात्कीर्तनेशंकापि नकर्त्तव्या ॥ ७ ॥

एवं गुणत्रयंसमर्थयित्वा श्रवणस्यापि पुरुषार्थसाधकत्वेसाधिते युक्तिमूलकमिदमप्रामाणिकमिति शंकास्यात् [illegible] इदमिति पुराणमिति प्रमाणभागवतंनामेति तदवांतरभेदः यौगिकश्चायमन्तेन प्रोक्तंभगवत्प्रतिपादकं भगवत्फलकंचेति अस्य दुर्ब- लत्वं वारयति ब्रह्मणावेदनसंमितं परब्रह्मणासम्यक् मितंज्ञातं यत्र गुरु परम्परामाह पितुर्द्वैपायनादिति तदानींतनकालस्य प्राणिबुद्धि- नाशकत्वमाह द्वापरादाविति द्वापरस्यादौतदानीमपि द्विपराबुद्धिर्नजाताः अध्यीतवानिति वेदवत् नियमेन अर्थबोधपूर्वकं अध्ययनमुक्तं पितुरिति पितैवोपनयेत्पुत्रमिति न्यायेनउपयनाध्यापनयोरेक कर्तृकत्वात् अध्ययनप्रकारः सर्वोपिसुसम्पन्नइति सूचितं ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

अतः कृतार्थीभवितुं कर्म्मादिकमकुर्वाणा भक्तिमेव कुर्वीरन्नित्याह तस्मादिति । हे भारतवंश्य अभयं [illegible] इच्छता पुंसा हरिः श्रोतव्यः । अत्र हरिरिति विशेष्यपदम् । सर्वात्मादिविशेषणान्येषां मोक्षाभिसन्धिमी रागानुगा वैधी च [illegible] तत्र प्रथमायाम् अभयं मोक्षम् इच्छता सर्वेषामात्मा परमात्मा हरिः श्रोतव्य इति । द्वितीयायान्तु अभयं निष्कर्म्म [illegible] इच्छता लाभवता पुंसा भगवान् अतिसुन्दरो नन्दसूनुः श्रोतव्य इति "अगं श्रीकाममाहात्म्यर्वार्म्वयत्नाकंकीर्तिषु" इत्यमरः । [illegible] न बिभेत्यस्मादित्यभयो हरिरेव मुहूर्त्तात् सर्वमुत्सृज्य गतवानभयं हरिम् इत्यभिमन्त्रोकरहस्यम् इच्छता अभयम् [illegible] इच्छता वा ईश्वरो हरिः शितव्येन पुंसा श्रोतव्य इत्यादि । कीर्त्तितव्यश्च स्मर्त्तव्यश्चेति चकाराभ्यां श्रवणानन्तरं कीर्त्तनस्मरणयोरेक- कालत्वं विहितमिति श्रोतव्यादिप्रश्नस्योत्तरमुक्तम् ॥ ५ ॥

ज्ञानिकर्म्मिप्रभृतयोऽन्येऽपि साधुसङ्गवशात् यदि भक्ता भवन्ति न पुनः कर्म्मादिकं कुर्वन्ति तदा तेऽपि कृतार्था इत्याह एतावा- निति । सांख्ययोगस्वधर्म्मनिष्ठाभिरिति विशेषणे तृतीया [illegible] । तथाच तैर्विशिष्टानां पुंसामेतावान् जन्मनो लाभः परः श्रेष्ठः । कोऽसौ अन्ते प्रत्यासत्तिन्यायेन ज्ञानयोगकर्म्मणामवसाने [illegible] भरतप्राचीनवर्हिःप्रभृतीनामिव नारायण- स्मृतिः शुद्धा भक्तिः यदि स्यात् । अन्ते इति यदि पुनरपि भक्ति त्यक्त्वा [illegible] न भवन्तीत्यर्थः । अत एवमेव [illegible] वानेव यजतामिह निःश्रेयसोदयः । भगवत्यचलो भावो यद्भागवतसङ्गतः इति । अन्यन् एवान्ते नारायणस्मृतिः परो [illegible] केचिदाहुः ॥ ६ ॥

संसारिस्तु भगवद्रूपगुणमाधुर्य्यानुभव एव स च ब्रह्मसायुज्यादप्यतिश्रेष्ठ इति महदनुभवप्रमाणेनाह प्रायेणेति । विधिषेधतः विधिनिषेधाभ्यां निवृत्ता नैर्गुण्ये स्थिता मुक्ता अपीत्यर्थः । गुणानुकथने एव रमन्ते न तु निर्विशेषब्रह्मसुखेऽपीत्यर्थः । प्रायेणेति अन्ये जीवन्मुक्तास्ततो निकृष्टाः सायुज्यार्थं गुणानुकथनं कुर्वन्ति न तु तत्र रमन्ते ॥ ७ ॥

किमिदमश्रुतचरमपूर्व्वं कथयसि । सत्यम् । अपूर्व्वमेवेदमित्याह । भागवतं भग[illegible] कृतं भगवता प्रोक्तं वा भगवत [illegible] शास्त्रम् इदं युष्मदस्मत्प्रश्नोत्तररूपश्रीभगवल्लीलामयमन्यभूतयुष्मदादिजन्म[illegible] [illegible] स्वरूपभवादिसम्भवं मत्पिता बादरायणेनाविर्भावितम् । [illegible] मितं येनेति वा । [illegible] अत आह अधीतवानिति । अस्य शास्त्रस्यार्थो बुद्धिबलेन स्वयं ज्ञातुमशक्य इति [illegible] प्रादुर्भावात् द्वापरादाविति न सम्भवे । [illegible] द्वापरान्त [illegible] [illegible] ब्याख्येयः ॥ ८ ॥

गृहीतचेता राजर्षे आख्यानं यदपृच्छत ॥ ९ ॥
तदहं तेऽभिधास्यामि महापौरुषिको भवान् ।
यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥
एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥ ११ ॥
किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ।
वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अथ यच्छ्रोतव्यमथोजाद्ध्येयरकर्तव्येनृभिःप्रभो । स्मर्तव्यं भजनीयंवेतिप्रश्नपंचकस्योत्तरमाह । तस्मादिति तस्मात्तुगन्यैतरपदार्थाभि निवेशेन वृथात्वेनेत्यर्थः । अतएव हेतो»। हे भारतभरतान्ववोत्पन्न अभयंहरिपदमिच्छतामुमुक्षुणा हरिःस्वपदप्राप्तिप्रतिबंधक ज्ञानकर्मापहारिः हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतइत्यादिस्मृति प्रसिद्धः श्रोतव्यः गुरुमुखात्कीर्तितव्यश्चशिष्यादिभिः हरयेनमइत्येवमुक्तैः कीर्तितव्यश्च मंत्रमूर्तिस्तूपोत्तुमलसैवकीर्तितव्यः । अभयश्चाप्यभित्वस्योत्तरमुकम् स्मर्तव्यः चकारान्नजनीयः सेवनीयः द्वितीयाचकारात्सर्वकर्त्तव्यतावियच्च सर्वैश्चियाभिराराधनीयश्चत्वयः । तत्रहेतुप्रदर्शनार्थहरिर्विशिनष्टि सर्वात्मा सतदस्तिविनामूर्तमयायस्यात्मराचरमिति श्रीमुखोक्तस्वैकारणकारणः निःसमानातिशयः यदन्योभजनीयोनास्तीत्यर्थः "मत्तः परतरंनान्यत्किंचिदस्तिधनंजय"इतिस्मृतेः । तमेवैकं विजानथ अन्यावाचोविमुञ्चथेति श्रुतेः भगवान्स्वाभाविकषड्भैश्वर्यसंपन्नः । ईश्वरःनियन्तासर्वभक्तकामपरिपूरकइतिपदद्वयार्थः ॥ ५ ॥

हरेरेवभजनीयत्वंतद्भजनस्य परमपुरुषार्थत्वंचोपपादयन्योगत्रयस्यभगवत्स्मृति साधनत्वमाह । एतावानिति "एषांतेभिहितासांख्येबुद्धियोगेत्विमांशृणु" इति श्रीमुखवचनात् । सांख्यशब्दः ज्ञानवाचकः योगशब्दश्चनिष्कामकर्मयोगवाचकः ज्ञानयोगेन निष्कामकर्मयोगेन स्वधर्मपरिनिष्ठया भक्तियोगनिष्ठया च । अन्तेप्राणप्रयाणसमयेपि नारायणस्मृतिः इत्येतावानेवपुंसांपरउत्कृष्टः जन्मनोलाभः ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् यः प्रयातित्यजन्देहंसयातिपरमांगतिमिति स्वस्मृतिफलंचस्वमुखेनैवोक्तम् ॥ ६ ॥

हरिभजनानंदेनिमग्नानामप्राप्तिविधिनिषेधावसराणां महामुनीनामाचारंचात्रप्रमाणयति प्रायेणेति मैर्गुण्यस्थाः प्राकृतगुणाःस्पृष्टब्रह्मनिष्ठाः मुमयस्तन्मननैकस्वभावाः हरिरेवैकनिष्ठाः हरेर्गुणानुकथनमुपलक्षणमन्येषांभजनप्रकाराणाम् । अतोविधिनिषेधतोविधिनिषेधाश्चनिष्ठाः यत्रचामृतत्वस्याभिहितस्यावकाशोनास्ति तत्रकिमुतविधवद्धेयस्यनिषिद्धस्यावकाशोनास्तीतिवक्तव्यमिति । अतएवोक्तं पुराणान्तरे "स्मर्तव्यः सततंविष्णुर्विस्मर्तव्योजातुचित् सर्वेविधिनिषेधाः स्युरेतयोरेवकिंकराः"इति प्रायेणेत्यविधिनिषेधौलोकसंग्रहाय हरिगुणानुकथनोपयोगितयाचगृह्णंतीत्यर्थः ॥ ७ ॥

धर्मादिभ्यतिरिक्तभक्त्यादिकमनुपादेयं तच्छ्रवणादिकंचोपादेयमित्युक्तमथतच्छ्रवणादिनिष्ठापादकं शास्त्रं श्रावयितुं प्रतिजानीते इदमित्यादिभिः । भगवतावेदव्यासेनप्रोक्तंभागवतम् ब्रह्मणाब्रह्मदेवेनसमितंतुल्यम् पितुर्वेदव्यासाद्यापरभादिर्यस्यद्यापरांतस्यतस्मिन्काले ब्रह्मवर्तमान् ॥ ८ ॥

भाषा टीका ।

भारत ! इसीसे अभय इच्छा करनेवाले पुरुषोंको हरि भगवान् ही सर्वात्म भावसे श्रोतव्य कीर्तितव्य और स्मर्तव्य हैं ॥ ५ ॥
पुरुषों को सांख्य योग और स्वधर्म निष्ठा का इतनाही परम लाभ है कि जो अन्त में नारायण स्मृति हो ॥ ६ ॥
राजन् ! मैर्गुण्य अवस्था को प्राप्त और विधि निषेध से अतीत मुनिजन भी हरिके गुणानु कथन मे रक्तचित्त करते हैं ॥ ७ ॥
द्वापर के अन्त में यह ब्रह्म संचित भागवत पुराण मेरे पिता द्वैपायन से पढा है ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिः तत्राह परिनिष्ठितोऽपीति । गृहीतचेताः आकृष्टचित्तः ॥ ९ ॥
अहमुत्तरो विष्णुरातदीयः । अस्य परिमन् अद्धा कुर्वताम् । सती अहैतुकी ॥ १० ॥
ज्ञानकर्मणी सिद्ध्यतश्च ततः परमन्यत् श्रेयोऽस्तीत्याह एतदिति । इच्छतां कामिनां तत्तत्फलसाधनमेतदेव निर्विद्यमानानां मुमुक्षूणां ज्ञानिनां च परमश्रेयसमेतदेव योगिनां ज्ञानिनां च परमश्रेयसमेतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः ॥ ११ ॥
अतीतानागतपुरुषशिक्षणं किमर्थं स्वाधिकारमित्याशङ्क्य हेत्वाह किमिति त्रिभिः । परोक्षैः अतीतैः हायनैः वर्षैः । विदितं—ज्ञा धातोरिदं रूपम् । अतः येन ज्ञानेन । घटेत यत्नं कुर्यात् ॥ १२ ॥

[illegible] तदभिधास्यन्नादौ पुराणस्यावतारप्रयोजनमाह [illegible] ॥ ९ ॥

आरुक्षतां मादृशामप्यस्य पुराणस्यावतारप्रयोजनमाह [illegible] मुमुक्षूणामित्यादि । तत्पुराणान्तेतुभ्यमभिधास्यामि किमुशुकधर्मेण [illegible] महापौरुषिकोमहापुरुषभक्तोभवान् । यद्भगवद्भक्तानां रहस्यार्थोपदेशेनचिरमुशुश्रूषायेति भावः यत्पुराणोऽहधतांश्रद्धांकुर्वतां मुकुन्दमोक्षप्रदंभगवन्तंस्तौति अहैतुकीमतिर्भक्तिःस्यात्तेन ॥ १० ॥

मुमुक्षूणांनातःपरमन्यन्मोक्षसाधनमित्याह । एतदिति । तापत्रयादिहेतुनिर्वेदं प्राप्तानामकृतोभयमोक्षमिच्छतां योगिनामनभिसंहितफलकर्मयोगनिष्ठानां । हे नृप ! हरेर्नामानुकीर्तनं स्वरूपादिचिन्तनादेरप्युपलक्षणमिदं तन्नामानुकीर्तनं तत्स्वरूपादिचिन्तनं चैतदेवमुक्तिसाधनंनान्यदित्यर्थः ॥ ११ ॥

अल्पमेवायुरवशिष्टंकिमहं साधयेयमितिमाशुचइत्याह । किमिति । प्रमत्तस्यदेहापत्यवित्तादिविक्षिप्तचित्तस्यपरोक्षैरज्ञाततयैवगतैर्वर्षाभिर्हायनैःकिंकिप्रयोजनं न किमपीत्यर्थः । विदित्वा वृथायातीति ज्ञातंमुहूर्त्तमेवचरंयतः येनविदितेन मुहूर्त्तेनश्रेयसेघटेतयत्नंकुर्यात् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] परिनिष्ठितइतियत्रयच्छ्रद्दधतांचत्रयस्मिन्भागवतेप्रतिपादितमर्थंश्रद्दधतामितिवा-अहंभागवतनामवद्व्याख्यानमधीतवान् । तत्तेतुभ्यमभिधास्यामीत्यन्वयः अभिधानेनिमित्तमाह महापुरुषभक्तइति पूर्णषड्गुणत्वात्पुरुषाणांवरः वांस्तद्भक्ताःपुरुषभक्तास्तेषांमध्येमहानितियत्तस्मादित्यर्थः स्थितप्रज्ञतयाकृतकृत्यस्वभवतोभागवताभ्यर्थनंकथमर्थमितिताहपरिनिष्ठितइति । नैर्गुण्येमुक्तौपरिनिष्ठितः मुक्तिरस्यभवतीतिनिश्चयवानपि श्रद्दधंसंशयःप्राक्तःपरिनिष्ठाविनिश्चयइत्यभिधानात् कथमनेनान्यपरिहारः आयातइतितत्राह उत्तमश्लोकइति अनेनैवंविधमाहात्म्यादनिशंयोभगवानित्युक्तंभवति ॥ ९.—१० ॥

नकेवलंतवैवैतन्निर्णीतमपितुसर्व्वयोगिनामपीत्याह एतदिति निर्विद्यमानानांविरज्यमानानांकृच्छ्रैरितिशेषः अकुतोभयमोक्षः एवंवैदान्तिकसाधनसाम्यमितांयांगिनांहरेर्नामा*नुकीर्तनमेतदेतदेवहरिस्मरणाकारणामित्यर्थः ॥ ११ ॥

अनेनभागवताकर्णनमभिप्रेतं तदायंतल्पायुष्ट्वेनमघटतइतिशंकामाभूदित्याह किमिति हायनैर्वत्सरैः परोक्षैरागामिभिः यतोयेनमुहूर्त्तेनहरिस्मरणाक्षयश्रेयसेघटेततदेकंमुहूर्त्तमेवघटिकाद्वयमपिपरमुत्तमंविदितंप्रख्यातं ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

परिनिष्ठितोऽपि नैर्गुण्ये इत्यादौ तदहं तेऽभिधास्यामि इत्यन्ते यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती इति श्रीभागवतस्य पद्यमहिमानमुक्त्वा श्रीभागवतमुपक्रममाणा एव तस्य नानाकृतः श्रीमन्मुखतया तन्नामकीर्त्तनमेवोपदिशति, तत्रापि सर्व्वेषामेव तत्स्वसाधनत्वेन चोपदिशति, एतन्निर्विद्यमानानामिति । टीका च—साधकानां सिद्धानाञ्च नातः परमन्यच्छ्रेयोऽस्तीत्यत्र, एतदिति । इच्छतां कामिनां तत्तत्फलसाधनमेतदेव, निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव, योगिनां ज्ञानिनां फलमेतदेव सिद्धीनां साक्षात्प्रमाणं वक्तव्यमित्यर्थः इत्येषा । नामकीर्त्तनमेवमुहूर्त्तमेव प्रशस्तं, नामान्यनन्तस्य हतत्रपः पठन् इत्यादेः । तत्र पाद्मोक्ता इत्यालस्यादयः परित्याज्याः । यथा श्रीसनत्कुमारवाक्यम्—सर्व्वापराधकृदपि मुच्यते हरिसंश्रयः । हरेरप्यपराधान् यः कुर्व्यादुद्विपदांवरः ॥ नाशाश्रयः कदाचित् स्यात् तरत्येव स नामतः । नाम्नोऽपि सर्व्वसुहृदो ह्यपराधात् पतत्यधः ॥ इति । अपराधाश्चैते—सतां निन्दा नाम्नः परममपराधं वितनुते यतः ख्यातिं यातं कथमु सहते तद्विगर्हाम् (१) । शिवस्य श्रीविष्णोर्य इह गुणनामादिकमलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः (२) ॥ गुरोरवज्ञा (३) श्रुतिशास्त्रनिन्दनं (४) तथार्थवादो हरिनाम्नि (५) कल्पनम् (६) । नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः (७) ॥ धर्म्मव्रतत्यागहुतादिसर्व्वशुभक्रियासाम्यमपि प्रमादः (८) । अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः शिवनामापराधः (९) ॥ श्रुत्वापि [illegible] हरत्यघं यः प्रीतिरहितोऽधमः । अहंममादिपरमो नाम्नि सोऽप्यपराधकृत् (१०) ॥ इति । अत्र सर्व्वापराधकृदपि इत्यादौ श्रीविष्णुजातीयत्वाक्यमप्यनुसन्धेयम्—अत्र नामानि लोकेऽस्मिन् अश्रद्धया यस्तु कीर्त्तयेत् । तस्यापराधकोटीस्तु क्षमाम्येव न संशयः ॥ इति । सतां निन्देत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम् । निन्दादयस्तु यथा स्कान्दे मार्कण्डेयभगीरथसंवादे—निन्दां कुर्व्वन्ति ये मूढा वैष्णवानां महात्मनाम् । पतन्ति पितृभिः सार्द्धं महारौरवसंज्ञिते ॥ हन्ति निन्दति वै द्वेष्टि वैष्णवान्नाभिनन्दति । क्रुध्यते याति नो हर्षं दर्शने पतनानि षट् ॥ इति । तन्निन्दाश्रवणेऽपि दोष उक्तः—निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ इति ॥ ततोऽपगमश्चासमर्थेनैवैवेत्यवेत्य, समर्थेन तु निन्दकस्य जिह्वा छेत्तव्या, तत्राप्यसमर्थेन तु स्वप्राणपरित्यागोऽपि कर्त्तव्यः । यथोक्तं देव्या—कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्म्मावितर्य्यसृणिभिर्नृभिरर्व्यमाणे । छिन्द्यात् प्रसह्य वदतीमस्तां प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत् स धर्म्मः ॥ इति । शिवस्य श्रीविष्णोः इत्यत्रैवमनुसन्धेयम्—श्रूयते हि—यदूयद्विभूतिमत् सत्त्वं मम तेजोंऽशसम्भवम् इति, ब्रह्मा चाहमपि यस्यैकांशकलायाः इति, यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्द्ध्न्यधिकृतेन शिवः शिवोऽभूत् इति, सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ इति । तथा भाष्यभाष्यधृतानि वचनानि ब्रह्मादौ—ब्रह्म ह्यावयोर्मध्यमूढ्वतत्त्वमवस्थितं । सोऽहं ब्रह्मैव चेशानो महादेवो महच्छ्रुतः ॥ विचिन्त्य ये नौ भजकाः समं मुक्ता भवन्ति संसारसागरात् । तदाधारौ यतो विष्णुः शिवश्चैवं ततः

---

* अत्रनामशब्दोग्रंथपरः । सोऽहंनामविदेवास्मीत्यादौग्रंथेप्रसिद्धत्वात् । हरिविषयग्रंथश्रवणादिकमितियावत् ॥

[illegible]

[illegible] ॥ इति । [illegible] न तु नारायणादीनां [illegible] सम्भवः । [illegible] गतिर्विष्णुरेव [illegible] प्रकीर्त्तितः ॥ इति । स्कान्दे—[illegible] [illegible] गुणोत्तमः । [illegible] पुरुष (वपुः) ॥ इति । [illegible]—[illegible] शतानन्दो [illegible] [illegible] । [illegible] विशेषकामापि [illegible] ॥ इति । [illegible] श्रीविष्णोः सर्वोत्तम- [illegible] प्रसिद्धात्तस्मात् सकाशाच्छिवस्य गुणनामादिकं भिन्नं शास्त्रान्तरसिद्धमिति वा धियापिपृथग्वेदित्यर्थः । [illegible] [illegible] सति श्रीविष्णोरप्यपेक्षया [illegible], [illegible] श्रीमद्भक्त तत्रैव दत्तः । अतएव शिवनामापराधः इति [illegible] श्रीविष्णुरेव प्रतिपादित इत्यभिप्रेतम् । [illegible] स्याणुशिवादिशब्दास्तथैव । अथ गुरोरवज्ञा अनादरः । [illegible], यथा—[illegible] पापयितृणाम् । अथार्थवादः—स्तुतिमात्रमिदमिति मननम् । [illegible]—तन्माहात्म्यगौणताकरणाय गत्यन्तरचिन्तनम् । यथोक्तं कौर्म्मे व्यासगीतायाम्—देवद्रोहाद् गुरुद्रोहः कोटिकोटिगुणाधिकः । [illegible] कोटिगुणाधिकम् ॥ इति । यत्तु श्रीविष्णुपार्षदैरुक्तः श्रुतनाममाहात्म्यस्याजामिलस्य—सोऽहं व्यक्तं पति- ष्यामि नरके भृशदारुणे इत्येतद्वाक्यं, तत्तु [illegible] रात्म्यमात्रदृष्ट्या । नाममाहात्म्यदृष्ट्या त्वग्रे वक्ष्यते—अथापि मे दुर्भगस्य इत्यादि- [illegible] । [illegible]—यद्यपि [illegible] बलेनापि कृतस्य पापस्य तेन नाम्ना क्षयः, तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानन्दसान्द्रं साक्षात् श्रीभगवच्चरणारविन्दं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापं विषयं साधयतीति परमदौरात्म्यं, ततः [illegible] तन्नाम [illegible], ततः पापकोटिमहत्तमस्यापराधस्यापातो बाढमेव, ततो यमैः बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण [illegible] कृतदण्डस्य तस्य शुद्धभावो युक्त एव, नामापराधयुक्तानाम्—इत्यादिवक्ष्यमाणानुसारेण पुनरपि सन्ततनामकीर्त्तनमात्रस्य भगवद्भक्तिमतोऽप्यधःपातलक्षणभोगनियमात्, तत्रैव [illegible] भगवद्‌यजनबलेन वृत्रहत्याप्रवृत्तिस्तु लोकोपद्रवशान्ति तदीयासुरभावखण्डनशक्त्या [illegible] दोष इति मन्तव्यम् । अथ धर्म्मव्रतत्यागेति—धर्म्मादिभिः साम्यमननमपि प्रमादः अपराधो भवतीत्यर्थः । अतएव—वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि कीर्त्ति- तानि न संशयः इत्यतिदेशोनापि नाम्न एव माहात्म्यमायाति । उक्तं हि—मधुरमधुरमेतत् इत्यादौ सकलनिगमवल्लीसत्फलम् इति । तथा श्रीविष्णुधर्म्मे—ऋग्वेदो हि यजुर्वेदः सामवेदोऽप्यथर्व्वणः । अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ स्कान्दे पार्व्वत्युक्तौ— मा ऋचो मा यजुस्तात मा साम पठ किञ्चन । गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः ॥ पाद्मे श्रीरामाष्टोत्तरशतनामस्तोत्रे—विष्णो- रेकैकनामापि सर्व्ववेदाधिकं स्मृतम् इति । अथाश्रद्धाने इत्यादिनोपदेष्टुरपराधं दर्शयित्वोपदेश्यस्याह श्रुत्वेति । यतः अहंममादिपरमः अहन्ताममतायैकतात्पर्य्यत्वेन तस्मिन्ननादरवान् इत्यर्थः । नामैकं यस्य वाचि स्मरणपथगतम् इत्यादौ देहद्रविणादिनिमित्तकपाषण्ड- [illegible] दशापराधा लक्ष्यन्ते, पाषण्डमयत्वात् तेषाम् । तथा तद्विधानामेवापराधानन्तरमुक्तं पाद्मे वैशाखमाहात्म्ये—अवमन्य च ये यान्ति भगवत्कीर्त्तनं नराः । ते यान्ति नरकं घोरं तेन पापेन कर्म्मणा ॥ इति । एतेषाञ्चापराधानामनन्यप्रायश्चित्तत्वमेवोक्तं तत्रैव— नामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि च ॥ इति । अत्र सत्प्रभृतिष्वपराधे तु तत्सन्तोप- [illegible] सन्ततनामकीर्त्तनादिकं समुचितम्, अम्बरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् । उक्तञ्च नामकौमुद्याम्—महदपरा- धस्य भोग एव निवर्त्तकस्तदनुग्रहो वा इति । तस्मादुगत्यन्तराभावात् साधूक्तम्—एतन्निर्व्विद्यमानानामिति । तत्राभास एव [illegible] ॥ ११ ॥

किमित्यस्य टीकायां माशुच इति माशोचीरित्यर्थः । श्रेयसे नामकीर्त्तनादिरूपाय ॥ १२ ॥

———

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

[illegible] वेदवत्सामग्रीश्रवणात् [illegible] कार्यमेव अतो नानेन केवलेन निर्द्धारितोर्थः प्रतिपत्तुं शक्य इत्याशङ्क्याह । परिनिष्ठि- तोपीति । ममाध्ययनं न बालवत् किन्तु विचा[illegible] यमताधिकारएव मर्यादाचारितः । ममेदं कर्त्तव्यं नवेति । तत्र सर्व्वस्याप्यध्ययनस्य [illegible] भावपरं विषयत इत्यादिश्रुतिभिः आत्मप[illegible] गुणातीत समाधिरूपं निर्त्यस्थितः सन् भागवतस्य च रसमनुभूय तस्याप्राकृतत्वं ज्ञात्वा यथा [illegible] लीनः न समाध्यवस्थां भजते तथा ब्रह्मरसादप्यधिकरसत्वात् गुणैर्गृहीतचेताः आख्यानमधीतवान् । आकरस्था- योरसः [illegible] स्थित [illegible] आगतान् प्रतिनवात्मानं तथा प्रकाशयति । किन्तु । केवलधर्मरूपेण प्रकटपुत्पात्रस्थपेयजलेच दर्शनात् । [illegible] प्रकटोजातः तदा तस्यां लीलायां योरसः सएव रसो ब्रह्मणि । परंनाभिव्यक्त इति निर्भ्रयर्थकितं तदाग्रायार्थीयते तदपेक्षयापि इदानीमेव रसः कथं न पीयत इति विचारसहितलीलया गृहीतचित्तत्वं । इममर्थमाह । उत्तमश्लोकेति उत्तमैः श्लोक्यत इति [illegible] गुणकरणादेव भगवतस्तोत्रमविजनैः [illegible] पि तस्माद्यःकश्चन भगवत्स्वरूपात्मकोरसः निरतिशयत्वेपिसाति- [illegible] इतियेषा मित्युक्ते लीलाश्रोतव्येति निर्द्धार्यमवाश्रोतव्य रसाभिज्ञेन आख्यानमधीतमित्यर्थः । राजर्ष इति- सम्बोधनम् यथा [illegible] राजत्वरसस्फूर्तिरधिका । ज्ञानमिश्रत्वात् । मान्यताधिक्याच । तथेदमपीतियुक्तौसम्मतिरुक्ता अनन [illegible] ॥ ९ ॥

अतस्त्वाद्यपीदेव श्रोतव्यमितिकीर्तन रसास्वादनार्थं परिभ्रमता मया तादृशो भवानुपलब्धः । अतस्तदहन्तेऽभिधास्यामीत्याह । तदह- [illegible] तत्सर्वोत्कृष्टं [illegible] रसभूतं [illegible] कीर्तनरसमेषु [illegible] तुभ्यं अभिधास्यामिकथयिष्यामि अथवा वेदवत्संबन्धिभूतं तत् [illegible] अहमेव [illegible] मिधास्यामीत्यर्थः । [illegible] निष्कारयाम्यप्रत्यापयित्वापुनःपानभवात् । इदं तुगजेपूपलब्धं अभितश्वपानसिद्धमादिरूपं द्वैपायनपदस्याप्येतत्सूचकत्वं द्विर्गताआपोयत्रेतितद्भवत्वात् । अन्तर्बहिःपातउक्तः अन्तः स्वबाह्यस्ययोश्चगुणयोः अतःसूक्ष्मरूप भागवतद्वयं बहिःस्थितं भगवती [illegible] च प्रकटितं अन्तःप्रवेश्य पुनःप्रकटितवान् । अतएव

[illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

[illegible]

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

[illegible]

मुहूर्तान् सम्प्रमुमुक्षूणां मतेष्वानमयं शुभम् ॥ १३ ॥
तवाप्यतर्हि कौरव्य सप्ताहं जीवितावधिः ।
उपकल्पय तत् सर्वं तावत् साम्परायिकम् ॥ १४ ॥
अन्तकाले तु पुरुष आगते गतसाध्वसः ।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥ १५ ॥
गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने ॥ १६ ॥

भाषा टीका।

नैर्गुण्यमें परिनिष्ठित होकरभी उत्तम श्लोकलीला से गृहीतचेतामें हे राजर्षे ! जो आख्यान पढ़ा था ॥ ९ ॥

वहमें तुम्हारे आगे कथन करूंगा तुम महापुरुष श्रीविष्णुके भक्त हो। जिस आख्यानमें श्रद्धा करनेवाले पुरुषकी मुकुन्द भगवानमें अहैतुकीमति होती है ॥ १० ॥

हे नृप ! निर्वेदप्राप्त मुमुक्षुओंको कामियोंको और योगियोंको यह हरि का नामानुकीर्तन ही अकुतोभय साधन और कल्याणकारी किया है ॥ ११ ॥

प्रमत्त पुरुषके अलक्षित बीतगये बहुत वर्षोंसे भी इस संसार में क्या है। वह मुहूर्त भी श्रेष्ठ है जिसमें अपने कल्याण की चेष्टा की जाय ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

अङ्गाङ्गी हि देवपक्षे स्थित्वा दैत्यानजयत्। ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते तेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति। ततो देवैरुक्तं नृप मुहूर्तमात्रमस्तीति ततोऽतिशीघ्रं देवैर्दत्तेन विमानेन भुवमागत्य हरिं शरणं गत इति। (यतः इयं स्वर्गभूमी रजोऽप्रधाना कर्मभूमिः पृथ्वी) ॥ १३ ॥

तव तु एतर्ह्यपि इदानीमपि। तावदिति तावता कालेन साम्परायिकं पारलौकिकं साधनं सम्पादय ॥ १४ ॥

तत्र वैराग्यं तावदाह अन्तकाले इति। गतसाध्वसः मृत्युभयशून्यः। असङ्गो नाम ममासक्तिः तेन शस्त्रेण स्पृहां सुखेच्छाम्। तं देहमनु ये पुत्रकलत्रादयः तेष्वपि स्पृहां छिन्द्यात् ॥ १५ ॥

किञ्च गृहादि प्रव्रजितः निष्क्रान्तः गृहे स्थितस्य पुनरपि आसक्तिसम्भवात्। तत्राष्टाङ्गयोगमाह। धीर इति ब्रह्मचर्यादियमोपलक्षणम्। पुण्यतीर्थेति स्नानादिनियमोपलक्षणम्। आसनमाह शुचाविति। विविक्तं एकान्ते विधिवत् कुशाजिनचेलैः क्रमेण विरचिते ॥ १६ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी।

तस्माद्योगेति। योगस्याष्टावङ्गानि यथा, पातञ्जले—यम-प्राणायाम-प्रत्याहार-धारणा-ध्यान समाधयोऽस्यैवाङ्गानि। तत्र अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। स्थिरसुखम् आसनम् इति ॥ १६ ॥

श्रीमद्राघवाचार्यकृतभागवतचन्द्रिका।

निर्दिष्टस्य मुहूर्तस्य श्रेष्ठीयत्वकत्व इतिहासमाह। अङ्गाङ्गीति। अङ्गाङ्गीहि देवपक्षे स्थित्वा दैत्यानजयत्ततः प्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तेनोक्तं प्रथमंममायुः कथ्यतामिति। ततोदेवैरुक्तं मुहूर्तमात्रमस्तीति ततः शीघ्रं विमानेन भुवमागत्यहरिंशरणंगत इति नवमस्कन्धे अम्बरीषः। अङ्गाङ्गीनामराजर्षिरायुष्यत्वं एतावत्तांज्ञात्वा इदमस्मिंल्लोके सर्वदेहादिष्वात्मात्मीयत्वाद्यभिमान मुत्सृज्यहरिंवाऽभयंभय-मधिगतवान्नारायणाश्रमः ॥ १३ ॥

अथैतदनुबन्धेनाह। तवेति अथित्वर्थः तवत्वित्यर्थः हे कौरव्य ! तवतुएतर्हीदानीमपिजीविताविधि जीवितस्यावधिः परिमाणं सप्ताहं सप्ताहिनवर्षन्तावत्। तावतासप्ताहैनकालेन सांपरायिकं परलोकहितं एतत्सर्वंउपकल्पयसम्पादय ॥ १४ ॥

अथतैरुक्तमाह अन्तकालइति अन्तकालेदेहावसानकाले आगतेप्राप्तेसतिपुरुषः गतसाध्वसः निवृत्तभयः असङ्गोऽनासक्तिः। सएवशस्त्रं तेन हैहेयैदेहमनुयेमनुसृत्यचेर्ष्यमाणा अपत्यकलत्रादयो देहानुबन्धिनस्तेषु च स्पृहामात्मात्मीयत्वाभिमान प्रयुक्त भोगेच्छां छिन्द्यात् ॥ १५ ॥

[illegible] धीरःजितेन्द्रियः अनेन ब्रह्मचर्यादिलक्षणो-पलक्षणः। पुण्यतीर्थेजलेषु आप्लुतः स्नानादिनाह नियमकः शुचौपरिशुद्धेविविक्तंएकान्तेविधिवत्कैलाजिनकुशोत्तर इतिशास्त्रक्रमेणकल्पिते आसनेविधिवदासीनः। ऋजुकायत्वकस्तिकादीन तिक्रम्योपविष्टः अनेनासनङ्गपांगमुक्तम ॥ १६ ॥

[redacted] "त्यागो विहित..." इत्यभिधानं नमस्यपुरुषार्थरूपहरि-
गतवानितिचा ॥ १३ ॥

तवतदपेक्षयानेकायुङ्मानुत्तापः कार्यइत्यतस्तत्सर्वंहरिचरणारविन्दस्मरणाविषयत्वेनकल्पयेत्याह तवापीति एतर्हीदानीं सप्ताना-
समाहारः सप्ताहंजीवितावधिरायुष्यस्येयत्ता यस्तावदायुः तत्सर्वमपिसम्बन्धरायैवैकालमुक्तिकैकलिस्तत्सम्बन्धियथाभवतितथा तावन्त
कालंहरिचरणस्मरणगोचरमुपकल्पय भागवताकर्णनंतात्पर्यकुर्वित्यर्थः "साम्परायकुतूहलाप्रयागामिकालयां"रितियादवः मरणकाल
यापत्कालेहरिचरणस्मरणंयथाभवतितथातावन्तंकालंभागवताकर्णनंकुर्वितिचा ॥ १४ ॥

मरणकालंज्ञात्वाहरिस्मरणाभिरुक्तौवैराग्यप्रथमसाधनमिदमाह अन्तकालइति अन्तेकाले इहलोकप्रयुक्तभयरहितः पुत्रादिस्नेहलक्षण
सङ्गः तद्विरोधिविवेकज्ञानलक्षणोऽसङ्गस्तेनशस्त्रेणातंदेहमनुयेत्पुत्रादयस्तुचरपृहांश्चिन्त्यादित्यन्वयः ॥ १५ ॥

अथकिंकर्तव्यमत्राह गृहादिति गृहात्प्रव्रजितः संन्यासलक्षणवैराग्यंप्राप्तः धीरः प्रतिबन्धकानिवर्तनसमर्थः पुण्यतीर्थजलाप्लुतोभाग
वतादिपुण्यशास्त्रजलस्नातस्तथागङ्गादिपुण्यतीर्थजलस्नातोनिर्भूतबाह्यान्तर्मलः सन् शुचौशुचिविविक्तेपुंजनसङ्गरहितेदेशेनात्युच्छ्रितानाति
नीचमितिविधिवत्कल्पितासनमासीनोभवेदितिशेषः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

खट्वाङ्ग इत्यस्य टीकायां भुवमागत्येति स्वर्गमहाविषयदर्शनेन चित्तविक्षेपात् ॥ १३ ॥

यत्तु पूर्वम् इतिलोकनमर्यादं तक्षकः सप्तमेऽहनि इति वटुवचनं एवेदानीमपि सप्ताहं जीवितावधिरिति शुकवचनं तदुपायमपि
श्रीभगवतैव तत्तदागमनस्य शीघ्रघटनया घटत इति ज्ञेयम् । तत् सर्वं श्रवणकीर्तनादिरूपं श्रोतव्यादीनि राजेन्द्र इत्यादिपुरुषेण स्पष्टेन
न ज्ञातोऽन्यः शिवः पन्था इत्यादि वक्ष्यमाणेन च ॥ १४ ॥

अतएवान्तकाले इत्यादि मध्यमं प्रकरणं केषाञ्चिदन्येषामेव साधनत्वेन ज्ञेयम् ॥ १५ ॥

गृहादिति युग्मकम् ॥ १६—१९ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्रदृष्टान्तमाह खट्वाङ्गेनामेति खट्वाङ्गेनामादिलीपः देवपक्षपातीभूत्वादैत्यान् हत्वादेवैर्वरंग्रहीत्युक्तः । आयुषः परिमाणम् ज्ञात्वात्वत्तु
दुसारेण वरंप्रार्थयिष्यामीति विचिन्त्यआयुः परिमाणम् पृष्टवान् । ततस्तद्वचनात् मुहूर्तमात्रञ्ज्ञात्वाभूमौसमागत्यसर्वम् परित्यज्यभगवद्रू-
पम् हरिस्मरणेनगतः सन्ततम्प्राप्तवानित्यर्थः । तस्मात्कालभूयस्त्वनापेक्षतइति भावः ॥ १३ ॥

तवतुमुहूर्त्तानाम् शतद्वयमांधकम चास्तिएकेनापि मुहूर्तेनकार्यम् सेत्स्यति । तथापि पूर्वमस्माभिरुक्तम् अवश्यम् यावद्यावधिकमीप्सा-
युक्तभगवद्विषयकम् । उपकल्पयेत्याह । तवापीति । यथातस्य ज्ञातमायुः एवंतवापीति एवंनहीदानीमपि जीवितावधिः सप्ताहम् सप्ताह-
मात्रजीवितावधिः अतः तावत्पर्यन्तम् सर्वमेवपरलोकसाधनम् कल्पयस्वसम्पादय । सर्वंपरित्यज्यभगवत्कथाम् शृण्विवर्तेयः । केचनाग्रे-
वक्ष्यमाणमाहुः । तत्प्रमेयविरोधादुपेक्ष्यम् ॥ १४ ॥

एवंसपरिकरम् प्रथमप्रश्नस्योत्तरमुक्तम् सर्वात्मनाकिङ्कर्त्तव्यमित्यस्य । अन्तेनारायणस्मृतिरिति च गतवानमयम् हरिमिति च कथना-
त्याम् सर्वमुपकल्पयेत्यनेन च अन्तकालकर्त्तव्य मुपदिष्टमेव । सर्वात्मनासर्वसमयेतदेव कर्त्तव्यंयतः । तथापि राज्ञश्चेदृयंतस्योत्तरम्
ज्ञेयमित्याकाङ्क्षास्यात्तदस्माभिरुच्यमानम् श्रवणञ्चसम्यग्भासतेति विशेषेणान्तकालकर्त्तव्यम् वदन्पूर्वोक्तस्य श्रवणस्य फलोपकार्युक्त
राज्ञेमननंनिदिध्यासनंनिरूपयति । अन्तकालइति । मननञ्चाममुक्तिभिरनुचिन्तनम् । तत्रभगवान् श्रोतव्यइत्युक्तम् तत्रकोभगवानितिकाङ्-
क्षायाम् सर्वात्मेत्यादि पदैः सर्वपुरुषार्थरूपः सर्वफलसाधकः सर्वमेवभगवान् भवति । तत्रकथम् सर्वंखल्विदंभगवानित्यत्रैव
आत्मैवेदं सर्वम् ब्रह्मैवेदं सर्वम् अहंहरिः सर्वमिदञ्जगदिति वाक्यानाम् प्रमाणानामपि लौकिकयुक्त्यपेक्षायाम् सर्वस्यापि जगतः
भगवच्छरीरेसन्निवेशउच्यते । "पुरुषश्च भगवानित्यभिवादं पुरुषोहवैनारायणोऽकामयत" इति श्रुतेः । पुरुषएवेदंसर्व"मिति च । तत्र सर्वस्यापि
बाह्यपुरुषशरीरेनिवेशनम् क्रियते । तावत्सर्वंत्वम् पुरुषस्य नमन्यते । अतः पुरुषशरीरेसन्निवेशनम् कथयति किञ्च पुरुषस्यशरीरत्वंसर्वेण
निवेशितमपि यत्तनुभवेनविसम्वादीस्यात्तदापि नमन्येत । अतस्तद्ज्ञानरूपेण वदतिध्यायमानस्य कदाचित्साक्षात्कारोभवेत् तदाचसर्वात्मनासर्वं
सर्वम् पश्यन्निः सन्निधोभवेदिति मननन्निदिध्यासनावधिसाक्षात्कारफलकम् तत्पनिरूपणार्थं मुपदिशन्नुपाख्यिकोपिदोषः परिहरणीयइति
न्यायेन कोवेदान्तकालेस्मरणं क्रियमाणे व्यासङ्गान्तरमपि भवेत् । तदातदेवभवेदिति तदोपपरिहारार्थम् चित्तशुद्धिरेवकरणम् योगमुखमुखेन
कृतध्यानविषयत्वेन भगवत्स्वरूपमपि वदन् अन्तकालकर्त्तव्यप्रश्नोत्तरमध्याह् । कुतस्तदस्तवैतत्कर्त्तव्यमिति पक्षम्व्यावर्तयति । पूर्वपक्षकृत
मेवकिञ्चिदुच्यतइति वापक्षम् व्यावर्तयति । अन्तकालोमरणकालः कालस्यान्तोवार्थसोर्द्धस्य राजवन्तत्पदिवत् पदनिपातः । अन्तकालएवान्त
कालः समागतइतिज्ञाते प्रथमसाधनम् गतसाध्यवसइति तदर्थंपूर्वोक्तम् कर्त्तव्यम् तवनुभवकृतेन वैराग्येण केन हेतेनमनुष्येणकृत्स्ने
नोयेगृहादयः तेषुस्पृहामभिलाषाम् ममैतेभवन्तुएतत्कृतोपकारादेति क्रियाम् । व्यङ्क्तःकरोतेरपेक्षायांशब्देन ह्यम् द्वितीयम् ॥ १५ ॥

ततोगृहात् प्रव्रजेत् सन्यासंगृहीत्वागच्छेत् । तृतीयम् । ततःशीतादिबाधायान्धैर्यंश्चतुर्थम् । एतेयमाउक्ताः । पञ्चममाह । पुण्यतीर्थे
जलाप्लुतइति । पुण्यंजलमुत्तमम्यत्र भवतीति तीर्थपदम् । पुण्यंपवित्रंकाम्यतीर्थपदिरुच्यते । पुण्यंकलम् तीर्थंकार्यं । तीर्थंपवित्रंवा ।
"तीर्थेहितेनाम्प्रवेशय"मिति श्रुतेः । आप्लुतः सम्यक्स्नातः आसनमाह । शुचौपवित्रे विविक्ते एकान्ते विधिवत्कल्पितासनेकल्पितं आसनेमासीनः अभ्यसेदिति सम्बन्धः ॥ १६ ॥

मना यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥
निगृह्णीयादिषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ।
मनः कर्म्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥
तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ।
मनो निर्व्विषयं युक्त्वा ततः किञ्चन न स्मरेत् ।
पदं तत् परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥
रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ।
यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तत्र जडभरतचरितं प्रमाणयति । जडभरतो हि देवपक्षे स्थित्वा दैत्यानजयत् । ततः प्रसन्नैर्दैवैर्वरं वृणीष्वेत्युक्तस्तानाह प्रथमं यावन्ममायुः कल्प्यतामिति । तैरुक्तं मुहूर्त्तमात्रं तत् । ततस्तूष्णीमेव शीघ्रं भुवमागत्य हरिं शरणं गत इति ॥ १३ ॥

तथापि तव तु । अत एतस्मिन्नपि समये यत् साम्परायिकं पारलौकिकं साधनं तत्तावत् सर्व्वम् उपकल्पय कुरु ॥ १४ ॥

तत्र म्रियमाणस्य किं कर्त्तव्यमिति प्रश्ने योगेनैव स्वेच्छया देहं परित्यज्य सुखेनैव ब्रह्मपदं प्रवेष्टुं योगाभ्यास एव कर्त्तव्य इत्याशयेनाभ्यासानां तन्महासदःस्थानां केषाञ्चिन्मतमष्टाङ्गयोगं क्षमतस्य शुद्धभक्तियोगस्य पुनरपि द्वितीयाध्यायान्ते वक्तव्यस्यात्कर्षार्थमाह अन्तकाले इति असङ्गोऽनासक्तिः । देहं तथा तं देहम् अनु ये पुत्रकलत्रादयः तेष्वपि ॥ १५ ॥

धीर इति ब्रह्मचर्य्यादियमः प्रथमः । पुण्ययतीर्थ इति स्नानादिर्नियमो द्वितीयः । विधिवत् कुशाजिनचैलैः क्रमेण कल्पिते आसने आसीन इत्यासनं तृतीयम् ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

जडभरतो नामराजर्षिर्देवमुखान्मुहूर्त्तमात्रं तवायुरस्तीति आयुषः । इयत्तामेतावत्तांज्ञात्वासर्वं राज्यादिकमुत्सृज्यतस्मादेवविदितान्मुहूर्त्ताद्धरिमग्नकरूपसाधननिष्पत्तिकालादभयंहरिं प्रपन्नवान्प्राप्तः ॥ १३ ॥

हेकौरव्यतवतुपनर्हिइदानीमपि सप्ताहर्जीवितावधिरस्ति । तावतासप्ताहेनयत्साम्परायिकम् परलोकसाधनम् तत्सर्वमुपकल्पयस्वाचर ॥ १४ ॥

तत्सर्वपरित्यागपूर्वकं सपरिकरमष्टाङ्गयोगन्तावदाह । अन्तकालेइति सार्द्धैः सप्तभिः । देहान्तकालेआगतेआसन्ने गतसाध्वसः निरस्तमृत्युभयः असङ्गशस्त्रेण वैराग्यखड्गेनदेहन्देहमनुयेदेहानुबन्धिनस्तेषु च स्पृहामिच्छामासक्तिंछिंद्यात् ॥ १५ ॥

गेहान्नयोगाधिरोधिजनालयात् । प्रव्रजितोनिर्गतः धीरोविजितेन्द्रियः ब्रह्मचर्य्यादेर्यमस्योपलक्षणमिदम् । पुण्यतीर्थजलाप्लुतः । इत्यनेन स्नानादिनियमोदर्शितः आसनाख्यमङ्गमाह शुचाविति ॥ १६ ॥

भाषा टीका ।

जडभरत नामक राजर्षि अपनी आयुष्यकी इयत्ता जानकर मुहूर्त्तमात्रमें सब छोड़कर अभय हरि भगवानको प्राप्त हुए ॥ १३ ॥

हे कौरव्य ! तुम्हारे जीवनका तो अभी सप्ता[illegible] अवधि है तब तक तुम समस्त पारलौकिक कार्य्य सम्पादन करो ॥ १४ ॥

पुरुष को उचित है कि जब अन्तकाल आ[illegible] साध्वस होकर "अर्थात् मृत्यु का भय छोड़ असंग शस्त्र से देहकी और देहके अनुगत स्त्री पुत्र धन आदिक स्पृहा को छेद[illegible] ॥

धीर सुसंयत होकर घर से निकल कर चलाजाय [illegible] घर में रहने से फिर स्त्री पुत्रों में आसक्ति होना सम्भव है । पुण्य तीर्थ जल में स्नान कर पवित्र एकान्त देश में विधिवत् कल्पित आसन पर स्थित हो ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अथ प्रथमे प्राणायामे वक्तुं जप्यमाह । त्रिवृत् त्रिभिरोंकारादिभिर्वेष्टितं ग्रथितं ब्रह्माक्षरं प्रणवं मनसा अभ्यसेत् आवर्त्तयेत् । मनसा इन्द्रियव्यापाहारं कर्तुं प्राणायामेन मनोनियमनमाह मनो यच्छेत् । ब्रह्मबीजं प्रणवम् अविस्मरन्नेव जितश्वासः सन् ॥ १७ ॥

अथाहारमाह । निगृह्णीयात् । अक्षात् इन्द्रियाणि । निश्चयात्मिका बुद्धिः सारथिर्यस्य सः । धारणामाह मन इति । पुनश्च कर्म्मभिः तद्वासनाभिः आक्षिप्तम् आकृष्टम् । शुभार्थे भगवद्रूपे ॥ १८ ॥

ध्यानमाह तत्रेति । एकमेकं पादाद्यवयवम् । अव्युच्छिन्नेन समानरूपावयियुक्तेन । आश्रयविशेषे सामान्यतश्चित्तस्थिरीकरणं धारणा अवयवविभागेनया तदाश्रयं ध्यानमिति भेदः । समाधिमाह । निर्व्विषयं मनः युक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानन्दमात्राकारं ब्रह्मेत्यर्थः । प्रसीदेति उपशाम्यति ॥ १९ ॥

ननूपशान्तं पुनरपि क्षोभे सति धारणामेव स्थिरीकुर्य्यादित्याह । रजसा आक्षिप्तं तमसा विमूढं चीर्यं मनो निरुन्ध्यात् । ततकृतं रजस्तमोजन्यं कृतम् ॥ २० ॥

अपगमेति । प्राणायामो त्रिविधः [illegible] । उक्तं चान्यैः—
मन्त्रो मन्त्रजापेन निगन्तो मात्रया मतः [illegible] । प्राणायामः इति पातञ्जलसूत्रम् ॥ १७ ॥

इत्याहारेति । स्वविषयासम्प्रयोगे चित्तस्वरूपानुकारे इन्द्रियाणां प्रत्याहारः (पातं । विभूति । ५४) ॥ धारणामाहेति । देशबन्धश्चित्तस्य धारणा (पातं । विभूति । १) ॥ १८ ॥

ध्यानमाहेति । प्रत्ययैकतानता ध्यानम् (पातं । विभूति । २) ॥ समाधिमाहेति । अर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः (पातं । विभूति । ३) ॥ १९—२६ ॥

श्रीमद्वाचस्पतिमिश्रविरचित भागवतसन्दर्भका ।

प्राणायामस्यजपगर्भत्वात्तावज्जप्यमन्त्रमाह । अभ्यसेदिति । त्रिवृत्प्रणवाद्यमकारोकारमकारैर्मात्रैर्वृत्तेनैर्यस्मिन्नक्षरत्रयप्रथितमित्यर्थः आक्षरं ब्रह्मप्रतिपाद्यमक्षरं प्रणवम्मनसाऽभ्यसेदावर्तयेत् । जितश्वास जितप्राण ब्रह्मबीजं ब्रह्मवाचिकम् स्मरन् स्मरेत्तेनमनोयच्छेत्प्रियच्छेत् दशप्राणायामरूपमङ्गमुक्तम् ॥ १७ ॥

इन्द्रियप्रत्याहारमाह । नियच्छेदिति । विषयेभ्यः शब्दादिभ्यः मनान् श्रोत्रादीन्द्रियाणिबुद्धिः सारथिर्यस्यसतथाभूतः प्रैग्रहभूतेनमनसायच्छेत "बुद्धिन्तुसारथिम्विद्धिमनः प्रग्रहमेवच" तिश्रवणात् । धारणामाह । मनइति । पुनश्चकर्मभिस्तद्वासनाभिराक्षिप्तम्विक्षिप्तंमनःशुभार्थेशुभाश्रयेमनवद्रूपनिजवाचकत्वाद्बुद्ध्याधारयेत्स्थिरकुर्यात् शुभाश्रयेमनसोऽवस्थापनं धारणा शुभाश्रयस्यपुनः पुनः चेतनध्यानं । तस्यैवजातीयप्रत्ययान्तराव्यवहितत्वं समाधिरितिभेदः ॥ १८ ॥

ध्यानमाहतत्रेति । अस्थुच्छिन्नमनसमप्रक्षुभाश्रयार्थयुक्तेन । चेतसाचित्तेन । एकावयवं प्रधानाङ्गं सुखाकारंध्यायेत् । अनेनार्थेनचित्तामरः पूर्वमाविस्वं सिद्ध पूर्वध्यानाशक्तएकावयवं स्मरेदित्यर्थः । समाधिमाह । मनइति । निर्विषयं बाह्यविषयानुभवरहितम्मनोयुक्तासमाधायकिञ्चनब्राह्मविषयार्थकं तत्स्मरेदित्यर्थः । आत्मन्संप्रलीनत्वाच्चकिञ्चित्स्मर्तुंन्द्रष्टुं वाक्षमनइतिचार्थः ॥ १९ ॥

शुभाश्रयरूपमाह । पदमिति । यत्रमनःप्रसीदति । यस्मिन्स्वरूपेचिन्त्यमानेममरागाद्यकलुषतम्भवतितदेवविष्णोः परमम्पदंब्रह्मस्वात्परमंसर्वोत्कृष्टंस्वरूपमित्यर्थः । कथञ्चिद्रागादिकालुष्यसम्भावनामाशङ्क्याह रजस्तमोभ्यामिति रजसाआक्षिप्तान्विक्षिप्तंतमसाविरूढमारमनः स्वस्यमनः धारणायायच्छेत् । धारणामाहात्म्यमाह याधारणातःकृतरजस्तमोभ्यांकृतम्मलंरागादिकं हार्म्मनिवर्त्तयति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

स्थिरासनस्थकृत्यमाह अभ्यसेदिति रेचकादिक्रमपरम्परयाप्राणायामेनजितश्वासः प्राणप्राणप्रसादः मनोयच्छेत् स्वयंकुर्यादेवंजितमनस्कः सन् बीजंसर्वजगद्बन्धुजकं शुद्धंपरब्रह्मानुस्मरन् अकारादीन्त्रीन्वर्णान्वहतीतित्रिवृदक्षरंब्रह्मवाचकत्वात्सर्वगतंपरमुत्कृष्टमोंकारं मनसाऽभ्यसेदावर्तयेदित्यन्वयः ॥ १७ ॥

आप्यमुक्ताध्यानप्रकारमाह नियच्छेदिति बुद्धिःसारथिर्यस्यसतथामत्पुरुषोजितेनमनसाऽग्रानिन्द्रियाणिविषयेभ्योनियच्छेत्प्रत्याहरेत् प्रत्याहृत्यचसंस्कारवशाद्बहिर्मुखतयाकर्मभिराक्षिप्तम्मनः स्वधियासारथिनाशुभार्थेपरममङ्गलार्थेहरौधारयेदित्यन्वयः ॥ १८ ॥

एवं हरौनियतचेतसोयोगिनोध्यानाभ्यासप्रकारमाह तत्रेति तत्रयुगपत्सर्वावयवध्यानाशक्तौ विषयैरभ्युच्छिन्नेनाखण्डितेनचेतसाएकावयवमेकैकावयवं श्रीपादादिलक्षणंध्यायेदेवमनायासेनस्मरणविषयंकुर्यात् तत्पारिपाकमाह मनइति एवमभ्यासपाटवेनयुगपत्सर्वावयवस्मरणक्षमयेः संस्तनोऽनन्तरंनिर्विषयंविषयेभ्योनिर्गत्यस्थितंमनस्तस्मिन् हरौसर्वावयवव्यापितयायुक्तंनियुज्य यत्रमनःप्रसीदतिनिर्वृतशयंसुखंलभ्यते तद्विष्णोः परमम्पदं समग्ररूपमेवस्मरेत्ततोन्यत्किञ्चिन्नस्मरेदित्यन्वयः ॥ १९ ॥

अवयवध्यानोपायमाह रजस्तमोभ्यामिति रजसाऽक्षिप्तमितस्ततोविषयैराकृष्टं । तमसाविमूढंकृत्याकृत्यज्ञानशून्यं आत्मनःप्रस्य । मनः । धारणायातैलधारावदभ्युच्छिन्नयास्मृत्यायच्छेद्विषयेभ्यआवृत्यध्यानमग्नं [illegible] धारणातःकृतरजस्तमोभ्यामाक्षिप्तंरागादिक्लेशहन्तितयेत्यन्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ ।

अतिविक्षिप्तस्य मूढचित्तस्य यस्य तु साक्षच्छ्रीभगवति धारणा न सम्पद्यते [illegible] प्रपञ्चमेव एतद्धारणामयत्वेन सम्पादयति रज इत्यादिना ॥ २० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

प्राणायाममाह । अभ्यसेदिति । सबीजप्राणायामेनाप्यम्बायुः स्थिरोभवति । पापेनचवायोश्चलनं । अतस्त्रिवृद्रूपाक्षरं अकारोकारमकारैर्वृत्तं सद्भूतत्रयात्मकमेकं ब्रह्मवाचकं निर्विशार्थंब्रह्मरूपपरं । इदापश्यन्तीमध्यमावैखरीप्रकारेणप्रथमं अकारोत्पन्नं तद्भ्यसेत् । ततवायुजयोभवति । ततः प्रत्याहारमाह । मनोयच्छेदिति । जितश्वासस्यैवमनोविषयगं । श्वासजयब्रह्मबीजरेचकपूरकबीजमनुस्मरंजितश्वासः मनोयच्छेदितिसम्बन्धः ॥ १७ ॥

प्रत्याहारंमनसश्चेन्द्रियाणां अन्योन्यहेतुहेतुमद्भावेनभेदं निरूपयति । नियच्छेदिति । मनआदीन्द्रियाणिविषयेभ्योनियच्छेत् । विषयाणां दुष्टत्वबुद्धिर्मनसेन्द्रियनियमेसारथिः सहायः । पूर्वंप्रणवस्य क्रियमाणस्यैव प्राणायामेन अधुनाकर्त्तव्यविशेषाभिधानात्प्राणायामेन [illegible] आक्षिप्तंमासमन्तात् विषयेभ्यादूरीभूतं विषयज्ञानानुकूलमितियावत् ताहशम्मनः शुभरूपेअर्थेविषयेकर्त्तव्यतयाविषयीकृतेशुभरूपेविष्णुविग्रहे [illegible] स्थिरंकल्पयतप्रसर्वावयवस्थिरम्मनः धारणाकुर्यात् । सर्वावयवेषु [illegible] धारणाभ्यासेनेति भावः ॥ २० ॥

---

* उच्चैरुच्चारणाद्धारणार्थमनसेति ॥

[illegible] अभ्युच्छिन्नेन । पूर्वध्यानावयवसंश्लिष्टेन । अनेन [illegible] । एकमन्यवयवं [illegible] । एवं ध्यानाभ्यासेन यदा मनः विषयवासनात्यजति तदापि विषयेच्छाप्रेरितस्वासर्वथा निर्विषयं युक्त्वा [illegible] । ततः किमपि न स्मरेत् । योगसाधित प्रयत्नेनचित्तं चिरञ्जयतिष्ठेत् । ततोयद्भवतितदाह । पदमिति । एवञ्चिन्तनिरोधेक्रियमाणोताश्चित्तं स्वयमेवप्रसीदति । ध्यानाकारेणपरि [illegible] । तस्यचरित्राभस्वयमाधारस्तद्विष्णो परमम्पदं । अन्यथास्यलाम्तरेनिरुद्धन्तदनित्यंकिकुर्यात् विधीदेद्वा । अतोयत्रनिरुद्ध प्रसीदतितदाधारस्तामभ्यांदेवप्रसीदतीतिप्रसादाधारोभगवत्पदमेव चित्तप्रसादेवप्रकाशतेतज्जीवात्मस्वरूपं पुरुषोत्तमस्वरूपम् । "तस्या शिखायामध्येपरमात्माव्यवस्थित"इतिश्रुतेः । वह्निशिखात्वेनाप्युच्यमानाजीवकलैव । अथवा । अक्षरस्यभगवत्पदत्वात् तदंशोजीवोपि भगवत्पदं । एवंयावत्कालं प्रसन्नं मनस्तिष्ठति । तावत्तथैवस्थातव्यम् ॥ १९ ॥

रजः सत्त्वन्तमश्चैवेतिन्यायेनकारण्यीभूतं रजस्तमोवाकालप्रेरितं सतूमनोविक्षिपतिविमूढम्वाकरोति । तदायोगबलेनान्येषामपिमनांसि भगवत्पदेभासन्ते । सर्वेषाजीवानान्तत्रैकीभावात् ॥ तत्राभ्यमनोविक्षेपेनकिञ्चित्कुर्यात् । यदात्वात्मनोमनः कर्म्मभिराक्षिप्तं रजः मूढम्वा कुर्यात्तमः । तदातद्दोषपरिहारार्थं पुनर्धारणयामनोयच्छेत् । तत्रनियमनसमयेवासनयारजोविषयान्युपस्थापयति । तमश्चनिद्रादिकं । तत्रोभयत्रापिधीरोभवेत् । तादृशीचधारणाकर्त्तव्या । यथारजोदोषस्तमोदोषश्चदूरीक्रियते । चण्डिकाशिवादिधारणान्यास्त्वर्थमुक्तं । हस्तियातत्कृतम्मलमिति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

त्रिभिरकारादिभिर्हृस्वसंज्ञं प्रथनं यस्य तत् ब्रह्माक्षरं प्रणवम् अभ्यसेत् आवर्त्तयेत् जपेदिति प्राणायामश्चतुर्थः । प्राणायामचतुष्टयेनैव प्रथमं मनः यच्छेत् निश्चलीकुर्य्यादित्यर्थः । ब्रह्मबीजं प्रणवम् ॥ १७ ॥

ततश्च नियतेन मनसा विषयेभ्यः शब्दादिभ्यः सकाशात् अक्षान् कर्णादीनिन्द्रियाणि नियच्छेदिति प्रत्याहारः । पञ्चमः । निश्चयात्मिका बुद्धिरेव सारथिर्यस्य सः । ततो मनः शुभेऽर्थे भगवद्रूपे धिया धारयेदिति धारणा षष्ठी । कीदृशं मनः कर्म्मभिराक्षिप्तं प्राचीनकर्म्मवासनातिप्राबल्यात् प्राणायामैरपि सम्यक् निश्चलीकर्त्तुमशक्यमित्यर्थः ॥ १८ ॥

तत्रैकावयवम् एकमेकं भगवदङ्गं ध्यायेदिति ध्यानं सप्तमम् । आश्रयविशेषे सामान्यतश्चित्तस्थिरीकरणं धारणा अवयवमात्रवत्वा तद्ध्यानं ध्यातृमिति भेदः । अभ्युच्छिन्नेन तस्मादवियुक्तेन । निर्विषयं विषयस्पर्शरहितं युक्त्वा संयोज्य किञ्चन ततोऽन्यत् किमपि न स्मरेत् । तदेव विष्णोः भगवतः पदं स्वरूपं ब्रह्मेत्यर्थः । यत्र सति मनः प्रसीदति उपशाम्यतीति समाधिरष्टम उक्तः ॥ १९ ॥

गुणवशात् पुनरपि क्षोभे सति धारणयैव स्थिरीकुर्य्यादित्याह । रजसा आक्षिप्तं तमसा विमूढं क्षीयं मनो निरुन्ध्यात् । तत्कृतं रजस्तमोभ्यां कृतम् ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

जपगर्भं प्राणायामन्दर्शयितुंतत्र आद्यन्ताधदाह । अभ्यसेदिति । त्रिवृतत्रिभिरकारोकारमकारैर्हृतं वर्तितं प्रवर्तितम् ब्रह्माक्षरञ्चिद्विच्छक्तिमद्ब्रह्मवाचकम् । तत्राकारोविशेषतः । शक्तिमद्ब्रह्मवाचकः । अक्षरद्वयंशक्तिद्वयवाचकम् समुदायोऽभेदपरोऽवयवाभेदपराः तदेवंसर्वभेदसूत्रं प्रणवं शुद्धं मनसाऽभ्यसेदावर्तयेत् । जितश्वासः जितप्राणः । ब्रह्मबीजं वेदसूत्रमविस्मरन्मनोनियच्छेत् । प्रणवजपाशक्त्याप्राणायामेनमनोनियमनंकुर्यात् । इतिप्राणायामउक्तः ॥ १७ ॥

इन्द्रियप्रत्याहारप्रकारन्दर्शयति । नियच्छेदिति । निश्चयात्मिकाबुद्धिः सारथिः सहायकारिणीयस्यसः । प्राणायामेननियमितं वश्यमनस्तेनविषयेभ्यः शब्दादिभ्योऽक्षान् श्रोत्रादीनीन्द्रियाणि नियच्छेद्वशवर्तीनिकुर्यात् धारणामाह मनइति कर्मभिः प्रणवजपाऽक्षमिवमनादिव्यापारैराकृष्टंमनः शुभेभगवद्रूपे । अर्थेआश्रयेणान्यतः धारयेत् स्थिरीकुर्यात् ॥ १८ ॥

ध्यानमाह । तत्रेति । अभ्युच्छिन्नेनसमग्र [illegible] तेनचेतसातत्र तस्मिन् रूपेविशेषतः एकमवयवं पादादिरूपमनुध्यायेत् । समाधिमाह । मनइति । मनोनिर्विषयं कृत्वाक [illegible] । उपशाम्यतीयं भगवद्रूपादपसार्यह्यतैवकेवलः । पादपद्माद्यालिङ्गनं कुर्यादतः किञ्चनकरणादिकमपि नस्मरेदित्यर्थः ॥ १९ ॥

आश्रयान्तरमपयति । पदमिति परात्तदसाधारणात्माधीः । यस्मिन् तत् यत्रमनः प्रसीदत्युपशाम्यति तद्विष्णोः । पदंस्वरूपम् । कदाचिद्रजस्तमोभ्यांक्षोभेसतिधारणयैवस्थिरीकुर्यादित्याह रजस्तमोभ्यामिति रजसाआक्षिप्तं तमसाविमूढमात्मनोमनः धारणयायच्छेत्स्थिरीकुर्यात् धारणमाहारस्यन्दर्शयति सपादेनरजस्तमोभ्यांकृतं मनोमलंरागादिकं हन्त्यपनयति ॥ २० ॥

भाषा टीका ।

शुद्ध विधान अर्थात् (अ) (उ) (म) से बने ब्रह्माक्षर (ॐ) कार को मन से अभ्यास करता मन को संयम करे । ब्रह्म बीज ओङ्कार को विस्मरण न कर अर्थात् ओङ्कार का जप करते२ श्वास को जय करे ॥ १७ ॥

बुद्धि सारथी वाला पुरुष मन से इन्द्रियों को विषयों से हटावे । और कर्म्मों से आक्षिप्त मन को बुद्धि के द्वारा शुभ अर्थ, श्रीभगवान् में धारण करे ॥ १८ ॥

अभ्युच्छिन्न अर्थात् एकाग्र चित्त से भगवान् के एकर अवयवको ध्यान करें । निर्विषय मनको श्रीभगवान् में योगकर फिर कुछ स्मरण न करे केवल श्रीभगवान् में ही मन को लगा । यही विष्णु भगवान् का परम पद है जहां निर्विघ्न होकर मन प्रसन्न होजाय ॥ १९ ॥

रजोगुण से आक्षिप्त और तमोगुण से विमूढ अर्थात् मनको धीर पुरुष धारणा ही से संयम करे । क्योंकि धारणा ही रजोगुण तमोगुण के मल को विनाश करती है ॥ २० ॥

ASIATIC SOCIETY, CALCUTTA.
ACC. NO.....DATE.....

यतः सन्धार्य[redacted]

आशु सम्पद्यते योग आश्रय भद्रमाश्रितः ॥ २१ ॥

राजोवाच । यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता ।
यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥

शुक उवाच । जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ।
स्थूले भगवतो रूपे मनः सन्धारयेद्धिया ॥ २३ ॥
विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ।
यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यतः यस्यां (धारणायां) क्रियमाणायाम् । भद्रं सुखात्मकम् आश्रयं विषयं पश्यतः तस्यैव प्रीतिर्भवति ॥ २१ ॥
यथा यत्र यादृशीति चेतिकर्त्तव्यताविषयतत्तद्विशेषाणां प्रश्नाः ॥ २२ ॥
यथैतस्यांत्तरं जितासन इति । विषयमाह स्थूल इति सार्द्धेन ॥ २३ ॥
विशेषः विराड्देहः अतिस्थूलानामपि स्थूलतरः । सत् कार्य्यमात्रम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

यस्यान्धारणायां सन्धार्यमाणायांधारणायां क्रियमाणायामित्यर्थः । भक्तिलक्षणोयोगः । प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते इत्युक्तलक्षणरूपोयोगः । भद्रंशुभमाश्रयंईक्षतः । ध्यातुराशुसम्पद्यतेसम्पन्नोभवति एतादृशमाहात्म्यवतीधारणेत्यभिप्रायः ॥ २१ ॥

एवं सङ्क्षेपेणाष्टाङ्गयुक्तेयोगउपदिष्टेपुनर्विस्तरबुभुत्सयापरीक्षित्पृच्छति । यथेति । धारणाविषयप्रश्नः । यादृशीतिधारणादशाविशेषप्रश्नः यथेतियत्नक्रमप्रश्नः ननुधारणायाएवदशाविशेषादीनां विशेषेणप्रश्नः ननुप्रधानभूतस्यध्यानस्येतिकश्चित् धारणापूर्वकत्वाद्ध्यानस्य धारणानुसारेणैवध्यानाच्च तत्प्रश्नैमैघगतार्थत्वात् एवमुत्तरेष्वनुसन्धेयं ॥ २२ ॥

तत्रैकस्मात्संयोगरूपचोदनाख्याविशेषाज्ज्ञानाशब्दादिभेदादित्यादिन्यायेनोपास्यब्रह्मरूपाणाज्ञानास्वेनोपासनानामपि नानात्वात्प्रथमतो गच्छरीरकस्योपासनमाहमुनिः जितासनइति जितासनः आसनकृतायासरहितः जितप्राणः स्ववशीकृतप्राणः जितसङ्गः जितान्तः करणः जितेन्द्रियः जितबाह्येन्द्रियः स्थूलेस्थविष्ठेभगवतोरूपेस्वीयंमनः सारथिभूतयाधियाधारयेत् ॥ २३ ॥

चिदचिदात्मकप्रपञ्चस्यभगवच्छरीरत्वकथनपूर्वकं तस्य धारणाविषयत्वमाह विशेषइति विशेषकार्यकारणाकारः पृथिव्यादिभूतमयप्रपञ्चः तस्यदेहः स्वकीयसां स्थूलतराणामपिमध्येस्थविष्ठः स्थूलतरः यत्रदेहेविश्वंसमस्तम्भूतम्भव्यञ्चभवच्चभूतभविष्यद्वर्त्तमानकालगोचरं समष्टिव्यष्ट्यात्मकम्पदार्थजातं दृश्यतेऽन्तर्गतत्वेनोपास्यते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

नकेवलंमलनाशोधारणायाः फलंकिंतुनिरंतरंभक्तिलक्षणयोगश्चेत्याह यस्यामिति । यस्यांधारणायां । सर्वजगदाधर्यभद्रंभगवंतमाश्रित श्रितयतोयोगिनोभक्तिलक्षणांयोगमाशुसंपद्यतइत्यन्वयः भद्रिकल्याणइतिधातो[redacted]मंगलं मंगलंभगवान्विष्णुरितिवचनं ॥ २१ ॥

परीक्षिद्विशेषबुभुत्सयाशुकंपृच्छति यथेति अत्रयथायत्रयादृशीतियच्छब्द[redacted]तश्चोदेतिसूर्यः यच्छब्दस्तुपरामर्शेप्रश्नेचापि भवतइत्यभिधुत्यभिधानाऽर्थानिश्चितत्वात् तथाचयथाकर्थंयत्रकुत्रयादृशीकी[redacted]तेइत्यर्थः ॥ २२ ॥

तत्रप्रथमतोयथाप्रश्नंपरिहरति जितासनइति यत्रेत्यनंतरंप्रश्नंप्रत्याहस्थूलइति ॥

क्रमप्राप्तत्वाद्यादृशीतिप्रश्नप्रतिवक्ति विशेषइति यदिदंभूतभव्यंभवच्चजडाजडंताद्दृश्यत्रांडकोशेदृश्यते सोयंस्थवीयसांस्थूलतराणांसकांशात्स्थविष्ठःस्थूलतमोविशेषआंडकोशःशिलालक्षणप्रतिमावत्तस्यतदन्तःस्थस्थूलदेहः ननुसाक्षादेहइत्यन्वयः । तनुर्वै शिलाविग्रहस्य देहायमंडकोशस्तुसावृतिरिति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भक्तिलक्षणः पूर्वोक्तधारणादिरूपः ॥ २१ ॥
यथेति । अयमपि राजप्रश्नोऽन्यहितार्थ एव ॥ २२—२४ ॥

श्रीवल्लभाचार्यकृत सुबोधिनी ।

किञ्च । यादृशीधारणाकर्त्तव्या । यथाधारणायायोगः सिद्धेत् । सन्तिचयेऽन्तरायाः । चित्तनिरोधकाः कर्मादयः । तत्प्रतिबन्धकभक्तियोगः यथासम्यक्स्यात्तांधारणांकुर्यादित्याह । यत्रेति । यत्रविषयेयत्पुरुषसंस्थितत्वंचित्तस्यासज्जनं । योगिनः चित्तनिरोधकस्यभक्तिरूपलक्षणंयस्य । यौसाक्षादिवत् कर्मरूपिमांकनंव्यभिचरति । भक्तयैवचतत्सिद्धिः । यादृशीयोगः अन्यप्रश्नः । तत्रप्रथम-

[redacted] धारणायाः । भगवद्रूपमितिवाक्यात् । तदीक्षतः तज्ज्ञानवतः भक्तियोगेनाधिकारिणो योगं [redacted] ॥ २१ ॥

तत्रराजाविशेषंपृच्छति । यत्रेति । इदंधारणाकथंसम्भवी । किम्मानसीमूर्त्तिरुतात्रमनः स्थापनीयं । आहोस्वित्श्रुतंभगवन्मूर्त्तिस्मृत्वा । किञ्च । यत्रसम्मता । यस्यां मूर्त्तौसम्मता । अनन्तमूर्त्तिस्वाद्भगवतः । यस्यामेवमूर्त्तौसर्वेषामेवयोगिनांसम्मतिरस्ति । किञ्च यादृशीवा । यादृक् प्रकारा[redacted]प्रमाणान्तरबाधकधर्मशून्यत्वेनवा स्थूलसूक्ष्मभावा निराकारासाकारावा । शान्तासाग्रहावा तत्रयादृशीपुरुषस्यमनोमलं हन्तितत्कथयेत्यर्थोदुष्करम्भवति गुरोः सन्निधानेनियोगोनुचितइतिअभिप्रायबोधकवाक्यशेषमुक्त्वानियोगांशमेवोक्तवान् ॥ २२ ॥

तत्रोत्तरमाह जितासनइति यादृशीस्यस्योत्तरं आसनादिजयसहितासामनोमलंहन्ति जितसङ्गः जितोविषयसङ्गोयेन मनेनमनोनियमनपूर्वं यत्रसम्मतेत्यस्योत्तरमाह स्थूलइति धियानिश्चयात्मिकयाबुद्ध्या ॥ २३ ॥

ननुभगवतः कथंस्थूलंरूपं व्यापकत्वफलरूपं नधारणामर्हतिअन्यानिमरुत्स्थादिरूपाणिअनिर्द्धारितपरिमाणानि अतः किं स्थूलमित्याकाङ्क्षायामाह विशेषस्तस्यदेहोयमिति विशेषः पृथिवीसर्वविशेषास्तद्रूपाइति अतोविशेषइतिवाक्यात् विशिष्टः शिष्टोयत्रेतिवा वेः कालस्यशेषोवा अत्रस्थानांस्वेकृत्याकालप्राप्तात् अतएवभगवतोदेहोविशेषः कालस्यभगवच्चेष्टत्वात् तदाधारोदेहोभवत्येव देहस्यात्मनः संयोगः सम्बन्धइतिसाङ्ख्या तदेकदेशिनोयोगिनश्चअङ्गत्वासइति । आवेशइत्यपरं अयोगोलकवत् अहङ्कारेणाहमितिस्वीकारइत्यपरे तेचत्वारोपिपक्षाः भगवतोदेहस्यसम्बन्धप्रतिपादकानभवन्ति किन्तुस्वस्वामिसम्बन्धइतिपृष्टासम्बोधयति तस्येति विहउपचयइतिधातोः अङ्प्रत्ययेकृतेदेहइतिभवति भगवतोयमुपचयइत्यर्थः स्वरूपस्थितेनैव यद्यपिसर्वंकर्तृशक्यते । तथापिसर्वेषामपोषार्थं स्वरूपादप्यधिकसुखदानार्थंउपचितः सम्पुष्टः सन्सर्वंकरोतीति । तदेवरूपम्भगवतः धारणाविषयोभवतीतिसर्वेषांसम्मतिः । अयमित्यपरोक्षविषयः । यद्यप्येकदेशएवतथापि तेनेतरानुमानंसुकरमिति इतरावयवज्ञानसहकृताप्रत्यक्षसामग्र्येवविशिष्टज्ञानं जनयतीत्ययमित्युक्तं । स्थविष्ठश्चस्थवीयसामिति । पृथनात्पृथिवीस्थविष्ठास्थूलावा । अत्रशास्त्रे विरलावयवाः सूक्ष्माः । संहतावयवाःस्थूलाः । अतएवाकाशादयस्सूक्ष्माः तथाव्यवहारागोचराः । पृथिव्यातुसर्वव्यवहारगोचरास्थूला । संहतैरुपचितैरवयवैर्गुणोऽवयवीप्रकटीक्रियते तथादेहेनापिभगवान् प्रकटीक्रियतइतिध्यानविषयतायां भगवानपिप्रकटोभवतीति तस्यस्थूलत्वनिरूपणं । बुद्धौप्रविष्टोबाबुद्धिमपि विशदयतीति पक्षात्स्थूलाबुद्धिः सूक्ष्मानर्थान्यथाग्रहीष्यति । तेनमनसःरजस्तमःकृतोदोषोनिवर्त्तितो भवति । चकारात्सुन्दरञ्च । सर्वविशेषसमवायात् । तेनतत्रबुद्धिः स्थिराभवति । स्वयीयसामाकाशादीनांमध्येउपचितावयवत्वादिति अतएवा"काष्ठाशरीरंब्रह्मेति वायुरात्मेति ज्योतिर्वाज्योतिरिति तोयात्मनेनम"इतिवाक्यैः सर्वावयवेभूतानि भगवच्छरीरत्वेनोक्तानि तथाप्यस्मादेवविशेषाद्स्यधारणाविषयत्वं । किञ्च सर्वावयवपिरूपायत्रसम्भवन्ति । इदन्तुनान्यत्रसम्भवतीत्यस्य ध्यानास्पदत्वं । तदाह । यत्रेति । सर्वमेव विश्वमत्रव्यज्यते । समुद्राःसूर्यःवायुराकाशश्च । अन्येषामपिसूक्ष्माणामेतदवान्तरभूतानामहङ्कारादीनाञ्चस्वयमेवाभिवेशम्वक्ष्यति पातालमित्यादिना । किञ्च । कालोप्यत्रनिर्विशतेकार्यद्वारेति तदाह भूतभव्यभवेति । अनुदयास्तमयरूपस्यकालस्य भूतत्वादिसाधकत्वं । केनचिन्निमित्तेनअतीतत्वादिधर्मसम्बन्धात् । तत्रोत्पत्तिस्थितिविनाशलक्षणगुणत्रयप्रेरणात् तथात्वं । अतः स्वकार्यसहितः कालः भगवच्चेष्टारूपः अत्रस्पष्टतयाप्रकाशतइतिसर्वमेवभगवत्कार्यंअत्रस्पष्टतयाज्ञातम्भवति । भूतज्ञातं । भव्यम्भाव्यं । भवेत् वर्त्तमानरूपं । चकारात् कालत्रयसम्बन्धरहितमपि प्राणजीवादिस्वरूपमत्रहृदयतइत्यर्थः । यदितिप्रसिद्धं । नात्रतिरोहितमिवकिञ्चित् । अतोविशेषतः प्रमाणान्तरकल्प्यमितिभावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

यतः यस्यां धारणायाम् । भक्तिरेव लक्षणं चिह्नं यस्य सः । भक्तिमिश्रस्यैव योगस्य मोक्षसाधकत्वोक्तेः न तु भक्तिरहितस्येति भावः । योगिनः कीदृशस्य भद्रमाश्रयं भगवन्तम् ईक्षतः धारणाया ईक्षमाणस्य ॥ २१ ॥

राजोवाचेति भक्तिमिश्रयोगं राज्ञो जिज्ञासैव न तु चिकीर्षा शुकदेव शिष्यस्य तस्य शुकस्याभिमतायां शुद्धभक्तावेव प्रवृत्त्यौचित्यात् २२

यत्रेत्यस्योत्तरमाह जितासन इति । यत्र स[redacted]तरं वदन् पूर्वोक्तस्यान्तर्यामिणश्चिद्घनस्वरूपे धारणायामसमर्थानामशुद्धचित्तानां योगिनां रागद्वेषादिमालिन्यनिवृत्त्यर्थं वैर[redacted]ह स्थूले इति ॥ २३ ॥

विशेषः समष्टिविराट् । यत्रेदं दृश्यते इत्येत[redacted]यादिवस्तुमात्राणां भगवद्विभूतित्वाद्भगवद्रूपत्वेन ध्येयत्वे सति स्पर्द्धासूयादयो न कापि अभेयुरित्यत इदमुक्तं । चित्तशुद्धि[redacted]शुद्धौ च चिद्घनात्मकश्रीनारायणमूर्त्तौ धारणा अतिसुकरा स्यादिति द्योतितम् तस्य सार्वज्ञमाह ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यतोयस्यांसंधार्यमाणायाम्नुष्ठीयमानायांभद्रं कल्याणरूपमाश्रयमीक्षतः । ध्यातुः भक्तिलक्षणः योगः शीघ्रंसंपद्यते ॥ २१ ॥

एवं संक्षेपतोऽङ्गयोगं श्रुत्वाविस्तरतस्तज्जिज्ञासुः पृच्छति । यत्रेति हेब्रह्मन् । धारणायायत्रसंधार्यते । यत्रयस्मिन्नाश्रयेसंमतावर्त्तते । यादृशीपुरुषस्य ध्यातुः आशुमनोमलं हरेत् । एतत्सर्वंहीतिशेषः ॥ २२ ॥

उत्तरमाह । जितासनइत्यारभ्य तावत्स्थूलः पुरुषस्य रूपंक्रियावसानेप्रथतः स्मरेतइत्यंतेन तत्रयथासंधार्यतइत्यस्योत्तरं जितासनइत्यादि । यत्रसंमतेत्यस्य स्थूलेभगवतीरूपइति मंदाधिकारिविषयत्वेनकंचित्स्वदेहांतर्हृदयाकाशेप्रादेशमात्रमित्युत्तमाधिकारिविषयत्वेन चोत्तरम् । यादृशीत्यस्यतुमनः संधार्यतेऽभियेति दृढतयाकृतामनोमलमाशुहरिष्यतीत्युत्तरंबोध्यम् । स्थूलेविस्तरतोवक्ष्यमाणेस्थविष्ठंविराड्

[redacted] विश्वसंहरयते । स्वयीयसांस्थूलावामपि स्थूलतरः सत्कार्याकारः । विश्वतः [redacted]

वैराजः पुरुषो योऽसौ [redacted]

पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥ २६ ॥
द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलञ्चातलञ्च ।
महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥ २७ ॥
उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ।
तपो रराटीं विदुरादिपुंसः सत्यन्तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥

भाषा टीका ।

जिस धारणा के धारण होने पर मङ्गल रूप आश्रय हरि को देखने वाले योगीका शीघ्र भक्ति लक्षण योग सिद्ध होता है ॥ २१ ॥

राजोवाच—हे ब्रह्मन् ! धारणा जहां धारणा की जाय और जैसे और जैसी करनी सम्मत है सो कहिये कि जो पुरुष के मन के मल को शीघ्र हरे ॥ २२ ॥

श्रीशुकउवाच— आसन जीतकर श्वास जीतकर सङ्ग जीतकर इन्द्रिय जीतकर श्रीभगवान् के स्थूल रूप में बुद्धि के द्वारा मनको धारण करै ॥ २३ ॥

यह स्थविष्ठों का स्थवीयान् अर्थात् अतिस्थूल विशेष ब्रह्माण्ड श्रीभगवान् का देह है । जिसमें भूत भविष्य वर्त्तमान समस्त सत् विश्व दिखाई देता है ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अस्य चोपलक्षणत्वेन विषयत्वम् । वस्तुतस्तु विराड्ऊविनियन्ता भगवानेव विषय इत्याह । अण्डकोशाभ्यन्तर्वर्त्तिनि कटाहे एव पृथिव्याद्यावरणं ततोऽप्यतेजोवाय्वाकाशाहङ्कारमहत्तत्त्वावरणानीति सप्त ॥ २५ ॥

विराड्देहाङ्गीवतदन्तर्योमिणामभेदमारोप्योपासनं कर्त्तव्यमित्याशयेनाह । पातालं पादमूलं पादस्याधोभागम् । पातालादीनां तदवयवता विधीयते । पातालादीन्यतलाद्यानि अधस्तलादारभ्य सप्त भूविवराणि । पठन्तिगृणन्तीत्यादि प्रमाणादर्शनम् । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ ॥ २६ ॥

ऊरुद्वयं तस्याधोभागे वितलम् उत्तरभागे अतलमिति ज्ञेयम् । नभस्तलं भुवर्लोकम् । नाभिरेव सरः ॥ २७ ॥

ज्योतिरनीकं ज्योतिषां समूहं स्वर्गम् । महर्लोकं ग्रीवेति गृणन्ति । तपोलोकं रराटीं ललाटम् । सत्यं सत्यलोकम् ॥ २८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

जघनं भागेरधोभाग इत्यर्थः ॥ २७—३० ॥

श्रीमद्वीरराघवाचार्यकृत भागवततात्पर्यचन्द्रिका ।

एतच्छरीरकोनिरुद्धांशभूतः पुरुषोविषयइत्याह आण्डकोषइति सप्तावरण[redacted]भ्यश्चेजोवाय्वाकाशाहङ्कारमहत्तत्त्वानिसप्तावरणानितैर्युक्ते ऽण्डकोशाख्यशरीरेवैराजःविराट् अनिरुद्धः तदंशभूतः पुरुषः वै[redacted]मुंजः तस्यैवंपुराधारणयात्मयोनिरित्येतद्भूयोपासकस्यावगमादसौवैराजः पुरुषः भगवान्धारणाश्रयः धारणाविषयः ॥ २५ ॥


एवं चतुर्दशभुवनात्मकाण्डकोशस्यतच्छरीरत्वं सामान्यतोक्ताऽण्डकोशान्तर्गत[redacted]न् विभज्यपादाद्यवयवत्वेनोपासनमाह पातालमिति एतस्यवैराजपुरुषस्यपादमूलं पादस्याधोभागम्पातालम्वदन्ति पादतलत्वेनपातालमुपास्यम्वदन्तीत्यर्थः एवमग्रेपि पार्ष्णिप्रभवद्भपार्ष्णिप्रपदे पार्ष्णिः पादमूलंप्रपदंपादाग्रंएतदुभयंरसातलमित्यर्थः विश्वसृजः विश्वस्रष्टुः द्वावपिगुल्फौमहातलं द्वेअपिजङ्घेतलातलं ॥ २६ ॥

विश्वमूर्तेर्द्वे जानुनीसुतलम्वितलमतलञ्चऊरुद्वयंमहीतलं भूर्लोकंतस्यजघनंकुट्याःपुरोभागञ्चभस्थलम्भुवर्लोकं नाभिरेवसरस्तावेवोपास्यं गृणन्तिवदन्ति तत्तत्त्वविदइतिशेषः ॥ २७ ॥


अस्यवैराजस्योरःस्थलंउरः प्रदेशंज्योतिरनीकं ज्योतिश्चक्रंग्रीवात्वेनमहर्लोकउपास्य इत्यर्थः । अस्यवदनंजनलोकः आदिपुंसः रराटीललाटंतपोलोकंविदुः सहस्रशीर्ष्णः सहस्रशिरसः शीर्षाणिशिरांसिसत्यंसत्यलोकं विदुरित्यर्थः ॥ २८ ॥

श्रीमाधवयज्वभट्टतीर्थकृत पदरत्नावली ।


पृथिव्यादिपंचभूताहंकारमहत्तत्त्वसंज्ञैःसप्तभिरावरणैः [redacted] । शरीरेधीर्वैमात्रत्वात् । तस्मिन्विराडाख्यो[redacted]विशेषप्रकाशनाद्विराजाख्यांतर्वर्तित्वात्सर्वतोधरत्वाद्विराजाख्यः पुरुषः पुरुषंपुरुषंप्रतिशयानोतिपुरुषः अनीशयाद्धारणाभवः तद्विषयतयाकृताधारणात्मनोमलंहरतीत्यन्वयः [redacted] ॥ वैराजस्तद्वरस्यादेः ॥ २५ ॥



श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।



श्रीवल्लभाचार्यकृतसुबोधिनी ।



इन्द्रादयो बाहव आहुरुस्रा [redacted]
नासत्यदस्रौ परमस्य नासे [redacted]
घ्राणोऽस्य गन्धो मुखमुष्णतेजा [redacted]
तद्भ्रूविजृम्भः परमेष्ठिविघ्नध्वस्तोऽस्य तालू रस एव जिह्वा ॥ २० ॥
छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि ।
हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्मोक्षः ॥ २१ ॥
व्रीड़ोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठम् ।
कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घाः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

उरःवक्षस्थलं । ज्योतिरमीकं । आदित्यादिभ्रुवान्तं ज्योतिश्चक्रं तदस्य तत्रत्यान्यांस्तद्वर्तीन्युक्तम्भवति । शिशुमारस्यभगवत्स्थान । हृदयेचन्द्रावस्थानम्भवति । अतोज्योतिरमीकेशिशुमारेभगवान्ध्येयः । ग्रीवामहर्लोकः वदनजनलोकः चिबुकादिभूपर्यन्तं । अवष्टभ्य । केवलम्भगवतः नित्यसुखस्थानत्वात् तदप्रवेश्यम् । तपोलोकोरगाटीललाटं । भ्रून्यस्थानं । स्रीपदप्रयोगः स्त्रुक्राधारत्वख्यापनार्थः । आदिपुंसइति । तपसातत्प्राप्यतइति । सत्यन्तुशीर्षाणिशिरसाम्बहुत्वहेतुः । सहस्रशीर्ष्णइति । सहस्रशीर्षेतितस्यप्रीतस्वज्ञापनाय । तच्चब्रह्मादीनांबहूनांलोकमदात् सर्वेषांमूर्धन्यतासिद्धयेमूर्धानंयस्मीतिशीर्ष्णांबहुत्वचनं ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

स एव विशेषः कुत्र को वा इत्यत्र आह । अण्डकांचे पञ्चाशत्कोटियोजनप्रमाणो ब्रह्मांडे पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहत्तत्त्वा-नीति सप्तावरणानि तैर्युते । वैराजः हिरण्यगर्भस्य देहः, भगवानिति हिरण्यगर्भान्तर्यामी गर्भोदशायी द्वितीयः पुरुषः, तत्प्रतिमांवि-नोपास्यमानो वैराजोऽपि भगवच्छब्देनोच्यते ॥ २५ ॥

तस्य पादादित्यत्र किं किं ज्ञेयम इत्यवेक्षायामाह । पादमूलं पादस्याधोभागम् । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ ॥ २६ ॥

ऊरुद्वयमिति तस्याधोभागे वितलम ऊर्ध्वभागे अतलमिति ज्ञेयम ॥ २७ ॥

उरः स्वर्गः ग्रीवा महर्लोकः वदनं जनलोकः ललाटं तपोलोकः शीर्षाणि सत्यलोकम् ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ब्रह्मकोशेब्रह्माण्डकोशेपृथिव्यप्तेजोवय्वाकाशाहंकारमहदाख्यैः स्वभावरावरणैः संयुते । बाह्यतः कपित्थाकारगोलकस्यान्तरन्तर्गोलकस्य-वच्चतुर्भोपलक्षितरूपेण चतुर्मुखाख्यस्वाभिमानिजीवभोग्यतया च विशेषतोराजतेति विराट् तत्रोपास्यत्वाभिधानैराजः पुरुषोधारणा-श्रयः । आस्थायेत्यत्र ॥ २५ ॥

एतस्य पुरुषस्य सावरणपातालादिसप्तान्त चतुर्दशभुवनशरीरिणः पातालंपादमूलं पादस्याधोभागंमुनयः पठन्ति पातालं पुरुषस्य ध्यानप्रकारेणोपास्यं बोधयन्तीत्यर्थः । एवमग्रेपि बोध्यम् । पार्ष्णिप्रपदेपादस्य पश्चात्पुरोभागस्थातलंपठन्ति । विश्वसृजः सर्वस्रष्टुः अथ-ह्यौरुद्वयमितिप्रकाशनलंह्रजानुतलातलंपठन्ति ॥ २६ ॥

विश्वमूर्तेर्ह्रजानुर्मुनयो । वितलमतलंचोरुद्वयं महीतलं भूर्लोकं जघनं नभ[redacted]र्लोकंनाभिसरोनाभिसरस्तद्गुहाश्च वदन्ति ॥२७॥

अस्य वैराजस्य पुरुषस्य उरस्थलमुरः प्रदेशः ज्योतिर्गणमयं स्वर्गलो[redacted]। महर्लोकः अस्यग्रीवाश्रिया जनलोकः वदनाश्रय सुपासकोदितशोभः । तपःतपोलोकं ररादिललाटं सत्यंसत्यलोकं शीर्षाणिशिरो[redacted]उपासकाः ॥ २८ ॥

भाषा टीका ।

इस सप्त आवरणसंयुक्त ब्रह्माण्ड शरीर में जो यह विराट् अन्तर्यामी भगवान् पुरुष हैं वही आराधना के आश्रय हैं ॥ २५ ॥

विराट् अन्तर्यामी की आराधना में ब्रह्माण्ड के स्थूल पदार्थों को श्रीभगवान् के अङ्गों में ध्यान करने हैं उसका यह प्रकार है पाताल इनका पाद मूल है रसातल एड़ी और पीछाग्र भाग है महातल विश्वसृष्टा भगवान् का गुल्फ है तलातल पुरुष के जङ्घा हैं ॥ २६ ॥

विश्व मूर्ति का सुतल दोनों जानु है वितल अतल दोनों ऊरु हैं हे महीपते ! महीतल उनका जघनहै नभस्तल नाभि सर है ॥ २७ ॥

उर्व्यो तथाक इनका उरस्थल है महर्लोक ग्रीवा और जनलोक मुख है । तपोलोक आदि पुरुष का ललाट है सत्यलोक सहस्र शीर्ष के शिर हैं ॥ २८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ब्रह्मा देवाः तेजोमयकायत्वात् ते बाहव इत्याहुः । विराः [redacted] कर्णौ श्रीधरः विद्यालय । [redacted] स्य श्रोत्रमित्याहुरुस्रा । घ्रं नासिकामित्यपि । नासत्यदस्रौ अश्विनौ नासे नासापुटे । इति शेषः ॥ २९ ॥

[redacted] । परमेष्ठिविष्ण्वर्यं ब्रह्मपदम् । तान्तः अधि-
[redacted] द्विजानि दन्ताः वयद्वत्वमार्षम् । 'पुरन्तः अपारः सर्ग इति यत् स्त
[redacted] ॥ ३१ ॥
[redacted] । कः प्रजापतिः । मेढ्रो मित्रावरुणौ ॥ ३२ ॥

श्रीराधारमणदासं गोस्वामि विरचित दीपन्याख्य तद्विप्पणी ।

[दंष्ट्रा दीक्षाग्रहन्तविशेषः । 'दाढा' इति हैमचन्द्रः ॥ ११—३४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

इन्द्रादयउक्ताः दंशाबाहवस्याहुः अमुष्यकर्णौश्रोत्रेन्द्रियाधिष्ठानभूतकर्णाखिलेदिशः तदधिष्ठेयंश्रोत्रेन्द्रियन्तुशब्दः व्यन्वात्मकोवर्णात्मकश्च एवमग्रेपि परमस्यसमाप्यधिकरहितस्यनासापुटेनासत्यदस्रावश्विनौगन्धः शान्तोग्राद्विरूपेणगानार्थोगन्धः तद्विन्द्रियंघ्राणः द्रष्टा अग्निस्तस्यमुखं ॥ २९ ॥

द्यौर्लोकः श्रोत्रगोलेभ्रगोलकं तच्चक्षुरिन्द्रियंपतङ्गः सूर्यः विष्णोर्वैराजस्यपक्ष्माणिउभेऽहनीअहोरात्रः तस्यवैराजस्यभ्रूविजृम्भः भ्रूविक्षेपः भ्रूविक्षेपातियावत् परमेष्ठिविष्ण्वर्यपरमेष्ठिनः चतुर्मुखस्यस्थानमस्यवैराजस्यतालुआपः तद्रसिमानीवरुणः अस्यजिह्वारसः ॥ ३० ॥

अनन्तस्यत्रिविधपरिच्छेदशून्यस्यशिरइत्यांसिगुणान्तिर्दंष्ट्रायमः द्विजानि दन्ताः नपुंसकत्वमार्षं स्नेहकलाः स्नेहस्यकलावंशावयवादीनांस्नेहकलावैराजस्यदन्तादित्यर्थः तस्यहासः हसनञ्जनोन्मोहकरीमायामाश्रयशक्तिः मायाशब्दस्यसर्वत्रानुगतंप्रकृतिनिमित्तमाश्रयैमेव तत्रविस्मयनीयत्वरूपं तच्चनानाविधकार्यकरत्वात् यस्यापाङ्गमोक्षः दुरन्तसर्गः अपारसर्गः ॥ ३१ ॥

श्रीवाक्षोरुबाहुः अधरः अधरोष्ठः लोमः धर्मः स्तनः अधर्मपथः अधर्ममार्गः अस्यपृष्ठः पृष्ठभागः तस्यवैराजस्यमेढ्रः प्रजापतिः वृषणौमित्रावरुणौसमुद्रः कुक्षिरुदरंगुदंरयस्तस्यास्थिसङ्घाः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इन्द्रादयोलोकपालास्तस्यबाहवस्याहुः दिशःकर्णौगोलकस्थानीयौ । अमुष्यहरेः श्रोत्रमिन्द्रियं शब्दइति । नासत्यदस्रावश्विनौनासिकं गन्धोभूमेर्गुणः घ्राणङ्गन्धग्राहीन्द्रियंगन्धजनकमाहुरित्यर्थः इदं दीप्तः ॥ २९ ॥

द्यौर्मूर्धकः । अक्ष्णीगोलके पतङ्गः सूर्यः मनुष्याणामहर्नाथादीनामहर्नाथइतिउभेचविष्णोः पक्ष्माणितताजातेनहाभिनेच परमेष्ठिविष्ण्वयब्रह्मलोकः मधुरादिरसः ॥ ३० ॥

नासत्यादिच्छन्दांसिगिरांचवचनानिगुणान्ति अर्यमन्दूसूर्यश्चन्द्रौदंष्ट्रंद्वयाज्ञानादिविशेषः बहुरूपत्वान्पुनर्वचनं । बहुत्वंबहुत्वतहरिवंशात् बहुगणानक्षत्राणि द्विजानि दन्ताः अत्रप्रगृह्यसञ्ज्ञाऽभावोलिङ्गव्यत्ययश्चवैलक्षण्यद्योतनायेतिज्ञातव्यं मायामोहनशक्तिः हासोल्लासोमध्यका सप्तसुप्रथमेतिसूत्रात् दुरन्तसर्गोऽनवसानविश्वसृष्टिः ॥ ३१ ॥

श्रीवाक्षा अधरोऽधरोष्ठः । एवशब्दोन्ययोगव्यवच्छेदकः कः प्रजापतिः मेढ्रमिन्द्रियं वृषणौवीजद्वयंमित्रइत्युपलक्षणंवरुणश्च ॥ ३२ ॥


श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।


इन्द्रादय इति । अस्य टीकायाम् एवं नासिकादिष्वपि इति प्रायिकमेव, अक्ष्णुपि व्यभिचारात्, तत्र हि सूर्यस्यैव हि गोलकस्थेन [redacted] । तदेवमत्र युक्तिर्मानुसन्धेया किन्तु उप[redacted]गोलकाश्रयेव कारणमिति सर्वं समञ्जसम् ॥ २९ ॥
आपः तदधिष्ठाता वरुणः ॥ ३०—३८ ॥


श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।


एवं लोकानांसर्गविसर्गसमुद्भूतस्थानं जीवानांसञ्चिवे [redacted] इन्द्रादयस्तस्यादिना यद्यपियेदेवतास्तत्तन्निमित्तस्यार्थादुत्कर्षवन्ति तथापितन्निमित्तस्थानजीवानांध्यानार्थरूपत्वं । यतोवक्ष्यति । सत्यलोकेतुपरिस्थमन्ति । अथवाभगवद्विन्द्रियाणां आधारत्वेनभाविष्यन्तीतिताद्रूप्यार्थंवृत्तिरूपत्वं । आधिदैविकास्तेदेवाः अन्योपिसत्प्रकरणनिरूपितास्तत्स्वरूपाएव इन्द्रादयोदेवाः उक्ताः कर्मफलदातारः भगवद्गात्रसौष्ठवाद्भवन्ति उत्तरत्रैवस्पष्टं । अतएवाह । भगवतः कर्णौब्रह्मायंद्विशिरः । अतएवाह । तस्यभगवतः आधारेन्द्रियं । नासत्यदस्रौअश्विनौबाहू । परमस्यनासिकाद्वयं । परमस्ययस्य यद्यत्तत्तत्कर्तापकारात् अश्विन्यादिदेवताधिष्ठातारः भगवद्विन्द्रियगोलकानि । विषयस्त्वेन्द्रियं । गन्धःअस्यघ्राणं । इत्युज्ज्वलकर्त्रिः अतोभगवन्मुखंयद्यन्तत्तथेत्यर्थः ॥ २९ ॥

द्यौः स्वर्गलोकः । शिशुमारस्यावयवभूतः । अक्ष्णीगोलके । चक्षुरिन्द्रियंपतङ्गः सूर्यः । पतङ्गश्चन्नीति । चक्षुरपिभगवदीयंतच्चेन्द्रियं [redacted] । तस्यसूर्यस्यपक्ष्माणिचत्वारि । मेषोन्मीलननिमीलनकर्तृणि । विष्णोरितिकालरूपस्य । यद्वरूपस्यथा । अहनीराऽहर्नाथौ । [redacted] मनुष्यभेदेन । चकारादिन्द्रियाणामेवोपि परमेष्ठिविष्ण्वर्थब्रह्मस्थानं । सत्यलोकस्थित । तस्यभगवतोभ्रुविजृम्भः । प्रंभनि-









नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ।
अनन्तवीर्य्यः श्वसितं मातरिश्वा गतिर्वयः कर्म्म गुणप्रवाहः ॥ ३३ ॥
ईशस्य केशान् विदुरम्बुवाहान् वासस्तु सन्ध्यां कुरुवर्य्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च सो चन्द्रमाः सर्व्वविकारकोषः ॥ ३४ ॥
विज्ञानशक्तिं महिमामनन्ति सर्व्वात्मनोऽन्तःकरणं गिरित्रम् ।
अश्वाश्वतर्य्युष्ट्रगजा नखानि सर्व्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥
वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ।
गन्धर्व्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्य्यः ॥ ३६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अनन्तं वीर्य्यं यस्य सः । वयः कालः तस्य गमनम् । गुणप्रवाहः प्राणिनां संसारः कर्म्म तस्य क्रीड़ा ॥ ३३ ॥
भूम्नः विभोः । अव्यक्तं प्रधानम् । सः प्रसिद्धः चन्द्रमाः तदीयं मनः सर्व्वेषां विकाराणां कोष इवाश्रयभूतम् ॥ ३४ ॥
विज्ञानशक्तिं चित्तं । महिं महत्तत्त्वम् । अन्तःकरणम् । गिरित्रं श्रीरुद्रम् । गर्दभात् खड़्वायामुत्पन्ना अश्वतरी ॥ ३५ ॥
वयांसि पक्षिणः तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्युक्तं विचित्रं शिल्पनैपुण्यम् । यथाहुः—येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ इति । मनुः स्वायम्भुवः मनीषा बुद्धिः । मनुजः पुरुषः निवासः आश्रयः, पुरुषस्य चाविस्तरामात्मा इति श्रुतेः । गन्धर्व्वादीनां द्वन्द्वैकयं गन्धर्व्वादयः स्वरस्मृतयः षड्जादिस्वरस्मृतय इत्यर्थः । असुरानीकं वीर्य्यं यस्य । स्वरः स्मृतिरसुरानीकवीर्य्य इति पाठे गन्धर्व्वादयः स्वरः असुरसमूहश्रेष्ठः प्रह्लादः स्मृतिस्तस्येति ॥ ३६ ॥

श्रीराधारमणदास गोस्वामि विरचित*दीपन्याख्य तट्टिप्पणी ।

[नखानि नक्षोपलक्षितानि ऋक्षादीनीति केचित् ।] खड़्वा घोटकी तस्यामित्यर्थः ॥३५—३९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

नद्यः गंगायमुनादयोऽन्यनाड्यः तनूरुहाणिरोमाणिमहीरुहाः वृक्षा विश्वतनोर्विश्वशरीरकस्येहनृपेन्द्र ! अनन्तवीर्य्यश्वसितमनन्तवीर्य्यस्यापरवीर्य्यस्यश्वसितंप्राणाःमातरिश्वा वायुःगतिर्गमनञ्चयःकालःतस्यकर्मगुणप्रवाहःगुणानांसत्वरजस्तमसांप्रवाहःकार्यप्राणिनांसंसारइत्यर्थः ॥ ३३ ॥

ईशस्यभगवतःकेशानंबुवाहान्मेघान्विदुः हे कुरुवर्य ! भूम्नः विभोर्वासः वस्त्रंसन्ध्येसायंप्रातःसन्ध्येतस्यहृदयंहृदयकमलमव्यक्तं प्रधानमाहुः सप्रसिद्धःसर्वविकारकोशः सर्वौषधिविकारहेतुः चन्द्रमा तदीयंमनःसर्वविकाराश्रयइत्यर्थः ॥ ३४ ॥

विज्ञानशक्तिंव्यवसायशक्तिं तांमहिं महत्तत्त्वमामनन्ति उपासते सर्वात्मनः सर्वान्तर्यामिणः गिरित्रंरुद्रम् अन्तःकरणमहङ्कारम् अतएव रुद्रांशत्वमस्यशास्त्रेषुप्रसिद्धमिति विश्वरूपेणकथितम् अहङ्कारश्चात्मन्यात्माभिमानहेतुरिति मोहकस्यगिरित्रस्यतदात्मकत्वयुक्तं रासमाद्रुड्वायामुत्पन्नाऽश्वतरी अश्वाश्वतर्य्युष्ट्रगजास्तस्यनखानीत्यर्थः सर्वेमृगाःपशवश्चतस्यश्रोणिदेशेऽपास्यास्तत्त्वेनानुसन्धेया इत्यर्थः ॥ ३२ ॥

वयांसिसंज्ञादात्मकानित्यर्थः वर्यःपक्षिणस्तस्यव्याकरणं "नामरूपे व्याकरवाणीतिश्रुत्युक्तंशिल्पनैपुण्यमनुमन्त्रः तस्यमनीषाबुद्धिः मनुजः मनुष्यवर्गः तन्निवासस्थानं गन्धर्वादीनांद्वंद्वैकवंगन्धर्वादयस्सरोऽतोवर्गः अस्यस्वरःषड्जादिस्वरःतेषांगानाद्यन्वयास्तत्स्वरत्वयुक्तम् असुरानीकवर्यः असुरसमूहश्रेष्ठः प्रह्लादस्तस्यस्मृतिः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

विश्वात्मतत्पदार्थेषुतिष्ठतितनुर्यस्यसतथा तस्य विश्वतनुः प्रतिमायस्यसतथा तस्येतिषा वीर्यैरतोऽत्रप्राणिभोग्यं गतिर्गमनं तस्माद्वयआयुःप्राणिनांजीवनावधिलक्षणमुत्पन्नं कर्मव्यापारः तस्मात्सस्वादिगुणानांप्रवृत्तिक्रमः ॥ ३३ ॥

संज्ञेद्वे अव्यक्तंमूलप्रकृतिं मनोभिमानत्वाच्चंद्रस्यकामादिनानाविकारगृहत्वमुपचारः मनोमनसोजातः ॥ ३४ ॥

विज्ञानशक्तिंचित्तं गिरिंकैलासंश्रायतइतिगिरेर्वायोर्जाताययस्यसःतथेतिषा गिरित्रोरुद्रः सर्वात्मनः सर्वस्वामिनः अन्तःकरणमहङ्कारःतस्माज्जातः नखानिनखेभ्यः । गर्दभाद्रुड्वायामुत्पन्नाऽश्वतरी श्रोणिदेशस्थितास्तस्माज्जाताश्च ॥ ३२ ॥

वयांसिलौकिकवैदिकानिविचित्रंतस्यव्याहरणंशब्दःव्याहरणाभितानिजातानिच मनुर्वायुः तस्यमनीषाबुद्धिः तेषायेमनवेषांधितायेधृतिः मनुष्यायेमुवोवा मनीषाविचारःमगवद्विचारशक्तिजातत्वात्स्मृतिकर्तृत्वंमनोर्निषासोनिषसनंकर्मजनितत्वात् गन्धर्वादीनामुत्पादिकेस्वरस्मृतीयस्यसतथा स्वरःषड्जादिलक्षणः स्मृतिरतीतादिविषयाऽसुरानीकस्यजनकंवीर्ययस्यसतथा ॥ ३६ ॥

श्रीमद्भागवार्यकृत सुबोधिनी।

नयोगङ्गाद्याः अस्यभगवतोनाड्यः तनूरुहाणिलोमानि अनन्तवीर्यतनप्राणवृहसत्रिवेगार्थं। राजसानाङ्गलोकास्तामसाः देवादय सत्त्वान्ताःसात्विकाः। महीरुहाद्याः षड्विधाअपिभगवतोलोमानि विश्वतनोरिति विश्वतनुपदस्य अनेनतेषां विश्वरूपत्वंनिरूपितं। अन्नाच्छादनरूपत्वात् नृपेन्द्रेतिसम्बोधनम् महाराजस्वराज्येएकस्मिन्नपिपृथ्वेक्षिप्रेलोमच्छादनवत् क्लेशोमवतीत्यनुभवस्थसम्बादार्थम्। अनन्तवीर्यस्यभगवतःश्वसितं नासापुटस्यवायुः मातरिश्वाभयंवायुः भगवतोगतिःवयःकालःकर्मभगवतोगुणप्रवाहः सत्त्वरजस्तमसां देवतिर्यङ्मनुष्यादिसृष्टिःरूपः ॥ ३३ ॥

ईशस्य ईश्वररूपस्य अम्बुवाहामेघाः विदुरिति पूर्ववत्प्रमाणं वासःपीताम्बरम् सन्ध्येसन्ध्याजघं तुच्छब्देनमायापक्षस्याग्रहणं भूभरहति-कालस्य कुरुवर्यतिसम्बोधनम् भगवतोमहत्वज्ञापनार्थम् अव्यक्तंप्रकृतिः। भगवतोहृदयम् आहुरितिपूर्ववत्। सचन्द्रमाःआधिदैविकरूपः सर्वविकाराणां कोशरूपभगवन्मनः तद्विकाशेसर्वेविकाराउत्पद्यंतेइति ॥ ३४ ॥

विज्ञानशक्तिंज्ञानशक्तिं महिंमहत्तत्त्वम् अन्तःकरणम् अहङ्कारं। गिरित्रंमहादेवं सर्वात्मकइतिअहङ्कारस्य सर्वत्रस्थितिरुक्ता। अश्वादय-श्चत्वारअवयवचतुष्टयनखानि तत्राद्योहस्तयोः वामहस्तनखानां स्त्रीपूपयोगइतिअश्वतरी। सर्वेमृगापशवश्चभगवतोऽवयवत्वाभवेऽपिभोग्ति-देशेभोगित्वेनभवन्ति अथवा मृगाःपशवश्चभोगित्वानङ्गम् ॥ ३५ ॥

वयांसिपक्षिणः तस्यभगवतोव्याकरणं मयूराश्रित्रितायेनेनिवाक्यात्। मनुःस्वायम्भुवादिःमनीषाइच्छा मनुजोमनुष्यः। निवासो-गृहं। गन्धर्वादयअप्सरोन्ताः एकवङ्गावंप्राप्ताः स्वरोभगवत्कर्णकरागविशेषः असुरानीकवर्यःप्रह्लादःस्मृतिःस्मृतीस्मृतयः याठान्तरेः अप्सरोन्ताः प्रह्लादश्चस्वरस्मृती आद्यःस्वरःद्वितीयःस्मृतिः। वीर्यइतिपाठेपूर्वोक्तएवस्वरस्मृतयः असुरानीकेवीर्ययस्यसमासएव उद्देश्य-विधेयभावः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

अनन्तः शेषो वीर्यं विक्रमो यस्य सः। वयः कालः तस्य गतिः गमनम्। गुणप्रवाहः प्राणिनां संसारः कर्म क्रीडा ॥ ३३ ॥

मूम्नः विभोः। अव्यक्तं प्रधानम् तस्य हृदयं बुद्धिः। सः प्रसिद्धः चन्द्रमास्तदीयं मनः सर्वेषां विकाराणां कोष इवाश्रय-भूतम् ॥ ३४ ॥

विज्ञानशक्तिं चित्तम्। महिं महत्तत्त्वम्। अन्तःकरणम् अहङ्कारम्। गिरित्रं रुद्रम्। गद्यंभात् षड्वायामुत्पन्ना अश्वतरी ॥ ३५ ॥

वयांसि पक्षिणः तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्युक्तं शिल्पनैपुणयम्। यथाहुः—येन शुक्लीकृतां हंसाः शुकाश्च हरि-तीकृताः। मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ इति। मनुः स्वायम्भुवः मनीषा विचारवती बुद्धिः। मनुजः पुरुषः पुरुषस्ये त्यविस्तरात्मात्मा इति श्रुतेः। गन्धर्वादीनां द्वन्द्वैक्यं गन्धर्वादयः स्वराः षड्जादिः। असुरानीकवर्यः प्रह्लादः स्मृतिः। स्वरस्मृती-रसुरानीकवीर्य इति पाठ—स्वराणां स्मृतयः। असुरानीकं वीर्यं यस्य सः ॥ ३६ ॥

श्रीमल्लुकदेवकृत सिद्धान्तप्रदीपः।

तनूरुहाणिरोमाणि अनन्तवीर्यः महाबलोमातरिश्वावायुःश्वसितंप्राणः वयःकालस्तस्यगतिर्गमनम् गुणानांसत्वादीनांप्रवाहः यत्र सुरनरादयः नदीप्रवाहेतृणानीवस्रवन्तिसस्तस्यकर्मक्रीडा ॥ ३३ ॥

ईशास्यसर्वेनियन्तुर्भगवतःकेशानम्बुवाहान्घनानूविदुः मूम्नःविभोर्वासः सन्ध्यांवाससीसन्ध्येत्यर्थः। अव्यक्तंप्रधानंहृदयंहृदयकमल-माहुः सम्प्रसिद्धः सर्वेविकारकोशः सर्वोपाधिप्रवृत्तिहेतुः चन्द्रमामनोऽयम् ॥ ३४ ॥

सर्वात्मनः सर्वस्यचतुर्दशभुवनस्यात्मनः विज्ञानशक्तिंचित्तात्मिकांमहत्तत्त्वाख्यंमहिमामनन्ति तस्यान्तकरणमहङ्कारंगिरित्रमाम-नन्ति अश्वाश्वतर्युष्ट्रगजास्तस्य नखानिध्यातृभिर्ज्ञेयानीत्यर्थः सर्वेमृगाः पशवस्तस्य [illegible]देशेज्ञेयाः ॥ ३५ ॥

वयांसिपक्षिणस्तस्यव्याकरणंशिल्पनैपुणयम् मनुःस्वायंभवस्तस्यमनीषाबुद्धिः मनुजोमनुष्यस्तस्यनिवासः। निवासस्थानम् गन्धर्वादीनांद्वंद्वैक्यंगन्धर्वविद्याधरचारणाप्सरसस्तस्यस्वरः षड्जादिसप्तस्वरसमूहः ध्यातृभवोऽयः असुरानीकवर्यः प्रह्लादस्तस्यस्मृतिः ॥ ३६ ॥

भाषा टीका।

नदी इनकी नाड़ी वृक्ष रोम हैं। हे नृपेन्द्र! अनन्तवीर्य मातरिश्वा पवन) श्वास, काल गमन और गुणप्रवाह संसार विश्वतनुका कर्म अर्थात् क्रीड़ा है ॥ ३३ ॥

अम्बुवाह मेघ) ईशके केश और सन्ध्या वस्त्र है। हे कुरुवर्य! प्रधान को भगवान का हृदय और सर्व विकार कोश चन्द्रमा मन कहलाता है ॥ ३४ ॥

महत्तत्व को सर्वात्मा की विज्ञानशक्ति और गिरित्र (शिव को) अन्तः करण कहते हैं। अश्व अश्वतरी ऊंट और गज नख हैं और समस्त मृगपशु श्रोणिदेशमे हैं ॥ ३५ ॥

पक्षीगण उनका विचित्र शिल्पनैपुणय, स्वायम्भुव मनु मनीषा (बुद्धि) और मनुष्य निवास है। गन्धर्व, विद्याधर, चारण, अप्सरा, षड्जादि स्वर और असुरसमूह उनका वीर्य है ॥ ३६ ॥

ब्रह्माननं क्षत्रभुजो महात्मा विड्ऊरुरङ्घ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म्म वितानयोगः ॥ ३७ ॥
इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ।
सन्धार्य्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्ववुद्ध्या न यतोऽस्ति किञ्चित् ॥ ३८ ॥
स सर्व्वधीवृत्त्यनुभूतसर्व्व आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेतनान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ब्रह्मा विप्रः तस्य आननं मुखम् । क्षत्रं क्षत्रियो भुजौ यस्य सः । विट् वैश्यः ऊरू यस्यः । अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य । नाना अभिधा नामानि येषां ते च ते अभीज्या देवाः तेषां गणैर्वसुरुद्रादिभिः उपपन्नो युक्तः द्रव्यात्मकः हविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्म्म कार्य्यम् आवश्यकोऽभिप्रेत इत्यर्थः ॥ ३७ ॥

इयान् एतावान् सन्निवेशः अवयवसंस्थानम् । अस्मिन् स्ववुद्ध्या मनः सन्धार्यते मुमुक्षुभिः । यतः यद्वपुषोऽतिरिक्तं किञ्चिन्नास्ति तस्मिन् ॥ ३८ ॥

तदेवं चित्तस्थैर्य्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनमुक्तम् । तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति निर्द्धारयति स इति । सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन सः एक एव सर्वान्तरात्मा । तमेव सत्यं भजेत । अन्यत्र उपलक्षणं न सज्जेत । यतः आत्मकृतात् आत्मनः पातः संसारो भवति । एकस्य तत्तदिन्द्रियैः सर्व्वानुभूतौ दृष्टान्तः स्वजनानामीक्षिता यथेति । स्वप्ने हि कदाचित् बहून् देहान् प्रकल्प्य जीवस्तत्तदिन्द्रियैः सर्वं पश्यति तद्वत् । ईश्वरस्य तु विद्याशक्त्याद्यन्धः ॥ ३९ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

ब्रह्मब्रह्मणस्तस्याननंमहात्मावैराजः क्षत्रभुजःक्षत्रंक्षत्रियोभुजोयस्यसः विट्वैश्यःऊरूयस्यतथोक्तः अंघ्रिश्रितकृष्णवर्णः अंघ्रौश्रितः कृष्णवर्णः शूद्रोयस्यसःकृष्णवर्णास्तुतदाश्रित्वेनानुसन्धेयइत्यर्थः नानाभिधाभीज्यगणः नानानामकाअभीज्यायेष्ट्यावसुरुद्रादयस्तेषांगणैरुपपन्नोयुक्तः योद्रव्यात्मकोहविःसाध्यःवितानयोगः यज्ञादियोगः ततस्याराधनरूपंकर्मेत्यर्थः ॥ ३७ ॥

ईश्वरविग्रहस्यवैराजविग्रहस्ययःसन्धिवेशःअवयवसन्निवेशःकथितःअमीइयानेतावानवस्थाविशेषोस्मिन्वैराजसम्बन्धिनिवपुषिस्वकीयबुद्ध्यामुमुक्षुभिर्मनः सन्धार्यतेयतः यस्मादीश्वरशरीरादन्यद्बहिर्भूतंनास्ति सर्वंतच्छरीरान्तर्भूतमित्यर्थः ॥ ३८ ॥

एतदेवाह सेइति इदयंश्रूयतेपिबेतिश्रुत्यर्थउच्यते सर्वधीवृत्तिभिः प्रत्यक्षानुमानादिसर्वविधज्ञानैरनुभूताः सर्वेयेपदार्थास्तेऽतर्बहिश्चाधिष्ठेयतयायस्यसःतथोक्तः एवञ्चैतदधिष्ठेयपदार्थानांतच्छरीरत्वमर्थासिद्धं तत्रदृष्टान्तमाह यथा एक आत्मा जीवःस्वेप्रेक्षिताःस्वप्नजनद्रष्टास्वप्नजनद्रष्टात्मात्मस्वकृतेषुकृतदुष्कृतानुसारेणपरमात्मसृष्टान्स्वेनैवानुभाव्यानूतत्कालमात्रावसानान्पदार्थानधिष्ठायराज्याभिषेक-शिरश्छेदादिसुखदुःखमनुभवति तथाअत्रैकस्यानेकपदार्थेष्वधिष्ठातृत्वमात्रेदृष्टान्तः । एवंदृष्टश्रुतचेतनाचेतनशरीरकत्वेऽपिशरीरगतदोषासंस्पर्शित्वमाह सत्यमिति सत्यंस्वरूपतोगुणतश्चनिर्विकारन्तस्यपुरुषार्थत्वमाह आनन्दनिधिमिति आनन्दाश्रयमित्यर्थः आनन्दस्वरूपत्वस्वाप्युपलक्षणं आनन्दंब्रह्मणोविद्वान्विज्ञानमानन्दमित्युभयत्रापि श्रवणात् । भजेतउपासीत यद्वा सत्यमित्यचिद्वावृत्तिः आनन्दनिधिमितिचेतनवृत्तिः अन्यत्रनसज्जेदब्रह्मात्मकस्वतन्त्रवस्तुकिञ्चित्परिकल्प्यतत्रासक्तोनभवेत् यतस्तदासंगादात्मपातः । आत्मनः स्वस्यकृतः संसारःस्यात्तस्मान्नसज्जेदित्यर्थः ॥ ३९ ॥

इति श्रीवत्साङ्कमिश्रपरिचरश्रीपाञ्चजन्यपुरुषोत्तमयतीन्द्रपादारविन्दमकरन्दसेवापरिणतसुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोःसुतेनतच्चरणकमलपरिचर्यप्रसन्नतत्सूक्तिसमधिगत श्रीमद्भागवतार्थ हृदयेन श्रीवेङ्कटेशदासेन श्रीवीरराघवविरचितायां श्रीमद्भागवतचन्द्रिकायां द्वितीयस्कन्धसमाख्यायां प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मणः ब्राह्मणजातेर्जनकमाननंयस्यसतथा क्षत्रजातेरुत्पादकौभुजौयस्यसतथा विशाञ्जनकौऊरूयस्यसतथा । अंघ्रिश्रितःकृष्णवर्णः शूद्रजनकपित्र्यस्यसतथा देवपितृऋषीणांनित्यपुरुषयज्ञस्वाहास्वधातयोरुत्पादकोधीर्यगुणोरेतोगुणास्तेनोपपन्नः हव्यजनकआत्मामध्यदेहोयस्यसःतथा अग्निहोत्रादिकर्मवितानस्योत्पादकोयोगउपायोयस्यसःतथा वितानविस्तारः ॥ ३७ ॥

उक्तकर्मोपसंहरति इयानिति ईश्वरविग्रहस्यवैराजाख्यहरिदेहस्ययः सन्निवेशोऽवस्थितिविशेषः सइयानित्थंभूतोमयातेतवकथितः मतोहस्मदीश्वरविग्रहात्स्थविष्ठमुत्तमंवपुरस्ति । योगिभिर्मनोस्मिन्स्थविष्ठेसर्वोत्तमेवपुषिस्ववुद्ध्यासन्धार्यते । मनोनैर्मल्यायतिशयहेत्वर्थः ॥ ३८ ॥

इति श्रीमद्भागवतमहापुराणद्वितीयस्कन्धेविजयध्वजकृतटीकायांप्रथमोऽध्यायः ॥ १ ॥

एतदन्तां विराड्धारणामुक्त्वा तदपवादेनापि तां पूर्वोक्तां भक्तिमेवाह स सर्वेति। यः सर्वधीवृत्त्यनुभूतत्वात् स मे भजनीयतया कर्त्तव्यविधमानत्वादर्थसिद्धार्थः—सः तथाभूतविराड्धारणासिद्धो योगी विराड्गताभिः सर्वाभिर्धीवृत्तिभिर्ज्ञानेन्द्रियैरनुभूतं सर्वं विराड्गतं येन तथाभूतः सन्, ते सत्यमानन्दनिधिं विराड्गर्भस्थामिमां श्रीनारायणमेव भजेत। अस्यश्च विराड्गतं तद्धारणान्तरफले च कुत्रापि न सज्जेत। यतः सज्जनात् आत्मपातः संसार एव स्यात्। तस्य सर्वानुभूतौ दृष्टान्तः, आत्मा स्वप्नद्रष्टा जीवः यथा स्वप्नगतानां सर्वेषां जनानां तदुपलक्षितानां वस्तूनाञ्च एक एव ईक्षिता भवतीति। अत्र तमित्यनेन स ऐक्षत इति स्वाभाविकी ज्ञानक्रिया च इति श्रुतिप्रसिद्धपरानपेक्षज्ञानादिसिद्धस्तथा सन्ध्ये सृष्टिराह हि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति न्यायप्राप्तेन स्वप्नस्यापि तत्कर्तृकत्वेन जाग्रदादिमयजगत्कर्तृत्वस्य पूर्णत्वप्राप्तेर्बलभयं दर्शितं, सत्यादिद्वयेन परमपुरुषार्थत्वञ्चेति क्रमः ॥ १९ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्बल्लभाचार्यकृतसुबोधिनी।

ब्रह्मभावःकश्चिद्धर्मः यस्मिन्विद्यमानेब्राह्मणशब्दवाच्योभवतिपुरुषः। ब्राह्मण्यापरनाम ब्राह्मण्यंनजातिः व्यक्तिसङ्गावेऽपितस्यापगमात्। ब्राह्मण्यादेर्हीयतइतिवाक्यानुरोधात्तृत्यतरकल्पनायां प्रमाणाभावात् नियतव्यक्तिकाभावाच्च ब्राह्मण्यंब्राह्मण्यजातत्वं चतुर्वेतत्पुत्रेषुमानसेषु च अव्यापकं ऋषभपुत्रेषुएकाशीतिर्ब्राह्मणाद्यभूवुरितिवाक्याच्च। तस्माच्छास्त्रैवदुषाक्यविरोधात् ब्राह्मण्यंकाश्चिद्व्यासायस्मिन्देहेअभिव्यक्ताभवतितेब्राह्मणाइत्युच्यते अतएवशापादिनाशूद्रत्वब्राह्मडालत्वं अनुग्रहेणब्रह्मत्वमिति। सापोधनयनेनदेहसमायाति तदाबहुनिवाक्यानिसंगच्छन्ते। एवंक्षत्रं अतएवपरशुरामेतृमर्यादेवशः ब्रह्मभानंनयस्य क्षत्रभुजोयस्य पूर्वसिद्धाग्निमुखत्वेनोक्तः वाक्प्रकाशार्थं अतोवागिन्द्रियंदेवताऽग्निः इन्द्रादयश्चभोक्तारःबाहवःपूर्वमुक्ताः। अत्रतुरसाधिष्ठात्रीदेवतावरुणः रसभोक्तृब्राह्मण्यं तथारणाकर्तृक्षत्रमितिविट्ऊरुरूपस्यविततलातलरूपस्यापिगुरुहृदयस्यावियत्वस्थितिसाधकत्वेन पूर्वबाहुशेषः वृत्तश्चतुर्विधत्वाद्बहुवचनं। विशःउरूयस्येति एवमघ्रिश्रितकृष्णवर्णः अंघ्रिश्रितः कृष्णवर्णोऽयं कृष्णवर्णःशूद्रत्वं वेदरहितविद्याच्च कर्मार्द्धिर्घं। स्वाभाविकवैशेषिकश्च स्वार्थपरार्थमितियावत् तत्रपरार्थंपूर्वमुक्तं कर्मगुणप्रवाहइति अत्रतुस्वार्थंकर्म वितानयोगःयज्ञविस्तारः वितानासप्ततंतुर्विताना: तेषांयोगोयत्रसत्राहीनेष्टसभगवत्कर्म तस्यद्वयगतामाह। नानाभिधाःनानानामानःइज्यगणाःदेवगणाःपूज्यगणाः तत्राप्यभितःप्रधानगुणभावेनतेनउपपन्नः। इज्यात्मकश्चग्रीहियवादिसाध्यपुरोडाशः देवतोद्देशेनद्रव्यात्यागोयागः ॥ ३७ ॥

तत्रदेवताद्रव्यअङ्गं एवंसर्वपदार्थानांभगवत्स्वरूपत्वायउद्देशप्रकारेणभगवच्छरीरेसमावेशनमुक्त्वानुपसंहरति। इयानसाविति। ईश्वरविग्रहस्यविद्देहस्य सन्निवेशः अवयवविन्यासप्रकारःइयान् एतावानेवनाधिकोविन्यासोस्तीत्यर्थः। असौअयमेवविन्यासःनत्वन्योऽपिविन्यासोऽस्ति अथवा असौप्राकृतरूपविन्यासःइयानेतावान्। आनन्दमयस्यत्वन्यः सउत्तरत्रवक्ष्यते अत्रपदार्थानांविनिवेशस्यखण्डदेहप्रकरणत्वात्नास्माभिर्विवरणमुक्तम अग्रेविभूतीयकथ्यत्वात्। एवंनिवेशकथनस्यप्रयोजनमाहसन्ध्यायेति अस्मिन्नेवपुरुषसंस्थेयोगिभिःमनःसन्धार्यते योगाङ्गधारणाविषयः अयमेवोक्तयोस्थांविष्णुरितिपृथ्वत् वसुब्रुवंपुरुषानीतिवपुःदेहापरपर्यायःतुल्यार्थत्वाद्व्याख्यस्तत्रैवोक्तः स्ववुद्ध्याआत्मबुद्ध्याआत्मरूपत्वेन अन्यथासर्वप्रवेशानस्यात्। परमभक्तिराकांक्षाभावश्चनभवेत्। फलञ्च मोक्षःअतिक्रमश्चनभवेत् एतस्मिन्धारणाविषयेजातेकुत्रधारणाकर्त्तव्याकुत्रनेत्यादिसन्देहागच्छेयुः यतोनयनोस्तिकश्चित् ॥ ३८ ॥

यस्माद्भूपात्कर्त्तव्यमध्य अन्यत्किमपिनास्ति साधारणानांपक्षप्रश्नेषु कर्त्तव्यमध्यंएवश्रोतव्यस्मर्त्तव्ययोरनुप्रवेशान्नमोनुकीर्त्तनेनैवजपस्योक्तत्वात् एवकर्त्तव्यस्यप्रवेशाद्विकल्पिकपक्षत्वाच्चान्येषां भजनीयप्रश्नोवशिष्यते तमाह सर्वधीवृत्त्यनुभूतसर्वइति। योऽत्रधारणाविषयत्वेनोक्तः सर्वात्मपदेन च श्रोतव्यविषयतावच्छेदकवाचकननिरूपितः। यस्यविग्रहणार्थमयंसन्निवेशोनिरूपितः। यः श्रवणादिनाभजनीयः श्रवणादिनाभगवत्सन्निधानेनत्वात्तत्सायुज्यंवाप्राप्यमान्तत्तमेवभजत अन्यत्रफलसाधनांतरेण अनेनवासाधनेनसक्तः स्वस्थानादपिपतेत यस्यामवस्थायांतिष्ठतितत्तोपियेत अनेनप्रथमंफलार्थंभवतु पश्चात्तदर्थमर्थात्यपिपक्षेनिवारितः नत्वस्यफलत्वं भजनीयत्वं वा कथ तत्राह आनन्दनिधिमिति भजनीयंफलमेव साधनस्यपुरुषशेषत्वात् यद्यपि फलमपिपुरुषशेषःपुरुषानुभवविषयत्वात् अनुभवरूपत्वाद्वा तथापिरसत्वेनरसप्रधानत्वेनैव भोगेरसिकताभवतीतिफलंसेव्यं अपरमानन्दः सोपनगणनयाप्राप्तोब्रह्मणिस्थितः परिमितत्वात् किञ्चानन्दनिधिः आनन्दोनितरान्धयतेस्मिन्निति पूर्णानन्दोभगवानेवसेव्यः आनन्दपोषस्योक्तत्वात् तस्यतिरोभावमाशंक्याह सत्यमिति मनुफलान्तरविषयेचित्तसद्भावेकिंविधेयं उद्यतस्यकामस्यप्रतिवादोनशक्यतइतिन्यायात् तत्राह सर्वधीवृत्त्यनुभूतसर्वइति सर्वधीवृत्तिभिःसर्वेषांसर्वज्ञानजनकेन्द्रियवृत्तिभिः अनुभूतंसर्वंयेन यत्किंचित्फलायनकेनचिदुपभोग्यंतत्तदिन्द्रियद्वाराअनेनैवयोग्यंतःस्वरूपतोऽस्मात् यथा अन्यत्रावशिष्यते तथा फलमपि एतदन्तमुपभोग्यंफलञ्चावशिष्यते मनुकथमस्यभोक्तृत्वं तत्तदधिष्ठातृणांदृश्यमानत्वात् तत्राह आत्मायंयेति तत्तदिन्द्रियाधिष्ठातृणान्दिगादीनां विद्यमानत्वेपि यथा आत्मासर्वेन्द्रियानुभूतसर्वःएवंभगवानपिसम्पेकदेशाभिमानिनम् अधिगणयतेनाधिष्ठितैरेवेन्द्रियैः सर्वमनुभवतीत्यर्थः नत्वात्मनः इन्द्रियाधिष्ठातृणामप्रतीतत्वात् आत्मीयत्वेनैवेन्द्रियाणांग्रहणात् तस्य स्वगृहीतमात्रानुभवोभूवतुनाम। भगवतस्तुसमष्टिरूपस्यव्यष्टिदेहस्थितकीटादिविषयप्रतीत्यभावात् आत्मीयत्वानावाच्च इन्द्रियाणां कथंसर्वधीवृत्तिभिर्भगवाननुभवति तत्राह स्वप्नजनानामीक्षिताहइ यथैकःस्वप्नस्यमायिकत्वेऽपिस्वाप्नजनमायिकस्यात्मरूपत्वात् तत्रस्वप्नद्रष्टुःपुरुषाःसर्वंपश्यन्तीति प्रतीतिरस्ति तत्रपुरुषदेहानांमायिकत्वंव्यायसिद्धं तथापि तन्निष्ठायाप्रतीतिसामायिकी तत्रचैतन्यान्तराभावात् भगवतोवाजीवस्यवाचैतन्यंभवति स्वस्यापिद्रष्टृत्वाभावात् इन्द्रियाणां गोलकाभावेनप्रदर्शना सामर्थ्यं गोलकस्यचस्वाप्नस्यवमिथ्यात्वात् भगवानेवपश्यतीतियुक्त्याध्यवसीयते निद्रावशाच्चतेनसहभेदोनस्फुरति तथान्यत्रापिसर्वंपश्यतीत्यध्यवसीयतेस्वप्नदृष्टान्तेन ततस्तेषुदेहेषुजीवसद्भावेऽसद्भावेवाभगवानेव द्रष्टेतिनिर्णीयतेतस्यचास्मदिन्द्रियगोलकापेक्षानास्ति देव तानामेवगोलकत्वात् विषयस्यचेन्द्रियत्वात् विषयश्चास्मदादिन्द्रियग्राह्यात् कारणाख्यपक्षेपिवासनया तत्रविषयेसद्भावात् कारणस्या

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

लयेक्षीनानामपि प्रकाशसंभवात् लयांगीकारेगौरवाच्चविषयेष्वेवलयांगीकर्त्तव्यः अन्यथानिद्रायामप्यवधायकत्वात्पुनरुद्बोधःकथंक्रियेत अहंकारःस्वात्माध्यासरूपइन्द्रियवलीयतेनस्विन्द्रियकारणभूतः तथासतिपुनःसृष्ट्यभावान्नोत्पद्येरन् अतोविषयलीनानीन्द्रियाणि भगवल्लीन्द्रियलीनानिभवन्ति अतःस्वप्नद्रष्टृविचारेक्रियमाणायथासर्वेष्वप्यसर्वेषामात्माभूत्वासर्वंपश्यतीतिनिश्चयः एवंजागरणविस्थायामपि तत्रतद्विषयेप्रविष्टानींद्रियाणिभगवदिन्द्रियप्रवेशाद्भगवद्ज्ञानसाधकानिभवन्ति अन्यथाभगवतइन्द्रियातिरिक्तस्यविषयस्याभावात्किंगृहीयात् तत्रेन्द्रियसम्बन्धं आत्मानंगृह्णन्नपिवक्तव्यत्वाकांक्षायांआत्मनोवेद्यत्वात्परेन्द्रियवेद्यत्वेन इन्द्रियस्यैववेद्यत्वंसम्भवति अतोऽप्यस्मदिन्द्रियापेक्षा स च सर्वत्रैकः भेदकप्रमाणाभावात् स्वप्नदृष्टान्तेन व्यावर्त्तकानामप्यावर्त्तकत्वात् अतस्तेनैव सर्वभोगसिद्धेःपुनर्यत्नान्तरेणभोगोनसाधनीयः आत्मनःपातसम्भवाच्च देहस्थितकीटेषुतुस्वस्यसर्वात्मभावतिरोभावात्जीवत्वाद्ज्ञानस्फुरणमिति सर्वमविवादम् ॥ ३९ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज श्रीवल्लभविरचितायां द्वितीयस्कन्ध प्रथमाध्यायविवरणम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ब्रह्म ब्राह्मणाः आननम् । क्षत्रं क्षत्रियो भुजा यस्य सः । विट् वैश्य ऊरू यस्य सः । अंघ्रौ श्रितः कृष्णवर्णः शूद्रो यस्य सः । नाना अभिधा नामानि येषां ते च ते अभीज्या देवाः तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः, द्रव्यात्मकः हविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्म आवश्यकं कृत्यम् ॥ ३७ ॥

इयान् एतावान् सन्निवेशः अवयवसंस्थानम् । अस्मिन् वपुषि स्वबुद्ध्या सारथिभूतयेत्यर्थः मनः सन्धार्यते योगिभिः । यतो व्यतिरिक्तं किञ्चिदपि नास्ति तस्मिन् । अयमर्थः—मनो हि स्वचाञ्चल्यवशाद्यत्र यत्र भ्रमति तत्र तत्रैव भगवत इदममुकमङ्गमिति स्वबुद्ध्या विचारयेत्, एवञ्च मनसः स्वाभाविकाः सर्व एव विषया भगवदङ्गान्येवेति सर्वमपि चिन्तनं भगवच्चिन्तनत्वेन पर्यवस्येत्, तथा स्पर्द्धावशादयो भावा नैवोत्पद्येरन्, स्पर्द्धादिविषयाणां मनुष्यगन्धर्वादीनामपि भगवदङ्गभूतत्वेन ध्येयत्वादेवेति ॥ ३८ ॥

नन्वेवं भगवद्धारणाभ्यासस्यानुषङ्गिकाणि फलानि भोगैश्वर्य्यादीन्यवश्यमुत्पद्यन्त एव योगी तानि स्वतःप्राप्तान्युपभुञ्जीत न वा । आद्ये योगशैथिल्यप्रसङ्गः । यदुक्तम्—यदा न योगोपचितासु चेता मायासु सिद्धस्य विषज्जतेऽङ्ग । अनन्यहेतुष्वथ मे गतिः स्याद्यात्यन्तिकी यत्र न मृत्युहासः ॥ इति । द्वितीये उपस्थितभोगत्यागस्य दुष्करत्वमिति । सत्यम् । विवेकेनैव सर्वं सुकरमिति विवेकप्रकारं दर्शयति । सः योगी सर्व्वाभिधियां वृत्तिभिरिन्द्रियलक्षणाभिः प्राचीनसहस्रजन्मवर्त्तिनीभिरनुभूतमेव सर्वं देवेन्द्रत्वनरेन्द्रत्वादिकं भोगैश्वर्यादिकं येन सः किं पुनरर्द्धितचर्व्वणायेति भावः । न च तस्य तस्यापि न स्थिरत्वमित्यत्र दृष्टान्तः आत्मा जीवः यथा स्वप्ने जनानां पात्रमित्रसैन्यादीनां तदुपलक्षितराज्यादिभोगानाञ्च स्वसृष्टानामेक एव ईक्षिता अनुभविता । अतस्तं सत्यसर्व्वकालदेशवर्त्तिनम् आनन्दानां निधिं भगवन्तमेव भजेत, न त्वन्यत्र असार्व्वादिकत्वादसत्ये अनानन्दनिधौ विषयसुखे इत्यर्थः ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीये प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ब्रह्मब्राह्मणास्तस्याननंमुखम् महात्मावैराजःपुरुषः क्षत्रंक्षत्रियोभुजायस्यसतस्यविट्वैश्यः ऊरूयस्यसतथा अंघ्रिभ्रितः कृष्णवर्णः शूद्रोयस्यसतथा नानाऽभिधाः बहुनामकाः येऽभीज्याःदेवास्तेषाङ्गणैरुपपन्नोयोद्रव्यात्मकोहविः । साध्योवितानयोगः यज्ञयोगस्तस्याराधनभूतंकर्म ॥ ३७ ॥

ईश्वरविग्रहस्यपुरुषशरीरस्ययः सन्निवेशः पादादिसन्निवेशः मयातेतुभ्यंकथितः असौइयानेतावानेव अस्मिन्नीश्वरविग्रहेस्वबुद्ध्यामुमुक्षुभिर्मनः सन्धार्यतेस्थिरीक्रियते यतोऽन्यत्किञ्चिन्नास्ति ॥ ३८ ॥

स्वइति । यःस्थूलदेहभजनायतयोक्तःसभगवान् सर्वधीवृत्तिभिरनुभूतसर्वेश्वराचरंयेनसयोक्तः यतःसआत्मासर्वंयदात्मकमेवातः सर्वतद्ज्ञानगोचरम् स्वप्नजीवस्यफलविशेषभोगायपुरुषशरीरादीन्भगवान्करोतितान् । जीवात्मायथाएकएवपश्यतितद्वत् स्वप्नमृषिर्भगवत्कल्पितंवेदान्तकोस्तुभंस्थितम् एवम्भूतन्तम्भगवन्तंसत्यमानन्दनिधिंभजेत अन्यत्राऽब्रह्मात्मकतयाकस्मिंश्चिदुपासनाबुद्ध्याज्ञानसङ्गेत । ततआसङ्गादात्मपातः ॥ ३९ ॥

इति श्रीसनत्कुमारसन्ततिप्रवर्त्तक भगवन्निम्बार्कचरणाचिन्तक शुकसुधीप्रणीते श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कन्धीये प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

ब्राह्मण आनन, क्षत्रिय भुज और महात्माके वैश्य ऊरु एवं कृष्णवर्ण शूद्र अंघ्रितल में आश्रित हैं । वसु रुद्रादि नाना नामवाले देवगण से उपपन्न द्रव्यात्मक वितानयोग (यज्ञ) उनका कर्म है ॥ ३७ ॥

इयनाही! यह ईश्वर विग्रहका सन्निवेश है । जोमैंने तुम से कहाहै । इसी स्थूल विराट् रूप में बुद्धिसे मन धारण करते हैं कि जिस से व्यतिरिक्त कुछ और नहीं है ॥ ३८ ॥

स्वप्न द्रष्टा जीव अपने तात्कालिक भोगके निमित्त जैसा ईश्वर सृष्ट स्वप्नके देह लोक और विषयोंका आप एकही भोक्ता होता है ऐसेही समस्त ज्ञानेन्द्रियोंसे सब अनुभव करनेवाला योगी, उन सत्यस्वरूप आनन्दनिधिका भजन करै । और कहीं भोगमें आसक्त होनेसे आत्माका अधःपात होता है ॥ ३९ ॥ प्रथम अध्याय समाप्त ।

शुक उवाच । एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राग्व्यवसायबुद्धिः ॥ १ ॥
शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः ।
परिश्रमस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥
अतः कविर्नाममसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥
सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

द्वितीये तु ततः स्थूलधारणातो जितं मनः । सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥
इत्यालम्बनरूपैवमुक्ता वैराजधारणा । इहोच्यते तु तत्साध्या सर्वान्तर्यामिधारणा ॥ ० ॥

तत्र तावत् पूर्वोक्तधारणाया अवान्तरफलमाह । एवं या धारणा तया तुष्टाद्धरेः पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात् प्राक्तनं विश्वं यथासीत्तथा ससर्ज्ज । व्यवसायात्मिका बुद्धिर्यस्य सः अतएवामोघा दृष्टिर्यस्येति अतस्तया धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥

उपासनाफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारः, अतो वैराग्यार्थं सर्वकर्मफलं निन्दति । शाब्दं शब्दमयं ब्रह्म वेदरूपस्य एषः पन्थाः कर्मफलबोधनप्रकारः । कोऽसौ अपार्थैः अर्थशून्यैरेव स्वर्गादिनामभिर्धीः ध्यायति तत्तदिच्छां करोति इति यत् । अपार्थत्वमेवाह तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिश्रमन्नर्थान्न विन्दति तत्तल्लाभं प्राप्नोऽपि निरवद्यं सुखं न लभते इत्यर्थः ॥ २ ॥

तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशङ्क्याह । अतः कविर्नाममात्रेषु भोग्येषु यावता अर्थेन अर्थो देहनिर्वाहो यस्य सः तथाभूतः स्यात् । अप्रमत्तः तावन्मात्रेऽप्यनासक्तः । व्यवसायबुद्धिः नेदं सुखमिति निश्चयवान् । तदापि तत्र तस्मिन् अर्थे अन्यथैव सिद्धे सति तत्र प्रयत्ने परिश्रमं पश्यन् न यतेत ॥ ३ ॥

अन्यथासिद्धिमाह सत्यामिति द्वाभ्याम् । कशिपोः शय्यायाः । स्वतःसिद्धे बाहौ सति उपबर्हणैः उच्छीर्षकैः । पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्यास्य तद्दीपनी ।

० ॥ १ ॥

निरवद्यम् इति । ऐकान्तिकात्यन्तिकलक्षणमित्यर्थः । तत्रैकान्तिकत्वं दुःखनिवृत्तेरवश्यम्भावः आत्यन्तिकत्वं नाम निवृत्तस्य दुःखस्य पुनरनुत्पाद इति ॥ २ ॥

कविरिति । धीर इत्यर्थः ॥ ३—४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंवैराजधारणामुक्त्वामुमुक्षोर्हृदयेउपास्यत्वेनोपास्यन्तदुपासनानिष्ठस्यार्चिरादिनागतिञ्च वक्ष्यन्नुक्तायावैराजधारणाया एवतावन्माहात्म्यमाहमुनिः । एवमिति एवयाधारणातयातुष्टाद्धरेः पुराप्रलयसमयेनष्टां पूर्वकल्पेचतुर्मुखेन सहावनष्टांस्मृतिं । सर्गविषयकज्ञानंप्रत्यवरुध्यलब्ध्वाव्यवसायबुद्धिः स्मृतिविषयेव्यवसायरूपज्ञानः अतएवामोघदृष्टिरमोघायथावस्थितदृष्टिस्तत्तद्वस्तुविषयज्ञानं यस्यसतथोक्तः आत्मयोनिश्चतुर्मुखः अप्ययात्प्रलयात्प्राग्यथातथाससर्ज्ज । पूर्वकल्पपदार्थसजातीयानवद्यार्थान्ससर्ज्जेत्यर्थः अत्रयद्यपि पूर्वकल्पेविनष्टां स्मृतिपरिलुप्तेत्यनेनतत्पूर्वकल्पेयश्चतुर्मुखः सएवास्मिन्कल्पेपिप्रतीयते । तथापि प्रतिकल्पंचतुर्मुखानांभेदएवन्याय्यः तत्तत्कल्पचतुर्मुखस्यब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसञ्चरेतेब्रह्मलोकेतुपरांनकालेपराभूतात्परिमुच्यन्तिसर्वेइतिमुक्तावगमेन पुनरावृत्त्यसम्भवाद्भगवत्पूर्णं कृपापात्रस्यपुनःसंसारायोगाच्च । तथाहिवक्ष्यति भगवान् ब्रह्मविमाधनवधातिपापीयांस्त्वांरजोगुणाः नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रहइति अतः प्रतिकल्पंविभिन्नाएवचतुर्मुखाः अतएव ह्यपिपूर्वानुभूतवस्तुविषयकज्ञानपरःस्मृतिशब्दः तथापीहसर्गविषयकज्ञानमात्रपरः

स्मृतिशब्दप्रयोगस्तुज्ञातृत्वेयज्ञानानामर्थतसाजात्याभिप्रायकृतः पूर्वदृष्टात्यन्तसजातीयेगवान्तरेसत्यायंगौरितिप्रत्यभिज्ञावत् । ननुवैराजधारणायाविश्वसृष्टिसामर्थ्येविश्वसृष्टौचसत्यांसृष्टानां पातालादीनां वैराजपादतलादिरूपेणाधारणेतीतरैतराश्रयदोषाति न च ज्ञस्वभाणपदार्थविषयक ज्ञानसद्भावेन पातालादीनामवयवत्व कल्पनंयुक्तं स्मृति प्रत्यवरुध्येत्यनेन ज्ञानस्यापि धारणात्तोलक्ष्यत्वाँवगमात्सत्यं भगवज्ञाभिकमलाक्षतुर्मुखे उत्पन्नेतपश्चर्ययाभगवतिप्रसन्ने भूयस्त्वंतप आतिष्ठविद्याश्चैवमदाभयां नाश्यामंतर्हृदिब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् । ततआत्मनिलोकेचभक्तियुक्तः समाहितः द्रष्टासिमांततंब्रह्मन्मयिलोकास्त्वमात्मनइति वक्ष्यमाणरीत्याऽक्ष्यमाणेषुसर्वेषु पदार्थेषु दृष्टेषु तेषां च पदार्थानां भगवदवयवत्वेन धारणायासृष्टिविषयज्ञानसृष्टिसामर्थ्यलाभस्यात्राभिधानात् । वैनन्दिनकल्पाभिप्रायंवा एवं प्रपञ्चशरीरकतदाश्रय भगवद्ध्यानाद्ब्रह्मणः सृष्टिक्षमत्वलाभउक्तः ॥ १ ॥

अथ मुमुक्षुभिर्हृदिउपास्यं रूपंवक्ष्यन् यावानर्थ उदपानेसर्वतः संप्लुतोदकेइतिन्यायेनवेदेमुमुक्षोः माकल्येनार्थानुपादेयत्वमाह । शाब्दस्यैति शाब्दस्यशब्दात्मकस्य ब्रह्मणोवेदस्यैषपंथाएषादिक् कइत्यतआह यदितिभपार्थैरपगतपरमपुरुषार्थैःनामभिः स्वर्गादिविषयशब्दैर्धीर्बुद्धिर्ध्यायतिचिन्ताङ्करोतीतियत्स्वर्गादिफलेश्रुतेतत्रधीः । प्रवणास्यादित्यर्थः नाम्नांसारवत्त्वेनस्वरूपत इतिद्योतनार्थेनामपदप्रयोगः तृतीयाचाध्ययनेनवसतीत्यादिवच्छब्दत्वर्थेनाममात्रसारभूतस्वर्गाद्यर्थकर्मणि बुद्धिप्रावण्यापादनमिति यदयंवेदमार्गइत्यर्थः स्वर्गादीनामपार्थत्वमेवाह परिश्रमन्निति मायामयेप्रपञ्चेवासनयाऽनादिकर्मवासनयाशयानोवर्त्तमानः तत्रस्वर्गादिविषये परिश्रमन्नर्थान्मोक्षतदुपायादीन्नविंदतेनलभते ॥ २ ॥

ननु मातापितृसहस्रेभ्योपिवत्सलतमोवेदआत्मोज्जीवनेप्रवृत्तः कथंनामप्रमाणसारभूतस्वर्गाद्यर्थकर्मयोधयन्प्रतारयेदित्याशङ्कां परिहरन्मुमुक्षोरपेक्षितांशस्योपादेयतामाह । अतइति अतःवेदोक्तस्यसाकल्येनानुपादेयत्वात्कविःत्याज्योपादेयविषय विवेकधाननेनोक्तांकापरिहृता वेदोहितमःप्रचुराणांरजः प्रचुराणांसत्वप्रचुराणांचलोकानांवत्सलतयैवहितमबबोधयति । यद्येषांस्वगुणानुगुणयेनस्वर्गादि साधनमेवहितंनाबबोधयेत्तदाएतेरजस्तमःप्रचुरतयासात्विकफलमोक्षविमुखाः स्वापेक्षितफलमजानन्तः कामप्रावण्यवशाभनुराये उपायश्चाश्रित्या प्रनष्टाभवेयुरितिगुणत्रयप्रचुराणांस्वर्गादिफलानितत्साधनानिचाबबोधयति । केवलसात्विकस्यतुमुमुक्षोस्तानि परित्याज्यानि परिगृहीतानिवातत्फलानिपरित्यज्यसर्वाणिकर्माणिमोक्षैकफलतयानुष्ठेयानीतिविवेकसम्पन्नः अप्रमत्तःकदाचिद्देहधारणार्थतया परिग्राह्येष्वन्नपश्वादिष्वनासक्तः व्यवसायबुद्धिः स्वर्गादिनांक्षयिष्णुत्वसातिशयत्वनिश्चयात्मकज्ञानवान्नामरूपनामात्रसारभूतेषुभोगेषुयावदर्थःस्यात् यावत्प्रयोजनवान्स्यात्ननुप्रयोजनाभासेषुरतःस्यादित्यर्थः । नानाविधेषुफलेषुतत्साधनभूतेषुबहुकर्मसुवेदबोधितेषुसत्स्वपियावतादेहधारणीमुपासनानिर्वृतिश्चभवतितावत्परिग्रहवान्स्यादित्यर्थः देहधारणार्थं क्षुद्रफलेष्वपियतितव्यमित्यतआह । सिद्धइति अर्थेऽपेक्षितेऽर्थेऽन्यथापूर्वकर्मानुरूपेसिद्धेसतितत्तत्क्षुद्रफलतदुपायादिष्वपिनयतेत कथम्भूतोनयतेततत्रयत्नेक्रियमाणो परिश्रमंसमीक्षमाणोभविष्यत्येवभवतिपरिश्रमस्तुफलातिइत्यर्थः ॥ ३ ॥

अन्यथासिद्धिविवृणोति सत्यामित्यादिनाद्वयेन क्षितौसत्यांकशिपोः शय्यायाःपर्यंकादेःप्रयासैस्तदर्जनानुकूलप्रयत्नैःकिंनकिमपि । किंतुपरिश्रमएवेत्यर्थः स्वतःसिद्धेबाह्यैःसत्युपबर्हणैः किंभ्रूलतौसतिपुरुधाऽपाश्यानानाविधयेभोजनपात्रेणकिंउपाधानैः दिक्वल्कलादौसतिदिक्षूत्तरीयस्थानीयासुसतीषुवल्कलेषुअन्तरीयस्थानीयेषुसत्सु ननुवल्कलाभावेदिक्षुसतीष्वित्यर्थः स्वरसःअपवित्रकरोनग्नइति नग्नस्यकर्मानर्हत्वस्मरणान्मुमुक्षोरप्यावश्यकानामनुष्ठेयत्वात् दुकूलैःक्षौमैःकिं ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवंवैराजाख्यस्थूलरूपस्यधारणाश्रयत्वमुक्त्वाऽस्मिन्नध्यायेतत्तद्धृदयकमलकर्णिकान्तर्वर्त्तिनोहरेरात्माख्यरूपस्य धारणाविषयत्वं तदुपासकानांफलंचोपदिशति । तत्रप्रथमतोधारणायांक्षिप्रप्रवृत्तयेकुत्रकस्यहृदफलेयं धारणेतिशङ्कांकुमुन्मूलयन्मूर्तिविषयत्वमितिप्रश्नं परिहरति एवमित्यादिना आत्मापरमात्मायोनिःकारणंयस्यसतथासब्रह्मा पुराभादिसृष्टेःकालेननष्टास्मृतिरहितांप्राक्कल्पविषयांस्मृतिमेवमुक्तधारणायाप्रत्यवरुद्धांऽकुरीकृत्यप्रतिलभ्यतुष्यन्नलंबुद्धिंगच्छन्नव्यवसायेजगत्सर्जनलक्षणोद्योगेबुद्धिर्यस्यसतथा ततएवधारणायाएवामोघदृष्टिः अव्ययात्प्रलयात्पूर्वंयथावस्थितंतथैवंजगत्ससर्जेत्यन्वयः ब्रह्मणोहृदयफलत्वादियंविश्वस्मर्तव्येतिविज्ञायते ॥ १ ॥

वाङ्मनोऽगोचरस्यकथंधारणावलंबनत्वमत्राह शाब्दस्येति उक्तप्रकारेणश्रोतव्यादित्वेनविधीयमानत्वात्स्वतन्त्रत्वात् ब्रह्मादिस्वर्गजगत्सृष्ट्यात्मकात्ततःस्थितत्वात्सर्वस्यतदधीनत्वात्सर्वगुणसम्पूर्णत्वाच्चशब्दस्यब्रह्मणोवेदादिसर्वशब्दराशेरेषहरिःपन्थाविषयोमुख्याख्यस्यान्वयः । इन्द्रादिनाम्नांपुरन्दरादिष्वेवरूढत्वात्हरेस्तन्नामत्वाऽव्यवरूढेःक्वाप्यप्रयोजकत्वमत्राह यन्नामभिरिति मायामयेश्वरेच्छानिर्मितत्वात्तदधीनेसंसारेशयानः परिश्रमन्किमप्यजानन्वर्तमानोतएवासनयानानाकर्मवासनया नानायोनिषुपरिभ्रमन्योजीवस्तस्यधीर्यत्पुरन्दरादिकमिन्द्रादिनामभिर्ध्यायति तत्रपुरन्दरादावर्थानिन्द्रादिनाम्नामनुपहतपरमैश्वर्यादिलक्षणान्नविन्दतेअलब्धुद्धिर्नप्राप्नोति किञ्च तदुपास्तौतेभ्यःपुरुषार्थाश्चनलभते । कुतइत्यतउक्तं अपार्थैरिति तत्रैश्वर्याद्यर्थानामसम्भवात् अतोहारेश्चैवपरमैश्वर्यादिगुणाकारत्वेनाभिधेयइतिस्वएवस्मर्तव्यइति अन्यत्सर्वमस्मर्तव्यंप्राधान्येनेतिभावः अनुपसर्गोपकृप्प्रत्ययविधानाद्ध्यायतीतिधीर्ज्ञानाश्रयः पुरुषोवार्थादित्यर्थाश्रयत्वेनापार्थैरित्यनेनसंयोज्यपदपार्थैर्यस्मिन्पुरन्दरादावपार्थैरिन्द्रादिनामभिः पुरन्दरादिकंध्यायतितत्रपुरन्दरादावितिवा सर्वनामावर्तनविष्णुस्तदन्यार्थोऽनुस्मरेदितिस्मृतिप्रसिद्धिहिशब्देनाह ॥ २ ॥

सर्वेशब्दानांविष्णुवैकविषयत्वेविदुषामभिवादनादिसर्वव्यवहारोच्छेदप्रसङ्गइतित्राह अतइति एवंसर्वनामार्थतयाहरिरेवध्येयस्तद्व्यवहार्यश्चयतोऽतःकविःसर्वज्ञः । अप्रमत्तोजागरणशीलोनान्यांहरिविषयत्वमविस्मरन्नित्यर्थः अतएवव्यवसायबुद्धिर्निश्चयबुद्धिर्नाममुहुरितरविषयेषुबहादिषु अभिवदनादिनायावदर्थः स्वप्रयोजनंयस्यसतथास्यात् । नातोधिकप्रयोजनइत्यर्थः अन्यथाघटादिलोकविषयव्यवहारमन्तरेणार्थेक्षप्रयोजनेसिद्धेस्वयमेवसम्पन्नोनतत्रयतेतेत्यन्वयः कुतोत्राह तत्रेति तत्तत्पदार्थेषुतत्तत्परिश्रममर्थपूर्त्यभावेनमनःक्षुब्धं समीक्षमाणइत्यन्वयः ॥ ३ ॥

श्रीविजयध्वजतीर्थकृत पदरत्नावली ।

इदानीं स्वतःसिद्धिप्रकारं दर्शयति मन्यामिति देवनिर्मितायांक्षितौसर्व्वाकृशिपाःशय्यायां सम्पाद्यनेप्रयासैःकिंकिमपिप्रयोजनं । शरीर
ज्ञानिवांहस्यद्रव्यान्तरणांसिद्धत्वाद्दितभावः । बाहौस्रसिद्धेस्वतोऽन्यायासेनसम्पद्येतिउपबर्हयेःशिरःपीठैरुच्छ्रीर्षकैकिं । कराङ्कौ
सतिपुरुभिर्विस्तीर्णैःपर्णपात्रैःकिं बर्हपर्णोदलंपत्रमित्यभिधानं विशालमेवबल्लाणांलाभेसतिदुकूलैर्मिष्कापाद्यलोमादिवस्त्रैःकि ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

० ॥ १ ॥

शाब्दस्येति । यत् यस्मात् यं श्रुत्येत्यर्थः ॥ २—५ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

मानमेयविनिर्द्धारस्तत्वार्थेविनिरूपितः । फलसाधननिर्द्धारोद्वितीयेविनिरूप्यते ॥ १ ॥
द्विविधस्तत्वनिर्देशोबाह्याभ्यन्तरभेदतः । बाह्योविरूपितस्तत्रमानमेयपुरःसरं ॥ २ ॥
आन्तरोभग्नमार्गेणफलसाधनबोधनः । अतःसाधननिर्द्धारःप्रथमंक्रियतेस्फुटः ॥ ३ ॥

पश्चात्फलस्यनिर्द्धारस्ततस्तत्वफलिष्यति एवंपूर्वाध्यायेसर्वेषांबस्तूनांप्रमाणतः प्रमेयतश्चतत्वं निर्द्धारितं । भिन्नतयाप्रतीतानामपि-
भगवतिप्रवेशात् । भगवतांद्रष्टृत्वाच्च प्रसङ्गाद्भगवतः साधनत्वं फलत्वंचोक्तं तथापि बाह्यत्वाभ्यतयोस्तत्वनिर्द्धारः इदानीं सर्वेषांकेन-
रूपेणसाधनताकेनरूपेणाचफलनतिविचार्यते । तत्रत्यागविषयत्वेनसाधनता । अवान्तरफलत्वे न च फलतेति सर्वपरित्यागेन जीवस्य
रूपस्यसाधनत्वंब्रह्मस्वरूपस्य च फलत्वं निर्द्धारितं भविष्यति तत्रपूर्वोक्तफलस्यसाधनस्य वा प्रकृतोपयोगंबक्तुवैराग्यशेषत्वेनतदुपयोग-
माह एवंपुरेति तथासामर्थ्यफलमितिकेचित् तद्ब्रह्मणःस्वत निश्चत्वात्तनष्टस्मृतेः प्रत्यवरोधवचनःअविचारणीयं नष्टपदेनचसर्वथानाशो
पुनस्तुतेनभगवतातत्संपादनेतोयहेतुत्वमेवमवेत् ननुसामर्थ्यहेतुत्वमपि अन्यथासिद्धत्वात् । अत्रतुपूर्वस्मृतोत्फल्लोधहेतुत्वेवदंवैराग्य
हेतुत्वं भगवत्तोषेवासर्वहेतुत्वमिति । प्रथमन्तप्रत्यवरुध्यपुनःससर्जेतिसम्बन्धः तुष्टाद्भगवतःसकाशाद्भगवत्तोहेतु
भावाद्भायथापूर्वतथाससर्ज्ज । तोषेपूर्वज्ञानमेवहेतुः यथाकश्चित्कश्चनपदार्थसङ्कीर्ण्यबालकंन्यायेनाहितंसचेदुपायेनतज्ज्ञानीयात् तदासन्तुष्टो
भवेत्पितृत्वात् तथास्वस्यापिसृष्टेः पूर्वंभगवच्चिकटे स्थितत्वात् भौमभोगार्थंमागतस्यतद्विस्मरणात् । उपायेनतत्स्मरणंतत्तुष्टः सन्
स्वरूपंप्रापयेदितिमुख्यंसाधनंपूर्वोक्तधारणैव तोषसाधनपक्षेपितुष्टुतुतत्रकिमलभ्यमितिन्यायेनमन्यत्सर्वंसुगमम्भविष्यतीतितद्वदर्थंसा-
धनंकर्त्तव्यं । सृष्टिसामर्थ्यत्वप्रयोजकं । परमधिकारित्वेनप्रतिबन्धकं भात्मयांनिर्ब्रह्मानष्टांविस्मृतांस्मृतिपदार्थज्ञानसृष्टेरनादित्वात्पूर्वमपिस्म-
रणेनैवकृतं अतःसंस्कारनाशोनोक्तः । तुष्टाद्भगवतःसकाशात्इदंसर्वंभगवत्यवलीनस्थितं पुनस्तथैवयथाप्ययात् प्रलयात् प्राक्पूर्वंयथेयं
सृष्टिः यथाबाल्यवसायात्मिकाबुद्धिर्यस्यतथाभूतःसन्तथाससर्ज्जेत्यर्थः ॥ १ ॥

इदानींइहामुत्रार्थ फलभोगवैराग्यंसर्वविषयत्यागार्थं साधनान्तरमाह शब्दस्यहीति सर्वेविषयास्त्यक्तव्याः तत्रमहतांलौकिकबाधा
भावेपिपरित्यागेवैदिकंबाधकंभवेत । यावज्जीवमग्निहोत्रंजुहुयात् स्वर्गकामः प्रजाकामः पशुकामइति तत्रयावज्जीवाधिकारस्यनित्यत्वेन
निर्व्वाजकामनादीनांवानित्यत्वेवैराग्यमकर्त्तव्यमेवस्यात् कर्त्तव्यत्वेवाभान्तरमेवकर्त्तव्यंस्यात् । आत्मन्यग्निसमारोपणंवाकृत्वाभिहोत्रं
कुर्वाणएवप्रव्रजेद्वा जरामर्यादाग्निहोत्रंवाकुर्यात् सर्वेषांपदार्थानांश्रुतिमूलकत्वेनतद्विरोधेनपदार्थकल्पनाया अशक्यत्वात् । तस्माद्यथोक्ता
एवपदार्थाः फलेसाधनेचावगन्तव्याः तस्माद्वैराग्यंपूर्वोक्तप्रकारेणशास्त्रार्थनिर्द्धारोवानसम्भवतीत्याशंक्यसर्वस्यापि वेदस्यार्थमाह यथा
परब्रह्मभगवानर्थरूपः । एवंवेदोपिशब्दराशिभूतं ब्रह्मभस्वराशिवत् यथा ब्रह्मणिसर्वत्रानन्दः पूर्णतएवंशब्दब्रह्मण्यपिसर्वंफलमुच्यत
स्वस्यब्रह्मत्वख्यापनाय शब्दप्रस्थानत्वाच्चशब्दमात्रं अर्थस्तुपरब्रह्मरूपमितिफलन्तत्रं भन्यथाएकस्मिन्कर्मणिप्रतिसाधनंधर्मधर्मिभेदेन
क्रियाभेदेनचउच्यमानानिफलानि अप्रामाण्यं अन्यानर्थक्यंवासम्पाद्ययेयुः यथास्वर्गायवापूतानि लोकायरूपन्तस्युपक्रम्यदाक्षिण्याहोम
आहुतिश्चतुष्टयनैमित्तिकेदक्षिणासंस्कारत्वेनक्रियमाणेगार्हपत्ये आहुतित्रयं । आग्नीध्रउत्तरवेद्यांचैकैकाहुतिः तत्रप्रतिकर्मसंख्यादीनामपि
माहात्म्यवेदनबाध्यते द्वाभ्यांगार्हपत्येजुहोतिद्विपाद्यजमान प्रतिष्ठित्याइति यद्येतावाहुतित्रयएवयजमानः प्रतिष्ठितःतदाअन्यानर्थक्यमेव-
स्यात् । विरोधेनाप्रामाण्यंवास्यात् विकल्पस्तुनभवत्येककर्मत्वात् किञ्च आग्नीध्रेजुहोतिमन्तरिक्षएवाक्रमतइति यथाग्नीधूहोममात्रेणैव
मन्तरिक्षाक्रमणसामर्थ्यस्यात् तदाश्रुतिः प्रमाणंस्यात् तत्प्रत्यक्षविरोधात् असम्भावितं आहवनीयेजुहोतिस्वर्गमेवैनंलोकंगमयतीति
तद्वानीमेवयजमानस्यैस्वर्गप्रापणमनिष्टमितिप्रवृत्तिप्रतिबन्धकताचस्यात् किञ्च आहुतित्रयसंख्ययायजमानस्याग्नप्रतिष्ठितत्वमुन्मासारीभ्या
मृग्भ्याङ्गार्हपत्येजुहोत्यमुमेवैनंलोकंसमारोहयतीतिहोमसाधनऋचोः सूर्यप्रकाशकत्वेनधर्मेण स्वर्गाक्रमणलक्षणंफलमुक्तं तच्चसंख्याफलेन
विरुध्यते एवंसर्वत्रबहुफलत्वंअन्योन्यविरुद्धफलत्वञ्चकर्मणांवदन् अप्रामाणिकमेवस्यात् अतःप्रामाण्यार्थंकिञ्चित्तात्पर्यवर्णनीयं यथाच
शब्दार्थावाधितानभवेत् तथाचवर्णनीयं । तत्रषोडशऋत्विग्रूपयजमानात्मकस्ययज्ञस्यसर्वलोकात्मतःपातिनः भगवद्रूपस्यलीलासर्वत्रवर्यते
यथासभगवान् एकत्रैवसर्वत्रसानाधिष्ठमानत्वात् सर्वत्रसर्वपूर्णोपिस्वयायत्रयेनभोगेनलीलांकृतवान् तथावेदोवदतीति निश्चीयते ततश्च
कांडत्रयेपि अयमेवभगवान्विराट्रूपः यज्ञापरमात्मप्रतिपाद्यइतियदस्माभिःस्थूलाधारणउक्तावेदेनापितदेवोक्तिश्चाब्दस्यब्रह्मणः अस्म-
दुक्तएवपन्थाः किन्तु लोकोभ्राम्यतिवाक्यार्थापरिज्ञानात् यतः यत्रस्थितैर्नाभिः वाक्यार्थं सम्बन्धरहितैरेवपदार्थं विनिश्चित्यवाक्यार्थः
साधनतांज्ञात्वातत्तादृच्छांकरोति ततस्तमेवार्थंध्यायति नहिपदानांवाक्यार्थबोधनेपदार्थेष्वपिबोधकत्वं युगपद्वृत्तिद्वयविरोधात् । अतः
स्वार्थेभपार्थैरेघनाभिर्लोकोभ्राम्यति । ततःस्वबुद्धावेदार्थमत्वातत्रतत्रबुद्ध्यापरिभ्रमन्तदर्थकर्मवाकुर्वन् अर्थानूफलत्वेनोक्तानूनविन्दति ।
किन्तु वासनयाकामनाहार्द्धेनतमेवार्थंविचारयन्नशयालोभवति । अहामोहेनिमग्नोभवतीत्यर्थः तस्मादस्मदुक्तेवेदोक्तेचसेदाप्ताम्नाय
प्रामाण्यसन्देहःकर्त्तव्यइतिभावः ॥ २ ॥

नन्वादेवेदं भिन्नप्रकारकमध्यर्थं प्रतिपादयेत् । तदाकस्यापिकोऽपिपुरुषार्थोनसिध्येत् सर्वकरणासामर्थ्यात् तस्मानेवंनिर्णयोयुक्तइत्याशं-कयंयत्रसिद्धार्थानुवादकत्वेनमहावाक्योपयोगार्थमर्थांतरफलान्यनुवदति। तानिलोकसिद्धत्वाद्युक्तियुक्तानिसाधनानितादृशफलार्थंकर्तव्यं यथाधन्वन्निवप्रपाअसि। अग्नेःस्तुतौलोकसिद्धाप्रपादृष्टांतीक्रियते। तथाकारीर्यांवृष्टिकामोयजेतइत्येनेनाभिचरन्यजेतेतिफला भिप्रत्यक्षसंबंधा दीनि भगवल्लीलार्थमेवप्रतिपादितानि। महावाक्यार्थोपयोगीनिश्रुतेस्तात्पर्यलोकदृष्टांतरूपमवगंतुंनिपुणोभूत्वाद्यनुवादफलेषुसाधनेषुस्वस्य कार्यसिध्यतितावन्मात्रपरःस्यात् । शांतोदांतउपरतस्तितिक्षुःशमदमादिकमुपकुर्व्यआत्मन्येवात्मानंपश्येत् । एवंसर्वमिदंजगत्सभूतंस-मष्यमित्युक्तात्वातमेवंमतमनुविद्वांसऋषयःपुत्रैषणायाश्चवित्तैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतिइत्यादिभूयोभिर्मृत्युमुखयानिविद्वांसीति । अंभस्यपारइत्युपक्रम्ययएनंविदुरमृतास्तेभवंतीत्युपसंहाररूपंयथ यस्ययत्राधिकारःतावन्मात्रांभवेत् । तत्राप्यप्रमत्तः । नह्येवंज्ञानमात्रेणाग्निप्रकृतिनिरपेक्षणाकार्यंसिध्यति । नन्वेवंगोधूमराशिपतितयवं द्वारणावत्प्रतिनियमश्रुतालोकादिबलाभावात्अशक्यमेवस्यात्इत्याशंक्याह व्यवसायबुद्धिरिति । व्यवसायात्मिकाबुद्धिर्यस्य अतिदि चारेणासर्वमालोड्यस्वार्थमुद्धृत्यनिश्चित्यतत्साधनकरणार्थंदृढोभवेदित्यर्थः । तत्रकिंकर्तव्य मित्याकांक्षायां प्रथमतो लोकप्राप्तं देहादिनिर्वा हार्थं कार्यनकर्तव्यमित्याह सिद्धेऽन्यथार्थहेति । अन्यथैवकालेन भगवताया स्वभावेन कर्मणालोकैर्वादेहनिर्वाहेसिद्धेस्वयंतत्रप्रयत्नंनकु र्यात् स्वस्याहिपरिमितःप्रयत्नः । सभगवत्संबंधार्थं स्थापितोनान्यत्रविनियोगमर्हति किंच तत्तत्परिश्रमंतत्रसमीक्षमाणाः । नकेवलमन्य थासिद्धत्वमात्रेदूषणं । तत्रदेहनिर्वाहे तत्तत्परिश्रमंतेषांतेषांपरिश्रममेकैकस्मिन् शय्यादिपदार्थे देहेंद्रियबुद्ध्यादीनांपरिश्रमंसमीक्षमाणा नयतेतेतिसम्बन्धः ॥ ३ ॥

अन्यथा सिद्धिंदृष्टांतेनबोधयति । सत्यांक्षिता विति क्षितौविस्तीर्णतया प्रसारित शय्यारूपायां बालुकादौ कोमलरूपायांवा । उपाजं कलेशन्यतिरेकेणैवसत्यांसिद्धायां कशिपोस्तूलिकाया : वल्कचीरांसमीवनधूननास्तरणप्रयासैः किंफलं । साधनसुखस्यतुल्यत्वेऽपिमत्र दुःखाधिक्यात् । किंच स्वतः सिद्धेवाहौ। महापुरुषस्य इंद्रियावैकल्यशंकाभावादेयमुक्तम् । उपबर्हणौः शिरस्पुधतासाधनभूतैः। गल्लयां पादायाहच सतूलवल्लपुटैः किंप्रयोजनं । भिक्षंवाक्यम् अतस्तात्पर्येणैकवाक्यता करपात्रेणापिभिक्षानिर्वाहेअनेकविधान्नपाऽयानाद्यर्थं मध्याकिं सैवंत्रप्रयासानुसंधानंकर्तव्यम् उष्णकालेदिशः । शीतकालेवल्कलादीनि आदिशब्देनचीरपत्राद्दीनि । दुकूलैः पट्टवस्त्रैःकि किंच नहि विरक्तस्य जनैरपि किं । लोकाअपि सर्वेत्यक्तव्या इत्यर्थः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

द्वितीये चिद्घनवपुर्धारणासिद्धयोगिनः । देहं जिज्ञासोः सायुज्यप्राप्तावुक्तं सृतिद्वयम् ॥
भगवत्त्वमिहारोप्य हेयप्राकृतवस्तुषु । धारणोक्तथ तत्साध्या भगवद्धारणोच्यते ॥

उक्तलक्षणधारणाया अवान्तरफलमाह । प्रत्यवरुध्य प्राप्य तुष्टात् परमेश्वरात् । अव्ययात् प्रलयात् प्राक् इदं विश्वं यथासीत तथा ससर्ज्ज । व्यवसायं भगवत्प्रेरणावशात् लक्ष्याम्येवेति निश्चये बुद्धिर्यस्य सः ॥ १ ॥

अत्र म्रियमाणाः किं कुर्व्वीतेति प्रश्ने स्वर्गसाधनं यागादिकं कर्मैव कुर्वीतात्र वेदः सर्वं एव प्रमाणमित्याक्षिप्यासूंस्तत्र कांक्षः मत्याह । शाब्दे शब्दमये ब्रह्म वेदस्तस्य पथ पन्थाः । कोऽसौ यन्नामभिः नाममात्रैरेव स्वर्गादिभिः धीः साधकस्य बुद्धिः ध्यायति स्वर्गे सुखमेव प्राप्स्यामीति चिन्तयति वृथैव । यतोऽपार्थैः अपार्थत्वमेवाह मायामये तत्र स्वर्गादौ सुखमिति वासनया शयानः स्वप्नान् पश्य त्रिव परिश्रमन् अर्थान् न विन्दति तत्तल्लोकं प्राप्तोऽपि क्षयिष्णुत्वान्निरयं सुखं न लभते इत्यर्थः ॥ २ ॥

एवं योगप्रसङ्गे एव कर्मिणां मतम् अतिबहिरङ्गत्वेन स्पष्टमेव विनिन्द्य कर्मफलेषु वैराग्यं भक्तज्ञानिनोरपि साधारणं योगारूढानाम वश्यकर्त्तव्यत्वमाह । अतो बुद्धिमान् भोगार्थं न ध्यायेत् न यतेत च । किन्तु कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता इत्युक्तन्यायेन नामसु भोग्यवस्तुषु यावता अर्थेन स्वीकृतेन अर्थः स्वकृत्यनिष्पत्यर्थं देहनिर्वाहस्तावानेवार्थो ग्राह्यो यस्य तथाभूतः स्यात् । यतोऽयम अप्रमत्तः स्वसाधनसिद्धौ सावधानः । किञ्च विघ्नबाहुल्यदर्शनेऽपि स्वयोगाच्च परावर्त्तेतेत्याह । व्यवसायबुद्धिः यद्भवेत् तद्भवतु मय तु यन्निश्चितं तन्निश्चितमेवेति दृढविचार इत्यर्थः । किञ्च यावदर्थतापि कस्यचिदतिसुकुमारस्यैवोक्ता न तु स्वतःसमर्थस्येत्याह । अन्यथा प्रकारान्तरेण अर्थे स्वदेहनिर्वाहे सिद्धे सति तत्र पिष्टपेषन्यायेन न यतेत । यतः तत्र यत्ने परिश्रमं धनिकजनोपासनादिकम् ॥ ३ ॥
समर्थस्यान्यथासिद्धिमाह सत्यामिति । कशिपोः शय्यायाः बाह्यौ स्वसिद्धे स्वतःसिद्धे सति उपबर्हणौः उच्छ्रायकैः पुरुधा पुरुः बहु प्रकारे धा अन्नपाऽया भोजनपात्रेण ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पूर्वाध्याये साधनरूपास्थूलविग्रहवतो वैराजस्यभगवतो धारणोक्तेदानीं तत्साध्यरूपांसर्वांतर्यामिणोभक्तेच्छयाविष्कृताप्राकृत शरीरस्य धारणां वक्ष्यन्पूर्वोक्तायाधारणाया अवांतरफलमाह एवमिति । एवमुक्तलक्षणया धारणयातुष्टाद्वैराजात्पुराप्रलयवेलायांनष्टांसृष्टि स्मृतिप्रत्यवरुध्यपूर्वप्रजातुल्याया उत्तरप्रजायारक्षणार्थंपुनः प्राप्य अतएवाऽमोघादृष्टियस्यसः अतएवव्यवसायबुद्धिः आत्मयोनिर्भगवत्पु त्रः ब्रह्मा अव्ययात्प्रलयात्प्राक् इदंनिश्चंयथासीत्तथात्रादशमेवससर्ज्ज "सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत्" इति श्रुतेः मनुपूर्वंसृष्टिकर्तृ त्वेन "ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानः प्रविशंतिपरंपदम्" इतिवचनाद्ब्रह्मयोनेर्मुक्तत्वादिदंनाप्यवतइतिचेन्न सर्वेषां मुक्तानामेकैकेनजन्ममाऽपुनरावृत्तिश्रवाक्याभावात् । नचवाक्यंप्रतिकल्पसृष्टिविषयकस्मृतिप्राप्तोतीति तत्रस्मृतिनाशासंभवात् ॥ १ ॥

• मनुनानोधमेबुद्धिर्हियमानोपिजनः किंचिदपियथेष्टंसुखेनप्राप्नोतियद्धारणयाविश्वसृष्टिसामर्थ्यंभवति तस्यभगवतः सुखसाध्यमेवाफ लंपथिकुतीनामवर्त्ततेइत्यत्राह शाब्दस्येति शाब्दस्य "वेदैश्चसर्वैरहमेववेद्यः" इतिस्मृतेःसर्वैर्वेदायत्पदमामनंतीतिश्रुतेश्चवेदैकप्रमाणकस्यब्रह्मणो

क्षीरादि किं पिपि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥५॥
एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः।
तं निर्वृतः सन्नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥
कस्तां त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम कुर्य्यात्।
पश्यन् जनं पतितं वैतरण्यां स्वकर्म्मजान् परितापान् जुषाणम् ॥ ७ ॥
केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

इयमेवंविधा तस्यैव भवति कस्य यत्यस्यबुद्धिः अपार्थैःपुरुषार्थवर्जितैः नामभिर्नामेतिरूपस्याप्युपलक्षणंतथाचनामरूपैरित्यर्थः मध्यवर्तिनवसतीतिवत्तृतीयाहेत्वर्थे हेतुभूतैः दाराऽपत्यादिभिः ध्यायति अतएवमायामयंप्राक्तनलोकेवासनयाशयानः परिभ्रमन्तत्रमायामयंतानर्थान्स्वकर्मानुरूपान्दारापात्यादीन्विंदतेनतुयोगसिद्धिमित्यर्थः ॥ २ ॥

एवंवदजीवस्वभावमुक्त्वावक्ष्यमाणधारणाया अधिकारिणं मुमुक्षुं प्रतिरहस्यमुपदिशतिभगवान्शुकः। अतइतिपञ्चभिः अतोवदस्यविवेकिनोनामरूपासक्त्यायोगेऽधिकाराभावाद्धेतोः कविःक्रांतदर्शीहेयोपादेयार्थविवेकवान्। व्यवसायबुद्धिः सर्वपरित्यागपूर्वकं हरिभजनंकर्तव्यमितिनिश्चयवान्मुमुक्षुःनामसुनामरूपेषुभगवद्ध्यानयोगे उक्तरीत्याऽनधिकारापादकेषुयावदर्थएवस्यात्। भोजनाच्छादनादिरूपोहरिसेवार्थं देहधारणार्थकोऽर्थोयस्यतथाभूतःस्यात्। भोजनाच्छादनादिनिर्वाहकेषु नामरूपेष्वव्यर्थप्रमत्तोऽनासक्तः। तावन्मात्रेऽप्यर्थेऽन्यथासिद्धेभूयोनयतेततत्रयत्नेपरिश्रमंसमीक्षमाणः ॥ ३ ॥

सिद्धेऽन्यथार्थेइत्येतद्विवृणोति सत्यामितिद्वयेन क्षितौपृथिव्यांसत्यांकशिपोः शय्यायाः पर्य्यंकादेःप्रयासैः प्रयत्नैः किंनकिमपि स्वतःसिद्धेवाहौसतिउपबर्हणैः शिरोपधानैःकिम् अञ्जलौसतिउरुधावद्बहुविधया अन्नपात्र्याकिम्। दिग्वल्कलादाविति वल्कलादौसतितद्भावेदिक्षुसतीष्वित्यर्थः तच्चात्यंतत्यागिमुमुक्षुविषयम् अतएवोक्तंशुकलक्षणंदिगंबरमिति। "अपवित्रकरोनरः" इत्यादिवाक्यंतुकेवलकर्मविषयम् आदिनावस्त्रखंडादिपरिग्रहः बहुयत्नसाध्यैर्दुकूलैः किम् ॥ ४ ॥

भाषा टीका

द्वितीय अध्याय।

श्रीशुक उवाच—ऐसी धारणासे सन्तुष्ट ईश्वरसे प्रलयकाल की नष्टस्मृतिको फिर प्राप्तकर निश्चय बुद्धि आत्मयोनि (ब्रह्मा) ने यथावत् इस जगत्की सृष्टिकी। जैसी प्रलयके पूर्व में थी ॥ १ ॥

शब्द ब्रह्मका यही पन्था है की अपार्थ नामोंसे साधककी बुद्धि ध्यान किया करती है। और वह जन मिथ्या अर्थात् भेदभरना वासनासे मायामय पथ में शयान अर्थोंको नहीं प्राप्त होता है ॥ २ ॥

इसी से कवि (क्रान्तदर्शी) को चाहिये कि नाममात्र के (मिथ्या) अर्थोंमें यावदर्थ रहकर अप्रमत्त रहे। और अर्थके मिथ्या होने में निश्चय बुद्धि हो। एवं परिश्रम देखकर अन्यथा (स्वतः) सिद्ध अर्थ में यत्न न करे ॥ ३ ॥

(भोगकी स्वतःसिद्धता दिखलाते हैं) इतनी बड़ी पृथ्वी के रहते पलङ्गका क्या प्रयोजन है। जब अपनी बाहु अपने शरीर ही में है तब उपबर्हण (तकिया) का क्या प्रयोजन है। अञ्जली रहते थाली लोटा कटोरा का क्या काम है। दिशा और वल्कलके होते वस्त्र से क्या काम है ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

ननु दिक्सद्भावो नाम नग्नत्वमेव वल्कलम् अन्नं तोयं वासः स्थानञ्च याच्ञाप्रयत्नं विना कथं प्राप्यते तत्राह। क्षीराणि वृक्षजयद्यानि। परान् विभ्रति पुष्णन्ति फलादिभिर्यं। गुहाः गिरेर्यः ननु कदाचिद्देवामलाभे किं कार्यं तत्राह अजितः हरिः उग्रसंसारदावाग्निसंतप्तान् किं न अवति न रक्षति। किमङ्गस्य पूर्वत्रापि सम्बन्धः। उक्तञ्च—भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः। योऽसौ विश्वम्भरो देवः कथं भक्तानुपेक्षते इति भूतेन यो दुर्मदस्तेनान्धान् ॥ ५ ॥

तदा तेन किं कर्त्तव्यम् हरिस्तु सेव्य इत्याह। एवं विरक्तः सन् तं भजेत्। भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः। यत आत्मा अतएव यः प्रियः तस्य च सेवा सुखरूपैव। अर्थः सत्यः न त्वनात्मवन्मिथ्या भगवान् भजनीयगुणः। अनन्तः निरवधिः। य एवंभूतः तं भजेत नियतार्थः निश्चितस्वरूपः। वक्तुमयमानन्दत्व निहतः सन्निति स्वतःसुखात्मकत्वं दर्शितम्। किञ्च पुंसः स्वात्मनः भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ॥ ६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतद्देवाद्यचिन्ताभिन्दया हृद्यति क इति । तां तथाभूतां परस्य हरेरनुचिन्तां धारणामनाहृत्य पशून् कर्म्मजडान् विना "यथापशुरेवं स देवानाम्" इति श्रुतेः असतीं विषयचिन्तां को नाम कुर्य्यात् । तथा चिन्तया वैतरण्यां पतितं तत्र च स्वकर्म्मजानाध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन् । वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ॥ ७ ॥

तामेव धारणां सविशेषमाह केचिदिति षड्भिः । केचित् विरलाः । स्वदेहस्य अन्तर्मध्ये यत् हृदयं तत्र योऽवकाशस्तस्मिन् वसन्तम् । प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्य्यते । कञ्जं पद्मम् । रथाङ्गं चक्रम् ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

निश्चितेति । निश्चितं स्वरूपं येन स निश्चितस्वरूप इति ॥ ६—९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

ननु वल्कलमश्नतोयंवासःस्थानश्रयाच्छ्रादिप्रयत्नंविनाकथंप्राप्येतत्राह । चीराणीति जीर्णावल्कलखण्डानि पथिमार्गेनसंतिकि । परभृतःपरान्विभ्रतिपुष्णंतिफलादिभिर्येतेऽघ्रिपाः भिक्षांनदिशंतिचाकिंनप्रयच्छन्तिकिमित्यर्थः । सरितोनद्यःअशुष्यन्किं गुहाःपर्वतविलालिरुद्धाःनिरुद्धाःकि ननुकदाचिद्देषामलाभेकिंकार्य्यस्यात्ततत्राह अजितइतिउपसन्नान्शरणागतानजितःसर्वेश्वरःनावतिनरक्षतिकि । कवयोधनेनयोदुर्मदः तेनांधान्धकार्यानभिज्ञान्कस्माद्धेतोः भजन्तिकविभिरन्याद्यर्थमपिदुर्मदांधानभजनीयाइत्यर्थः ॥ ५ ॥

इतरदुःसेव्याःहरिस्तुसुसेव्यउक्तरीत्याद्यस्थितेरवैतृष्ण्याद्भगवत एवप्रीतिविषयत्वादित्याह एवंमिति स्वचित्तेस्वकीयचित्ते एवंसिद्धेउक्तानुसन्धानपरेसतिविषयान्तरविरक्तचित्तविषयभूतोयआत्मत्वादिगुणाकृः यत्रचयस्मिन्सेव्यमाने संसारहेतूपरमश्चबन्धहेतुभूताविद्यानिवृत्तिश्चभवतितंभजेतेत्यन्वयः भजनीयत्वस्यौपाधिकगुणानाह आत्मेत्यादि आत्मांडतःप्रविश्यधारकः धार्य्यस्यशरीरस्य जीवात्मनःधारकपरमात्मानुवर्त्तित्वंयुक्तमित्यभिप्रायः यतआत्माऽतएवप्रियःनिरतिशयप्रीतिविषयकः आत्मसम्बन्धादेवहिदेहापत्यकलत्रादिकंसर्वंप्रियवदाभाति आत्मनोऽप्यात्माहरिःप्रियइतिनिरतिशयसुखस्वरूपत्वस्याप्युपलक्षणम् अतएवार्थःनिरतिशयपुरुषार्थस्वरूपः निरतिशयसुखमेवह्यपरमपुरुषार्थः पुरुषार्थस्वरूपस्यापिदुर्भगत्वेऽभजनीयत्वंस्यादतआह भगवानूहेयप्रतिभटसमग्रज्ञानशक्तिबलैश्वर्य्यवीर्यतेजःसम्पन्नःस्वरूपस्यज्ञानादिगुणानाञ्चपरिच्छिन्नत्वशङ्कांव्यावर्त्तयति अनन्तइतिमुक्तविधं स्वप्राप्तिविरोधिभूताविद्यानिवर्त्तकमात्मानं तिर्यङ्नृइतरविषयवैतृष्ण्यायाखिलातिशयसुखस्वरूपपरमात्मोपासनायासुखितःनियतार्थः नियतप्रयोजनः फलान्तरनिवृत्तइत्यर्थः उपासीतेत्यर्थः ॥ ६ ॥

एतद्देवार्थान्तरचिन्तानिन्दयाद्रृढयतिकइति तमीश्वरमनाहृत्यतामितिपाठेऽप्यर्थःकोलोकः ऋतेपशून्पशून्विनापरानुचिन्तामर्थान्तरचिन्तामसतीमशोभनांकुर्य्यान्नामपशुरेवतथाकुर्य्यात्तथाकुर्वन्पशुरित्यर्थः परानुचिन्तयावैतरण्यांयमलोकाभिधौतत्सदृशे संसारेइत्यर्थः । पतितं तत्रचस्वकर्म्मजानाध्यात्मिकादिक्लेशानुजुषाणंसेवमानंपश्यन्कःकुर्यादितिपूर्वेणासम्बन्धः ॥ ७ ॥

एवंफलान्तरत्वदुपायनिवृत्तस्य भगवद्ध्यानप्रकारमाह केचिदित्यादिना भगवदुपासनाबाहुल्येन उपासकबाहुल्यात्केचिदित्युक्तिः ननुश्रुतसम्मतत्वेन स्वदेहस्यान्तर्मध्येयंहृदयाख्यकाशस्तत्रस्वसन्तंप्रादेशमात्रंप्रादेशमात्रसम्बन्धिनीमात्रावपुः परिमाणंयस्यतंहृदयान्तः प्रादेशसम्बन्धिमात्रयापरिच्छिन्नम् । "यस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्ते" इतिश्रुतेर्लोकयशरीरकेऽप्युपासकानुग्रहाय उपासनायाः प्रादेशसम्बन्धिमात्रयापरिच्छिन्नत्वश्रवणात् हृदयकमलस्यांगुष्ठमात्रत्वाच्च एतेनतर्जन्यंगुष्ठविस्तारं प्रादेशमन्तर्परिमितमित्ययुक्तमितिबोध्यं कञ्जकमलंरथाङ्गञ्चक्रन्दक्षिणबाहुरथाङ्गंरथाङ्गवामाभ्यांशङ्खगदेबिभ्रतमित्यर्थः एवम्विधं पुरुषंकेचिद्योगीश्वराःधारणयात्मरन्तिधारणापूर्वकमुपासतइत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

ननुभवादृशानांयोगिनांक्षित्यादिनाशरीरयात्रामिद्धावप्यपरिपक्वयोगिनांपुंसांकथमुपभोगःसम्पत्स्यतइत्याह चीराणीति "पट्टचीराणिगृहिभिर्देयानिपथितोरणे दरिद्राणाञ्चभिक्षूणामाच्छादनकराणिच" इतिस्मृतेः पथितोरणेगृहस्थैर्निहितानिचीराणिजीर्णावल्कलानि मूषकादिप्रभिक्षानिवा । नसन्तिकि भोजनार्थमितिचेत्परान्फलपाकादिनाबिभ्रतीतिपरभृतः आम्रपावृक्षाःफलादिनोदिशंतिवादिशंत्येव शयनार्थमितिचेत् गुहारुद्धाःपिहिताःकि केनचिदितिशेषः गुहासुसिंहादिभयेनकथंवासःसम्पद्यतइतत्राह किंमिति कृष्णोवधूतानांधूलिधूसरांगानांसुहृन्नकिम । सुहृदेव अतोयस्त्राद्याशयाकवयोधनादिदुर्मदेनांधान्विधेकचक्षुरहितान् राजादीन्कस्माद्भजन्तिनभजत्येव अतोमुमुक्षुणायहृच्छयालब्धाशनादिनाभाव्यमितिभावः ॥ ९ ॥

इदानीमुक्तानुष्ठानपरिपाकप्रकारमाह एवमिति एवमुक्तप्रकारेणायदृच्छयालब्धाशनादिनावृत्तिरहष्टाप्रसङ्गस्यस्वतःस्वतन्त्रस्यहरेः प्रसादात्स्वचित्तेस्वाधीनतयावर्त्तमानेसतिभगवानैश्वर्य्यादिगुणासमुद्रोऽनन्तःपरिच्छेदशून्यः आत्मापरमात्मादेहपुत्रादिभ्योऽत्यंतंप्रियार्थइतिकृत्वानिर्वृतःसमुद्भूतरोमाश्रुनियतार्थः*"एतमितःप्रेत्याभिसम्भावितास्मि" इतिनिश्चितार्थःपुरुषस्तंभगवन्तंभजेत । कदाचिदपितद्भजननमुज्झेत् । ततःकिफलमत्राह संसारेति यत्रयस्मिन्सेव्यमानेसेवकस्यसंसारहेतूनामविद्यादीनामुपरमः । अविद्यादीनांसद्भावेसोऽस्तीतिशङ्कयशङ्कातएवनसन्तियतइतिशङ्कामाबोऽसुरप्रकृतिरितिभावः तदेतत्प्रेयइत्यादिश्रुतिसिद्धंहरेः प्रियार्थत्वञ्च । नकेवलंसंसारहेतूपरमःफलं । किन्तुनिर्वृतःस्वानंदानुभवलक्षणामोक्षप्राप्तिश्चेतिचशब्दः ॥ ६ ॥

---

* इतश्चरमदेहात् प्रेत्यमृत्वा एतंहरिं अभि आभिमुख्येन सम्भावितास्मि सम्यक् यथायोग्यंसाभाव्यमापन्नोमीतिनियतार्थइति ।

श्रीमद्विजयध्वजकृतपदरत्नावली ।

भजनापरपर्यायोपासनंगुणोपसंहारेणाकार्यमितियदतस्तदुगुणाकथनपूर्वकंतदेवोपासनंस्पष्टीकुर्वन्विषयद्वैराधकमाह ससर्वंविदितिप्राणएवैतस्मिन्पुरेजाग्रतिइतिश्रुतेः पञ्चवृत्तिरेकोमुख्यप्राणएवयथासुप्तजनस्येच्छिनाद्रष्टा। तथासहरिःसर्वान्वेत्तीनिसर्वंवित् हृदिस्थित्वानुभूयेष्टानंदानुभवनात् सर्वोगुणापूर्णः आत्मास्वामीत्येवंगुणानुपसंहृत्यसत्यंसर्वतःसारमानन्दनिधिंतंविष्णुंभजेतोपासीत आधिव्याध्यादिसमुद्भवेऽप्युपासनंनहातव्यमित्याशयेनोक्तंसर्वात्मनेति अतोऽन्यतःपरमात्मानुपासनेऽपिभात्मघातः महितकरणादिनास्वात्महननाक्यदोषापत्यानित्यदुःखतमप्राप्तिःस्यादित्यन्वयः चशब्दस्तत्तद्योग्यतानुसारेणोक्तस्मिन्नर्थे "यथैकस्तुबहून्सुप्तानसुप्तःपश्यतिप्रभुः यथेष्टमवनाद्विष्णुरनुभूःपरिकीर्त्तित" इत्यादेरुक्तएवार्थइति । स्वेच्छयानुकूलविग्रहग्रहणाद्वाऽनुभूः अनेनप्राणांनदत्तानिचेष्टालक्षणानिकर्माणीत्यानन्दशब्देनकर्माण्युच्यन्तेतेषांफलपर्यन्तंनिधायकत्वेननिधिपालनत्वात्स्वामित्वाद्वाऽऽनन्दनिधिर्हरिरुक्तश्च ॥ ७ ॥

भगवदुपासनामकुर्वाणस्यपशोरपिवैलक्षण्यंनास्तीत्याह कस्तमिति नरकेविगततरणत्वाद्वैतरणीनामनदीयातस्यांहरेरनुपासनास्यदोषात्पतितंस्वकर्मजान्स्वकृतकर्मसमुद्भूतान्पारतापान्सर्वतोदिशमायातानदुःखविशेषानजुषाणांभुंजानंजनंगुरुशास्त्रोपदेशादहदृष्टापदर्थस्तुशब्दस्मुचितनादृशदुःखनिवर्तकालंवुद्धिगोचरमुखप्रदंहरिंचपश्यन्कोन्वियेकीर्तयेत्कीर्तयेदपि भगवंतमनाहृत्यासतीमशुभांपरदुःखोचितामितरविषयामुपाश्रित लक्षणांस्मृतिंयुंज्यात् पशुन्वंचिवेकबुद्धिराहित्यमृते । यदियुंज्यात्तर्हिसपशुरेवनविवेकीत्यन्वयः "चतुर्वेद्यपियोविप्रोवासुदेवंनविंदति वेदभारभराक्रांतःसर्वेद्यात्मगर्दभ" इति ॥ ७ ॥

योग्यतातारतम्येनाधिकारिणांबहुत्वात्स्थूलरूपोपासनायोग्यानांतदुपास्तिमभिधायाधुनास्वदेहहृदयकमलकर्णिकानिकेतनात्मोपासनायोग्यानां तदुपासनांविधत्ते केचिदिति केचिदात्मोपासनायोग्याः स्वदेहांतर्हृदयाकाशेशयसंतंप्रादेशमात्रंप्रादेशपरिमाणं । कंजंपद्मंचकांगसुदर्शनंशंखंपांचजन्यंगदांकौमोदकींधारयतीति कंजरथांगशंखगदाधरस्तंधारणातैलधारावद्खंडितमनोवृत्त्यास्मरतोध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

एवं तत्र तत्र भगवत्येव तात्पर्ये सति स्वचित्ते स्वत एव सिद्धः श्रीभगवानेव परमपुरुषार्थतया सेव्यः किं तत्तदाग्रहेणोक्तवान् एवं स्वचित्ते इति तस्माद्धारत सर्वात्मा इत्यादिना यदुक्तं तदेव पुनर्निर्णीयत इति भावः । चशब्देनानुषङ्गिकमेवाविद्यानिवृत्तिः फलमिति बोधितम् ॥ ६ ॥

व्यतिरेकेण तदेव द्रढयति कस्तामिति ॥ ७ ॥

अथ तत्राप्येकदेशिनां मतमाह केचिदित्यादिसार्द्धचतुष्कैः व्यध्यन्तर्यामिण एव धारणेयम् । गर्भोदकशायिरूपसमष्ट्यन्तर्यामिधारणा तु तृतीयस्कन्धे तत्तद्गुणानुसारेण ज्ञेया । सैव सूचिता तं सत्यमानन्दनिधिं भजेत इत्यनेनेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

ननु सर्वत्र सर्वपदार्थाःअन्यदीयाः साधनेनैव सिध्यंति । क्षितिरपिकस्यचिद्भवति । अतस्तदाग्रयास्थातव्यं । तदनुरोधेनचदेहश्च पराधीनः । बलकलादिकर्मापि साधनं साध्यम् । अतः सर्वदा सर्वनैरपेक्ष्यात्शक्यत्वात् किंचित्सापेक्षतायां कर्तव्यायां मग्नश्चेत्पालालं विशेदितिन्यायेनसर्वथापेक्षनैवास्तु तत्राह । चीराणि किं पथिनसंतीति चीराणिवस्त्रखण्डाः। पथीतितत्संपादनार्थं मप्यन्यत्रगंतव्य मिति मूर्च्छितम् । अंघ्रिपाः वृक्षाः परभृतः परानेवबिभ्रति । ननुतत्फलैस्तेषामुपकारः कश्चन तर्हि पक्वंफलं स्वतएवत्यजंतिईश्वरकंतुचालनेन तेतुदेवनारूपाःवैष्णवाश्च भगवज्जीवार्थं जगतःसृष्टत्वात् एकपरित्याग अन्यदीयं तदुभयति अतश्चारण्यपिभगवदीयानि मार्गाश्चभगवदीयाः गतिसाधनत्वात्। अतस्तेऽपिकिंवस्त्राणिनप्रयच्छंतीतियोजनीयम्। पादसंबंधात्तद्दानंलक्षते। गर्तमात्रेवक्षणाविलंबाद्वाफलदानात्भिक्षाप्रदाः तेषां हस्तस्याशुद्धत्वंचानवारितम् अंघ्रिपाइति। जलानिरिक्तं वनभक्षयंतिजलंच अंघ्रिभिरेवपिबंति। आतपादिभिश्चशाखाःशुष्काः वनस्थाः महिष्यावश्चपरार्थैकांतजीविनश्च अतस्तेष्वेवमाधुकरीकर्तव्या । जलार्थमपिनलौकिकापेक्षा इत्याह । सरितोऽप्यशुष्यंतीति तदाहि कूपापेक्षा भवति । सरितां बहुत्वं महत्त्वंच सर्वप्रसिद्धं शीतघातातपवर्षानिवारणार्थं मपिनान्यापेक्षाकर्त्तव्येत्याह गुहागुहाइति । तेषां निरोधस्याश्रवणात् । ननुकदाचित्सर्वाभावे तुहासुचव्याघ्रादिभये किं कर्त्तव्यं। तत्राह । किमजितोऽवतीति । केनापिनजितःअतिसमर्थैः उपपन्नान् शरणागतान् किनावति । आग्रहेण सर्वत्र कथनं तथाधिकारिणोऽपितथान कुर्वंतीति । एवंसर्वं कार्येष्वपिसिद्धयुपे अधिकारिणोऽपिभूत्वा धनंदुर्मदांधान्भजंति धनेनयोदुष्टो मदोगर्वस्तेन अंधान् आगतस्वरूपानभिज्ञान् । कस्माद्धेतोर्भजंतीतिन जानीमः ॥ ५ ॥

एवं प्रसंगादन्यानुपदिश्यताहशेननिरपेक्षेणयत्कर्त्तव्यं तदाह । एवं स्वचित्तेइति । भजनीयोपार्जन क्लेशाभावायाह । एवंस्वचित्तइति एवं प्रकारेण सर्वनैरपेक्ष्यंयोनःकरणं प्रेरणं या साधयति । सोऽहंकरणेतिष्ठतीत्यविधाहम् । अतएवमस्माद्धेतो एवं प्रकारेण वाक्यचित्ते स्वाधीनेचित्तेस्वतएवयत्रस्यतिरेकेणैवसिद्धेसतिसिद्धौवांतं भजेतेतिसंबंधः । ताहशस्यभगवतः भजनीयंरूपंवक्तुं सर्वं पुरुषार्थं हेतुभूतं

ससंर्वविद्वृयनुभूश्चसर्वआत्मायथासुप्तजनेच्छितैकः ।
तंसत्यमानंदनिधिंभजेतसर्वात्मनातोऽन्यतआत्मघातः ॥ ७ ॥

* अत्रसर्वविदात्मासत्यमानंदनिधिमितिपदचतुष्टयेनाऽऽनंदादयः प्रधानस्वेत्यत्रोक्तंसर्वाधिकारिसाधारणमुपसंहार्यंसच्चिदानंदत्वाज्ञेतिगुणचतुष्टयंसूचितमिति ज्ञातव्यम् ॥

पञ्चमप्रश्नस्यमाह आत्मत्वादिहेतुभिः आत्मत्वात्प्रियत्वाद्धेयत्वाद् अर्थत्वाद्भगवत्त्वाद् भगवत्त्वाद्धर्मतत्त्वमिति हेतुहेतुमद्भावोऽपि-विशेषणानां प्राणिनां सर्वौपयिकरूपाणि पंच । स्वात्मादेहः धनम् ईश्वरःनित्यकर्मच । तत्र भगवान्पंच रूपोपीत्याह । प्रथमस्तेषामात्मत्वस्तुतः अधिकारिणं प्रतितत्त्वेन प्रकाशमानोऽपि । तस्माद्धेयत्वेसेव्यः । उपपत्त्यासेवनमुक्तं रुच्यासेवनमाह । प्रियइति यथाप्राणाः यथात्वादेहः प्राणिनां प्रीतिविषयोभवति । आत्मत्वेनप्रीतिविषयत्वे प्राप्तेऽपिपुनर्यत्प्रीतिविषयकथनंप्रीतेः परिच्छिन्नत्वज्ञापनार्थम् । अतः सामीतिरेकत्र विनियुक्ता नान्यंतथात्वेनगृह्णाति । अतः सर्वरूपे एकस्मिन्नेवप्रीतिः कर्तव्या । अन्यथा खंडशः एकस्मिन्नेकरूपेवाक्रियमा णात्सर्वपुरुषार्थं साधयेत् । प्रीतिस्तुभगवद्धर्मः । भगवान् सर्वेभ्योजीवेभ्यः तंखंडशोदत्तवान् सुखार्थम् । अतोयत्रैवप्रीयते तत एवसुखं भवति । ततःस्वसुखमेवस्वस्यभवतीत्युक्तं भवेत् । अतोदेहादिभ्यः प्रीतिमाच्छिद्यभगवतिस्थापयंतीतिभावः । अर्थोधनरूपः । यावत्कार्यं तेनभविष्यति तत्सर्वं भगवताभविष्यतीति । अर्थशब्दस्यपंचार्थवाचकत्वात् पंचरूपोऽपिभगवान् । सर्वंवेदार्थः सर्वधनरूपः सर्ववस्तु रूपश्च । सर्वप्रयोजनरूपः । सर्वनिवृत्तिरूपेण सर्वनिवर्तकश्च । भजनेचैतेधर्माः भजनीयविषयतावच्छेदकत्वेन गुणोपसंहारन्यायेन ग्राह्याः तथासतिसर्वात्मकतयाभजनंभवति किंच भगवान्षड्गुणैश्वर्यसम्पन्नः ऐश्वर्यार्थमपिस्वस्यसेवनं भवति । श्रीशब्देनात्रशोभाग्राह्या किंच अनंतः देशकाला परिच्छिन्नः नित्यः एतावतापंचविंशति तत्त्वानिषड्विंशश्चमहाविष्णुः षड्विंशति प्रकारेणासेवितव्यः तत्रात्मा द्विविधः जीवब्रह्मभेदेन । प्रियएकादशविधः एकादशेंद्रियभोग्यत्वात् अर्थःषड्विधउक्तः । भगवान् षड्विधः । अनंतोद्विविधश्च । एवंसर्वप्रकारेणासेवितव्यइत्यर्थः । सेवकस्यअधिकारिविशेषणभूतधर्मद्वयमाह तन्निवृत्तोनियतार्थइति एकंसर्वतोऽन्यनिवृत्त्यर्थम् एकंच भगवतिदाढ्यार्थम् इमौचधर्मावावश्यकौ अन्यथासर्वप्रकारेणासेवितोऽपि न पुरुषार्थोभवति सर्वतोनिवृतः अन्यथाब्रह्मात्मन्यात्मोभवेत् नियतः भगवत्येव अर्थःपुरुषार्थोयस्य भगवान्वा अन्यथासंशयात्माविनश्यति । यद्यपिभगवानेवफलंनचान्यदपेक्षते । तथापि आनुषंगिकंफलं संसारहेतोःअज्ञानस्य । भगवद्वैमुख्यस्यवानिवृत्तिर्भवति । चकारात्सायुज्यादि ॥ ६ ॥

एवं भजनस्यसर्वोत्तमत्वंप्रतिपाद्यतादृशस्याकर्तॄन्शोचन्नाह कस्तामिति । तांभगवतःपरानुचिंतांध्यानरूपंचिंतनामृतेपशून्निनापशून नाहत्यभक्त्वामसतींचिंतकनाशिकांदेहादिचिंतांनामेतिप्रसिद्धेर्युज्यात् स्त्रियमिवयोजयेत् । अज्ञानाद्भवतुनामयोजनं । तत्कृतमपकारंज्ञात्वा कस्तांयुंज्यात् अपकारंगणयति पश्यन्जनमिति यथाभगवद्भजने भगवदीयाःषड्गुणाःस्वस्मिन् संक्रमंते तथादेहादिभजनेतद्गताः षड्दोषाःसंक्रमंते । उत्पत्तिः नाशः दुःखं कर्माणि परितापः हीनत्वंच तदाह जनमृत्युमयमानम् । पतितंस्वस्थानाच्च्युतंमृतमितिवावत् वैतरिण्यांयमद्वारस्थितनद्याम् अनेनासतीपरिग्रहेमृतोवैतरिण्यांपततीतिसूचितम् । स्वकृतविविधकर्मफलंचसेवमानम् । परितापाःशोकाद्दयः अतःक्रोधाद्मृतेविहायविषंभक्षयिष्यतीतिप्ररोचनार्थेनबहुवक्तव्यमितिभावः । एवंसर्वार्थनिश्चयपूर्वकं भक्तिमार्गानुसारेणभगवद्विषयक-श्रवणादिकं साधनं कर्तव्यमितिसिद्धम् ॥ ७ ॥

अत्रकेचिन्मतेसर्वनिर्द्धारोव्यर्थः मुख्यभगवद्रूपंचतुर्भुजादिआनंदमात्रकरपादमुखोदरादिरूपंज्ञात्वाभजनंकर्तव्यमिति धारणायां स्थूलस्थानेभजनीयंभगवतःआनंदरूपंयोजयति । केचिदितिवचनात् मात्रसर्वसंमतिः । अनेनहृषीकेशादिभावएवक्रियते नतुदोषनिवृत्तिः । यद्यपिमांसरोधकपापादिनिवृत्तिःक्रियते तथापिसर्वभावत्वसंपादकत्वाभावान्नरागादिनिवृत्तिः भगवतोरूपाणिचत्वारिध्येयानि । अंगुष्ठमात्रं प्रादेशमात्रं पुरुषमात्रं पूर्वोक्तंच तत्रस्वनेकदृश्यप्रादेशमात्रस्यैवेति वैश्वानरार्चिरध्यायासिद्धत्वात् शुद्धेचस्वहृदयेमातुशक्यत्वात् अथवा अत्यतिरुद्दशांगुलमितिपुरुषादति रिक्तरूपमतिरेकार्थेभजंते । अतिरिक्तमपि पुरुषाकारंवसंतं तृतीयंपुरुषं । तस्यमूलरूपं ध्यायंति चतुर्भुजमिति केजंकमले रथांगंचक्रं हस्तचतुष्टयेऽप्यायुधधारिणम् अनेनसर्वतोरक्षास्यूचिता । प्रणेरेऽपितत्त्वानि तत्रस्थापयित्वा ध्यायंतीतिव्याख्यातं । धारणायापूर्वोक्तया स्मरंतीतिविधमानत्वात् नांतमेनमाकल्पनमपेक्षते ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ननु हीतत्राणोपायः कः तत्र साक्षेपं कुध्यन्निवाह । चीराणि वस्त्रखण्डानि । ननु ततोऽपि जाठरानलो दुर्वारः तत्र तथैवाह । अस्थिपिण्डा अपि किं नैव भिक्षां दिशन्ति दर्वात मनुष्याः खलु मा ददतु नामेति भावः यतः परान् विभ्रति फलादिभिः पुष्णन्तीति । तर्हि पाणौ अलन्तु मृण्मयमेवेति चेत् धिक् तव बुद्धिमित्याह सरितोऽपीति । ननु शिलावर्षात् त्राणार्थं पर्णशाला कुत्राचिदपेक्षितव्यैवेति चेत्तत्राह कथा इति । गुहां प्रविश्य व्याघ्रादयः आदन्ति चेत्तत्राह किमजित इति । व्याघ्रादीनामपि स एवान्तर्यामी भक्तवत्सलस्तान् कथं तत्रप्रेरयिष्यतीति भावः ॥ ५ ॥

ननु तर्हि भजनीयेश्वरस्य तद्भजनोपकरणानां चान्वेषणं तु कर्तव्यमेव योगिभिरिति चेत्तत्राह । क्वचिच्चे स्वत एव सिद्धः यतः कृत्स्नात्मा चिन्मात्रिग्रहो वासुदेव इति नाप्यांहाहनादिभ्रम इति भावः । किञ्च तस्य भजनं स्वत एव भवितुमुचितमित्याह प्रिय इत्यादि त्रिभिर्मन्त्रैर्मन्त्रिभेदैः । प्रियः स्वभावत एव प्रेमास्पदम् न च प्रेमास्पदत्वेऽपि पतिपुत्रादिकरूपोऽनर्थः । यतोऽर्थः परमवस्तुरूपः । वस्तुरूपत्वेऽपि न केवलमन्तरात्मैव । यतो भगवान् सौन्दर्यादि गुणवत्त्वेन दृश्यः । न च तत्र देशनियम इत्याह । अनन्तः सर्वव्यापकत्वात् सर्वत्रैव देशे स्थितः । न च भजने श्रमः कोऽपीत्याह । निर्वृतः भजनानन्दमग्नः सन् । नियतः प्रेमैव भक्तावमुसंहितोऽर्थः प्रयोजनं यस्य तथाभूतः सन् । यद्वा नित्यमेतावन्ति नामानि गृहीतव्यानि एतावती कथा श्रोतव्या एतावत्यः प्रणतयः कर्तव्याः एतावत् कालं ज्ञानं कर्तव्यमित्येवं नियमयुक्तानि कीर्तनश्रवणादीनि यस्य तथाभूतः सन् भजेत । यत्र भजने संसारहेतोरविद्याया उपरमश्च भवेत्तदनुसंहितं फलं न भक्तमते ॥ ज्ञानियोगिनोमते तु संसारहेतूपरम एवानुसंहितं फलम् । चकारः पादपूरणे नियतार्थः निश्चलश्चेत्यर्थः ॥ ६ ॥

श्रीमद्विजनाथकृतभक्तिविवेकसारप्रदीपिनी ।

व्यतिरेकेण तदेवाह क इति परस्य हरेरनुचिन्तां तां असिद्धां, अकिञ्चन अनादृत्य पशूनं कर्मजडान् विना पशुरेव स देवमाद" इति श्रुतेः असतीं विषयचिन्तां को नाम कुर्य्यात् ॥ ७ ॥

एवञ्च वैराग्यं भक्तेरन्वयव्यतिरेकौ च प्रदर्श्य पुनरपि योगिनां पूर्व्वोक्तधारणातोऽप्यतिश्रेष्ठामन्तर्यामिण्यखिलघनरूपस्य धारणामाह । केचिदिति पूर्व्वोक्तवैराजधारणानिष्ठेभ्योऽप्यतिश्रेष्ठा इत्यर्थः । किंवा वक्ष्यमाणवार्त्तानुसारेण वैराजधारणाभ्यासेन शुद्धचित्ता एव तदन्तर्यामिण्यखिलघनरूपस्य धारणां कुर्य्युरित्यभिप्रायेणाह केचिदिति । अत्र धारणायां चतुर्व्विधा योगिनः सम्भवंति । तत्र प्रथमा भगवद्रूपमनालम्बमानाः प्राणमनोधारणावन्तः श्रीभागवतासम्मता विगीता एव । द्वितीयाः पूर्व्वोक्तवैराजधारणया शुद्धचित्ताः मृणालगौरायतशेषभोगेत्यादितृतीयस्कन्धोक्ततदन्तर्यामिधारणावन्तः । तृतीया वैराजधारणानन्तरव्यष्टिविराडन्तर्यामिचतुर्भुजरूपधारणावन्तः । चतुर्थाः स्वत एव शुद्धचित्ताः । प्रथमत एव व्यष्टयन्तर्यामिचतुर्भुजधारणावन्तस्त एवात्र केचिदशब्देनोच्यन्ते । प्रादेशमात्रमिति प्रादेशप्रमाणहृदये ध्येयत्वात् । पुरुषं तावन्मात्रप्रदेशोऽप्यचिन्त्यशक्त्या पञ्चदशवर्षीयपुरुषाकारप्रमाणं, सन्तं वयसि कैशोरे इत्युक्तेः । वसन्त तत्रान्तर्यामितया कृतावासम् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

कवयोधनदुर्मदांधान्कस्माद्धेतोर्भजन्ति कविभिस्ते नभजनीयाइत्यर्थः । ननु तर्हिवस्त्रखंडादिलाभः कुतोभवेदत्राह चीराणिकिम्पथिनसन्ति परान्पुष्णन्तियेते अंघ्रिपाः वृक्षाः दयाविधर्मांघ्रिपालकाः वा भिक्षांकिंनैवदेशन्तिनैवप्रयच्छन्ति सरितः गंगायमुनाद्याः नद्यः शिवजलाः अशुष्यन्किंनिर्जलाजाताः किम गुहाः गोवर्द्धनादिगिरिदर्य्यः रुद्धाः किम किंश्च अजितः श्रीकृष्णः उपसन्नान्किंन भवति नरक्षति अपितुरक्षत्येव ॥ ५ ॥

एवंनियतः अनायाससिद्धः देहनिर्व्वाहरूपोऽर्थप्रयोजनंयस्यसः निर्वृतः वैराग्यसुखसंपन्नः मन् तंभजेत यत्रभजनेससंसारहेतोः कार्यकारणरूपप्रकृतिसंगस्योपरमश्चभवति चकारस्तत्प्राप्तिसमुच्चिनोति "मद्भक्तायांतिमामपि"इति श्रीमुखवचनान् विद्ययाऽविद्यायानिवृत्तायामुपास्योपासकस्वरूपयाथात्म्यज्ञानवान् श्रवणमननिदिध्यासनाद्यन्याजन्ममरणाख्यं संसारहेतोः प्रकृतिसंबंधाद्विमुक्तोभवतीत्यर्थः तदावृत्तिमाहभगवान् सूत्रकारः आवृत्तिरसकृदुपदेशात्॥४।१।१॥इति भजनीयं दर्शयति भगवान्स्वाभाविकषड्ढैश्वर्यसंपन्नः । अनेनतद्दत्तै श्वर्यंतोव्यावृत्ताः प्रियोऽर्थः अनेनप्रियपदार्थांतरामावउक्तः आत्मा "कृष्णमेनमवेहित्वमात्मानमखिलात्मनाम्"इति वक्ष्यमाणात् कृष्णाख्य आत्मपदार्थः भजनीयोननुतदात्मकः जीवात्मेत्यर्थः स्वचित्तेस्वतएवासिद्धः अनेनसर्व्वत्रस्वतः सिद्धत्वेनतत्संनिहितताप्रदर्शिता अनेन इत्यनेनतदपरिच्छिन्नतोक्तया एवंभूतस्तमितियोजना ॥ ६ ॥

भगवद्भजनहीनकर्मनिष्ठजननिंदयाभजनानिष्ठांद्रढयति कहति वैतरियांपतितंस्वकर्मजान्परितापान् जुषाणांसेवमानंजनं यमराजापश्यन् वैतरणीतुल्यायांसंसृतौवापतितंपश्यन् यत्रसंसारहेतूपरमः तां भजननिष्ठामनादृत्य असतीमशोभनांपरानुचिंतां भगवद्विमुखीं तां "पशुरेवसदेवानाम्"इति श्रुतिप्रसिद्धं कर्मजडंविनापशुतुल्यं विवेकहीनंजनं विनावाकोनामकुर्यात् अनेननित्यबद्धोजीवःसूचितः ॥ ७ ॥

लाभेयमजननिष्ठामाह केचिदिनयद्भिः । तत्रपंचधाभिधारणामेकेनध्यानम केचिद्भागवताः स्वंदहस्यांतर्मध्ये यांघकाशस्तत्रैमनं प्रादेशमात्रं प्रादेशस्तर्जन्यंगुष्ठमात्रा सामात्रापरिमाणंस्वस्तंशनात् "अंगुष्ठमात्रं पुरुषंमध्य आत्मनिसंस्थितं तंज्ञात्वामृत्युमत्येतिनान्यः पंथाविमुक्तये"इत्युक्तम उभयत्रहृदय कमलापेक्ष्य व्यापकस्यैव सूक्ष्मत्वं विवक्षितं । चतुर्भुजंकंजरथांग शंख गदाधरं पद्मचक्रशंखगदाधरं धारणयास्मरंति ॥ ८ ॥

भाषा टीका ।

क्या मार्गमें पुराने कपड़ा के टूक नहीं हैं क्या वृक्ष फलों की भिक्षा नहीं देते हैं क्या जलकी नदी सूख गई हैं क्या रहने को पर्वत कंदरा रुकगई हैं क्या व्याघ्रादिकों से परमेश्वर शरणागतों की रक्षा नहीं करते हैं फिर ज्ञानी लोग होकर धन मदसें अंधे जनोंका क्यों सेवन करते हैं ॥ ५ ॥

इस प्रकार से अपने चित्तमें आपही स्निग्ध प्रिय आत्मा अर्थ रूप भगवान् अनंतको सुखी होकर विश्वास से भजे जिससे कि संसार के हेतु का नाश होजाय ॥ ६ ॥

केवल पशुओं को छोड़कर उस परमात्मा कि चिन्ता को अनादर करके असत् चिन्ता कौन करैगा जोकि अपने कर्मों के दुःखों को भोगते हुये वैतरणी नदीमें पड़े मनुष्यों को देखता है ॥ ७ ॥

कोइ महात्मा अपने हृदय के मध्यमे अंगुष्ठ मात्र विराजमान चतुर्भुज शंख, चक्र, गदा, पद्म धारि परम पुरुष को ध्यानसे स्मरण करते हैं ॥ ८ ॥

प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ ९ ॥
उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकन्धरममलानलक्ष्म्या वनमालयाचितम् ॥ १० ॥
विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमाननहासपेशलम् ॥ ११ ॥
अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेतमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य । कदम्बकुसुमस्य किञ्जल्कः केशरः तद्वत् पिशङ्गे पीते वाससी यस्य । लसन्ति महारत्नानि येषु तानि स्वर्णमयानि अङ्गदानि यस्य । स्फुरन्ति च तानि महारत्नानि च तन्मयानि किरीटकुण्डलानि यस्य ॥ ९ ॥

उन्निद्रं विकसितं यत् हृदयपङ्कजं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य । श्रीरेव लक्ष्म चिह्नं तदयुक्तं पामादिविहितो मत्वर्थीयो न-प्रत्ययः । कौस्तुभरत्नं कन्धरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं व्याप्तम् ॥ १० ॥

स्निग्धत्वादिविशिष्टैः कुन्तलैर्विरोचमाने आनने यो हासः तेन पेशलं सुन्दरम् ॥ ११ ॥

अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन्नुल्लसन्तो ये भ्रूभङ्गाः भ्रूविक्षेपाः तैः संसूचितो भूर्यनुग्रहो येन । चिन्तामयं चिन्तया आविर्भवन्तम् ॥ ॥ १२ ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य तट्टिप्पणी ।

न-प्रत्यय इति । लोमादि-पामादि-पिच्छादिभ्यः शनेलचः (पा० ५ । २ । १००) इति सूत्रेण न-प्रत्यय इति यावत् ॥ १०—१८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवमेवपुरुषंविशिनष्टि प्रसन्नवक्त्रमिति अनुग्रहोन्मुखंमुखंनलिनंपद्मंतद्वत्प्रसन्नेआयतेदीर्घेईक्षणे यस्य कदंबकुसुमस्य किंजल्क केसरस्तद्वत्पिशंगवाससीयस्य लसंति महारत्नानियेषु तानिहारांगदानियस्य स्फुरंतिमहारत्नानितन्मयानिकिरीटकुंडलानि यस्यतम् ॥९

उन्निद्रंविकसितंयद्धृदयपंकजंहृदयकमलंतस्य कर्णिकैवालयःस्थानं तस्मिन् योगीश्वरास्थापितौध्यानविषयीकृतौपादपल्लवौयस्य श्रीर्लक्ष्मीरेवलक्ष्मचिन्हंयस्यास्तीति श्रीलक्ष्मणः पामादिविहितमत्वर्थीयोनप्रत्ययः तस्याकृतिगणत्वात् कौस्तुभरत्नंकंधरायांयस्य अत्र कंधराशब्दस्तदामन्नवक्षः परः अम्लानालक्ष्मीः शोभःयस्यास्तयावनमालयाआचितंव्याप्तम् ॥ १० ॥

मेखलयाकांच्यासूत्रेणमहाधनैरनर्घ्यैरंगुलीयकैर्नूपुरकंकणादिभिश्च विभूषितं विशेषेणालंकृतं स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आननेयोहासस्तेनपेशलं सुंदरं तत्र स्निग्धाः सस्नेहा आकुंचिताचक्राः ॥ ११ ॥

अदीनमुदारंयल्लीलाहसितंतेनयुक्तंयदीक्षणंतेनोल्लसंतोयेभ्रूभंगाः भ्रूविक्षेपाः तैः संसूचितोभूर्यनुग्रहोयेन तंचिंतामयंचिंताविषयं चिंताप्रचुरंईक्षेतेतिक्रियाविशेषणंवा एवं विधमीश्वर यावद्धारणया मनोऽधितिष्ठतेतावदीक्षेतोपासीतेत्यर्थः ॥ १२ ॥

श्रीमज्जिजयध्वजकृत पदरत्नावली ।

श्लोकचतुष्टयेनतमेवविशिनष्टि प्रसन्नवक्त्रमित्यादिना नलिनपद्मवत्प्रसन्नेदलवदायतेदीर्घेईक्षणेयस्यसतथातं कदंबकुसुमप्रियतरुस्तस्य पुष्पस्यकिंजल्कमंकुरविशेषस्तद्वत्पिशंगेपीतेवाससीयस्यसतथातं लसन्महाहारश्चहिरण्मयांगदश्चतिलसन्महाहारांहिरण्मयांगदस्तं । स्फुरंतिशोभमानानिमहांतिचरत्नानितैर्युक्तंकिरीटकुंडलंचयस्यसतथातम ॥ ९ ॥

उन्निद्रस्यविकसितस्यहृत्पंकजस्य कर्णिकाख्यालयेयोगेश्वरैः सनकादिभिरास्थापितौपादपल्लवौयस्यसतथातं श्रीरेवलक्ष्मचिह्नंयस्य तंश्रीलक्ष्मणं कुस्तुभास्यरत्नस्यआतंकौस्तुभेतेनरत्नेनयुक्तंकंधरायस्यसतथातम अम्लानानांनवपल्लवदलानांलक्ष्मीर्यस्याः सातयातया॥१०॥

मेखलयाकांच्या अंगुलीयकैरंगुलीभूषणैः महांतिधनानिमूल्यतीतिर्महाधनानितैः स्निग्धाश्यामलाश्चतेतैः कुंचिताश्चनीलाश्चतेकुंतलाश्चैर्विरोचमानेआननेयोहासस्तेनपेशलंसुंदरम् ॥ ११ ॥

अदीनलीलयोद्भूताभ्यांहसितेक्षणाभ्यामुल्लसंत्योभ्रुवोर्भंगेनस्फुरणाविशेषेणसंसूचितोभूर्यनुग्रहोयेनसतथातम। ईक्षेतचिंतयेत चिंतामयं-चिंताप्रचुरं, "प्रकाशसंचितिर्योविश्वुचितंप्रददात्यज" इत्यादेः किंयतंकालंचिंतनमाह यावदिति यावद्धारणयासमर्थंमेमनोऽचलमव-तिष्ठतेतावदितिशेषः ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृत कमलास्तवः

ईक्षेतेत्यर्द्धकम् ॥ १२ ॥ १३ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

किंच प्रसन्नवक्त्रं प्रसन्नभक्तेभ्यः फलदानार्थेवक्त्रंयस्य नलिनवत् आयतेदीर्घेईक्षणेयस्य कदंवकिंजल्कवत् अर्धपीतारक्तयुक्त रतभागेवांतेमुक्ताफलसहितरेखाकारेश्यकदंवकिंजल्कवत्सुवर्णोदंडाकारसूक्ष्मनद्धमुक्ताव्याप्तकृतार्धीकृतशोभजीवयुक्तवद्रूपम । एतादृशं भगवतःपीताम्बरं लसंतिमहारत्नानियस्मिन् हिरण्मयेअंगदे अंगदंबाहाभरणं । स्फुरंतिमहारत्नानि किरीटे कुंडलयोश्चयस्य ॥ ९ ॥

उन्निद्रे विकसिते हृदय रूपे पंकजे याकर्णिकातस्मिन् यदालयं गृहं सूर्येणुचाग्न्यग्निगर्तस्मिन्नालयेयोगेश्वरैरासमंतात्स्थापितं पादपल्लवं यस्य श्रीःलक्ष्मिचिन्हेयस्य कौस्तुभरत्नं कंधरायां यस्य अम्लानालक्ष्मीर्यस्याः सर्वदाप्रत्यग्रविकसितपुष्पयुक्ता । वादृशा वनमालयाअंचितंपूजितम् ॥ १० ॥

मेखलयाकाटिवोरकरूपया अंगुलीयकैश्चमहाधनैः अमूल्यरत्नादियुक्तैः उभयत्र विशेषणं नूपुरमेकंमहाराजचिन्हरूपं आदिशब्देन वलयादि स्निग्धानिचतानिअमलानिचकुंचितानि नीलानियानिकुंतलानितैः विरोचमानंयद्वानं तेनयोहासस्तेनसुंदरम् ॥ ११ ॥

अदीनंयल्लीलाहसितंसवैन्योयाचकेभ्यः सर्वफलदानेऽपिअसंकोचयुक्तमहीनं लीलाहसितेनयुक्तं यदीक्षणं तेनउल्लसंत्यौयेसुद्योत-योर्भंगः तेनसूचितः भूरिरधिकःअनुग्रहोयेन एतादृशं चिंतयाप्रकटीभूतं राजाधिराजरूपमीश्वरमीक्षेत यावत्मनःधारणया सर्वांगस्थितया अवतिष्ठते चांचल्यंनप्राप्नोति ॥ १२ ॥

श्रीमविश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

महारत्नानि पद्मरागादीनि ॥ ९

उन्निद्रं विकसितं हृत्पङ्कजं तस्य कर्णिकैवालयस्तत्र योगेश्वरैरास्थापितौ पादपल्लवौ यस्य तमिति तद्भक्तान् योगेश्वरानपि ध्यावे-दिति भावः । श्रीलक्ष्मणं श्रीरेव लक्ष्म वामस्तनोर्द्धे लक्ष्मीरेखा तद्युक्तं पामादिविहितो मत्वर्थीयो न-प्रत्ययः । कौस्तुभरत्नं तद्भ्रमनहि-रण्मयसूत्रं कन्धरायां यस्य तम् । आचितं व्याप्तम् ॥ १० ॥

महाधनैः बहुमूल्यैः । स्निग्धत्वादिविधिशिष्टैः कुन्तलैर्विरोचमाने आनने यो हासः तेन पेशलं मनोहरम् ॥ ११ ॥

अदीनमतिमाधुर्य्यं यल्लीलाहसितं तद्युक्तमीक्षणञ्च उल्लसल्लुलासं प्राप्नुवन् भ्रूभङ्गञ्च ताभ्यां संसूचितो भूरिरनुग्रहो येन तम् । चिन्तामयं चिन्तयैवाविर्भवन्तम् ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

प्रसन्नध्यात्रानंदप्रदंवक्त्रं यस्यनलिनं पद्मं तद्वदायतेदीर्घेईक्षणेयस्यकदंवकिंजल्कवत् कदंवपुष्पकेसरवत् पिशंगेवाससीयस्य लसंति-महारत्नानियेषुतानि हिरण्मयान्यंगदानियस्य स्फुरंतिचतानिमहारत्नानि च तन्मयानि किंगटकुंडलानियस्यतम् ॥ ९ ॥

उन्निद्रहृत्पंकजस्यविकसितहृदयकमलस्यकर्णिकैवालयः स्थानं तत्रयोगेश्वरैरास्थापितौ यामगोचरीकृतौपादपल्लवौयस्य श्रीरूपंलक्ष्मचिह्नंविद्यतेयस्यसः श्रीलक्ष्मणास्तम् पामादिविहितोमत्वर्थीयो न प्रत्ययः तस्याकृतिगणत्वात् कौस्तुभरत्नंकंधरायांयस्य अम्लानाविस्फूर्यमाणालक्ष्मीः शोभायस्यास्तया आचितंसर्वतोविस्फूर्यमाणम् ॥ १० ॥

मेखलयाकाटिसूत्रेणां गुलीयकादिभिश्चविभूषितम स्निग्धैः सस्नेहैरमलैरुज्वलैः कुंचितैर्वकैर्नीलवर्णैरेवविधैः । कुंतलैर्विरोचमाने आननेयोहासस्तेनपेशलंसुंदरम् ॥ ११ ॥

अदीनमोदारंया लीलाहसितेनयुक्तं यदीक्षणं तेनोल्लसद्भिर्भ्रूभंगैर्भ्रूविक्षेपैः सम्यक्सूचितोभूर्यनुग्रहोयेनतम् चिंतामयंचिंतायां भवार्णा-दाविर्भूतं तत आगतहर्त्याधिकारमयट् एतंध्येयमीश्वरमंतर्यामिणम् यावन्मनो धारणायावतिष्ठतेतावदीक्षेत ॥ १२ ॥

भाषाटीका ।

प्रसन्न है मुखारविंद जिनका कमल सरीके चौड़े नेत्रवाले हृदय पुष्पके केसर सरीके पीतवस्त्र धारण किये हुए प्रकाशमान बहुमूल्य रत्न जड़ित सुवर्ण के बड़े बाजुबन्द धारण किये हुए चमकते हुये बहु मूल्य रत्नोंके किरीट कुंडल धारण किये हुये ॥ ९ ॥

खिला हुआ हृदय कमल स्थानमें योगीश्वरोंने जिनके चरण कमलको स्थापित कियाहै जिनके लक्ष्मीका चिह्नहै कौस्तुभमणि जिनके कंठमें है निर्मल शोभा वाली वनमाला से शोभित हैं ॥ १० ॥

कटिमेखला मुद्रिका बहु मूल्य नूपुर कंकणादिकों से तथा चीकने निर्मल घुंघरारे केशोंसे सुशोभित हैं जो प्रकाशमान दांतों से सुशोभित हैं ॥ ११ ॥

उदारलीला वाली हसीयुक्त नेत्रों के सुंदर भृकुटी के चलनसे बड़ी कृपा कुंभकों पर जनाते हुये ऐसे भगवान इस ईश्वरको ध्यावे जबतक कि मन धारणा में स्थित रहसके तबतक ॥ १२ ॥

एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत् परं परं शुध्यति धीर्यथा यथा ॥ १३ ॥
यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥
स्थिरं सुखश्चासनमास्थितो यतिर्यदा जिहासूरिममङ्ग ? लोकम् ।
काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन्मनसा जितासुः ॥ १५ ॥
मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एनां निनयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तस्यैव ध्यानमाह एकैकश इति । अनुभावयेत् ध्यायेत् । यद्यत् जितं जितम् अयत्नतः स्फुरितं पादगुल्फादि स्थानम् अवयव तत्तत् अपोह्य त्यक्त्वा परं परं जङ्घाजान्वादि धारयेत् ध्यायेत् । शुध्यति तस्मिन् निश्चला भवति ॥ १३ ॥

पूर्वोक्तवैराजधारणाया एतद्धारणाक्रत्वमाह यावदिति । परे ब्रह्मादयोऽवरे कनिष्ठा यस्मात् कुतः, विश्वेश्वरे, द्रष्टरि न तु दृश्ये चैतन्यघनत्वात् अनेन कर्म्मापि भक्तियोगपर्य्यन्तमेवेत्युक्तम् ॥ १४ ॥

एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तम् इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्द्धैश्चतुर्भिः । अङ्ग हे राजन् ! एवम्भूतो यतिर्यदा इमं लोकं देहं जिहासुः हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनः न सज्जयेत् सङ्गं न प्रापयेत् न देशकालौ योगिनः सिद्धिहेतू किन्तु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखकरञ्चासनमास्थितः प्राणान् इन्द्रियाणि नियच्छेदित्यर्थः ॥ १५ ॥

एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि मिलयेत् प्रविलापयेत् । तञ्च क्षेत्रज्ञम् आत्मनि शुद्धे । तञ्च शुद्धमात्मानम् आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् ततः परं प्राप्याभावात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

युगपत्कृत्स्नशुभाश्रयगोचरध्यानाशक्त्यातदुपायभूतमुक्तरूपस्यैवध्यानक्रमविशेषमाह । एकैकशइति गदाभृतः परमात्मनः पादादि पादप्रभृतियावद्धसितंमंदस्मितावधि । अंगानि एकैकशः प्रत्येकंधियानुभावयेच्चिन्तयेत् । जितं जितं भावनयास्फुरितंप्रतिष्ठितमितियावत स्थानंपादगुल्फाद्यवयवमपोह्यत्यक्त्वाविशेषाकारेणेतिभावः । सामान्याकारेणकृत्स्नशुभाश्रयगोचरज्ञानस्यापेक्षितत्वात्परंपरंजंघाजान्वादिस्थानंधीर्यथाशुद्ध्यतिप्रसीदत्यनाकुलीभवतितथाधारयेत । कृत्स्नशुभाश्रयगोचरभक्तियोगोत्पत्तेः पूर्वमिदमवयवशोविभावनंयत्नेनक र्त्तव्यमुत्पन्नायांतुभक्तौहानायोगात् ॥ १३ ॥

अतस्तत्सर्वयत्नेनध्येयमवयवशइत्याह यावदिति । परेब्रह्मादयोऽवरेयस्मात्सपरावरः तस्मिन्नविश्वेषामीश्वरेनियंतरिद्रष्टरिसर्वज्ञेऽस्मिन् कविप्रहविशिष्टेपुरुषेभक्तियोगः विशेषाकारेणकृत्स्नशुभाश्रयगोचरः प्रीतिपूर्वकोऽविच्छिन्नोध्यानयोगः । यावन्नजायेतमोत्पद्येततावत्क्रियावसाने आवश्यकानुष्ठानांतेपुरुषस्यप्राक्शमात्रं पुरुषमित्युक्तस्यपुरुषस्यस्थविष्ठरूपंदिव्यात्मस्वरूपापेक्षयास्थविष्ठंविग्रहंप्रयतः समाहितश्च यवद्वाः स्मरेतेत्यर्थः । स्थविष्ठंरूपंवैराजस्यपूर्वोक्तरूपमितितुमंदैकपांतरोपासनायाएतद्रूपोपासनानुपयुक्तत्वात् ॥ १४ ॥

एवमेकैकमवयवंशिक्षयित्वापश्चादेकैकांगध्यानपूर्वकंकृत्स्नध्यानाभ्यासउक्तः । अथेदशोपासनानिष्ठस्यदेहत्यागप्रकारंवक्तुमुपक्रमते आत्मन परमात्मनिसमर्पणाप्रकारमाह स्थिरमिति यतिर्योगीयदापरिपूर्णभक्तियोगसंपादकशरीरावस्थितिहेतुभूतप्रारब्धावसानकालेअंग हेराजन्निमंलोकंप्राकृतंलोकंजिहासुर्हातुमिच्छुर्भवतितदागंगातीरोत्तरायणादिदेशकालादिषुमनोनसज्जयेत्सक्तंनकुर्यात्किन्तुजितप्राणः जि तासुःस्थिरंनिर्भयदेशस्थंसुखमृज्वासनमास्थितः मनसाप्राणानींद्रियाणिनियच्छेदनन्यपराणिकुर्यात् ॥ १५ ॥

स्वबुद्ध्यानिश्चयात्मिकयाबुद्ध्याऽमलयाभगवदुपासनेननिर्द्धूतमलया मनः नियम्यबुद्धिव्यापारमात्ररतंकृत्वाएतांबुद्धिंक्षेत्रज्ञेजीवेनिनये जिवच्छेत्तंक्षेत्रज्ञमात्मनिनियच्छेदित्यर्थः एवमात्मानंजीवमात्मनिपरमात्मनिअवरुध्यसमर्प्यलब्धोपशांतिः प्राप्तनिर्वृतिः सन्कृत्याद्विरमेत् अंत काळेपरमात्मनिस्वात्मसमर्पणाद्यधिकर्मनत्याज्यमितिकृत्याद्विरमेतित्यनेनलभ्यते । आप्रयाणात्तत्रापिहिदृश्यम् ॥४।१।१२॥इतिन्यायेनोपासना याआप्रयाणाद्वर्तमानयैवतेनजिवात्मकंकृत्स्नस्याप्याप्रयाणादनुवर्तमीयत्वाच्चाहिमुमूर्षोः कृत्यविरतिर्विधेयाक्षतएवविरतेः । अत्रयद्यपियद जिहासुरिमंगलोकमित्यनेनयोगिनांस्वच्छंदमरणानांकृत्यमेवप्रतीयतेतथापि "तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्ये" इतिकृत्स्नयोगइ तीरारंभकप्रारब्धावसानएवपरमात्मसंपत्तिभवत्यान्तेचमिदंकृत्यंनत्वमुमूर्षोरनवहितकृत्वेनाशक्त्यावासक्षेत्रियच्छेद्विरमेतेत्यादिविधि विधानस्यानुपपत्त्यास्वच्छंदमरणानांकृत्यमेवमितिविकुंठयोगप्रभावातिशयेनकरणानांक्षायस्तत्वात् । येचयोगमाहात्म्यादविनष्टएवप्रार ब्धेदेहेतेषांपुनःसंसारएवातएवभीष्मादीनामुत्तरायणादिकालप्रतीक्षाप्रारब्धस्याविनष्टत्वात् अतोयदेत्यस्य प्रारब्धावसानइत्युक्तएवार्थः साधुः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

सर्वांगस्मरणाशक्तस्वस्मरणप्रकारमाह एकैकशइति ध्यानेनजितमनोवायुनेनध्यानविषयंस्थानमवयवमपीक्षणीकृत्यपरंपरमजितमवश्यंस्तमवयवंरूपादभारंश्चयावद्धसितं*पुष्पितंवनमितिवत्तद्धासनेधिकसितंमुखंहसितमितिलक्ष्यते। मुखपर्यन्तंसांगोपांगंप्रतिविधायमनोधारयेत्। यथायथाधीःशुध्यातेसर्वांगध्यानक्षमाभवतितथातथाऽवस्तंकुर्वीतः सर्वांगध्यानाक्षमश्चेत्तावत्पर्यंतमेकैकावयवमनुभावयेदित्यर्थः॥१३

इममेवार्थमुपसंहरति यावदिति परावरेश्वरेयस्मात्सपरावरस्तस्मिन् । द्वयेरिसर्वसाक्षिणि । विश्वेश्वरेहरौ । यावत्सर्वोत्तमोत्तममहोपकारकोऽतएवसर्वतःप्रियतमइतिज्ञानपूर्वकप्रेमलक्षणभक्तिपरं । पुरुषस्य । स्थवीयोऽतिस्थूलंरूपं । स्मरेत । तत्रापिनिरन्तरध्यानासक्तःसन्नित्यक्रियावसानेप्रयतःप्रयत्नवान्स्मरेतेत्यन्वयः ॥ १४ ॥

इदानीमुक्तविधोपासनाजनितज्ञानेनापरोक्षकृतपरमात्मतत्त्वस्यतत्प्रसादाद्विद्वान् ब्रह्मादिनस्वस्यज्ञानिनोयदादेहत्यागेच्छा तदाखदेह गतेंद्रियाद्यभिमानिदेवतालयस्मरणपूर्वकंमोक्षप्रकारमाह स्थिरमिति यतिर्निर्जितेंद्रियग्रामोऽपरोक्षज्ञानीइमंलोकंदेहंयदाजिहासुस्वकु मिच्छति तदायथासुखंभवति तथास्थिरमचलमासनमास्थितःकालेदेशेचकालस्थेषुदेशस्थेषुचविषयेषुचयावन्मनोनसज्जेत्सकंनकुर्यात् अथमनसास्ववशेनप्राणान्विषयाननुधावंतीन्द्रियाणिचनियच्छेत् तत आहरेदाहृत्यचप्राणान्प्रियच्छेत्प्राणायामान्कुर्यादयजितासुर्भवत्तथा प्राप्तप्राणप्रसादइन्द्रियप्रेरकान्दिशादिदेवान्मनोऽभिमानिनींद्रेनियच्छेतइंद्राधीनांश्रितयेत् ॥ १५ ॥

मनश्चमनोऽभिमानिनमिन्द्रञ्चामलयाबुद्ध्याबुद्धिदेवतयोमयानियम्यतदधीनंस्मृत्वैनांबुद्धिदेवतामुमांक्षेत्रज्ञेजीवान्तर्यामिणि हरौनियेत् नितरांतदधीनाञ्चिन्तयेत् तंक्षेत्रज्ञमात्मानिदेहमध्यस्थेहरौनियेत्तदैक्येनचिन्तयेत् तंदेहगतमात्मानं हरिमात्मनिसर्वगतेहरावक्यतदेकीभावेनसञ्चिन्यदेहादुत्क्रम्यलब्धोपशान्तिः प्राप्तसर्वाधिक्यमङ्गलाख्यविष्णुरूपोधीरः कृत्याद्विधिनिषेधलक्षणात्कार्याद्विरमेदित्यन्वयः "भक्त्याप्राणावशेनीत्वाजितप्राणोभवत्युत जीवस्थोभगवान्विष्णुः क्षेत्रज्ञइतिगीयते इत्रतस्तुसएवात्माव्याप्तोऽप्यात्मेतिभण्यते हरीद्रदेभेद श्रीतिस्तदेकत्वस्यचिन्तनम् अन्यत्रतन्नियम्यादिचिन्तनंनीतिरुच्यत"इतिप्रमाणेभ्यउक्तप्रकाशोऽन्योनस्वकपोलकल्पितइतिभावः । मनस्तस्यं बुद्धितस्वेबुद्धितस्वंक्षेत्रज्ञेऽधिष्ठानभूतेतंक्षेत्रज्ञद्वारमात्मनिशोधिततत्वंपदार्थेचिन्मात्रेतमात्मानं शोधिततत्वंपदार्थभूतमात्मनिशोधिततत्पदार्थं भूतेपरमात्मन्यवरुध्यैकीकृत्यभेदहेतुमविद्याधिष्ठानम् यथार्थज्ञानेन निरस्यकृत्यात् विरमेतेतिमायावादिनः एतांश्चद्विरूपांबुद्धिक्षेत्रज्ञे समष्टिरूपहिरण्यगर्भात्मनिकारणात्मकैकारणात्मानमात्मनिशुद्धक्षेत्रज्ञाख्यवपुष्य कृत्यादुविरतःस्यादितिपौराणिकंमन्याः इतिद्वयमपि प्रमाणविरुद्धत्वादुपेक्षणीयंमनश्चेतिचशब्देनमनः शब्दवाच्यंरुद्रं बुद्धिशब्दवाच्यांवाणीधिरिचलश्रीद्वाराक्षेत्रज्ञलयं तत्त्वानांस्वस्वकारणे पुकल्पतइतिज्ञातव्यम् "उपोधिकेसमीपेचेति शांतिःप्रशममंगलेइतिच मंगलंभगवान्विष्णुः"इतिच ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यावदिति । भक्तियोगः केचित् स्वदेहान्तः इत्यादिनोक्तसाधनलक्षणाभिनिवेशः अन्यत्रैः ॥ १४ ॥

अनन्तरं पूर्ववत् च यदि महतकृपाविशेषेण दिव्यदृष्टिता भवति, तदा विशेषोपलब्धिश्च भवेत् । न चेत्, निर्विशेषचिन्मात्रब्रह्मानुभवेन तल्लीन एव भवति । तथैव निर्विध्यासनमपि तेषाम् । तथाच स्थिरमित्यादि ॥ १५ ॥

तथा मन इति । तत्र क्षेत्रज्ञं स्वरूपभूतया बुद्ध्या आत्मनि तदद्रष्टृत्वादिरहिते शुद्धे जीवे । अन्यत्रैः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

सर्वांगास्फुरणे पुनःएकैकशः अंगानिधारयेत् एकंधृत्वातस्यस्वाधीनतायां जातायां द्वितीयंधारयेदिति धियेत्युक्तम् अत्रधारणायां क्रमोविवक्षितः तदाह पादादियावद्धसितमिति तृतीयस्कन्धेऽप्यर्थंभविष्यति गदाभृतइति प्राणनिश्चलतासूचिता जितंजितस्थानं स्वाधीनं स्वाधीनस्थानंपादादिअपोह्यग्राहक बुद्ध्यप्रगामाभावात् त्याजयित्वा तेनाग्रेणअन्यदग्राह्यं अन्यग्रहणे न तथा भगवदवयवस्यअधिकागुणाः स्मर्तव्याः यथाबुद्धिदोषाअपगच्छेयुः तदपगमेबुद्धिर्विशदाभवति तथाअवयवांतरमपिमाति एवमुत्तरत्रापि यथायथाबुद्धिःशुद्धयति तथा तथापरंधारयेदित्यर्थः इयंचधारणासंजातभक्तेर्भवति ॥ १३ ॥

यावत्पुनर्भक्तिर्नजायते तावत्पूर्वोक्तधारणाकर्त्तव्येत्याह यावदिति परेऽवरेयस्मात् परावरत्वस्फुरणमपि सर्वोत्तमत्वरूपं प्रेममार्गे माहात्म्यज्ञानापरपर्यायम् अस्मिन्निति स्वयंभक्त्यातंपश्यन्नाह द्वयेरिसर्वसाक्षिणि पूर्वोक्तन्यायेन सर्ववस्तुशुद्धेनस्वरूपेणद्वया प्रत्यग्रूपेणचाप्रकाशमाने योगपदेनस्वसाधनं साधनभूतं भक्तेः स्थिररूपमुक्तं तावत्स्थवीयःस्थूलं पुरुषस्यपूर्वोक्तस्य क्रियावसाने अग्निहोत्रादिकंकृत्वा अन्यप्रशुद्धावस्थायां सन्यासंगृहीत्वेतिकेचित् तदानिरंतरंस्मरणं भवति परक्रियायाहेतुत्वंनस्यात् प्रतिबंधः कल्पकल्पनांपक्षया साधकत्वकल्पनायाउत्कृष्टत्वात् पुण्यतीर्थं जलाप्लुतइति नियमानामुक्त्वाच प्रयतःसावधानेसूत्वा नियमेऽपिधर्मः अन्यभावनापरित्यागार्थंया ॥ १४ ॥

एवमंतकालेपाक्षिकदोषपरिहारार्थं योगंसाधयित्वातस्यदृष्टोपायत्वज्ञापनायबुद्धिपूर्वकं मरणप्रकारमाह स्थिरमित्यादिना फल्गुत्सृजेदेतदंगसंनिनिहतमुत्तरांगमितिकेचित् । अथांतरव्यापारहत्यपरे । स्थिरमचंचलं । सुखंकोमलं । पद्मासनादिरूपंवृष्यादिरूपंवा । आत्मंतात्स्थितः । मनसाप्यन्यत्रगमनंनिवारितम् । अतः परंसन्यासोमिश्रः । तदावासन्यासःकर्त्तव्यइत्याह । यस्मिन्निति । प्राणायामंकृत्वापूर्वा-सूरंसन्यासमंत्रंचउच्चार्यित्वाअभयमभयंभूतेभ्य इतिभूताभयदानमुक्त्वाब्रह्मब्रह्मणेनिर्देशमुक्त्वाबहुरूपेविश्वरूपेसर्वात्मकेपरमात्मन्यात्मानं त्वाम्प्रह्वाणिप्रणवेनजीवयोरैक्यंतत्त्वम् । एवंभूत्वातदाअन्यदावायदाजिहासुर्भवति इमंलोकंदेहं तदादेशकालापेक्षानकर्त्तव्येत्याह इति भाग-

---

* पुष्पितइत्युक्ते यथावर्णनमत्यर्थोलभ्यतेतद्वदित्यर्थः ।

श्रीमच्छुकाचार्यकृत सुबोधिनी ।

जेचेति देशोवदरिकाश्रमादिपुण्यस्थाने कालेऽतद्योग्यसमये चकाराद्युक्तयोगधर्मेषुमनोनासक्तं कुर्यात् । विशेषणभूतएवदेशादौचिन्तव्या पुनर्भावे हितितदाकेवलंभगवच्चिन्तं मनःकृत्वा यद्देशादिभिर्भविष्यतितद्भगवतैवभाविष्यतीतिमनस्यैर्यंविधायप्राणान्नियच्छेत् । मूलाधारादपानंसंकोच्यतत्रप्राणंनिधायकुंडलनीप्रबोधनेनब्रह्मरंध्रांतंप्राणापानसहितांसुषुम्नामार्गेणनिवेश्यवायुमूर्द्धन्येधित्यर्थः । मनसाबुद्धिसहितेन देहचालनादिकमकृत्वा एतत्सामर्थ्यंजिज्ञासोरेवभवतीतितदवसरेस्मारयति । जितासुर्यतिएवंकृतेप्राजितासुर्भवति ॥ १५ ॥

यदाकथञ्चित्स्वप्रमादाद्विघ्नाद्दयतेततदाजयःसिद्धोभवति । तदनंतरंस्वबुद्ध्याआत्मबुद्ध्या संघातव्यतिरिक्तरूपयाममलयामक्षादिभिः शुद्धया नियम्यस्थिरंकृत्वाप्रयत्नं त्याजयित्वा दंडवत्स्थक्त्वेतियावत् स्वस्मिन्वास्थापयित्वा बुद्ध्यावासंयोज्यतांबुद्धिं मनःसहितांवा क्षेत्रज्ञे शारीरे आत्मनि यःक्षेत्रंदेहादिमहमितिममेदमितिच अभिमन्यतेतस्मिन् प्रवेशयेत् तंचक्षेत्रज्ञं भगवतोरूपविशेषे सर्वजीवसमूहरूपेआत्मनि "अहमात्माशुडाकेशः सर्वभूताशयस्थित"इति वाक्यनिरूपिते भगवद्विभूतिरूपे तमात्मानं तस्मिन्नेव वा भगवद्रूपे अवरुध्यएकीकृत्यपुनर्देहानुसंधानार्थमिच्छामकृत्वाधीरोभूत्वातत्रात्मनि लब्धोपशांतिःकृत्यात्कर्त्तव्यात् कोटिजन्मकृतात् सर्वस्मादेवप्रयत्नेश्च उपरतोभवेत् समाधाविवस्थित्वापुनर्नागच्छेदित्यर्थः अत्रैवमुक्तिरित्येकःपक्षः एवंस्थितेर्देहः स्वयमेवस्वकारणलयादुगच्छति परंतन्नानुसंधत्ते एतत्तृतीयेवक्ष्यते ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अस्यैव ध्यानमाह एकैकश इति । नु निश्चितं भावयेत् ध्यायेत् । जितं जितं ध्यानेनाभ्यस्तं स्थानं पादगुल्फादि अपोह्य त्यक्त्वा परं परं जङ्घाजान्वादि धारयेत् स्वमनः प्रयोज्य प्राहयेदित्यर्थः । यथा यथा धीश्च शुध्यति विषयलाम्पट्यं त्यजति तथा तथा धारयेदिति चित्तशुद्धितारतम्येनैव ध्यानतारतम्यमुक्तम् । तेनात्यन्ताशुद्धचित्तस्य नात्राधिकारः किन्तु वैराजधारणायामेवेति व्यञ्जितम् ॥ १३ ॥

अतएवाशुद्धचित्तत्वादेतद्रूपं यावद्ध्यातुं न शक्नुयात् तावद्वैराजरूपमेव ध्यायेदित्याह यावदिति । परे ब्रह्मादयोऽवरे यस्मात् । कुतः, विश्वेश्वरे, द्रष्टरि न तु दृश्ये । भक्तियोगः योगाङ्गभूतध्यानलक्षणः । क्रियावसाने आवश्यककर्मानुष्ठानानन्तरम् ॥ १४ ॥

अथ तस्यैव भक्तिमिश्रयोगिनः स्वयं देहत्यागकृत्यमाह स्थिरमिति । लोकं देहं यदा जिहासुर्भवेत् तदा देशे पुण्यक्षेत्रे काले योत्तरायणादौ मनः न सज्जयेत् सङ्गं न प्रापयेत् । योगिनः कालदेशौ न सिद्धिहेतू किन्तु योग एवेति हृदनिश्चयो भूत्वा प्राणान् इन्द्रियाणि मनसा नियच्छेत् प्राणान्मनोनियम्यान् कुर्य्यादित्यर्थः । तेन नियन्तरि मनसि इन्द्रियाणि प्रविलापयेदिति द्योतितम् ॥ १५ ॥

तत्रैव तन्मनः स्वबुद्ध्या नियम्येति मनो बुद्धौ प्रविलापयेदिति भावः । एतां स्वबुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि जीवे निलयेत् प्रविलापयेत् तत्र क्षेत्रज्ञम् आत्मनि शुद्धजीवे तम् आत्मानम् आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् । मुक्तस्य कर्त्तव्यान्तराभावादिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ध्यानमाह एकैकशइति गदाभृतोध्येयस्यध्यातृत्राणायगृहीतकौमोदकेः पादादियावद्धसितंहसितयुक्तमुखावधिअङ्गानिएकैकशः धियाभावयेद्ध्यायेत् । जितंजितंस्थानंसुस्नातंपादगुल्फाद्यम् । अपोह्यसुस्नातत्वेनहृदिनिधायपरंपरंजंघाजान्वादि धीर्यथायथाशुद्ध्यतितत्र-तत्रनिष्ठांप्राप्नोतितथातथाधारयेद्ध्यायेत् ॥ १३ ॥

वैराजधारणासाधनभूतातावदनुष्ठेयैवयावत्साध्यधारणाश्रयेभक्तिर्नभवेदित्याह यावदिति । अस्मिन्मुक्तशरीरिणि द्रष्टरिसर्वांतर्यामिणिपरेऽवरेयस्मात्तस्मिन् विश्वेश्वरेसर्वेश्वरेयावत्भक्तियोगोनजायेततावत्क्रियावसाने आवश्यककर्मानुष्ठानावसानेपुरुषस्यवैराजस्यस्थवीर्यं स्थूलं चतुर्दशभुवनात्मकं प्रयतः स्मरेत ॥ १४ ॥

अथेदम्भजननिष्ठावतोदेहविसर्जनप्रकारंचकुंभगवत्यात्मसमर्पणप्रकारंभगवत्स्वरूपंचाह स्थिरमितिचतुर्भिः अंगहेराजन् ! यतिर्म-गवद्ध्यानयोगीयदाप्रारब्धकर्मक्षयकाले इमंलोकं प्राकृतं लोकंजिहासुर्हातुमिच्छुःस्यात् तदादेशेपुण्यक्षेत्रेकाले उत्तरायणादौचमनोनस आवेशप्रापयेत् । किन्तुस्थिरंसुखमासनमास्थितः जितासुर्जितप्राणः मनसाप्राणमिंद्रियगणंनियच्छेद्भगवत्परंकुर्यात् ॥ १५ ॥

तन्मनःस्वबुद्ध्यानियम्य एतांबुद्धिंक्षेत्रज्ञे आत्मनिजीवेनिनयेन्नियच्छेत् । सर्वदेहेंद्रियरूपंजडवर्गंस्वनियम्यंस्वस्मात्पृथक्चिंतयेदित्यर्थः । तमात्मानंजीवम् आत्मनिभगवतिनिरुध्यसमर्प्यधीरोलब्धोपशांतिः कृत्याद्विरमेत अनेनस्वात्मसमर्पणावधिसाधनाभूतिर्दर्शिता ॥ १६ ॥

भाषाटीका ।

एक एक अंगकूं बुद्धिसे भावना करै गदाधर भगवान के पाद से लगाकर मुख हास पर्यंत जिस जिस स्थान में ध्यान लगजाव उस उसको छोड़कर जैसे जैसे मन शुद्ध हो तैसे दूसरे दूसरे स्थान कूं [अंगकूं] मन से ग्रहण करै ॥ १३ ॥

जब पर्यंत ब्रह्मादिकोंसें बड़े रूप वाले द्रष्टा विश्वेश्वर में भक्ति योग उत्पन्न न हो तब तक नित्य कर्म के अंत में परम पुरुष के स्थूल रूप कूं सावधान सें स्मरण करा करै ॥ १४ ॥

हे राजन् ! स्थिर सुखदायक आसन में बैठा हुआ योगी यदि इस लोक कूं छोड़ना चाहे तो पवन को जीतने वाला आप उत्तम देश काल में मन न लगावे केवल प्राण वायू को रोक देव ॥ १५ ॥

अपनी निर्मल बुद्धी से मन को रोककर इस बुद्धि को क्षेत्रज्ञमें स्थापन करै उस क्षेत्रज्ञ जीवकों परमात्मा में स्थापन करै आत्मा को आत्माही में स्थित करके धीर पुरुष योगी शांति को प्राप्त होकर संसार कार्यों से निवृत्त होजावे ॥ १६ ॥

न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम् ॥ १७ ॥
परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥ १८ ॥
इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्य्यसुरन्धिताशयः ।
स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्रमः ॥ १९ ॥
नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तदेवाह न यत्रेति । यत्र आत्मस्वरूपे कालः न प्रभुः किमपि कर्त्तुं न समर्थः अतएव देवा न प्रभव इत्याह । अनिमिषां देवानां परः प्रभुः कालोऽपि यत्र न प्रभुः, तत्र कुतो नु देवाः प्रभवः स्युः । देवनियम्यानां जगतां प्राणिनां का वार्तेत्याह जगतामिति । कुतो न प्रभवन्तीत्यपेक्षायां निरुपाधिकत्वादित्याह न यत्रेत्यादि । यद्वा जगत्कारणान्यपि न यस्य सृष्ट्यादौ प्रभवन्तीत्याह न यत्रेति । विकारः अहङ्कारः ॥ १७ ॥

निरुपाधित्वं कुतः इत्यत आह परमिति । यत् यस्मात् 'अतत् आत्मव्यतिरिक्तं नेति नेति इति एवम् उत्सृष्टुमिच्छवः दौरात्म्यं देहाद्यात्मत्वं विसृज्य अर्हस्य पूज्यस्य श्रीविष्णोः पदे पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन् सौहृदं येषां तथाभूताः सन्तः तद्वैष्णवं पदम् अतएव परं सर्वतः श्रेष्ठम् आमनन्तीत्यन्वयः ॥ १८ ॥

तस्मात् इत्थं ब्रह्मात्मत्वेन व्यवस्थितो मुनिरुपरमेत । तु शब्देन यदि प्रयास्यन्निति वक्ष्यमाणात् सकामाद्विशेष उक्तः । तमाह । विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्या वीर्य्यं बलं तेन सुरन्धिता विहिंसिता आशयाः विषयवासना यस्य सः ॥ १९ ॥

इदानीं तस्य देहत्यागप्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदं मूलाधारम् आपीड्य निरुध्य अनिलं प्राणम् उन्नमयेत् ऊर्द्धं नयेत् । जितः क्रमो येन । षट्सु स्थानेषु नाभ्यादिषु । नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य । उरसि कण्ठादधोदेशे स्थिते विशुद्धचक्रे । तम् अनिलम् ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

यदि प्रयास्यन्नित्यस्याध्यायस्यैव द्वाविंशश्लोको द्रष्टव्यः ॥ १९ ॥

नाभ्यादिष्विति । अत्र परोक्तेषु मणिपूरानाहतविशुद्धतालुमूलाज्ञाचक्रब्रह्मरन्ध्रेष्वित्यर्थः ॥ [षट्चक्रभेदस्य विशेषविवृतिरस्मत्प्रकाशिते महानिर्व्वाणतन्त्रे सप्तपञ्चाशदधिकशततमसंख्यकपत्रे द्रष्टव्या ।] ॥ २०—२४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अथप्राप्यंपरमात्मस्वरूपंवक्ष्यंस्तस्मिन्स्वात्मसमर्पणावधिकर्मनत्याऽऽद्यमित्याह नयत्रेति यत्रवैष्णवेपदेकालोनप्रभुः किमपिकर्त्तुंन समर्थः अतएवदेवानिप्रभवइत्याह अनिमिषांब्रह्मादीनांदेवानांपरः प्रभुःकालोयत्रनप्रभुःतत्रकुतोदेवाःप्रभवःस्यु देवनियम्यानांजगतां प्राणिनांकावार्तेत्याह जगतांप्राणिनांयेईशिरेजगतियेन्ययमयन्देवाःतेकुतोनप्रभवः तस्मियाम्यानांजगतांत्वप्रभुत्वंकैमुत्यन्यायसिद्धमित्यर्थः सर्वैरनियाम्यंसर्वनिर्द्देश्यमित्यर्थःकिंचयत्रपदेप्रधानंतद्गुणाःसत्त्वादयःप्रधानकार्यभूतमहदहंकारादयश्चस्वकीयकार्यजननक्षमानभवंति ॥१७॥

यद्विष्णोःसंबंधिपरंसर्वोत्कृष्टंपदं प्राप्यंस्वरूपंयतेनगम्यतइतिहिव्युत्पत्तिः आमनंतिवेदाइतिशेषः किंकर्त्तुमिच्छवआमनंति वृयुत्सिसृक्षवःतन्नेति नेतीतिउत्सिसृक्षवः तद्व्यतिरिक्तमुत्स्रष्टुमिच्छवः व्यावर्त्तयितुमिच्छवः अन्यब्रह्मात्मकंखल्वतंनवस्तुनेतिनेतीतिबोधयंतः कालादिभिरनियाम्यंकालादीनांचनियंतृयत्सत्त्वादिकार्यास्पृष्टंच वैष्णवं प्राप्यंस्वरूपंवेदांताः आमनंति दौरात्म्यं रागाद्युपहतचित्तत्वंविसृज्यत्यक्त्वा तदर्हपदमर्हस्याराधनीयस्यभगवतः परमनन्यसौहृदाःअनन्यसौहृदयेनहृदयस्यहृदादेशः यद्वाऽनन्यसौहृदावेदांताः आमनंतीतिपूर्वेणान्वयः अनन्यसात्पर्यकाइत्यर्थः हृदाहृदयेनोपगुह्यपदेपदेक्षणेक्षणे आश्लिष्यकृत्याद्विरमेततदाकृतकृत्योभवेदितिपूर्वेणान्वयः ॥ १८ ॥

अथदेहादुत्क्रांतिमाह इत्थंमिति इत्थंतूपरमेतदेहादितिशेषः तुशब्दः कृत्याद्विरतेर्देहादुपरामस्यवैलक्षण्यद्योतकः इत्थंवक्ष्यमाणप्रकारत्वेन एतदेवोपपादयति विज्ञानेति सर्वंब्रह्मात्मकमितिव्यवस्थितमितिमतिर्विज्ञानं भगवदुपासनात्मकं ज्ञानंतदेवदृग्दर्शनात्मकं प्रत्यक्षतापन्नमित्यर्थः तादृशस्यज्ञानस्ययद्वीर्य्यंसामर्थ्यंतेनसुरंधिताः विहिंसिताः निःशेषनिवृत्तः आशयोवासनायस्यसतथोक्तः योगीस्वपार्ष्णिं स्वपादमूलेनगुदंमूलाधारमापीड्यनिरुध्यततः आपीडनमनंतरमनिलंप्राणंषट्सुनाभ्यादिषुस्वस्वमात्रेषुस्थानेषुउन्नमयेदुत्थापयेत्तेनैव तिरुद्धक्रमइत्यर्थः ॥ १९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

• नाभ्यांमणिपूरकेस्थितंप्राणंहृदयनाहृताख्यहृदयकमलेऽधिरोप्यतस्माद्धृदः उदानगत्योदानस्योदानवायोर्गत्यासंचारप्रकारेणोरसिकंठाद्यूर्ध्वोदग्रस्थितेविशुद्धचक्रेतंप्राणंनयेततततउरसः श्रियानुसंधायगंतव्यमनुसंधायमनस्वीयतांचित्तः स्वतालुमूलंस्वजिह्वाग्रपूर्वकस्यैवाग्रभागंशनकैःततोबहुधागमनसंभवाच्छनकैरित्युक्तंनयेतप्रापयेत ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

• एवमुत्क्रांतोज्ञानीयंलोकमाप्नोतितमितरलोकेभ्योव्यावर्तयति नयत्रेति यत्रयस्मिन्लोकेऽनिमिषाणांरुद्रादिदेवानांप्रभुःकालोवायुर्न प्रभुःस्वशक्तेरुद्बोधकः "हरिरूपप्रकृतिर्ध्रुवब्रह्मवायूतथैवचेत्यादेः* येरुद्रादयोदेवा †जगतामीशिरेजगंतिस्वस्वकार्येप्रवर्तयामासुस्तेदेवानप्रभवंति कुतोन्यावकाशोनकुतोऽपीत्यर्थः । यत्रयस्मिन्स्थानेसत्त्वादिगुणात्रयंचस्वशक्तिप्रकाशकंन । विकारोवैभूतेंद्रियात्मकोहंकाश्चन । महान्महत्तत्त्वंचप्रधानंप्रकृतिश्चन । जरादिस्वधर्मापादिकानभवंतीत्यर्थः ॥ १८ ॥

ननुकालादिसंसर्गाभावाच्छशविषाणवन्नास्तीतित्राह परंपदमिति तद्वैष्णवंविष्णोर्विद्यमानं परंपदंप्राप्तव्योत्तमंलोकमामनंतिपठंतीत्यन्वयः । अनेनयथाकालादिकृतोपद्रवोहरेर्नोस्तितथालोकस्यापीत्युक्तंभवति यत्संबंधाल्लोकोऽपिताहङ्महिमासविष्णुःकिंमहिमेतित्राह यत्रेतीति वैष्णवमित्यनेनप्रस्तुतोविष्णुरयमुच्यते अततत्तस्मात्ब्रह्मणाइतरत्संसारलक्षणंदुःखमुत्सिसृक्षवस्त्यक्तकामाः विशिष्टाधिकारिणोयेविष्णुनेतिनेतिपृथिव्यादिवन्नाकाशादिवच्चन तत्कारणमहदादिवच्चन तदभिमानिवच्चनेत्युपास्यतद्दौरात्म्यदुरात्मनामसुरप्रकृतीनांविद्यमानंसंसारदुःखंविसृज्यानन्यसौहृदा अनन्यभक्ताहृदानिरंतरंयथास्यात्तथोपगुह्यपदेपदेमनसानिरंतरंपरिरभ्यामुमापुः एवंविधस्यहरेर्विद्यमानमितिपूर्वेणान्वयः यद्वायत्सर्वोत्तमंपरममंगलंविष्णुरूपमाप्तवान्तद्रूपमितरेभ्योव्यावर्तयति नयत्रेति अततस्तस्माद्ब्रह्मणोऽन्यदुजगदुत्सिसृक्षवस्त्याजयितुकामाः सचाएषआत्मानेतिनेतीत्यामनंतितदित्यन्वयः वेदानामचेतनत्वेनबुद्धिपूर्वकप्रवृत्त्यसंभवात्कथंतदुक्तंनिर्णेतुंशक्यतइत्यत्राह विसृज्येति । वेदोक्तेनविधिनायैर्दौरात्म्यंदुष्टोपास्तिमेकयाविषयंविसृज्यपदेपदेऽन्वहंहृदोपगुह्याप्योक्षीकृत्यानन्यसौहृदाभूतभवद्भविष्यंतोऽमुमापुराप्नुवंत्याप्स्यंतिवातायुक्तमुक्तमिति ॥ १८ ॥

संप्रतिज्ञानिनांदेहादुत्क्रमणप्रकरमाह इत्थमिति तुशब्दःप्रकरणभेदार्थः इत्थंस्थिरंसुखंचासनमित्युक्तप्रकारेणमुनिःपरमेदुत्क्रमितोभवत् । कथमत्राह व्यवस्थितइति देहादुत्क्रमणेव्यवस्थितोनिश्चितबुद्धिः । विज्ञानमात्रमयोयज्ञानंस्वविषयंतदेहक्तस्यावीर्येणसुष्ठुरंधितोदग्धआशयोयोगाभ्यासकरणोयस्यसतथोक्तः । विज्ञानंब्रह्मेतिश्रुतेर्विज्ञानस्यब्रह्मणोदशोर्ध्वियेणेतिवा जितक्लमःशरीरग्लानिरहितःप्रथमंस्वपार्ष्णिनागुल्फाधोभागेनगुदमपानद्वारमापीड्य ततोपानद्वारंनिरोधानंतरं । ततोमूलाधाराच्चतुर्दलपद्मादनिलमुदानवायुमुत्थाप्यनाभिहृदयोरस्तालुमूलभ्रूमध्यमूर्ध्वसुपदृस्थानेषुक्रमादुन्नमयेदूर्ध्वगमयेदित्यन्वयः ॥ १९ ॥

संक्षिप्योक्तंविशिनष्टि नाभ्यामित्यादिना मुनिर्मूलाधाराच्चतुर्दलपद्मादुन्नीयनाभ्यांस्थितंषट्दलपद्मेनीत्वामुदानगत्याब्रह्मनाड्याहृदिदशदलपद्मेऽधरोप्यसन्निधाय ततोदशदलपद्मात्तमुरसिद्वादशदलपद्मेनयेत् मनस्वीमनःसमाधाननिरतस्ततोद्वादशदलपद्मात्तयानाड्यंतरंनगच्छंस्तयाधियानुसंधायशनकैरसंभ्रमेणास्वतालुमूलंषोडशदलकमलंनयेत् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तत्फलञ्च द्विविधं ब्रह्मकैवल्यप्राप्तिर्वैकुण्ठप्राप्तिश्च, भक्तिसिद्धज्ञाननिष्ठत्वादुभक्तिमयज्ञाननिष्ठत्वाच्च । तत्र पूर्वावस्था उक्ता । अथ उत्तरावस्थामजामिलादिन्यायेन तत्रैव वैकुण्ठाभिव्यक्तिदर्शनार्थमाह, न यत्रेति युग्मकेन । अत्र श्रीवैकुण्ठस्य सच्चिदानन्दरूपत्वं श्रीभगवतैवोक्तम् । तद्यथा—एवमेतान् मयादिष्टाननुतिष्ठन्ति मे पथः—ज्ञानकर्म्ममभक्तिलक्षणान् मत्प्राप्त्युपायान्; ज्ञानकर्म्मणोरपि भक्तेषु भक्तेः प्रथमतः क्वचित् कदाचित् किञ्चित्साहाय्यकारित्वात् । क्षेमं—मद्भक्तिमङ्गलमयम् । यत् स्थानं परमं ब्रह्मेति विदुर्जानन्ति। इत्थमेवोदाहरिष्यते च दशमे—इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः । दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥ इति । उभयत्रापि चकाराद्यध्याहारादिना त्वर्थान्तरं कृष्टं भवति । तैरेव च तमसः प्रकृतेः परमिति वैकुण्ठस्यापि विशेषणत्वेन व्याख्यातमिति ॥ १७ ॥

परं पदमिति । अतत् चिद्व्यतिरिक्तं नेति नेतीत्येवमुत्सृष्टुमिच्छवः दौरात्म्यं भगवदात्मनोरभेददृष्टिं विसृज्य अर्हस्य श्रीभगवतः पदं चरणारविन्दं पदे पदे प्रतिक्षणं हृदा उपगुह्य आश्लिष्य अनन्यसौहृदाः नान्यस्मिन् सौहृदं येषां तथाभूताः सन्तः यत् आमनन्ति जानन्ति तद्वैष्णवं पदं श्रीवैकुण्ठाख्यमिति ब्रह्मस्वरूपमेव तदिति तात्पर्य्यम् । अनेन भक्तिलक्षणसाधनलिङ्गेन निराकाररूपमर्थान्तरं निरस्तम्। अत्र निराकारपरायणस्यापि मुक्ताफलटीकाकृता दैवाभिव्यञ्जिता गीर्यथा—तत् परं पदं वैष्णवमानन्ति अधिकृताधिष्ठितराजाधिष्ठितत्ववत् ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात् परमित्युक्तम् । विष्णुनैवाधिष्ठितामित्यर्थ इति । अतएव श्रुतावपि तस्य स्वमहिमैकप्रतिष्ठितत्वम्—स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नि इति । अतएवोक्तम्—क इत्था वेद यत्र स इति ॥ १८ ॥

इत्थमित्यर्द्धकम् ॥ १९ ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

• तस्यमुक्तिमुक्त्वाह नयत्रेति यत्रात्मनिकालोनप्रभुःमनिमिषांदेवानांपरमुत्कृष्टःमुख्याधिकारी प्रभुःतेषामपिनियंता अनेनाधिकारस्तामर्थ्योक्तंतथापि भगवतिस्थितत्वान्नप्रभुः कुतोऽन्यदेवाःइंद्रियाधिष्ठातारः तेहिसर्वदासमाधिस्थितंनिष्काशयंति तेषामपि

* कालशब्देरितःकर्मादितिशेषतात्पर्य ? † कर्मणिषष्ठी ।

इतोनिष्काशनेसामर्थ्यैकैमुतिकन्यायेननिवारितं तेषांसामर्थ्यमाह जगतांयेऽशिरइति सर्वेजगतिवेधप्रभवः अतःकालस्यकालनियम्यान तामतत्रसामर्थ्यमित्युक्तं यद्यपिकालप्रेरणाव्यतिरेकेणगुणानक्षुभ्यंति अक्षुब्धाश्चस्वरूपान्नप्रच्याचयंति तथापिक्षोभणेकालोगुणाधीनईहति तेषांपृथङ्निराकरणमाह नयत्रेति चकारात्प्रकृतिगुणाः अहंकारगुणाश्च वैनिग्रयेनअहंकारोऽपिसतुसर्वदास्वरूपप्रच्यावकः अतोवैष्णवः महान्महत्तत्त्वं प्रधानंप्रकृतिः तत्रस्थितंकोऽपिनचालयतीत्यर्थः ॥ १७ ॥

नन्वेवंतस्यस्थानस्यकथंमाहात्म्यंतदाह परंपदमिति तत्सर्वेभ्यःपदेभ्यःस्थानेभ्यःउत्कृष्टंपदम् अक्षरंरूपंपुरुषोत्तमपादरूपम् अतएववैष्णवं यतोवैष्णवंपरंपदमामनंतीतियोजनायादित्युद्देश्यमामनंतीतितत्रप्रमाणमूलेकेवलश्रुतेःप्रमाणत्वेऽपचरितार्थत्वंवाकल्प्येतअतआहनेतिनेती-त्यतदुत्सिसृक्षवहति अतत्आत्मव्यतिरिक्तम् अस्मिन्संघातेयेऽत्सिसृक्षवोभवंति तेतद्वैष्णवंपदमितिवदंति तदेकंग्राहयम् अन्यस्याज्य-मितिविवेकः नच तेषामुत्तमाधिकारादेवस्फुरणंभविष्यतीत्याशंक्यतेषामधिकारमाह विसृज्येति तेषामपेक्षितंगुणत्रयंवर्त्तते सर्वथा देहादौआत्मस्फूर्त्तित्यागः सर्वदोषाभावरूपः नविद्यतेमन्यस्मिन् सौहृदंयेषाम् अनेनपूर्वोक्तन्यायेनभगवतिपरमाप्रीतिरुक्ता साधर्म्यमाह अर्हपदं भगवच्चरणारविंदं पदेपदेक्षणेक्षणेमनसःस्थापनस्थानेषा उपगुह्यआलिंग्य आमनंतीतिसंबंधः एतादृशैरुक्तंनान्यथा भवतीत्यर्थः ॥ १८ ॥

इत्थमित्युपसंहारः एवंस्थितेदेहादिःस्वयमेवगमिष्यतीतिभावः पक्षांतरमाह मुनिरित्वेति यदितत्रस्थितोनभवेत् मननवत्साधनपरो-भवेत् भिन्नतत्स्वरूपंभासयतेचेत्ततदातस्मादुपरमेत् प्रकारांतरेणापुरुषार्थःसाधनीयइति तमेवप्रकारांतरमाह व्यवस्थितइति विशेषाकारेणात्तस्मिन्नेवपदेमनःस्थिरीकृत्यआत्मानंयोजयित्वाभगवत्साक्षात्कारंब्रह्मभावंवाबहुकालमनुभूयतस्यविज्ञानस्यबलंप्राप्यविज्ञान मेवया दृक्अनुभवरूपंयदूज्ञानं तस्यधीर्यैर्यासामर्थ्येनसर्वाज्ञाननिवर्त्तकरूपेण सुष्ठुरंधितःशोधितःरागादिनिराकरणेनशुद्धःकृतः आशयो यस्यतादृशोभवेत् सम्यक्चित्तशोधनंकुर्यादित्यर्थः तदाशुद्धंचित्तंदेहत्यागार्थं यत्नंकुर्यादितितस्यागोपायमाह स्वपार्ष्णिनापीडयेति मूलाधारस्यपीडनंपार्ष्णिनाकर्त्तव्यम् एकवचनेनपार्ष्णिद्वयप्रक्षेपनिवारितःगुदंमूलाधारस्थानं ततःकुंडलिनीप्रबोधात् ततःमूलाधारात् अनिलमुत्थाप्यषट्चक्रभेदनेनोर्द्धंनयेत् तत्रधायोः स्थानभूतानिषट्चक्राणि मूलाधार स्वाधिष्ठान मणिपूरक अनाहत विशुद्धि आज्ञारूपाणि गुदे गुह्यमूले नाभौ हृदये तालुमूले भ्रूमध्येचस्थितानि तानिस्थानानिपद्मत्वेनोक्तानि चतुर्दलं षड्दलं अष्टदलं द्वादशदलं षोडशदलं द्विदलमिति । तेषांधायोरूर्ध्वनयनमार्ज्जवेननभवतीति अन्यत्रगमनशंकयासाधनमाह जितक्लमइति वाय्वाकर्षणेजितः क्लमो-येन ॥ १९ ॥

नाभिपर्यंतमार्ज्जवम् अग्रेवक्रता अतोनाभ्यांस्थितंमहतीप्रयत्नेनहृद्यधिरोपणीयं तत्रहृत्पुंडरीकमूर्ध्वनालमधोमुखंतद्वायुवशादूर्ध्वमुखं कर्त्तव्यं ततःप्रयत्नाधिक्याद्भाभ्यांस्थितमित्यनूद्यहृद्यधिरोपणमुक्तं तस्माद्दृष्ट्यग्रे नयनंदुर्गं तालुमूलस्थानेउरसिउदानवायुरेवतिष्ठति अन्योऽपियोगच्छेत्तत्रसतद्भावमापन्नएवगच्छेत् अतआह। उदानगत्योरसितंनयेदिति पूर्वाधिकारेहृदयपर्यंतमेववायोरानयनम् अस्यस्थीय्र नयनमितिपूर्ववदाह मुनिरिति तत्रसमावस्थितभावेप्राप्तस्य अग्रेगमनार्थंतद्भावंत्यक्त्वापूर्वभावमनुसंधाय तयामहत्यावुद्ध्याग्रहणंस्थापन समर्थयामनस्वी महाबुद्धिमान् स्वतालुमूलं तस्यैवाग्रिमस्थानंशीघ्रंनीतस्यमुखाद्विद्धारणनिर्गमनशंकयाशनकैर्नयेत् तत्रबुद्धेःसूक्ष्मता विधेया स्थापनार्थंनयनार्थंचेत्याह सुधीरिति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

न च मुक्तं कोऽप्यतिक्रामतीत्याह । यत्र प्राप्तब्रह्मस्वरूपं तस्मिन् अनिमिषां देवानामपि परः शास्ता कालो न प्रभुः । तत्र कुतो नु देवाः प्रभवेयुः । ये देवा इन्द्राद्याः जगतां प्राकृतजगत्स्वेव ईशिरे ईशाश्चक्रिरे । ननु तदेव ब्रह्म किंस्वरूपं तत्राह न यत्र सत्त्वमिति । यत्र ब्रह्मणि । विकारः अहङ्कारः ॥ १७ ॥

सत्त्वादयः कथं न सन्ति इत्यत आह । परं प्रधानात् परम् अतएव वैष्णवं पदं विष्णोर्निर्विशेषं स्वरूपं तत् प्रसिद्धमेव तदपि भगवद्भक्ता नारदाद्य एव यथा जानन्ति न तथा ज्ञानिनोऽपीत्याह । यत् ब्रह्म नेति नेतित्यत्वम् अतत् तद्व्यतिरिक्तं वस्तु उत्सिसृक्षवः आ सम्यगेव आमनन्ति जानन्ति किं कृत्वा दौरात्म्यं केवलज्ञानिनामिव निर्बुद्धित्वं विसृज्य । कीदृशाः । अनन्यसौहृदाः विष्णु-सम्बन्धव्यतिरिक्तवस्तुनि स्नेहाभाववन्तः । अर्हस्य पूज्यस्य श्रीविष्णोः पदं चरणारविन्दं पदे पदे क्षणे क्षणे हृदा उपगुह्य हृदमेवा-स्माकं सर्वस्वमित्यालिङ्ग्य । अत्र अतउत्सृजन्तः इत्यनुक्तेर्यदा स्वप्रभोर्ब्रह्मस्वरूपं केवलमनुबुभूषन्ति तदा अतत् त्यक्तुमिच्छवो भवन्ति सर्वथा तु भगवत्सेवोपकरणत्वात् हृदयं जगन्न त्यजन्तीत्यर्थो लभ्यते । दौरात्म्यमिति विष्णोर्देहे मायिकत्वबुद्धिमन्तो दुरात्मान एव ज्ञेयाः ॥ १८ ॥

इत्थं ब्रह्मत्वेन व्यवस्थितो मुनिः । तुशब्देन यदि प्रयास्यामीति वक्ष्यमाणात् सकामाद्विशेष उक्तः । विज्ञानमनुभव एव दृग्दृशि-स्तस्या धीर्यैर्या बलेन सर्वतो निर्भालनाधिक्येन सुष्ठु रन्धिता आशया अतिसूक्ष्मा अपि विषयवासना येन सः ॥ १९ ॥

इदानीं तस्य देहत्यागे प्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदं मूलाधारम् आपीड्य निरुध्य अनिलं प्राणं षट्सु स्थानेषु नाभिहृदुर स्तालुमूलभ्रूमध्यब्रह्मरन्ध्रेषु उन्नमयेत् । तत्र प्रथमं नाभेरधः स्वाधिष्ठानचक्रादुपरि नाभ्यां मणिपूरके स्थितम् अनिलं हृदि अनाहतचक्रे अधिरोप्य । उरसि कण्ठाद्धोदेशस्थिते विशुद्धचक्रे ॥ २० ॥

तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः ।
स्थित्वा मुहूर्त्तार्द्धमकुण्ठदृष्टिर्निर्भिद्य मूर्द्धन् विसृजेत् परं गतः ॥ २१ ॥
यदि प्रयास्यन् नृप ? पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ।
अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥
योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् ।
न कर्म्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २३ ॥
वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप ? शैशुमारम् ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यत्रभगवतिस्वात्मसमर्पणापात्रेअनिमिषांदेवानांपरः मयदः कालोऽपिप्रभुः किंचित्करोनतत्रदेवाः कालनियम्याः कुतः प्रभवः । देवनियम्यानांजगतांप्राणिनांतुकाकथेत्याह जगतांयईशिरेइति । येजगंति नियमयंतितेतत्रजनप्रभवः तत्रजगतांकाकथेत्यर्थः । यत्रप्रधानंतत्कार्यभूतौमहदहंकारौप्रधानगुणाश्चकिंचिदपिकर्तुनक्षमाः ॥ १७ ॥

अतद्व्यावृत्तिरिक्तम् नेतिनेतीति उत्सिसृक्षवः उत्सृष्टुमिच्छवः अनन्यसौहृदाः अनन्यविषयाः वेदांताः यत्परंसर्वोत्कृष्टंवैष्णवंपदं विष्णुस्वरूपमामनंति । जगत्कारणत्वेनसर्वात्मत्वेनसर्वशक्तिमत्त्वेनसत्यत्वादिमत्त्वेनचप्रतिपादयंति । तदर्हस्यपूज्यस्यविष्णोः पदंस्वरूपंस्वतंत्रोऽस्मीतिदौरात्म्यमब्रह्मात्मकत्वं विसृज्यहृदापदेपदेप्रतिक्षणमुपगुह्यसंप्राप्यकृत्याद्विरमेतेतिसंबंधः ॥ १८ ॥

एवं "तस्यप्राणाउत्क्रामंतिब्रह्मैवसन्ब्रह्माप्येति यदासर्वेविमुच्यतेकामायेऽस्यहृदिस्थिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते" इतिश्रुतिप्रोक्तांवरायस्थायां ब्रह्मप्राप्तिमुक्त्वा अर्चिरादिमार्गेण मुक्तावस्थायां ब्रह्मप्राप्तिप्रकारंवक्तुंतावद्देहादुत्क्रांतिप्रकारमाह इत्थमितित्रिभिः विज्ञानदृग्वीर्यसुरंधिताशयः विज्ञानंशास्त्राचार्यानुग्रहालब्धंविशिष्टंयत्तत्त्वज्ञानंतदेवरूकपरिपाकावस्थापन्नंसाक्षात्तत्त्वदर्शनं तस्यधीर्येण प्रभावेनसुरंधिताः आशयाः विषयवासनायस्यतथा उक्तप्रकारेणाव्यर्थाश्चित्तः भगवतिकृतात्मसमर्पणः इत्थंवक्ष्यमाणप्रकारेण मुनिस्तूपरमेद्देहादितिशेषः अनिलोत्थापनादिक्रियानभिज्ञस्यमुमुक्षोर्नाडीविशेषज्ञानंभगवदनुग्रहाद्भवतीति "हार्दानुगृहीतःशताधिकयेति सूत्रकारेणसूचितम् तस्मान्मूनेरनिलोत्थापनादिक्रियाभिज्ञस्यविशेषद्योतकस्तुशब्दः तमेवप्रकारमाह स्वपार्ष्णिनेतिद्वाभ्याम् स्वपार्ष्णिनास्वपादमूलेनगुदंमूलाधारमापीड्यनिरुध्यततस्तदनंतरमनिलंप्राणांषट्सुस्थानेषुनाड्यादिपूर्वमयंदूर्ध्वंनयेत् जितक्लमः जितश्रमः॥१९॥

नाड्यांमणिपूरकेस्थितमनिलंहृदिअनाहतचक्रेऽधिरोप्यततोऽनाहतचक्रादुदानस्थायोर्गत्यातमनिलमूरसिकंठादधोदेशे स्थितेविशुद्धिचक्रेनयेत् मनस्वीजितचित्तः ततोबहुधागमनसंभवात्तमनिलंधियानुसंधाय शनकैस्तालुमूलंतस्यैवविशुद्धिचक्रस्याप्रदेशंनयेत् ॥ २० ॥

भाषाटीका ।

तब वह योगी उस वैकुंठ को जाता है जहां कि देवताओं का भी प्रभु जो काल सो भी नहीं है तो जगतों के ईश्वर देवता तो कैसे प्रभु होंगे जहां पर सत्त्व रजः तमः अहंकार महत्तत्त्व प्रधान यह भी कोई नहीं है ॥ १७ ॥

परमेश्वर से दूसरे में सौहृद नहीं रखने वाले अपने दुरात्मता कूं छोडकर हृदय में परमात्मा के चरण कूं क्षण क्षण में आलिंगन करके बाह्य पदार्थों को छोडकर नेति नेति इस रूपसे वर्णन करते हैं उसको वैष्णव परम पद कहते हैं ॥ १८ ॥

इस प्रकार निश्चय करने वाला मुनि विज्ञान दृष्टि से जिसके अन्तःकरण शुद्ध होगये हैं सो मुनि अपने पादकी एडी से गुद द्वार को दबाकर फिर अपानवायु को परिश्रम जीतकर षट्चक्रों के स्थानों में ऊपरकूं लेजाय ॥ १९ ॥

उन्हीं चक्रों में नाभि में स्थित पवन को हृदय में स्थापन करके उपर गति से हृदय में लेजाय तिसके अनंतर ठीक अनुसंधान कर के मन के द्वारा उत्साह वाला योगी धीरे धीरे अपने तालु मूल को लेजाय ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मनस्वी जितचित्तः । स्वतालुमूलं तस्यैव चक्रस्याप्रदेशम् । ततो बहुधा गमनसम्भवात् शनकैरित्युक्तम् । तस्मात् भ्रुवोरन्तरम् आज्ञाचक्रम् । निरुद्धानि सप्त अयनानि श्रोत्रे नेत्रे नासिके मुखञ्चेत्येवं सप्त प्राणमार्गा येन सः अनपेक्षः क्रममुक्तवत् पारमेष्ठ्यादिभोगकौतुकानपेक्षः मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रे निर्भिद्य देहमिन्द्रियाणि च विसृजेत् ॥ २१ ॥

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति दशभिः । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति । वैहायसानां खेचराणां सिद्धानां यत् विहारं क्रीडास्थानम् । कीदृशम् अष्ट आधिपत्यानि अणिमादैश्वर्याणि यस्मिन् । तदपि प्रयास्यन् । क्व गुणसन्निवाये गुणसमुदाये क्वापि ब्रह्माण्डे सर्वत्रेत्यर्थः । यदि देहत्यागावसरे मनश्च इन्द्रियाणि च न त्यजेत् किन्तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यतःकर्म्मगतिवत् न योगगतिः परिच्छेत्तुमेत्याह । योगेश्वराणां त्रिलोक्या अन्तः बहिश्च महर्लोकादिषु ब्रह्माण्डात् बहिश्च गतिर्भवेत् । अन्तरेतुः पवनस्तयोर्मध्यः आत्मा लिङ्गशरीरं येषामिति । विद्या उपासना, तपो भगवत्कर्म्म, योगोऽष्टाङ्गः, समाधिर्ब्रह्मज्ञानं, तान् ये व्रजन्ति तेषां या गतिस्ताम् ॥ २३ ॥

तामाह वैश्वानरमित्यृषभिः । विहायसा आकाशेन तत्र तेन च ब्रह्मलोकपथेन गतः सन् । तत्र प्रथमं वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । केनोपायेन सुषुम्णाया नाड्या । सा च देहाद्बहिरपि विततास्तीत्याह शीर्षण्या ज्योतिर्म्मय्या । विधूतस्य त्यक्तः कल्को मलं येन सः काप्यसज्जमान इत्यर्थः । उदस्तात् उपरिष्टात् वर्त्तमानं, हरेः सम्बन्धि तारारूपनारायणाधिष्ठानमित्यर्थः । शैशुमारं चक्रं पञ्चमस्कन्धे वक्ष्यमाणं शिशुमाराकारं ज्योतिश्चक्रम् । चक्रस्थानि आदित्यादिध्रुवान्तानि पदानि प्रयातीत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

तस्मात्स्वतालुमूलादूर्ध्वोरंतरंभ्रूमध्यस्थाज्ञाचक्रप्रत्युन्नयेनऊर्ध्वनयेत कथंभूतः निरुद्धसप्तायतनः निरुद्धानिसप्तायतनानिभोग्यत्वायाश्रितत्वेनाभिमतानि शब्दादीनि यानि तानि तथा निरुद्धसप्तायतनानि येनसः विषयांतरनिरपेक्षः भ्रूमध्यमुद्दिश्यस्थित्वाकुंठदृष्टिः स्वगंतव्यविषयाप्रतिहतज्ञानसंपन्नः परः परमात्मानंप्राप्तः अनुसंदधन्मूर्द्धन्मूर्द्धानं सुषांसुलुक्॥६।२।०॥इतिसुषुलुक निर्भिद्य शीर्षकपालंभित्वेतिश्रुतिःस्मारिता विसृजेत्स्थूल देहमितिशेषः ॥ २१ ॥

अथमुमुक्षोर्गन्तव्यमर्चिरादि मार्गवक्ष्यंस्तस्य मुमुक्षोर्धूमादि मार्गस्य हेयत्वज्ञापनायधूमादि मार्गेणागतानांगन्तव्यलोकानाह । यदीति । एतेसृतीतेनृपयेदगतीहेति मार्गद्वयस्यवक्ष्यमाणत्वादस्मिन्ध्यायेधूमादिमार्गविषयग्रन्थान्तरामावाच्च । "तासांमूर्द्धानमभिनिःसृते कातयोर्ध्वमायन्नमृतत्वमेति विषङ्ङन्याउत्क्रमणेभवन्ति"इति श्रुतेः । मूर्द्धनिष्क्रान्तस्यार्वाचीनलोकगत्यनुपपत्तेश्च यदीत्यादिश्लोकद्वयं धूमादिमार्गगतागतस्य चारप्रदर्शनपरमेव । नच"यदासर्वेप्रमुच्यन्ते कामायेऽस्य हृदिस्थिताः । अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते" इति सद्योमुक्तिरेकाप्रतीयते"तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न"इत्यादिना क्रममुक्तिरन्याप्रतीयते अत्रापिविसृजेत्परंगतः इतिसद्योमुक्तिः । वैश्वानरंयातीति क्रममुक्तिश्च प्रतीयते । अतः क्रममुक्ति सद्योमुक्तिरूपमार्गद्वयस्यैवैते सृतीतेहेति वक्ष्यमाणत्वाच्च धूमादिमार्ग गतगन्तव्यप्रदर्शनपरमिति श्लोकद्वयमिति केचिदुच्यते । सद्योमुक्ति स्तावदप्रामाणिकैव । येचेमेऽरण्येश्रद्धातपइत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिनासपतान्ब्रह्मगमयतीत्यंतेनब्रह्मोपासीना नामर्चिरादि नागतानामेव ब्रह्मप्राप्त्यवगमात्"विकल्पोऽविशिष्टफलत्वात्॥३।३।०॥इति न्यायेन सर्वब्रह्मविद्यानामेकफलत्वेनार्चिरादिगतेः सर्वब्रह्मविद्यानिष्ठानांसमत्वाच्छास्त्रप्रतिपाद्यायाः सद्योमुक्तेरभावात् । अथब्रह्मणः सर्वगतत्वा दतत्प्राप्तयेदेशान्तरगमनापेक्षेति"ततस्यप्राणाउत्क्रामंति ब्रह्मैवसन्ब्रह्माप्येति"इत्यादेः कोऽर्थइति चेदुच्यते ॥ अत्रास्मिन्लोकेउपासनदशायां ब्रह्मानुभवति तस्य ब्रह्मप्रेप्सोः प्राणानोत्क्रामन्तितंविहायनगच्छन्ति किन्तूपासनफलभूतब्रह्मप्राप्तयेतदधिष्ठितलोकांतरगमनायसहैव तिष्ठंतीत्यर्थः इति अतोधूमादिनागतानांगन्तव्यप्रदर्शनपरमिदं श्लोकद्वयमित्याह । यदीति हे नृप?परमेष्ठ्यंचतुर्मुखलोकं वैहायसानां खेचराणां सिद्धानां यद्विहारस्थानं कीदृशम्अष्टाधिपत्यमणिमाद्यष्टैश्वर्यसंपन्नं यदिप्रयास्यन्नगमिष्यन्भवति तदागुणसन्निधाये मरणे मनसोंद्रियैश्चसहैवगच्छत्स्थूलदेहस्यैवभस्मीभावात्सूक्ष्मदेहेनैवगच्छतीत्यर्थः अर्वाचीनलोकान्गच्छतांभूतसूक्ष्मेंद्रियात्मकलिंगशरीरे-णैवसहगमनंब्रह्मप्रेप्सोस्तुकिंचिद्दूरं गच्छतोमध्येविशेष इतिविशेषः ॥ २२ ॥

योगेश्वराणांभगवद्भक्तिव्यतिरिक्तयोगनिष्ठानामब्रह्मात्मकस्वतंत्रजीवोपासकानांत्रिलोक्याःबहिःजनलोकादिषु पवनांतरात्मनां पवनस्यांतरात्मापवनांतरात्मातेनवायुभूतसूक्ष्मदेहेनगतिमाहुरित्यर्थःयद्वावायुमनुप्रविश्यगच्छतीतिवायुतुल्यवेगोगच्छतीत्याहुरित्यर्थः भग-वद्भक्तिव्यतिरिक्तयोगनिष्ठानांगतिरितरैर्नलभ्यतइत्याह नेति विद्याशास्त्रजन्यंज्ञानंतपः कर्मयोगः योगोयमनियमादिः समा-धिरब्रह्मात्मकस्वात्मस्वरूपानुसंधानमएतान्भजंतियेतेषांयोगीश्वराणांतांगतिंब्रह्मांडांतर्गतापेक्षितलोकगतिकर्मभिरभिसंहितफलैःकर्मभि-र्नप्राप्नुवंति केवलकर्मिभ्योऽधिकोयोगीकेवलयोगिभ्योऽधिकोभगवदुपासकइत्यभिप्रायः यद्वा भगवद्भक्तानांगतिःकर्मभिर्नावाप्यत इत्याह योगीश्वराणामिति भगवद्भक्तियोगनिष्ठानामित्यर्थः त्रिलोक्यांत्रिलोकांतर्भूतचतुर्दशभुवनात्मकांडकोशाद्बहिः समाधिः परमात्मो पासनमितिभेदः एतद्धेयत्वेनधूमादिमार्गगतिरुक्ता ॥ २३ ॥

अथमुमुक्षोरर्चिरादिमार्गमाह वैश्वानरमिति छांदोग्ये"यथापुष्करपलाशआपोनश्लिष्यंते एवमेवंविदिपापंकर्मनश्लिष्यते" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्यामाना "अथयदुचास्मिञ्छव्यंकुर्वंतियदुचनार्चिषमेवाभिसंभवंतिअर्चिषोऽहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यः संवत्सरंसंवत्सरादादित्यमादित्याच्चंद्रमसंचंद्रमसंविद्युतंतत्पुरुषोऽमानवः सएतान्ब्रह्मगमयत्येषदेव पथोब्रह्मपथः एतेनप्रतिपद्यमानाइमंमानवमावर्तनावर्तंतेनिवर्तन्तेइत्याम्नातश्रुतिः सर्वेपुनर्महदिषज्ञतेगमित्यंतेनाभिमता अन्नानुक्ताहरादिप्रदेशस्तथैव सिद्धोवेदितव्यः शीर्षकपालभेदनानंतरमेववैश्वानरप्राप्त्यसंभवात् श्रुतावपिवरुणेंद्रप्रजापत्यादयोऽन्यत्रश्रुताअर्थसिद्धाइतिविदितव्यम् ब्रह्मपथेनेतिसुषुम्णाविशेषणं ब्रह्मप्रेप्सोर्मार्गभूतयाशीर्षण्याप्रकाशमानयासुषुम्णायासुषुम्णाख्ययानाड्यादेहान्निर्गतः शीर्षच्छेत्यमेन "तेन प्रद्योतेनैषआत्मानिष्क्रामति"इति श्रुत्युक्तसुषुम्णासंबंधिहृदयकमलाग्रस्यप्रकाशनंस्मारितं "तदेकोप्रज्वलनंतत्प्रकाशितद्वारोविद्यासाम-र्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतः शताधिकया॥४।३।०॥इतिसूत्रकारः तदेकः तस्यब्रह्मप्रेप्सोर्जीवस्यस्थानभूतं यद्धृदयकमलं तस्याग्रंसुषुम्णाख्यनाडीद्वारं तस्यज्वलनंप्रकाशनं भवति श्रेयंजीवः हार्दानुगृहीतः हृदयकमलस्थपरमात्मानुगृहीतः तेनपरमात्मना प्रकाशितसुषुम्णाद्वारोविद्यायाः, ब्रह्मविद्यायाः सामर्थ्यादूब्रह्मविद्यांगभूतार्चिरादिगतिस्मृतियोगाच्चशताधिकयासुषुम्णयागच्छती-तिसूत्रार्थः एवंभूतसुषुम्णयागतः विहायसाशीर्षकपालबहिष्ठाकाशेनवैश्वानरमर्चिः शब्दवाच्यमादित्याधिकंप्रतिपद्यते "अग्निर्ज्योतिरहः

सुषुम्णेत्यादिना ब्रह्मलोकपर्यन्तम् अर्चिरभिमानिसंभवमित्यनेनैवार्थात् लब्धमेवमोक्षमार्गत्वं सूचयति विधूतकल्मषेति "पुण्यपापेविधूयनिरञ्जनः परमसाम्यमुपैति तत्प्रदर्शनायैवमहिविधूयमपापंब्रह्मलोकमभिसम्पद्यमानः शरीरम्" इतिहिश्रुते नहिधूमादिमार्गेणगतानांपुण्यपापप्रहाणं श्रूयते विधूतकल्मषः निधूतपुण्यपापः अथाहरादिमवेक्षमाणः हरेरादित्यस्योदस्तादुपरिष्टात्स्थितंशैशुमारंचक्रंप्रयाति हेनृप! शैशुमारंचक्रं-ब्रह्मपौत्रोनलस्तंवेक्षयते ॥ २४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

तस्माद् भ्रुवोरंतरमूर्ध्वस्थितंद्विदलंकमलमुन्नयेत तत्राऽऽत्मतिष्ठंकर्तव्यतयामाध्यमित्याह निरुध्येति निरुद्धाःसप्तानामप्यानांकर्णादिनासिकादिसंज्ञानांपंथानोयेनसतथोक्तः । अनपेक्षोबाह्यसुखानिच्छुः । अत्रापीत्थंभावमाह स्थित्वेति मनसापरंगतोभ्रूमध्येतुमुहूर्तार्धेस्थित्वात्मानंगैगम्यविशेषेष्वकुंठदृष्टिर्मूर्धन्यूर्ध्वनिर्शिरोमध्येनिर्भिद्यविसृजेत्शरीरामितिशेषः गतइत्यनेनचिंतनमुच्यते अथैकयोर्ध्वमुदानः प्राणा-वानाविद्यायांचपिंगलायांचवर्तते व्यानःसंधिषुसर्वत्रउदानोब्रह्मनाडिगइतिश्रुतिस्मृतिभ्यामुदानगतिर्ब्रह्मनाड्यामितिसिद्धम इत्थंमुनिरित्थ मेवनिर्गुणविद्याफलमुक्त्वास्यपार्ष्णिमेत्यनेनसगुणविद्याविदोदेहोत्क्रमणप्रकारउच्यतइत्येतदनुपपन्नमेकवाक्यतयामुख्यार्थसंभवेसावय-भेदायोगादिति ॥ २१ ॥

एवंदेहादुत्क्रांतानांयोगिनांप्राप्यस्थानंगम्यंचाह यदीत्यादिनाश्लोकद्वयेन अत्रयदिशब्दोयदिअथउतेतिशब्दाः पुनरावृत्त्यान्वेतव्याः तथाहि यदिसम्यक्पक्वकषायत्वादिसाधनवांस्तर्हिअथोत्क्रमणानंतरमेवपरमेष्ठ्यंपरमेष्ठिनोब्रह्मणोलोकंप्रयास्यति तत्रायंकिंकरोतीतितत्राह अथेति अथतल्लोकप्राप्त्यनंतरं पुनरुत्पत्तिहीनोब्रह्मसालोक्यमाप्नुंप्राप्य अथमहत्तत्वादिलक्षणपरिपाकायययोगीविशति अनंतरंब्रह्मप्रलयेब्रह्मणासह-स्वयोग्यांमुक्तिंप्राप्नोतीतिशेषः । उतशब्दोऽप्यर्थे यद्यदिततउतपूर्वोक्तयोगिनोप्यपरिपक्वमहत्तत्वादिकलयाणवांस्तर्हिवैहायसानांधैमानिकानां-सिद्धानांविहारक्रीडास्थानंमहर्लोकादिप्रयास्यति तत्रास्ययोगफलमाह अणिमाधिपत्यमिति अथमहर्लोकादिस्थानेऽष्टानामणिमादियोगाना-माधिपत्यमवाप्यवस्तेअथयदिसम्यक्पक्वमहत्तत्वादिमानप्रतीकालंबनस्तर्हियत्रपवनस्यांतरात्माविकुंठनाथस्तत्रविकुंठनाथलोकेऽमुकस्या-नेऽमुकैर्देवैरुपास्यमानंहरिं प्रयास्यति यदिप्रतीकालंबनस्तर्हियत्रपवनश्चासावंतरात्माचेति वायुर्ब्रह्माचतत्रसत्यलोकेवायुंब्रह्माणं च प्रयास्यति ॥ २२ ॥

किमुकंमवतितत्राह ॥ योगेश्वराणामिति । त्रिलोक्या भूर्भुवंतरिक्षंतद्गंसंज्ञायावहिर्महर्लोकादौयोगेश्वराणांगतिमामनंतिनत्वर्वाक् । तल्लोकप्राप्तौसाधनविशेषमाह विधेति विद्याऽपरोक्षज्ञानंतदादिपुरुषार्थसाधनसामग्रीमतांपुंसांतांमहर्लोकादिगतिंकेवलकर्ममिर्नाप्नुवंति किंत्वपरोक्षज्ञानेनैव अत्रायंक्रमविशेषः गुणानांसत्त्वादीनांसन्निवायः सन्निधासोयत्रसगुणसन्निवायस्तस्मिन्महर्लोकादियैकुंठामुक्तस्थाना दधिनेप्रदेशेप्रयास्यन् वाङ्मनोभ्यांमनोभिःसहैवगच्छेत् "आविष्कृतनिजरूपस्यापितस्यारब्धकर्मनोक्षपर्यंतंदग्धपटवत्तेषांस्थित्युक्तेः यद्यादज्ञानादिगुणसन्निवायेमुक्तस्थानेचिन्मात्रेंद्रियमनोभिःसहैवसति तदुक्तं "चिन्मात्राणींद्रियाण्ययाहुर्मुक्तानामन्यदैवहि" इतिमूलकर्मणालोकान्ज्ञानेनैवतदुत्तरान् तन्मुख्याहरियांतितदन्येषांयुमेवतु अपक्वायेनतेयांतियायुंवाहरिमेवया स्थानमात्राश्रितास्तेतु पुनर्जन्मनिवर्जिता" इतिस्मार्क्याद्यचनबलाद्ध्याहारेणाध्याख्यातं । ननुस्वमनीषोत्प्रेक्षाबलादिति यदिपारमेष्ठ्यादिलोकंप्रयास्यतितर्हिमनसेंद्रियैःसहैवगच्छेदितिवाक्यशेषः यत्रयोगेश्वराणांगतिंत्रिलोक्यावहिरामनंति यत्रपवनांतरात्मातत्रविष्वादिभाजःतांगतिंकर्मभिर्नाप्नुवं-तीतिवा ॥ २३ ॥

तत्रयोनिर्गोमार्गमाह । वैश्वानरमिति सुषुम्णयानाख्योत्क्रम्यविहायसाहृदयाकाशेनब्रह्मपथेनसुषुम्णाख्ययाशोधिषा । रोचिःशोचि-रुभदत्याद्यभिधानं । गतोनिर्गतोऽर्चिरादिदेवयानगत्याधैश्वानरंयाति अथवैश्वानरप्राप्त्याविधूतकल्कोदग्धपापपुण्यस्ततोवैश्वानरलोका-दुदस्तादुपरिहरेःशैशुमारंचक्रंशिशुमारस्वरूपंप्रयातीत्यन्वयः । "वैश्वानरेणसघांवासूर्येणादेहपद्धा विधूयसर्वपापानियांतिकिंस्तुब्रह्मकेशव-द्" इत्येतद्वेतिसूचितम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र इति सार्द्धकम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवंतालुमूलेद्विदलीकृतंमुखादिच्छिद्रद्वारानिर्गमनशंकयानिरुद्धसप्तास्यनः निरुद्धानिसप्तअसोःप्राणस्यअयनानिद्वाराणियेनतादृशो भ्रूमध्यात्पूर्वंस्थानात्भ्रुवोरंतरमूर्ध्वमयेतत्रआत्मानंकेवलंधारयुंस्थिरीकृत्यअंतःकरणशुद्धेःपूर्वंनिरूपितत्वात्सर्वापेक्षारहितोसूत्वा तत्र मूलबद्धपानेनमनसदाविर्भावजातेतत्राकुंठदृष्टिंमुहूर्तार्द्धंस्थित्वापरंगतंगतःसायुज्यंप्राप्तः पूर्वमेवधार्योर्ध्वहिर्निर्गमनार्थं प्रयत्नस्य कर्तव्यत्वादूर्ध्वंब्रह्मरंध्रंनिर्भिद्यविसृजेत् इंद्रियाणिविसृजेत् प्राणानामपिभिःसारणांकेचिदिच्छंति अग्रेतेषामप्युपयोगात् केचित्तद्दहे वर्तमानमेवेतदतिवाक्यानुरोधात्प्राणानामत्रैवात्मनिलयमूलभूतास्वरूपेणास्थितिमिच्छंति प्राणस्यभोगासाधकत्वंच तमुत्क्रामंतंप्राणो नूत्क्रामतीत्यनुक्तिविषयम् उत्क्रांतिश्चरणविचारेणापिवाङ्मनसिसंपद्यतइत्यादिभिः प्राणशब्देनेंद्रियाण्युच्यंते गमनेवाग्मनोभावात् तेषामत्रैवलयः तेनमुख्यानुरोधिप्राणानामिहलयः तस्मादिंद्रियाणितत्सर्वेद्वः प्राणाश्चवीर्यभिःसारितइत्यर्थः ॥ २१ ॥

[illegible] उक्तलक्षणेदेहादुत्क्रांतस्यवासनाबाहुल्यात् भोगेनैवतत्क्षयंमन्वानंप्रतिक्रममुक्तिंवदन्इंद्रियादीनां [illegible] आह यदीति यदिपरंस्वभावतो [illegible] सहैवगच्छेदितिसंबंधः मूलेतिसंबोधनंसर्वपुरुषार्थसिद्धावपियथो [illegible] वासनस्यवाहुल्यं [illegible] पारमेष्ठ्यंब्रह्मस्थानंवैहायसानांविमान-[illegible] अथवर्षांतरिक्षेपक्षिमनुष्यादिस्थानंतत्रो [illegible] गुणसंनिवायेब्रह्मादे अथःउप-

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सुबोधिनी ।

रिमध्येवाग्रयास्यद्गमयति तत्रैवसहगच्छेत् चक्रारादासनाभिःप्राणैर्यो मन्त्रैर्वेसामर्थ्यैकवेद्यीवश्येत्यार्षत्वाह योगेश्वराणामिति । येषां ब्राह्मीयोगः यद्यपिस्वतोगमनेसामर्थ्यंनमवति तथापियांगेनतद्भवतीतिस्वर्गेगतवद्उच्यते त्रिलोक्याःअन्तर्बहिश्चेति बहिःस्थितानपि अंतरायांति अंतस्थितानपिबहिर्गच्छंति तत्रहेतुः पवनांतरात्मनामिति पवनस्यांतः आत्मालिंगशरीरंयेषांद् अन्यत्रिलोक्यांपवनब्रह्मांडाभिमानी किंतुलोकत्रयमेव यद्यपिकर्मभिरपिस्वर्गेब्रह्मांडेगमनमस्ति तथापिनतेषांस्वेच्छागमनमित्याह तामिति वाक्यच्छद्मयोगिनांसाधकत्रिद्धा मित्यर्थः ननुउपायस्यतुल्यत्वेऽपियोगस्यकथंगौणताकथंकर्मणांमुख्यत्वमितिउच्यतेआह विद्यातपोयोगसमाधिभाजामिति कर्मतुखलुतत्रमनसहायं जीवंस्वाधीनंकरोति योगेतुविद्यादयोऽन्येपिचत्वारःसंति तान्संवर्हृत्तेजीवंयोगःस्वाधीनंकर्तुनशक्नोति एवमन्येऽपि ततश्चजीवएवस्वतंत्रः अन्येतुगुणभूताःखेच्छयागमनेसहायभूताभवंति विद्याउपासना मंत्रप्रकारेण तपःकृच्छ्रादि ज्ञानंवा योगोऽष्टांगः समाधिः समाधिस्थित भगवद्ध्यानेनतच्चिंतितभक्तिसहितःपरमधर्मउच्यते एतेषुकरणद्वयायामपिपुरुषस्यस्वातंत्र्यं कर्ममार्गेतुविध्यधीनमेवेति ॥ २३ ॥

एवंपुरुषस्यस्वाधीनतांनिरूप्यगमनप्रकारमाह वैश्वानरंयातीत्यादिना यावद्वसाने आर्तवमयः तावद्यातीतिसंबंधः वैश्वानरमग्न्यधिष्ठातृदेवतालोकम् अग्निर्ज्योतिरहःशुक्लइतिवाक्यप्रकाशितागमनम् ननुतस्यलोकस्यदूरेविद्यमानत्वात्बहुकालव्यवधानेनांतराभोगाभावात्भोगाभिनिवेशस्यविद्यमानत्वात्पुनरागमनंस्यात् तदर्थमाह विहायसागतइति आकाशमार्गेणागतःपूर्वमेवपवनांतरात्मनामित्युक्तत्वात्तथावायोर्गमनं तथातेषामपीत्यर्थः ननुवायोरंतस्तंतोगमनसंभवात्तद्वदन्यापिनाड्यृजुमार्गेणवैश्वानरंगमनंसंभवति तत्राह सुषुम्णायेति सुषुम्णामार्गेणागच्छतीतिनाऽन्यत्रगमनं ननुसुषुम्णापिकथंनान्यत्रगच्छति तत्राह ब्रह्मपथेति ब्रह्मणाःपंथाःब्रह्ममार्गत्वात्त्वापिवैकुंठ एवगच्छति ननुसुषुम्णायानाडीरूपत्वात् कथंदेहाद्बहिर्निर्गमनं तत्राह शोचिषेति तेजोरूपया एवंतेनमार्गेणावैश्वानरलोकंगतस्यपूर्वंमाङ्गः संपरिष्वक्तस्यगमनात्कामनाद्याद्युत्थेमवाम्मकलत्वात् तत्रभोगेअग्निमध्यभोगात्कलत्वशोषः अतस्तद्गतंरज्योतिस्थानंगमनमादित्यादि ध्रुवपर्यंतंगमनेविधूतकल्कोभूत्वा अर्चिरभिमुखक्रमेणातेजोमयशरीरेणाहरंभगवतःस्वरूपभूतं शिशुमारंरूपंचक्रमुपयाति यद्यपिशिशुमारचक्रस्य भूमेःपरितोविद्यमानत्वात्सर्वत्रगमनमायातितथाप्युदस्तादूर्ध्वमेवगच्छति नृपेतिसंबोधनंशुद्धसत्त्वात्मकस्यऽर्ध्वगमनस्यसंबादबोधकं यथा नरपालकस्यनृभिरूर्ध्वनयनामिति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

मनस्वी जितचित्तः । स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम् । ततो बहुधा गमनसम्भवात् शनकैरित्युक्तम् । तस्मात् भ्रुवोरन्तरम् आज्ञाचक्रम् । निरुद्धानि सप्त अन्वयनानि श्रोत्रे नेत्रे नासिके मुखञ्चेत्येवं सप्त प्राणमार्गा येन सः । अनपेक्षः क्रममुक्तिवत् पारमेष्ठ्यादि पदभोगकौतुकानपेक्षः मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रे निर्भिद्य देहमिन्द्रियाणि च विसृजेत् ॥ २१ ॥

इति सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति । पारमेष्ठ्यं ब्रह्मपदं यदि प्रयास्यन् भवेत् । तथा वैहायसानां खेचराणां वर्त्म विहारं विहरत्यस्मिन्निति विहारं क्रीड़ास्थानम् । कीदृशम् अष्टावाधिपत्यानि अणिमाद्यैश्वर्य्याणि यस्मिन् तच्च प्रयास्यन् । क गुणसमुदायरूपे ब्रह्माण्डे सर्व्वत्रेत्यर्थः । तर्हि देहत्यागावसरे मनश्चेन्द्रियाणि च न त्यजेत् किन्तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥

भोगेऽपि योगिनो न कर्म्मभिः साधारण्यमित्याह । योगेश्वराणां त्रिलोक्या अन्तः बहिश्च महर्लोकादिषु ब्रह्मागडबहिश्च गतिमाहुः । तत्र हेतुः पवनस्यान्तः आत्मा लिङ्गशरीरं येषां तेषाम् । विद्या भगवदुपासना, तपो भगवद्धर्म्मः, योगोऽष्टाङ्गः, समाधिर्ध्यानं, तान् ये भजन्ति तेषां या गतिस्ताम् ॥ २३ ॥

तत्र प्रथमं वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । विहायसा आकाशेनैव सुषुम्णया नाड्या । कीदृश्या ब्रह्मपथेन ब्रह्मलोकमार्गरूपेणेत्यर्थः । सा च देहाद्बहिरपि विततास्तीत्याह शोचिषा ज्योतिर्म्मय्या । विधूतकल्कः त्यक्तमालिन्यः काय्यसज्जमाक इत्यर्थः । अथ हरेः भगवतः सम्बन्धि उदस्तात् इत ऊर्ध्वं स्थितं चक्रं शैशुमारं शिशुमाराकारम् । चक्रस्थानि आदित्यादीनि ध्रुवान्तानि पश्यन्नि प्रयातीत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तस्मात् स्थानात् । भ्रुवोरन्तरमाज्ञाचक्रं प्रत्यगिलमुन्नयेत् । कथंभूतः निरुद्धानिसप्तान्वयनानिछिद्राणियेनसतथा तानिच श्रोत्रे नेत्रे नासिके मुखमित्येवं सप्त । विपर्यांतरानपेक्षः आज्ञाचक्रेनियमितानिलोमुहूर्त्तार्द्धंस्थित्वा । अकुंठदृष्टिः प्रस्तुतंगमनमेवसमाहितदृष्टिः । परंगतः । उक्तप्रकारेण यद्यावस्थायांभगवंतं प्राप्नोति । मुक्तबंधनत्वेनभगवत्प्रेष्ठुः । मूर्द्धन्मूर्द्धनिभिर्भित्वस्थूलं देहंविसृजेत् ॥ २१ ॥

एवं मूर्द्धनिनिर्भिद्याक्रान्तस्य मुमुक्षोरर्चिरादि मार्गेण ब्रह्मप्राप्तिमाह । यदीति दशभिः तत्रेयंक्रिया । विद्वान्स्थूलशरीरान्मूर्द्धन्याख्यानिष्क्रम्यसलिंगशरीरएवसूर्य्यरश्मिनाऽर्चिरभिमानिनातिवाहिकेनसुसत्कृत्यविना विद्वान्निर्मानीतस्तयैवतेन पक्षाभिमानिनंतेन संवत्सराभिमानिनंतेन वायुंतेन स्वस्मिन् छिद्रंदत्वादित्यंतयैवतेन चन्द्रमसन्तेन विद्युदभिमानिनंदेवताविशेषंनीयतेतदमंतरंधरुणाभिद्रंप्रजापतिञ्च प्राप्यब्रह्मायर्द्धिभित्वाविरजांप्राप्नोति तदाकारेणलिंगशरीरंहित्वात्तीरंवांब्रह्मलोकं प्राप्यब्रह्मसाधर्म्यलक्षणंमोक्षंप्राप्नोति । विस्तरस्त्वाकरेद्रष्टव्यः तत्रकानिचिदस्यासाम्यत्र संत्यन्यानितुपलक्षणत्वादेवानि । यदिवस्थूलशरीरे स्थूलशरीरवियोगकालेहेनृप ! गुणसंज्ञितायेगुणसमुदायरूपेब्रह्माण्डे पारमेष्ठ्यं ब्रह्मपदंलोकं वैहायसाख्यामृतबहिर्द्वारं । क्रीड़ास्थानञ्च अष्टावाधिपत्यानि अणिमाद्यैश्वर्य्याणियस्मिन् तच्च प्रयास्यन् भवेत् तदाक्रमेणाद्युत्क्रान्तिरेव वर्त्मसंज्ञेत्यर्थः । यद्यपिस्थूलशरीरादेव सूक्ष्मशरीरत्यागोनास्तितेनैव सहविरजापर्यंतं सुषुम्णांतर्गतत्वेनैवेत्यर्थः ॥ २२ ॥

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ।
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥ २५ ॥
अथो अनन्तस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वम्
नियाति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्द्धं तदु पारमेष्ठ्यम् ॥ २६ ॥
न यत्र शोको न जरा न मृत्युर्नार्त्तिर्न चोद्वेग ऋते कुतश्चित् ।
यच्चित्ततोदः कृपयानिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥ २७ ॥
ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्त्तिरत्वरन् ।
ज्योतिर्म्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

नकेवलं त्रिलोक्यंतर्गतपारमेष्ठ्यात्तावेवयोगसिद्धानां गतिरपितुब्रह्मांडाद्बहिरस्तीत्याह । योगइति । पवनान्तरः प्राणगर्भः आत्मा-लिंगशरीरं येषान्तेषांयांगेश्वराणां योगसिद्धानाम् । उर्ध्वाधोमध्यभेदत्रयम् पातालादिसत्यांताः लोकास्तेषां समाहारस्त्रिलोकीतस्याः अंतर्मध्येपातालादि सत्यांतेषुलोकेषु बहिर्निरावरणलोके च गतिमाहुः । "तस्यं सर्वेषु लोकेषु कामचारोभवति"इत्यादयः श्रुतयः तत्रहेतुगर्भ-विशेषणम् विद्यातपोयोगसमाधिभाजामिति विद्याब्रह्मजिज्ञासाजन्यं ज्ञानम् । तपःसाधनावृत्तिः योगःसमाधिः विद्यातपसोः परि-पाकावस्थाद्वारा येभजन्ति तेषाम् । "एतेनमार्गेण ब्रह्मप्रतिपद्यमानाः इदंमानवमावर्तं नावर्तंते"इत्यादि श्रुति प्रोक्तस्योपादेयस्यापुनरावृत्ति मार्गस्य प्रस्तुतस्य दार्ढ्यार्थमनुपादेयं पुनरावृत्तिमार्गं सूचयति नकर्मभिस्तांगति माप्नुवन्तीति । "यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते" । इत्यादि श्रुति प्रसिद्धमार्गसाधनैः कर्मभिः । विद्यातपोयोगसमाधि भाजान्ताङ्गतिं नकर्मठाः प्राप्नुवन्तीत्यन्वयः ॥ २३ ॥

एवमर्चिरादि मार्गप्राशस्त्यंधूममार्गंचानुपादेयत्वेनोक्त्वार्चिरादिमार्गं दर्शयति । वैश्वानरमिति । विहायसाआकाशेनमूर्द्धनिसुषुम्णेना छिद्रेण ब्रह्मप्राप्तिमार्गेण तत्रचरोचिषाज्योतिर्मय्यादेहादपि बहिश्चिततयासुषुम्णयानाड्यागतोनिर्गतः । विधूतकल्कोनिष्पापः कल्कः पापंस्तु च पुण्यस्याप्युपलक्षणं । तथासतिपुण्यापुण्यवर्जितः "अभ्वइवरोमाणि विधूयपापं चन्द्रइवराहोर्मुखाद्विमुच्यधूत्वाशरीरमकृतं कृतात्माब्रह्मलोकमभिसंभवामि"इति । ताण्डिरहस्येश्रवणात् । "तदाविद्वान्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैति"इत्यथर्वणे श्रवणाच्च । प्रथमंवैश्वानरंयाति अग्न्यभिमानिनींदेवतांप्राप्नोति तदनन्तरंदिनाद्यभिमान्यातिवाहिकद्वाराउदस्तादुपरिष्टाद्भ्रुवमानंहरेः विष्णोः शैशुमारं चक्रंशिशुमाराश्रयं ज्योतिश्चक्रं हेनृप ! प्रयाति अनेनादित्याद्यातिवाहिकप्राप्तिरुक्ता ॥ २४ ॥

भाषाटीका ।

तदनंतर भ्रूमध्यमे लेजाय बाह्यलोकों की अपेक्षा नकरके सात इंद्रियों के द्वारोंको रोककर निश्चल दृष्टिसे आधा मूहूर्त रहकर मस्तक भेदन कर परमात्मा को प्राप्त होकर इस देहको त्याग देय ॥ २१ ॥

हे राजन् ! यदि ब्रह्माके लोक या सिद्धों के विहारस्थान या अष्ट अधि पतियों के स्थान इन्हों मे जानाहोतो देहत्याग समय मे मन तथा इन्द्रियों के सहित ही गमन करै ॥ २२ ॥

पवन स्वरूप वाले योगियों की गति त्रिलोकी के बाहेर भीतर सर्वत्र होती है विद्या तप योग समाधियों को भजनेवाले तथा कर्म करनेवाले भी उस गतीको नहीं प्राप्त होसकते हैं ॥ २३ ॥

हे राजन् ! आकाश मार्गसे जानेवाला योगी प्रकाश मान ब्रह्म मार्ग सुषुम्णा नाडीके द्वारा अर्चिरादि मार्गको जाता है तदनंतर निर्मल रूपसे उपरमे श्रीहरि के शिशुमार चक्र को प्राप्त होता है ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तत् विष्णोश्चक्रम् । विश्वस्य नाभिं सूर्य्याधाश्रयभूतम् । आविष्टलिङ्गत्वात्तस्याभिशब्दस्य न पुनरुक्तत्वम् । अतिवर्त्य अतिक्रम्य । परतः स्वर्गादिभ्यो गत्यभावात् एक एव निर्म्मलेन लिङ्गशरीरेण ब्रह्मविदां स्थानम्अन्यैर्नमस्कृतं महर्लोकमुपैति । यत् यस्मिन् । विबुधाः महान्तः कल्पायुषः ब्रह्मादयः ॥ २५ ॥

अथो अनन्तरं कल्पान्ते सति सः विश्वं त्रैलोक्यम् अतिशयेन दह्यमानं निरीक्ष्य तत्राप्युल्काप्रातेः यत् द्विपरार्द्धस्थायि तत् पारमेष्ठ्यं पदं प्रति नियाति । सिद्धेश्वरैर्जुष्टानि विष्ण्यानि विमानानि यस्मिन् तत् । ड इति मैत्रेयं सूचितम् ॥ २६ ॥

तदेवाह न यत्रेति । आर्त्तिः दुःखम् । उद्वेगः भयम् । किन्तु चित्ततो हेतोः यत् दुःखम् अत ऋते तदेकं विना । तत् कुतो भवति अविदांविदाम् इदं भगवतो ज्ञानमजानतां प्राणिनां दुरन्तदुःखो यः प्रभवो जन्म तस्यानुदर्शनात् तेषां कृपया । यद्वा चित्ततोदो मनः-पीडेति यत् तद्विना कुतश्चिदपि यत्र शोकादयो न सन्तीति ॥ २७ ॥

तत्र च ब्रह्मलोकगतानां प्राणिनां त्रिविधा गतिः । ये पुण्योत्कर्षेण गताः ते कल्पान्तरे पुण्यपतारतम्येनाधिकारिणो भवन्ति । ये तु हिरण्यगर्भोपासनाबलेन गताः ते ब्रह्मणा सह मुच्यन्ते । ये तु प्रणवोपासकाः ते तु क्रमेण ब्रह्माण्डं भित्त्वा वैष्णवं पदमाप्नुवन्ति । तत्र प्रस्तुतस्य तस्य भगवद्रूपस्य ब्रह्माण्डभेदनप्रकारमाह तत्र इत्यादिना । तत्रेयं प्रक्रिया—ईश्वरपरिग्रहिताया प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति, तस्यांशेनाहङ्कारः, तस्यांशेन शब्दतन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः, तस्यांशेन रूपतन्मात्रद्वारा तेजः, तस्यांशेन रसतन्मात्रद्वारा आपः, तदंशेन गन्धतन्मात्रद्वारा पृथ्वी; तैश्च मिलितैरनुद्दंडशुण्डात्मकं विराट्शरीरम् । तस्य च पञ्चाशत्कोटियोजनविशालस्य पृथिव्येवागडकटाहविशेषशब्दवाच्या कोटियोजनविशाल प्रथमावरणं; पञ्चाशत्कोटियोजनविशालमित्येके । ततोऽघादीनां यऽपरिगता अंशाः तान्येवोत्तरोत्तरं दशगुणान्यावरणानि । अष्टमं तु प्रकृत्यावरणं व्यापकमेव । तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते । ततो विशेषं प्रतिपद्य लिङ्गदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः कथं यास्यामीति शङ्काशून्यः । तेनात्मना पृथिवीरूपेण तन्निरन्तरा अपः प्रतिपद्य । अम्बरम् स्वरात्मकुर्वन्; तत्तदात्मत्वेऽपि क्लेदवाहादिशङ्काभावात् यथेष्टं भोगान् भुञ्जान इत्यर्थः । एवं ज्योतिर्मयः सन् । काले भोगावसाने । बृहदात्मनो लिङ्गं परमात्ममूर्त्तित्वेनोपासनेयुक्तं; यद्वा शब्दात्मना तस्य प्रमापकमिति ॥ २८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

आविष्टलिङ्गत्वात् अजहल्लिङ्गत्वादित्यर्थः २५—२७ ॥

अधिकारिण इति । अत्र आधिकारिका इति च पाठः । आधिकारिका अधिकारे नियुक्ताः इति गोविन्दभाष्यम् ॥ तन्निरन्तरा इति । अन्तरमवकाशः । पृथिव्यन्तरहिताः इति यावत् ॥ २८—३१ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

विश्वनाभि विश्वस्य ग्रहतारकानक्षत्रादेः कृत्स्नस्याश्रयभूतंविष्णोःस्थानमितिशेषः । विरजेनप्रशस्तपुण्यपापेनाणीयसासूक्ष्मतरेणात्म लिंगशरीरेणैकः असहाय नमस्कृतं ब्रह्मविदांब्रह्मविद्भिर्नमस्कृतम् इदंशिशुमारचक्रविशेषणांतदतिवर्त्येत्यन्वयः । अनेनचन्द्रप्राप्तिर्यपिसिद्धातस्याव्यवहितः शिशुमारः यद्यत्रकल्पायुषः विबुधाआकल्पांतायुषः देवाः रमंतेतंजनलोकमुपैतिप्रयाति ॥ २५ ॥

अथअधस्तात्स्थितस्यानंतस्यमुखानलेनाधांतरप्रलयेशेषमुखोद्भूतरुद्रगणपातालानलेनदह्यमानमिति । मस्तकस्थायी इहमृत्युरित्युक्तरीत्या सत्त्वाभिप्रायोवर्त्तमाननिर्देशः निरीक्ष्यत्रिकालज्ञानबलादपरोक्षंहृष्टेत्यर्थः । जनलोकेस्थित्वाकल्पांतरेततउपैतीत्ययमर्थोऽनुपपन्नः । पुण्यपाप विधूननस्योक्तत्वेन तत्रावस्थितिहेतुभूतकर्माभावात्तेषुलोकेष्वस्थित्ययोगात् । अतोदोषद्वाद्वैपरार्द्धद्विपरार्द्धस्थायिसिद्धेश्वरैर्जुष्टानिविभ्यन्यानिविमानानियस्मिंस्तदुध्रुवंपारमेष्ठ्यचतुर्मुखसंबंधिस्थानंयातिनिर्यातीत्यर्थः । वरुणेंद्रादिप्राप्तिस्त्वर्थसिद्धा ॥ २६ ॥

चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकाल स्थायित्वमभिप्रयन्नाह नयत्रेति । यत्रेत्यस्यतत्रदुरंतदुःखप्रभवानुदर्शनाद्वित्युपरिष्टनेनान्वयः आर्तिर्दुःखमुद्वेगोमनः क्षोभः भयमागामिदुःखदर्शनजंज्ञानं कुतश्चिदित्यस्यभयमित्यनेनान्वयः । कुतश्चिच्छीतातपवातवर्षादिभ्यः । एवंविधेऽपिचतुर्मुखलोकेब्रह्मविदांनिर्वेदमाह यच्चिततइति यद्यस्मादित्यर्थः। अनिर्वृतिंविदाम् इदंशब्दवाच्यपरिदृश्यमानप्रपंचविलक्षणापरंब्रह्मविदाम् क्रिययाकर्मणाहेतुभूतेन दुरंतदुःखप्रभवानुदर्शनात् । दुरंतमपारंयद्दुःखंतस्यप्रभवः प्रभवत्यस्मादितिप्रभवः दुःखहेतुभूतसंसार स्तस्यानुदर्शनमुत्प्रेक्षणांतस्माच्चित्तश्चिंतनादद्दः दुरंतदुःखमितियच्चतुर्मुखलोकेऽपिब्रह्मविद्भिः कर्महेतुकंदुरंतदुःखंचिरेणानुभूयतइतियत्तत एवहेतोर्विशेषप्रतिपद्येत्युत्तरत्रान्वयः । अर्थांतरपरत्वमनुपपन्नमध्याहारबाहुल्यात् । यस्यहिरण्यगर्भस्यचित्ततउपासनात् अहस्तस्यस्थाम मुपासकैर्ज्यतइति यदायोजनातदोपासकैर्ज्यतेइत्यध्याहारः । अनिर्वृतिंविदांहिरण्यगर्भोपासनरहितानांदुरंतदुःखप्रभवानुदर्शनात्तदुपास कानामेवदुःखनिवृत्तिस्थानब्रह्मलोकाद्यंलभ्यतइतिनोपपद्यते । हिरण्यगर्भस्थानस्यापिदुःखनिवृत्तिहेतुत्वाभावाच्चतुर्मुखलोकंगतस्यभैतावत स्यरात्रःपुनर्भुवमागम्यप्रतिदिनंस्वीयशरीरभक्षणंप्रसिद्धम् । आवृत्तेर्दर्शनाच्चब्रह्मलोकस्थयोगिनां नपुनरावृत्तिदुःखमयं । तत्रमोक्ष्यमाणत्वनिश्चयादितिचेन्न भूतलस्थयोगिनामपिमोक्ष्यमाणत्वनिश्चयात्पुनरावृत्तिभयमीतिमुमुक्षूणांमहीतलचतुर्मुखलोकयोःकोविशेषः "आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन"इतिहिस्मर्यते । तच्चद्वैपरार्ध्यमित्यनेनसूचितम् अतोयथोक्तएवार्थः ॥ १७ ॥

विशेषंपृथिवीमयमंडकटाहंप्रतिपद्यव्याप्येत्यर्थः अनेन"पृथिवीमंडंभिनत्ति"इतिश्रुतिर्व्याख्याता । विशेषशब्दः पृथिवीवाचकः"ग्रहादयो विशेषांता"इतिप्रयोगात् । अत्रापिविशेषस्तुविकुर्वाणादंभस्कोगंधवान्भूमिरितिवक्ष्यमाणत्वाच्चाविशेषंप्रतिपद्यनिर्यातीत्यनुषंगः सह । अम्बरात्रोपैतीत्यनेनान्वयः । तेनात्मनास्वरूपेणोपलक्षितः आपः आवरणजलंप्रतिपद्येत्यन्वयः । आवरणाग्निव्याप्तिमाह अनलस्मूर्त्तिमिति मूर्त्तिमत्तावरणाग्निंप्रतिपद्यात्वरन्त्वरामकुर्वन्क्लेदवाहादिशंकाभावादित्यभिप्रायः ज्योतिर्मयः वायुर्भूत्वाभयंभयतीतिवत्संश्लेषाभिप्रायेणैतिर्मयट् शब्दः वायुम् आवरणवायुमुपेत्यकालेपूर्वपूर्वकावरणव्याप्यव्यापकांतरकालेष्वात्मनावायुसंश्लिष्टरूपेणोपलक्षितोबृहत्त्वकार्यभूतत्वाच्चबृहत् । आत्मलिंगंश्वासाधारणशब्दलिंगंखमावरणाकाशमुपेत्य आत्मलिंगमित्यत्रआत्मा श्वासाधारणशब्दः लिंगमात्मानमात्मनो वस्यतत्तद्दृश्यं लिंगयद्दृष्टद्दश्यर्थैरितिवक्ष्यमाणत्वात्। इहमावरणांतरेष्वपिसप्तदशादिगुणविशिष्टपृथिव्यादिसंश्लेषप्रदर्शनार्थंपुनः पुनरुक्तमाकाशोभिमर्शीत्यंतःशुल्बंडकः ॥ २८ ॥

वैश्वानरनामकगतिमाह यदिति योभूतानामंतःकोष्ठगाग्नीस्थित्यातद्भुक्तचतुर्विधमन्नंपचति यत्रब्रह्मांडमध्यगःखपूरमध्यगस्तर्पित-ब्रह्मादितत्तत्प्रधानवह्निवैश्वानरोक्तो ब्रह्मदेवपितृलोकगंतुर्मुनेर्योगिनःकर्मयोगिनश्चागम्यत्वान्मार्गइतीरितइत्यन्वयः । "पितृयानंदेवयानं ब्रह्मयानमितित्रिधा । गच्छन्वैश्वानरंयातितस्मान्मार्गःसईरितः" । देवयानेनगंतृणांवैश्वानरादवागचिरादयोगम्यत्वंसंति । ब्रह्मदेवपितृ-लोकगंतृभिःसर्वैरपिवैश्वानरःप्राप्यतइतिद्योतनायवैश्वानरंयातीतिप्रथमतएववैश्वानरप्राप्तिकथनमितिज्ञातव्यम् ॥ २५ ॥

कैतर्हितइतितत्राह देवयानमिति शरीरदक्षिणपार्श्वस्थपिंगलाख्यनाडीभिः शतायुषामरणाख्योत्क्रमणादहान्यहुःसंज्ञंदेवयानमेति दक्षामिर्देहवामपार्श्वस्थेडाख्यनाडीभिःशतायुषामरणोनरात्रीः रात्रिसंज्ञंपितृणांयानंपितृयानमेति । देवयानपितृयानमार्गस्थानामहरादि-कालाभिमानिनीनांदेवतानांप्राचुर्यंदहानिरात्रीरितिबहुवचनं"दक्षिणाःपिंगलाःसर्वाइडावामाःप्रकीर्तिताः । नाड्योऽथमध्यमाप्रोक्तासुषुम्णा वेदपारगैः"इति"देवयानस्यमार्गस्थाअहः शब्दाभिसंज्ञिताः पितृयानस्यमार्गस्थारात्रिशब्दाह्वयामता"इतिवा पिंगलेडामध्यस्थयासुषुम्णयागा श्याशतायुषाविशिष्टसुखवत्त्वात्तद्विधुवत्ताख्यंब्रह्मयानमेति । विशिष्टंसुखंविधु तद्दस्यास्तीतिविधुवत् । तस्यभावोविधुवत्तातां । सचयो रभेदाद्वीप्सायुपसर्गयोगाद्वासकारस्यषकारः "विधुवत्ताब्रह्मयानंविशेषेणासुखंयत"इतिरागोपरक्तसुखादिदातृत्वात्पिंगलादेवयानादिशब्द-वाच्यत्वं तदुक्तं "पिंगलाहेवयानंस्यात्पिंगाक्ष्यसुखदायतः इडाभदानात्पितृणामेवंमार्गाःप्रकीर्तिता"इति अत्रदेवयानब्रह्मयानभेदोऽवांतरोव-गन्तव्यः ॥ २६ ॥

अधुनाशिशुमारलोकादुपरितनमार्गप्रकारमाह । तदिति । शैशुमारहत्यनेनतद्रूपमुक्तंविष्णोस्तद्विश्वनाभिविश्वाधारंरूपंप्रतिपद्य तुशब्दसूचितामतदनुज्ञामादाय । विराजेनविगतरागादिदोषेणाऽर्णीयसासूक्ष्मतरेणात्मस्वरूपेणसर्वोऽपिब्रह्मज्ञानिजनस्तल्लोकमुपैति तंवि शिनष्टि कल्पायुषइति कल्पायुषोविधुधायत्रत्ररमंतेकीर्डंतितामितिशेषः । किंविशिष्टंरूपं । ब्रह्मविदांसमुदायेननमस्कृतमेकंमुख्यंकेवलम-मितिवा "मन्वंतरायुषःस्वर्ग्यामहर्लोकेतुकाद्विपका"इति पिंगलाभिरुक्तस्वर्देवयानेनगतः परांतेब्रह्मप्रयास्यंस्तत्रमहर्लोकेऽष्टाधिपत्यमित्युक्तो ऽणिमादैश्वर्यशालीवसति कल्पजनलोकेकल्पांतपोलोकेज्ञानादिपरिपाकायास्ते कल्पास्तत्यलोकेहिर्यांश्चयावसति ब्रह्मयानेनगताः अप्रती कालंबनाःप्रतीकालंबनाश्चशैशुमारहरिणानुज्ञातास्तदैवानिरुद्धप्रद्युम्नसंकर्षणादिदेवाम्प्राप्यदिवस्पतिवायुंप्राप्यतेनकार्यब्रह्मप्रापिताः तदु-पदेशंप्राप्यप्रतीकोपासकानिवसंति अन्येतुतेनवायुनापरंब्रह्मप्रापितास्तल्लोकेनिवसंतीत्यादिविशेषस्तुशब्देनसूचितइतिज्ञातव्यम् ॥ २७ ॥

महर्लोकादिषुविहरतांतथाज्ञानादिसाधनपरिपाकायचनिवसतांचतुर्मुक्तप्राप्तिप्रकारमाह अथोइति महर्लोकादिषुवसन्सज्ञानिसंघो ऽयद्विपरार्धावसानेब्रह्मप्रलयेब्रह्मणासहमुक्तियास्यन्सिद्धैःसनकादिभिर्जुष्टस्यचतुर्मुखस्यधिष्ण्यंनिवासस्थानं यत्द्वैपरार्ध्यद्वयोः परा-र्धयोःसंधिः । चतुर्मुखस्याऽऽयुषःपरेतिनामचतुर्मुखायुर्लक्षणशतसंवत्सरभोग्यमित्यर्थः । तत्पारमेष्ठ्यंनिर्यांति महर्लोकादेर्निर्गत्यसत्य-लोकमाप्नोतीत्यर्थः गंतुंहेतुमाह अनंतस्येति अनंतस्यभगवतोमुखानलेनमुखनिर्गताग्निनापुनःपुनर्दह्यमानंविश्वंनिरीक्ष्य । संकर्षणमुखाग्नि-नाभयज्ञस्यदाहोहेतुरित्यर्थः ब्रह्मलोकंप्राप्यतेनैवसहमुक्तिंप्राप्नोतीत्यस्मिन्नर्थेवर्तते ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अथो लीलागृहीतशरीरेण तन्भोगानन्तरम् ॥ २६ ॥ २७ ॥

ततो विशेषमिति । अत्र टीकायामेकब्रह्माण्डपक्ष एव सङ्कुमितः । बहुब्रह्माण्डपक्षस्त्वेवम्—ब्रह्माण्डानि खलेकत्रैवानुक्रमीत्वेन मण्डलीभूय वर्त्तन्ते । तेषां पृथिव्यावरणं प्रत्येकं पृथगेव । जलावरणान्तु तन्मण्डलाद्बहिः पूर्व्वावरणाद्दशगुणमेकमेव । यस्योपरि च सर्व्वब्रह्माण्डकारणं कारणार्णवशाय्येक एव शेते । यत्तु मण्डलाभ्यन्तरेऽपि यत्किञ्चिज्जलं प्रविशति तत्त्वावरणसंज्ञं न भवति अनि-श्चितमानत्वात् । तदेवमेवाहङ्काराद्यावरणानां सर्व्वभूताधारकत्वं सङ्कुच्छेत इति । विशेषं प्रतिपद्य प्राचीनस्थूलदेहे इव तत्र लिङ्गदेहावेशं कृत्वा । पुनश्च तेन विशेषाविष्टेन लिङ्गदेहाख्येनैव आत्मना अपः जलावरणं प्रतिपद्य प्राचीनस्थूलदेहत इव विशेषत इतरूक्रमपूर्व्वकं तत्र तदावेशं कृत्वा । पुनश्च पूर्व्ववदनलमूर्त्तिः सन्नित्यादि योज्यम् । तत्र तत्र लोकविशेषेषु भोगार्थलीलाशरीरमपि मन्तव्यम् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

शिशुमारस्वरूपमग्रेवक्ष्यते । तत्रध्रुवस्थानंशिशुमारस्यांतभवति । तद्ब्रह्मांडस्यनाभिस्थानीयम् । ततोऽग्रेलोकचतुष्टयम् । तत्रनुशब्देनपूर्वैरूपा-तरूपांतरकरणमुक्तम् । विष्णोरित्युभयत्रसंबध्यते । तत्रगमनयोग्यंशरीरंवर्णयति । अर्णीयसाविरजेनात्मनेति । पूर्वापेक्षयातदर्णीयः । वायुप्रधानत्वात् । प्रशिथिलावयवइत्यर्थः । तत्रापिविरजः वायोरपिलोकत्रयएवरजःसंबंधः । अथवा पूर्वशरीरंतामसंस्थितंतद्वैश्वानरो वेत्यर्थः तृतीयमिदमितितमोरजसोरभावात्तौ विरजेनेत्युक्तं केवलसत्त्वमयेनसत्त्वप्रियेणवा । केवलसत्त्वेनब्रह्मांड भेदस्यवक्ष्यमाणत्वात् । आत्मनापूर्वंवदात्मत्वेनगृहीतेनदेहेन । एकइति तत्रवैमानिकानांगमनाभावात् असहायत्वेनैकाकित्वं ब्रह्मविदांस्वा-भाव्येनैवकृतं केवलज्ञानिनामेवस्थितियोर्ध्वंमहर्लोकं यत्रमहर्लोकेकल्पायुषःब्रह्मकल्पपर्यंतमायुर्येषांविशेषेणबुधाःज्ञानिनःभृग्वादयःरमंते ब्रह्मवद्गुणानुस्मरणेन ज्ञानेनवासमाधिकरणेन । अयमपितत्रगतःब्रह्मकल्पपर्यंततिष्ठति ॥ २९ ॥

ततःभगवच्छक्त्यैजातेनअनंतस्यसंकर्षणस्यमुखाग्निनात्रैलोक्यंसमस्तंतद्ब्रह्मादीनिरीक्ष्यततोनिर्यातिभृग्वादिभिःसह । गमनस्यबहुकालव्यवधा-नत्वादनयोरनुक्रमः । सिद्धैरिति मुक्तानिविशेषणानियत्रजनस्तपोलोके । पारमेष्ठ्यंसत्यलोकस्थानंतदपितदुपर्यवस्थितेश्वरसेवितमित्यर्थः॥२९

तत्रमुक्तिमनुक्रमाह नचेति नचब्रह्मलोकेऽपिलोक ब्रह्मानंदार्थेनास्ति नचाजरा देहधर्मैः नचामृत्युःमृत्युग्रासः नाधिःमनःपीडा

पिन । अंतःकरणधर्माभावः । मृत्योःप्राणाग्रहकत्वात्तद्धर्मप्रतिषेधेन [illegible] । यथान्यत्रादिपुताद्यर्थेगच्छतस्तथा प्रेत्य । तथाप्यन्यतोनिर्भयसुखत्वेऽप्य तदाई ऋतेकृताभिर्दीति अन्यस्मादृते किंतुकृतश्च । अतस्त्वविद्वद्यति यच्चित्ततोदहति । अहः-प्रसंचित्ततः चित्ताद्धेतोः यत्दुःखमित्यर्थः तत्खानुभवगम्यम् । अतोविशेषतोनवकृष्णत्वमितितथोक्तम् । तच्चविवक्षमाह अनिर्दविदुर्दुरंतदुःख प्रभवानुदर्शनादिति इदंस्थानम् । एतत्साधनंज्ञानमात्मप्रकारंवा नविदंतीतितथा दुरंतंदुःखंतस्यप्रभवोयत्रसंसारेतस्यमनुपश्यादर्शनम् । एकवारमुत्पन्नामपिविवेकिनोऽपिपुनस्तत्रैवगच्छंतीतितथा ॥ २७ ॥

ततःस्वेच्छयाब्रह्मांडभेदनमाह ततोविशेषमिति अश्वमेधयाजिनोऽपितत्रगच्छंति तथाहिरण्यगर्भोपासकाः पूर्वोक्ताश्च तत्र "आब्रह्मभुवनाल्लोकाः" इतिवाक्यात्कर्मिणांपुनरावृत्तिः हिरण्यगर्भोपासकानांब्रह्मणासहयाब्रह्मणोगतिःसागतिः पूर्वोक्तस्वंमित्यागच्छतीत्याह ततःसत्यलोकाद्विशेषंपृथिव्यावरणरूपंप्रतिपद्य पृथिवीरूपोभूत्वातत्रप्रविष्टः पृथिव्यावरणातिक्रमेआवरणरूपपृथिवीसायुज्यंप्राप्यतामतिक्रम्यपुनर्जलकपेक्षानलसायुज्यंप्राप्यतदतिक्रम्यैत्यंबमप्रेऽपिआकाशातिक्रमपर्यंतंगच्छति सर्वत्रतेनात्मनेतिज्ञातव्यम् अत्यदांति तत्तत्रगंधादिभोगान्भुंजान एवविलंब्य कालेमोगेच्छाक्षयसमयेउत्तरत्रगमनमितिसर्वत्र स्वमाकाशं तद्वृहत् अनंतमेव शब्दब्रह्मरूपंवा माहात्म्यकंवा तस्यबृहत्त्वेहेतुः आत्मनः भगवतः लिंगंशरीरम् "आकाशशरीरंब्रह्म" इतिश्रुतेः भगवतोव्यापकत्वम् अंतर्बहिर्व्यवहारहेतुत्वंपरिच्छेदापरिच्छेदौ शब्दब्रह्माश्रयत्वमित्यादिधर्मबोधकम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ततश्च तत् विष्णोश्चक्रम् अतिपर्त्य अतिक्रम्य । कीदृशं विश्वस्य नाभिं विश्वात्मकपुरुषस्य नाभिस्थानीयम् । अणिमा अणिमादिसिद्धिमत्त्वादतिसूक्ष्मेण विरजेन निर्मलेन लिङ्गशरीरेण सह । ततः परत्र स्वर्गिणां गम्याभावादेकः नमस्कृतं पूज्यं ब्रह्मविदां स्थानं महर्लोकमुपैति । यत् यस्मिन् विबुधा महाकल्पायुषः रमन्ते खेलन्ति ॥ २५ ॥

अधो अनन्तरं यदि कल्पपर्यन्तं कौतुकवशात् तत्रैव स्थातुमिच्छति तदा कल्पान्ते सति विश्वं लोकत्रयम् । निर्याति उष्णीभूतान् महर्लोकादूर्द्धं यत् द्वैपरार्द्ध्यं द्विपरार्द्धपर्यन्तस्थायि यत् पारमेष्ठ्यं सत्यलोकं प्रति याति । सिद्धेश्वरैर्जुष्टानि विष्वग्यानि विमानानि यस्मिंस्तत् ॥ २६ ॥

सत्यलोकस्य माहात्म्यमाह न यत्रेति । आर्तिः दुःखम् । उद्वेगः भयम् । किन्तु चित्ततो हेतोः यत् दुःखम् अहः ऋते तद्वेगं विना । तदेव किं कथं वा भवेत् तत्राह । अनिर्दविदाम् इमं वैष्णवयोगमजानतां त्रिलोकस्थजनानां दुरन्तदुःखो यः प्रभवः संसारस्तस्यानुदर्शनाद्या कृपा तया । तेन व्याजस्तुत्या सत्यलोकस्थास्ते महाकृपालवो धन्या एवेति भावः ॥ २७ ॥

अथ तत्रैव यदि महाकल्पपर्यन्तं स्थातुमिच्छति तदा ब्रह्मणा सहैव मुच्यते । यदि च तदन्तरेव मोक्षमिच्छति तदा खमावरणानि निर्भिद्यैव ब्रह्म प्रविशतीति तत्प्रकारमाह । ततो विशेषं पञ्चाशत्कोटियोजनविशालस्य ब्रह्माण्डस्य प्रथमावरणरूपां पृथिवीं पञ्चाशत्कोटियोजनप्रमाणां प्रतिपद्य प्राप्य । केन प्रकारेण तेनात्मना पृथिवीरूपेण । एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः तत्तदावरणत्वेन छेददाहादिशङ्काशून्य इत्यर्थः । ततोऽपः पृथिवीदशगुणप्रमाणाः प्रतिपद्य अथात्मनेति शेषः । ततोऽनलमूर्त्तिः जलदशगुणा तेजआवरणं प्राप्येत्यर्थः । अत्यरन् भवेत् । तत्र तत्र पृथिव्यांजलादिषु घ्राणरसनादीन्द्रियैर्गन्धरसादीन् विचित्रभोग्यविषयान् भोक्तुमेवेति भावः । ततो ज्योतिर्मयः काले वायुरात्मना वायुं तेजोदशगुणम् उपेत्य । यं वायुदशगुणमाकाशं, बृहदात्मनो लिङ्गं परमात्ममूर्त्तित्वेनोपासनेयुक्तं, कद्वा वेदशब्दात्मना तत्प्रभापकमिति ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तद्विष्णोश्चक्रं शैशुमारं विश्वनाभिं सूर्यादि ग्रहनक्षत्रादेः सर्वस्याश्रयम् अतिवर्त्यातिक्रम्यविरजेनपुण्यापुण्यरहितेन अणिमादिसूक्ष्मतरेणात्मनालिंगशरीरेण एकः विद्वान् । यत् यस्मिन् कल्पायुषोविबुधारमन्ते तद्ब्रह्मविदांभृग्वादीनांस्थानं नमस्कृतं नमनीयं महर्लोकमुपैति प्राप्नोति ॥ २५ ॥

अधो अनन्तरं कल्पांतेअनन्तस्य मुखानलेन मध्यस्थस्यशेषस्य मुखोद्गताग्निनाविश्वं त्रैलोक्यंदह्यमानं सविद्याद्भिरीश्वरस्यैवेच्छया द्वैपरार्द्ध्यंस्थायि सिद्धेश्वरैर्जुष्टानि युक्तानि विष्वग्यानि विमानानि यस्मिंस्तदुपारमेष्ठ्यंपरमेष्ठिपदंप्रति निर्याति भोगार्थं महर्लोके स्थिरीभूत्वात्रैलोक्यं दह्यमानं निरीक्ष्यतत: पलायतेइति नशङ्कयं । प्राक्तनपदार्थभोगयोगाभावात् ॥ २६ ॥

यत्रलोके अनिर्दविदाम् । इदंप्रस्तुतमपुनरावृत्ति धर्मब्रह्मवाजानंतीतिदंविदस्तद्भिन्नानांप्रस्तुतविद्वद्व्यतिरिक्तानांपुनरावृत्तिधर्मिणांतत्र गच्छतां । दुरंतदुःखोयः प्रभवः पुनरावृत्त्याजन्मतस्यानुदर्शनात् कृपयायच्चित्ततोभवति । अहः ऋतेशोकादि कृतश्चिन्नभवति । ततः पुनरावृत्तिस्तु "ऐश्वर्यपारमेष्ठ्यं च तेतिकर्म्मनिर्मितं निधूय पुनरायान्तिगुणव्यतिकरेसति" इति वक्ष्यमाणात् । "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति भगवद्वचनाच्च ॥ २७ ॥

अथावरणभेदेन प्रकारमाह । ततइति । "दशोत्तराणि दशभिः मैत्रेयैतानि सप्तवै" इति पुराणान्तरात् पृथिव्यावरणानि दशगुणोत्तराणि सप्तत्रकोटियोजनमानमंडकटाहसंज्ञकं प्रथमावरणम् । "कोटियोजनमानस्तुकटाहः संप्रकीर्त्तितः" इतिपुराणान्तरात् । महांतत्र समवृत्तप्रधानं संप्रचक्षते स्थितम् । अनन्तस्य नखदंष्ट्रान्तमिति वचनाद्दशापकमहमंडकटाहावरणं निर्भयः आवरणभेदेनभयवान्यः ततः पारमेष्ठ्यात्तेजोरूपात्। तेनात्मनालिंगदेहेनोपलक्षितः विशेषं पृथिवीमयमण्डकटाहं प्रतिपद्यतद्भूतं प्राप्यप्रतिपद्योदादीनाम् आद्येनाकृतिमुपैतीत्यनेनान्वयः तस्मिन्नन्तरा आपःप्रतिपद्यततोऽनलमूर्तिः अनलभावं प्रतिपद्येत्यर्थः । अतएवात्वरन् त्वरामकुर्वन् तत्तद्भोगप्राप्तस्य तत्र तत्रभयाभावात् ततोऽज्योतिर्मयः । अनलमूर्तिः कालेऽनलोत्तरवायुभेदकाले वायुमुपेत्यतत्तोवाय्वात्मनोपलक्षितः वायुमुपेत्यकर्मभूते वायुदेवतामापन्नः । पुनः कथंभूतमात्मलिंगम् । आत्मान्यगुणभूतः शब्दएवलिङ्गं प्रापकोयस्य तत् चक्षुरादिग्राह्यत्वमित्यर्थः ॥ २८ ॥

घ्राणेन गन्धं रसनेन वै रसं रूपञ्च दृष्ट्वा त्वसनं त्वचैव ।
श्रोत्रेण घोषेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥
स भूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्य्यम् ।
संसाद्य गत्वा सह तेन याति विज्ञानतत्त्वं गुणसन्निरोधम् ॥ ३० ॥
तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ? ॥ ३१ ॥
एते सृती ते नृप ? वेदगीते त्वयाभिपृष्टे च सनातने च !
ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ॥ ३२ ॥

भाषाटीका ।

उस विष्णु के नाभी को उल्लंघन करके सूक्ष्म निर्मल आत्मा से इकलाही उस स्थान को जाता है कि जो स्थान ब्रह्मज्ञानियों से नमस्कृत है और जहां पर कल्पांत आयु वाले ज्ञानी लोग रमते हैं ॥ २५ ॥

तदनंतर वह योगी अनंत के मुखाग्नि से खूब जलते संसार को देखकर परमेष्ठी का जो स्थान सिद्धेश्वरों से सेवित है द्विपरार्ध स्थायी है उस स्थान को चला जाता है ॥ २६ ॥

जहां पर कोई शोक नहीं है जरा नहीं है मृत्यु नहीं है कहीं से उद्वेग तथा दुःख भी नहीं है केवल परमेश्वरके तत्त्व को न जाननेवाले संसारियों का अत्यन्त दुःख देखना मात्र वहां पर दुःख मालूम होता है ॥ २७ ॥

तदनंतर निर्भय होकर पृथ्वी तत्त्व को प्राप्त होके तिसी से जलमूर्ती होकर धीरे से अग्निमय होकर समयपर वायु को प्राप्त होकर वायु रूप से आत्मा का प्रकाशक आकाश को प्राप्त होजाय ॥ २८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

इन्द्रियार्थानां भूतसूक्ष्माणाम् अतिक्रममाह । घ्राणेनाधिष्ठितेन गन्धमुपेत्य । त्वसनं स्पर्शनम् । नभोगुणत्वं शब्दात्मताम् । प्राणेन तत्तत्कर्म्मेन्द्रियेण आकूतिं तत्तत्क्रियाम् ॥ २९ ॥

•तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिप्राप्तिमाह । सः योगी विकार्य्यं संसाद्य विज्ञानतत्त्वं याति । विविधं कार्य्यमस्येति विकार्य्योऽहङ्कारः । स त्रिविधः तामसो राजसः सात्त्विक इति । तत्र तामसाद्भूतानि भूतसूक्ष्माणि जायन्ते राजसाद्बहिर्मुखानि दशेन्द्रियाणि सात्त्विकान्मन इन्द्रियदेवताश्च । तेषां लयश्च तत्तदहङ्कारे । तत्र भूतसूक्ष्माणामिन्द्रियाणाञ्च सन्निकर्षं लयस्थानं तामसं राजसञ्च मनोमयं देवमयञ्च सात्त्विकं प्राप्य गत्वा एवं क्रमेण तेन अहङ्कारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति । ततो गुणानां सन्निरोधो लयो यस्मिन् तत् प्रधानं याति ॥ ३० ॥

तेनात्मना प्रधानरूपेण आनन्दमयः सन् उपाधीनामवसाने शान्तम् अविकृतम् आनन्दं परमात्मानमुपैति । न विषज्जते नावर्त्तते इत्यर्थः ॥ ३१ ॥

एते सृती मार्गौ प्रकाराविति यावत् । हे नृप ? अनपेक्षो निर्भिद्य मूर्द्धन् विसृजेत् परं गत इति या सद्योमुक्तिः सैका सृतिः, यदि प्रयास्यन् इत्यादिना क्रममुक्तिरिति द्वितीया सृतिश्च । एते सृती वेदेन गीते उक्ते, ननु स्वोत्प्रेक्षिते । तत्र—यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिः, तेऽर्चिषमभिसम्भवन्ति इत्यादिना क्रममुक्तिश्च वेदेनोक्ता । यद्वा न कर्म्मभिस्तां गतिमाप्नुवन्ति इति दक्षिणमार्गस्यापि सूचितत्वादेते सृती इति द्विवचनम् । त्वयाभिपृष्टे यच्छ्रोतव्यम् इत्यादिप्रश्नेन अर्थान्मुक्तिविषये ह्रे अपि सृती पृष्टे । ब्रूहि यद्वा विपर्य्ययम् इति च दक्षिणमार्गोऽप्यर्थात् पृष्टः । एवं त्वया च ये पृष्टे ते एते सृती इत्यन्वयः ॥ ३२ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्यास्य तट्टिप्पणी ।

यद्वा सर्व्वे इति कठोपनिषदि द्वितीयाध्याये षष्ठवल्ल्यां ब्रह्मदेवमन्त्रः ॥ तेऽर्चिषमभि—सम्भवन्तीति बृहदारण्यके अष्टमाध्याये—अथनिवस्तु षष्ठाध्याये द्वितीयब्राह्मणे पञ्चदशकण्डिका दक्षिणमार्गस्येति अत्र दक्षिणोत्तरमार्गादीनां विशेषजिज्ञासायामस्माभिः सत्यार्थिते श्रीमद्गोविन्दभाष्यसमेतवेदान्तदर्शने चतुर्थोऽध्यायीयद्वितीयतृतीयपादौ द्रष्टव्यौ ॥ यच्छ्रोतव्यमिति प्रथमस्कन्धीयैकोनविंशाध्यायस्यार्द्धविंशतमश्लोकः ॥ इति यच्छति प्रथमस्कन्धीयैकोनविंशतितमाध्यायस्यार्द्धत्रिंशत्तमश्लोकस्यैकदेशः ॥ ३१ ॥ ३२ ॥

गच्छतोमुक्तस्यसूक्ष्मदेहस्थैरिन्द्रियैस्तत्तद्भूतगुणग्रहणमाह । प्राप्येति । अन्दलोकमर्यतेऽनेनेत्यन्दलोकशब्दादिन्द्रियमाह । अतएवभूतसूक्ष्मशरीरत्वात्तद्भूतगंधादीन्गृह्णातीत्यभिप्रायः । प्राप्यानन्दलोकमित्यत्रार्थेन्द्रियेणगंधमात्रमग्रहणमिन्द्रियेणरसमेन्द्रियेणरूपंस्पर्शमेन्द्रियेणरूपंतेजोगुणम् । स्वकात्स्वार्गेन्द्रियेणाप्युपकारः सांकर्यभावद्योतकः । अत्रसंख्यापुरुषस्वशब्देनेन्द्रियाणांग्रहणंगुणग्रहणंचाक्रमेणकथितं प्राणेनेति करणेनाकूतिमभिप्रायं समानीयमाकूतिरितिश्रुतम् । अत्रप्राणशब्देनेन्द्रियवृत्तिहेतुभूतमुख्यप्राणोनविवक्षितःतेनाकूतिग्रहणार्थमन्तःकरणंविवक्षितम् । अन्तःकरणप्रसूतोऽज्ञाभिप्रायः एवंप्राणादिभिर्गंधादीनुपेत्यतत्तद्भूतभेदनदशार्थांस्तत्तद्गुणान्गृह्णातीत्यर्थः ॥ २९ ॥

अथाहंकारमहत्प्रकृतीनामतिक्रममाह । सहेति । सयोगीगम्यागमनेनविकार्यैस्वकार्यकरणैरपरिशाम्यन्नहंकारंससाधेत्यन्वयः । विकार्यमेवविशिनष्टि । देवमयंहिग्यातादिदेवाधिष्ठेयेंद्रियकारणं मनोमयंमनःकारणं भूतसूक्ष्मेंद्रियसन्निकर्षभूताव्याकाशादीनितत्सूक्ष्माणिशब्दादीनींद्रियाणिज्ञानकर्मोभयेंद्रियाणि एतेषांसन्निकर्षकारणं भूतसूक्ष्मसन्निकर्षस्वेंद्रियसंनिकर्षत्वाभ्यांद्विविधाहंकारभेदोतामससात्विकाहंकारावुक्तौ । मनोमयंदेवमयमितिचसात्विकाहंकारकार्यप्रदर्शनं । देवमयमित्येतावतैवसिद्धेतत्कार्यप्रदर्शनार्थेंद्रियसन्निकर्षवमनोमयंवोक्तिः इंद्रियसृष्टावनुग्राहकराजसाहंकारग्रहणाय अतएवराजसाहंकारस्यनपृथक्कार्यप्रदर्शनं तस्यानुग्राहकमात्रत्वेनपृथक्कार्याक्षमत्वात् एतद्ग्रंथेस्फुटीभविष्यति तेनातिक्रांताहंकारेणसहोपलक्षितःविज्ञानतत्त्वंमहांतंयाति विज्ञानसारथिर्यस्तु बुद्धितुसारथिं महान्बुद्धिलक्षणइतिचैकानामेकार्थत्वात् गुणसाम्यावस्थप्रकृत्यतिक्रमणमाह गुणसंनिरोधमितिगुणानांसत्त्वरजस्तमसांसन्निरोधः साम्यंयस्मिन्नुतत्प्रधानं यातीत्यर्थः ॥ ३० ॥

अवसानेप्रकृतेरवधौ "गौरनाद्यंतवतीसाजनित्रीनित्यासततंक्रिया" इतिप्रकृतेर्नित्यत्वाद्देहावधिरवसानशब्दोक्तः स्वकीयभूतसूक्ष्मेंद्रियाणांस्वकारणंपुलयोऽप्यवसानशब्दविवक्षितः तेनात्मनाविरजसास्वकरूपेणोपलक्षितः शांतमूर्मिषड्भिरहितमानंदंनिरतिशयानंदस्वरूपम् आत्मानं आनंदमयपरमात्मसाम्यापत्त्याआनंदमयः स्वयंनिरतिशयानंदप्रचुरः उपैति आत्मानंदशब्दाभ्याम् "आत्मनआकाशः संभूतः आनंदोब्रह्मेतिव्यजाना"दित्युपक्रमोपसंहारगतवाक्यद्वयंस्मारितम् एवं "क्षयंतमस्यरजसःपराकेआदित्यवर्णंतमसः परस्तात्तदक्षरेपरमेव्योमन्" इत्युक्तप्रकृतिपुरुषातीतपरमाकाशस्थाभगवत्प्राप्तिरर्चिरादिनागनस्योक्ता एवंसएतान्ब्रह्मगमयतीत्यस्यार्थउक्तः अथधूमार्चिरादिमार्गयोःप्रामाणिकत्वंकथयन्नेतेनप्रतिपाद्यमानाद्यंशस्यार्थमाह एतामितिभागवतीभगवदुद्देश्यांगतिमर्चिरादिमार्गयोगतःस्वपुंसैरिहतत्प्रकृतिसंबंधेऽंगकर्मज्ञानदेहंप्रतिनिर्वर्त्यतेनासक्तोभवति ॥ ३१ ॥

अथपार्गद्वयमुक्तंनिगमयति एतेइति इमौमार्गौअर्चिरादिधूमादिमार्गौवेदगीते । "येचेमेरण्येश्रद्धांतपइत्युपासतेतेर्चिषमभिसंभवंति अहयाहएग्रामेइष्टापूर्तेदत्तमित्युपासतेतेधूममभिसंभवंति" इत्यादिवेदबोधितेऽतएवसनातनेस्थितेऽतएवस्मृतीहेतूपन्यासाभिप्रायेणार्चिरादिमार्गस्यधूमादिमार्गस्यापिपृष्टत्वात् चकारान्मयाकथितेइत्यर्थः सनातनत्वंविशदयति येइति येवैयेस्मृतीपुराकल्पादौब्रह्मणोचतुर्मुखाद्याराधितः सम्यगुपासनयाप्रीतः वासुदेवः सर्वभूतांतरात्माभगवानाहउवाचतस्मात्सनातनेइत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सत्यलोकस्येतरलोकेभ्योवैशिष्ट्यमाह तत्रेति यत्रब्रह्मतेसत्यलोकेशोकादयोनसंति आधिस्तुव्यसनेचित्तदुःखेऽधिष्ठानबंधयोरिति व्यसनमाधिरत्रोच्यते यत्रानिर्दविदामब्रह्मविदांक्रियायादुःखस्यप्रभवस्यजननादिलक्षणस्यचानुदर्शनात् जनस्यचश्रिक्लेशःसोऽपि नास्तितंसत्यलोकमाप्नोतीतिपूर्वेणान्वयः । जनादिलोकापेक्षयासत्यलोकस्यवैशिष्ट्यंनतुमुक्तिविशेषात् तदुक्तं "सर्वेदुःखविहीनायेमुक्ताःप्रायस्तुताइशाः अमुक्तास्तुजनाद्येषुविशेषेणातुसत्यगा" इति । ननुयद्विब्रह्मणासहैवमुक्तिःसर्वेषांतर्हितः पूर्वमाचार्यसेवनसाधनसामग्रीसम्पादनंव्यर्थमितिचेन्न योग्यतावादुविध्यान्मुक्तिप्राप्तेरपिवादुविध्यात् तदुक्तं "विष्णोर्लोकंतदैवैकेयांतिकालांतरेपरे आद्यैवहरेःकेचिदंतैःकेचिदंजसा विदुरेवान्यलोकेषुमुच्यंतेब्रह्मणासह" इति ॥ २९ ॥

एवंदेवयानेनगत्वासत्यलोकेपरब्रह्मलोकेचस्थितानांज्ञानिनांमोक्षंवक्तुंदेवमुक्तिप्रकारमाह ततइति प्रतीकालंबनाप्रतीकालंबनसंज्ञःसन्ना निसंधोब्रह्मप्रलयेब्रह्मविदंप्रविष्टोगरुडशेषलक्षणमार्गद्वयेनवार्णीप्रविश्यतयाभौतिकशरीरंब्रह्मार्णंप्रविश्यततस्तेनब्रह्मणासहाविशेषं * पृथिवीं प्रतिपद्यतेन * पृथिव्यात्मनासहापः प्रतिपद्यतेनात्मनाऽनलमूर्ध्निप्रतिपद्यतेनज्योतिर्मयोग्निप्रधानोभूत्वावायुमुपेत्यमुक्तिकालेतेनवाव्यात्मनाहरिर्लिङ्गमाकाशवद्ब्रह्मानंतित्यंचेतिबृहन्महत्त्वं † प्रविशतीत्यन्वयः निर्भयःसंसारभयान्मुक्तः अतएवत्वरत्वरमाणः । अत्रेहतात्पर्यंचशब्दाद्बुद्धांतव्यं तथाहि विशेषाख्यांडेष्वर्वास्थतेविशेषनाम्निविरिंचेस्थितंवैराजाख्यंहरिंपुनस्तद्दशगुणांडकटाहात्मकविशेषाख्यपृथिव्यांस्थिते विरिंचेस्थितमब्जनामानंहरिं तेनाब्जनाभ्नाहरिणाप्सुस्थितेतच्चतुर्मुखेस्थितमब्जाख्यंहरितेनाब्जेनविष्णुनातेजोगतविरिंचस्थेप्राणनामानंहरिं तेनाग्निगतेनहरिणावा † युस्थितंचतुरानेनस्थितं प्राणाख्यंप्राप्यतेनवायुस्थविरिंचांतर्यामिणाऽऽकाशस्थितविरिंचस्थंप्राणाख्यंहरिंप्रविशतीति पृथिव्यादिकार्याणांस्वस्वकारणेष्वप्यादिप्रधानांतेषुलयः । तदभिमानिदेवताशरीराणांच । तत्रविरिंचकेशवयोस्तत्तत्प्रधानांतर्यामिस्वस्वरूपेरैक्यभावोदीपानांदीपांतरैरिव । अन्येषांद्वारमात्रमिति ज्ञानिनः प्रलयेसर्वेब्रह्मणासहपार्थिवं भूम्यधामजनामानंप्राप्नुवन्तीति संस्थितमित्यादिवाक्यद्वयेनचशब्दगृहीतेनमिश्रमाप्नुमितिशंकानिरस्तेतिज्ञातव्यम् ॥ ३० ॥

इदानींपंचतन्मात्राप्रलयप्रकारमाह प्राप्येति प्राणैर्द्वियाधिष्ठितविरिंचस्थेनहरिणागंधतन्मात्राप्रधिष्ठातृविरिंचस्थितेनहरिणा योगीपुनरावृत्तिमनापेतीत्यन्वयः तत्रवाय्वादीवापुनरावृत्तिसंज्ञावात्मायेयोगमुक्तं वक्ष्यमाणं एवमुक्तस्यस्वमाह्यप्रकारेणमुक्तानांतेषांचतारतम्यंच प्रकारमाह प्राप्येति एवमुक्तःकेवलचिदानंदैकरूपोयोगीसःवासिसंज्ञतावद्भिरिंद्रियैर्गंधादिभिरित्युक्तशब्दाद्गंधादिपंचविधतन्मात्रेषु श्वेतद्वीपादिस्थानेष्वाश्रितः प्रलयेऽपिनपुनरावृत्तिमुपैतीत्यन्वयः । अत्रेदृशेनपंचेंद्रियैरित्यनेनचाक्षुषाद्यन्याःसर्वतोवदादयादिमानसेंद्रियोपलक्षितेति इत्थमेवमुक्तिर्नान्यैरुक्तवादिकथितेत्येवशब्दः तुनामग्रस्यहिपरेशानैर्विनुःअतरंमवेदितिश्रुतेरूचयति ॥ ३१ ॥

---

* पृथिव्यंतर्यामिणाहरिणा † भूताकाशं † भूतकृतुः

[illegible]

[illegible] आकाशेन गन्धमिति । अनेनाकाशावरणाद्बहिरेव सूक्ष्मरूपाण्यावरणानि लभ्यन्ते । युक्तश्चेदम् । कारणकारणानां बहिर्बहिरवस्थानात् [illegible], व्यवहितानामपि कारणानामंशमंशमुपादायैश्वर्येण तत्तत्कार्य्यसृष्टेः, यथा गन्धतन्मात्रस्य जलस्य चांशमुपादाय तेन पृथिव्यादि सृष्टयादि । किन्तु गन्धतन्मात्रादीनां सूक्ष्मत्वेनानुपलभ्यमानत्वादाकाशतुल्यत्वमिति आकाशान्तर्गणनाद्बहिरेवावरणान्यवसीयन्ते । तात्पर्यमिदं स्विधं विवेचनीयम् । तत्र प्राप्नेनेति द्वाराद्वारा गन्धमाविश्येत्यर्थः । एवमुत्तरत्रापि ॥ २९ ॥

तेनाहङ्कारेण सहेति तद्रूपं विज्ञानतत्त्वमित्यर्थः ॥ ३० ॥

तेनात्मनेति । आत्मना शुद्धेन स्वरूपेण । तेन प्रधानमावेष्टितेन पुनस्तत उत्क्रमिष्यतः । आत्मानं परमात्मानं परमवैकुण्ठनाथमित्यर्थः, आगन्तवी गतिमित्युक्तेः । ततो विशेषमित्यत्र टीकावतारिकायाञ्च ये तु भगवदुपासकास्ते क्षेत्रज्ञा ब्रह्मायतं भित्त्वा वैरज्यं पदमाप्नोन्ति इति । तस्मात्तन्मतेऽपि प्रकृत्यावरणाद्बहिर्महावैकुण्ठलोकः । प्रकृत्यावरणस्य व्यापकत्वं चापेक्षिकमिति ॥ ३१ ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवमाकाशादीनपरित्यागेनमहाभूतांशाःपरित्यक्ताः विषयातिक्रमेणेन्द्रियातिक्रममाह प्राप्नेनेति प्राप्नेनेतिपाठेऽपिसएवार्थः सर्वत्रतत्तद्रूपे स्वतन्त्रीकरणमेतत्तदतिक्रम्येतिज्ञातव्यं नभोगुणत्वंशब्दत्वं प्राप्नेनकर्मेन्द्रियसहितेन तद्रूपेणवा आकूतिक्रियांपञ्चकमपि उपैति त्यजतीति पूर्ववद् योगीतियोगसामर्थ्यादिस्मरणम् ॥ २९ ॥

अहंकारादितिक्रममाह सएवयोगीभूतानांसूक्ष्माणामिन्द्रियाणांचसंनिकर्षमुत्पत्तिस्थानं तामसंराजसंचाहंकारंमनोमयं देवमपीति चानिष्टं विकार्यमूलाहंकारं तेनरूपेणगत्वासहयाति क्रियामहंकारंचत्यजतीत्यर्थः विज्ञानतत्त्वंमहत्तत्त्वं गुणसंनिरोधंप्रकृतिं सर्वत्र ॥ ३० ॥

तेनात्मनेति अग्रेपुरुषावरणं तत्रापितेनात्मनाआत्मानमुपैति ततःशांतमक्षरं ततःआनंदपुरुषोत्तमं स्वयमप्यानंदमयोभूत्वाऽपैति अथसर्वतःपरंनमनमास्ते "आमुपेत्यपुनर्नेति" इतिवाक्यमेतादृशपरमित्याह एतांगतिमिति ब्रह्मांडमध्येहृदयमध्ये ब्रह्मांडात्परतोव्यापैवानंदमयो भूत्वाआनंदरूपंभगवंतंप्रविशति सनैवंपुनःसंसारंप्रविशति ॥ ३१ ॥

एवंपुनरावृत्तिमार्गंहृदयमुक्तासद्योमुक्तिक्रममुक्तिरूपमुपसंहरति एतेमृतीइति एतेषांसर्वेषांपदार्थानामध्यायद्वयोक्तानांभगवत्स्वरूपत्वेनैव ज्ञानार्थंमुक्तानांयथाभिवेशंपथोपयोगंयुक्तिभिःविमर्शीःस्वरूपस्थंभविष्यति अग्रेतूद्देशमात्रंकृतं तत्रस्वरूपमेवाविष्करिष्यामःतेतुभ्यं हेतूपदेशेनेति गीते राजस्यात्तुज्ञानार्थंस्वरूपेणकीर्तिते तत्रापिस्वयाभिपूर्णे साधनद्वयफलपर्यंतसाधनप्रदर्शनेनैवतत्प्रदर्शनउक्तोभवति सनातनेन नहीदं ज्ञानंतत्काश्चिदास्मिन्मार्गेगच्छति किंत्वनादिसिद्धे अग्रेनंतानग्रेरूपद्वोभविष्यति अनादिसंप्रमाणमाह येवैपुरेति ब्रह्मणैवपूर्वे ब्रह्मणेनाह अनयाप्रपृच्छःसन् कथनहेतुः आराधितइति एवंकथनेहेतुमाह वासुदेवइति मोक्षदातृत्वेनैवमुक्तवानित्यर्थः ॥ ३२ ॥

श्रीमद्विठ्ठलनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

इन्द्रियार्थानां भूतसूक्ष्माणामतिक्रममाह । प्राप्नेन प्राप्नेनेन्द्रियेण प्राप्तं गन्धम् उपेत्य । एवं रसनेनेत्यादि । स्पर्शनं त्वगिन्द्रियम् । नभोगुणत्वं नभोगुणं शब्दम् । प्राप्नेन कर्मेन्द्रियेण आकूतिं तत्तत्क्रियाम् । तत्र पृथिव्याद्यावरणेष्वेवगन्धाद्यः सन्ति तेषामतिक्रमं पूर्ववदुक्तं स्वरूपत्वादेति शेषम् ॥ २९ ॥

इदंचं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिज्ञानमाह । स योगी विविधं कार्य्यमस्येति विकार्य्योऽहङ्कारस्तं तेनात्मना प्राप्य । कीदृशं भूतसूक्ष्माणाम् इन्द्रियाणाञ्च संनिकर्षो यतो यत्र तत्र । तामसाहङ्कारे भूतसूक्ष्माणि राजसाहङ्कारे इन्द्रियाणि संनिकृष्यन्त्यर्थः । पुनः कीदृशं मनोमयं देवमयम् । सात्त्विकाहङ्कारे मनः देवताश्च प्रविलाप्यन्त्यर्थः । ततस्तावन्निष्ठेन तेन अहङ्कारेण सह तत्त्वा विज्ञानतत्त्वं महत्तत्त्वं याति । अहङ्कारं महत्तत्त्वे प्रविलापयतीत्यर्थः । ततस्तेन महत्तत्त्वेन गुणाः संनिरुध्यन्ते येन तत् प्रधानं याति । महत्तत्त्वं प्रधाने विलापयतीत्यर्थः ॥ ३० ॥

तत्प्रकृतेन प्रधानेन सह आत्मना स्वस्वरूपेण आत्मानं परं ब्रह्म अनादिपुरुषमानन्दरूपम् उपैति, प्रकृत्यावरणात् परत्र कारणार्थंचतुर्विधमनुग्रहस्य स्थितेः । ततोऽवशाने आनन्दमय इति लक्षितमेव साधुत्वं ग्राह्येत्यर्थः । न विद्यते इह संसार आवर्तनं ॥ ३१ ॥

मृती ब्रह्मणार्थी । निर्मिच मृत्युंच विमृत्युंच परं गता इति वाक्यात् सद्योमुक्तिरेषा स्मृतिः यदि प्रधानस्थं इत्यादिना क्रममुक्तिमप्येषा स्मृतिः । एते मृती वेदेन गीते ॥ इ. [illegible] । तत्र सर्वे ब्रह्मणस्ते वासा देवस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिः । देवर्षिरिति [illegible] इत्यादिना क्रममुक्तिश्च वेदेषेषा । त्वयाभिपृष्टे इति श्रियमाद्यस्य किं कृष्णेनेति ब्रह्मेवैतदमर्थंचिद्भिः ॥ ३२ ॥

[illegible]

भाषा टीका।

वह योगी नासिका इंद्रिय द्वारा गंध गुणको प्राप्त होकर जिह्वा इंद्रिय से रसकी० नेत्रसे रूपको त्वचा से वायुके कर्म से स्पर्शको प्राप्तहो क्रिया को प्राप्त होताहै ॥ २९ ॥

वह योगी पंचभूत तथा तन्मात्रा तथा इंद्रिय इनका कारण जो सात्विक राजसतामस अहंकार इनकी गतीसे प्राप्त होकर महत्तत्व की तथा गुणोंकि साम्यावस्थारूप प्रकृति को प्राप्त होता है ॥ ३० ॥

उस प्रधानके द्वारा अंतमें आनंदस्वरूपसे शांत आनंद परमात्माको प्राप्त होता है हे राजन् इस भागवती गतीको जो प्राप्त हुवा है वो फिर इस संसारको नहीं प्राप्त होताहै ॥ ३१ ॥

यह तीनों अर्थ सनातन हैं वेदमें कथित हैं जो तुमने पूछे सो हमने कहे जो विश्वरूप के आदि में आराधन से संतुष्ट भये देवकीपुत्र वासुदेवने पूछने पर ब्रह्माको उपदेश कियेथे ॥ ३२ ॥

अत्राध्याये विजयध्वज टीकायां पंचविंशपद्यियामूलम।

योऽतः पचतिभूतानां यस्तत्पत्यंडमध्यगः ।
सोऽग्निर्वैश्वानरोमार्गो देवानां पितृणां मुनेः ॥ २५ ॥
देवयानं पिंगलाभिरह्न्येति शतायुषा ।
शार्ङ्गरिडाग्निः पितृणां त्रिभुवनं सुषुम्णया ॥ २६ ॥

इति श्लोकौ ॥

द्वात्रिंशत्तमस्तिसृणामूलम।

[illegible]

इति श्लोकौ ॥

न यतोऽन्यः शिवः पन्था विशतः संसृतावि[illegible]
पुंसो भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥
भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥ ३४ ॥
भगवान् सर्व्वभूतेषु लक्षितः स्वात्मना हरिः ।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३५ ॥
तस्मात् सर्व्वात्मना राजन् ! हरिः सर्व्वत्र सर्व्वदा ।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम् ॥ ३६ ॥
पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे महापुरुषसंस्थानुवर्णनं नाम
द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

[illegible] पुंसो बहवो मोक्षमार्गास्तत्रोत्तमोत्तमयोगाह्यः समीचीनस्तत्त्वभेदेत्याह न हीति । पुंसोऽनुचितात् भक्तियोगो अन्यो ब्रह्मोऽन्यः शिवः सुखकरो निर्विघ्नश्च नास्त्येव ॥ ३३ ॥

कुत एतद् अत आह । भगवान् ब्रह्मा कूटस्थः निर्विकारः एकाग्रचित्तः सन्निश्चयः, त्रिः त्रीन् वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदम् अन्वीक्ष्य विचार्य यतः आत्मनि हरौ रतिर्भवेत् तदेव मनीषया अध्यवस्यत् निश्चितवान् ॥ ३४ ॥

अन्यानुद्दिश्य यदि रतिर्भवति अननुभूते तु भगवति कथं रतिः स्यात् तत्राह । भगवान् लक्षितः दृष्टः । कथं स्वात्मना क्षेत्रज्ञान्तर्यामितया कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति । दृश्यानां जड़ानां बुद्ध्यादीनां दर्शने स्वप्रकाशं द्रष्टारं विना न घटते इत्यनुपपत्तिमुखेन [illegible] क्षेत्रज्ञान्तर्यामिलक्षणैः । तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतश्च [illegible] इत्यनुभवसिद्धैश्च ॥ ३५ ॥

तस्मात्सर्वात्मनेत्यादिप्रकृतस्य उत्तरमुपसंहरति तस्मादिति ॥ ३६ ॥

अथ फलमभिनयेनाह पिबन्तीति । सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतम् । विषयैर्दूषितं मलिनीकृतमाशयं पुनन्ति शोधयन्ति । तस्य चरणपद्मान्तिकं श्रीविष्णुपदं व्रजन्ति ॥ ३७ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य तद्विवृतिः ।

[illegible] ॥ ३४—३७ ॥]

श्रीमद्राधारमणदासगोस्वामिकृत भागवतचन्द्रिका ।

[illegible] ॥ ३३ ॥

कथंचासुदेवेभक्तिरेवार्थिभिरनुसन्धेयेत्यत्राह भगवानिति "एवंलक्षणो महानुभावो" इत्यादिना पद्यमवतारयति ब्रह्मजगत्कारणतत्त्वनिरूपणेनोक्तोपासकस्वरूपमित्यत्राह कार्त्स्न्येनेति भगवान्वासुदेवस्तत्त्वतस्तत्त्वेन कृत्स्नमनवशेषतो यथा "मालोक्यं सर्वशास्त्राण्यविचार्यैवपुनःपुनरि"त्यत्र तद्व्यवच्छिन्नित्यर्थः विज्ञानमपरोक्षज्ञानमाह कूटस्थइति निर्विकारेपरमात्मनि रतिः मुक्तौमानंदःनिरतिशयानंदपरमात्मानुभवजनितसर्वावस्थोचिताशेषशेषैकरतिर्यतोभक्तियोगान्नेश्वरस्यैवमक्तियोगोमुक्तस्यापायः इति निश्चित्यनिपुणतरालोकःस्थितइत्यर्थः ॥ ३४ ॥

नन्वनीदृशेभगवतिकथंभक्तिरुत्पद्यतेकथंतरांरतिरित्याशंक्यपरिशुद्धमनोविषयत्वायुक्तमयमित्यंभावेनाहभगवानिति ज्ञानयोगपरिशुद्धमनसासर्वभूतेषुभगवदात्मकत्वेनसाक्षात्कारार्हः "मनसानुविशुद्धेनमनसाभिपश्यत्" इतिश्रुतेःकर्महसकिंचदादिर्येषुपुरुषेषु तीव्रदृग्यथेत्यतआहद्रष्टासर्वज्ञः नकेवलंयोगपरिशुद्धमनोविषयएवमहदादिभिःमहदादिभिः महान्तंपुरुषं लक्षणइतिवचनात् कार्यभूतमहदादिनिर्दिष्टोतत्कारणभूतोऽनुमीयतेइत्यर्थः नकेवलमनुमानविषयएवकिंतुशास्त्रविषयोऽपीत्याह शास्त्रैरनुमापकैरितिपदद्वयेन लक्षयंतीतिलक्षणानिवेदांतवाक्यानि "सत्यंज्ञानमनंत"मितोवाहमानिभूतानी"त्यादीनि तथातदुपबृंहणव्याख्यानरूपाणिवादकानि "सदेवसौम्येदमग्रआसीदि"त्यादीनितैरनुमापकैःस्मृतिवाक्यैःस्मृतीनांस्मृत्यनुमापकत्वाच्छ्रुतिस्मृतिभ्यामप्युपबृंहितः अनेन केवलानुमानगम्यत्ववादिनोवैशेषिकादिरस्ताः तन्निरासस्तु "शास्त्रयोनित्वात् ॥१।१।३॥इत्यधिकरणसाध्यः बृहत्वादिकार्यत्वंचैतन्यबृंहितः जगत्कारणतयाशास्त्रैः प्रतिपन्नःतत्सत्कर्मैवंयोगपरिशुद्धमनसासाक्षात्कुर्वंतीत्यागमोत्थविवेकजन्यज्ञानद्वयविषयत्वमुक्तं भवति ॥ ३५ ॥

यच्छ्रोत्रमित्यादिग्रन्थोत्तरमुपसंहरति तस्मादिति स्पष्टोऽर्थः ॥ ३६ ॥

अस्तुयोगपरिशुद्धमनोग्राह्यत्वंयोगारंभोवाकथंस्यादित्यतआह पिबंतीति भगवतआत्मनःपरमात्मनःकथामृतंयेपिबंतिश्रवणविधूतपापाश्चार्थपुनर्नंतीत्यन्वयः कथामृतंवाकथंलभ्यतेइत्यतआह सतामिति कर्तरिषष्ठी सद्भिःकर्मपुंसंभूतैःपुरितम् अनेनसत्सेवयाग्रथमंभवितव्यमित्युक्तभवतिसत्सेवयाभासहारिकथाश्रवणेविषयैःशब्दादिभिर्विदूषितंकलुषितमाशयमंतःकरणंपुनर्तिसत्सेवादिभिर्भक्तियोगांतस्वकल्पमाह व्रजेनेतितत्स्वभगवतश्चरणसरोरुहयोरितिकैसमीपंव्रजंतिप्राप्नुवंतिप्रथमंरूत्सेवातःश्रवणतोयोगारंभःतेभागमोत्थविवेकादिसाध्यस्वकल्पजन्यज्ञानाभ्यासाऽनुगृहीताप्रत्यक्षतयाचाक्षामाक्रियेत्यर्थंक्रमोऽत्रोक्तः ॥ ३७ ॥

इति श्रीमद्भागवते द्वितीयस्कन्धे श्रीवीरराघवाचार्यकृतटीकायां द्वितीयोऽध्यायः ॥ २ ॥

तेनविज्ञानंतत्त्वगतेनहरिरागुणसन्निरोधेसत्त्वादिगुणविधुरंसर्वमूलकारणंमहत्तत्त्वाख्यंनिरंघगतंविज्ञाननामानमाप्नोति एवंसर्वांतर्यामिकेशवः समहत्तत्त्वांतर्यामिविज्ञाननामाहरिस्तेनात्मनाविरिंचनसहशांतिचित्रप्रकृतिस्थितमानंदनामानंहरिंयाति सआनंदमयः पूर्णानंदः आनंदमहत्तत्त्वगतोविष्णुःश्रियानुज्ञातंब्रह्माण्डमादायावसानेऽपरार्धावसानेसर्वात्मकेसर्वांतर्यामिगुणगृहीतेपरिपूर्णेब्रह्मण्यनुवेधात्प्रवेशेनहरति । जीवसंघःस्वस्वयोग्यतानुसारेणगृहीतत्वाद्ब्रह्माख्यैकमूलरूपेविहरतीतिशेषः । इत्येवादेवानांमुक्तिरितिभावः एवंब्रह्मविष्णुहरेण्यहरिंप्रविष्टानांपुनरावृत्तिर्नास्तीत्याह वासुदेवइति ॥ ३३ ॥

योभागवतआत्यंतिकोमत्कोवासुदेवेपरांसायुज्याख्यांगतिंमुक्तिंगतःसब्रह्मादिसंघःपुनरिहसंसरिनविसृजतेसंसारविषयोभोग्यवर्ग यैवाह्लादेनानंदसंज्ञकेनापिब्रह्मण्यापरस्मिन्कथंसमुद्रेप्रविष्टनदीवदित्यादिदर्शयति सन्मित * आनंदादिशब्दे । मेहविषयकतेहतीदंयुक्तं । तदभोगसामान्यमिदंकिंनस्यादित्येतच्चोद्यं "वासुदेवेभक्तिहेतोब्रह्माद्यामुक्तबंधना" इत्यादिनापरिहर्तव्यम् ययसंहरति एतेइति पुराचतुर्मुखेनाहूतःपृष्टोभगवान्वासुदेवोद्वेमूर्तीब्रह्मणोब्रूते । तेएतेमूर्तीमयातेकथितेहरयम्वयः । एकस्यत्वेहेतुमाह स्वयेति तत्रापिनिमित्तमाह वेदैरिति यद्वेदवेद्यंब्रह्मतत्परंयुपासतेतेऽर्चिषमभिसंभवंति"त्यादिवेदसूचयति वेदगीतत्वेऽप्यश्रद्धेयत्वेनहेयत्वंवदन्नाह समातनइति नित्यइतिहेतुरित्यादित्यर्थः ॥ ३४ ॥

ननोऽत्रनिःश्रेयसार्थिभिर्भागवतमेवाश्रयणीयमितिभावेनाह नहीति इहसंसृतोभगवताव्याद्ग्रंथादाधिमुतः शिवःपंथानमिति सज्जनकरक्षणायाभागवतोक्तत्वादितिशेषः । हेत्वंतरमाह वासुदेवइति ॥ ३५ ॥

एकस्यप्रतिभानेतुकृतकाजविधिप्यतस्तत्तदाप्तिमूलत्वेनतदुक्तंप्रमाणमेवेत्याह भगवानिति ब्रह्मवेदमर्म्मोदयमाहोच्च । यतोब्रह्मादयश्च स्वात्मात्मकूटस्थेनिर्विकारेहरौभक्तिलक्षणारतिर्भवेद् तद्भागवतंपुराणमपेक्ष्यहित्यन्वयः हिताहेतनित्यशास्त्रेनसिद्धमपुनःपुनरवेक्षतइत्यादिकंसूचयति ॥ ३६ ॥

उक्तमाधिकारिणांविवादिनामागवतश्रवणेऽप्रवृत्तेरपरंतरंपर्यालोच्यतंकथमित्याशंक्याह भगवानिति इतोऽपीदमेवंविधंश्रेयस्करं हेतुत्वात्प्रथमाद्यादिनाऽप्यसनीयमित्यतोवाह भगवानिति द्रष्टासाक्षीभगवानमुमापकैर्निश्चयज्ञानजनकैरनुवेदैरेवं सर्वज्ञातेप्यादिनाब्रह्मादिनीचराशेरज्ञातेऽप्यादिनाचप्रमाणेनगृहीतत्वात्सिद्धेनुब्रह्मादिकल्पकैर्लौकिकैःसर्वभूतेषुनियामकत्वेनस्थितइतिआत्मनाऽऽत्मानमाविशन्नाविशन्पुरावेदेनिरीक्षितोवाह इत्यतस्तद्दर्शितत्वेसिद्धेनप्रोक्तत्वाद्वेदमूलत्वेनाविमूलत्वाद्वेदमर्वेदयमप्रदर्शनीयमित्यावातमितिभावः इदंबुध्येवंनचेदिमंपुराणंवेदानांपरत्वंवदंतोनादरणीयाःस्युरितिवादस्योन्मिषंतास्तीत्यत्रत्यचाक्षुषत्वात्त्वाख्योहरिरेवेत्यत्रत्यचाक्षुषःशब्दः तदुक्तं । "समाचायवतामादिर्मध्यमोऽवतरंस्यदेहिन"मित्यादि ॥ ३७ ॥

उक्तमुपसंहरतितस्मादितिं यस्मात्सर्ववेदेनम्वार्थोवेदेनसाध्यश्चसवेदवेद्येषुमुख्योऽतश्चवेदनिरूप्यत्वेनबृहत्त्वाच्चेतिहेतुः तत्प्रमाणत्वं [illegible] अवतारादिफलमाह विधंतीति सतांसत्कारात्प्रवक्तृश्रोतृभूतैर्पुरितं [illegible] ॥ ३८ ॥

इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेविजयध्वजटीकायांद्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

श्रेयःसृतिं भक्तिमुदस्य ते विभो इत्यादिना ' यदि प्रयास्यन्नृप पारमेष्ठ्यं ' इत्यादिना च क्रमेण सद्योमुक्तिक्रममुक्त्युपायौ ज्ञानयोगावुक्ता सतीरपि केवलं भक्तियोगहेतुमनवर्पितकर्म्मणोऽप्युक्ता सालम्बिक्रियायोगस्य तु कैमुत्यमेवागीतं यथा, न हीति । टीका च—संसृतिसंसरतः पुंसो यद्यपि भक्तिमार्गोऽस्ति योगादयः समीचीनत्वमपेक्ष्याह न हीति । यतोऽनुष्ठिताद्भक्तियोगो भवेत् कुतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव इत्येषा । यच्छब्देनात्र भगवत्सम्बन्धिकार्य्यं कर्म्मोच्यते, स वै पुंसां परो धर्म्मः इत्युक्तेः अन्वयैः ॥ ३३ ॥

स हि भक्तियोगः सर्व्ववेदसिद्ध इत्याह भगवानिति । भगवान् ब्रह्मा कूटस्थो निर्विकार एकाग्रचित्तः सन्निर्त्यर्थः त्रिः त्रीन् वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य्य यत् आत्मनि हरौ रतिर्भवेत् तदेव भक्तियोगाख्यं वस्तु मनीषया अध्यवस्यत् निश्चितवान् । (त्रिरन्वीक्ष्येति कर्म्मज्ञानभक्तिप्रतिपादकतयाभिप्रेत्येति ज्ञेयम ।) अत्राप्युपसंहारानुरोधेनात्मशब्दस्य हरिवाचकता । निरुक्तञ्च —आप्ततत्वाच मातृत्वादात्मा हि परमो हरिः इति । अथवा (परमवेदविदा श्रीभगवता स एव मत इत्याह ।) भगवान् स्वप्रकाशःसार्व्वज्ञ्यादिगुणः परमेश्वरोऽपि सर्व्ववेदाभिधेयसाराकर्षणलीलार्थं त्रिरन्वीक्ष्य तत्र शास्त्रविदन्तराणामीक्षणमनुकृत्य । अनन्तवैकुण्ठवैभवादिमयानामनन्तविरिञ्चिपाठभेदानां वेदानां तथेक्षणञ्च तेनैव संभवतीत्याह—कूटस्थः एकरूपतयैव कालव्यापीति । अतएवोक्तं स्वयमेव—किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ इति । श्रीशुकेन च—निगमकल्पतरोर्गलितं फलम् इति ॥ ३४ ॥

अन्वितरेषां तावत् कथं तस्मिन् भगवति आस्तिक्यबुद्धिः स्यात् तत्राह भगवानिति । स्वात्मना स्वचित्तेन प्रथमं द्रष्टा जीवो लक्षितः कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति । दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिद्वारा लक्षणैः स्वप्रकाशद्रष्टृलक्षकैः । तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिद्वारानुमापकैरिति । अथ भगवानपि लक्षितः । केन सर्व्वभूतेषु सर्व्वेषु तेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेणान्तर्यामिणा । आदौ सर्व्वैर्द्रष्टृभिरन्तर्यामी लक्षितः । ततस्तेन भगवानपि लक्षित इत्यर्थः । स तु पूर्व्ववत् द्वेधैव लक्ष्यते । तथा हि कर्तृत्वभोक्तृत्वयोरस्वातन्त्र्यदर्शनात् कर्म्मणोऽपि जडत्वात् सर्व्वेषामपि जीवानां तत्र तत्र प्रवृत्तिरन्तःप्रयोजकविशेषं विना न घटत इत्यनुपपत्तिद्वारा अन्तर्यामी लक्ष्यते । "एष ह्यनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मानयति बुद्ध्या बोधयति तस्मादेतामाहुः स्मृतिरस्मृति"रिति माल्लवेयश्रुतिश्च । अथ तस्मैवान्तर्यामित्वैश्वर्य्याय तेषु यदि सर्व्वांशेनैव प्रविशति कोऽपि परस्तदा स्वतःपूर्णत्वाभावादनीश्वरत्वमेव स्यादित्यनुपपत्तिद्वारान्तर्यामिरूपेण तस्यांशेन भगवानपि लक्षितः । अतएव गीतोपनिषत्सु—अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति । विष्णुपुराणे च—स्वशक्तिलेशावृतभूतसर्गः इति । तथा जीवाः प्रयोजककर्तृप्रेरितव्यापाराः अस्वातन्त्र्यात् तक्षादिकर्म्मकरजनवत् इत्येवमन्तर्यामिणि तद्द्वैधाव्याप्तिद्वारा सिद्धे पुनस्तेनैव भगवानपि साध्यते । तुच्छवैभवजीवान्तर्यामिस्वरूपमीश्वरतत्त्वं निजांशितस्वाश्रयम् । तथैव पर्य्याप्तेः । राजप्रभुत्वाश्रिततक्षादिकर्म्मकरप्रयोजकप्रभुत्ववदिति । अथवात्र—यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः इत्येवोदाहरणीयम् । अनेनैव गतिसामान्यञ्च सिध्यतीति ॥ ३५ ॥

अथ किन्तत् यतस्तत्र रतिः स्यात्तथैव यच्छ्रोतव्यम् इत्यादिप्रश्नस्योत्तरत्वेनोपसंहरति तस्मादिति । चकारात् पादसेवादयोऽपि गृह्यन्ते ॥ ३६ ॥

इत्युत्पत्तिमेव श्रवणप्राधान्येन दर्शयन् तन्महिमपराकाष्ठामाह पिबन्तीति । सताम् आत्मनः प्राणेश्वरस्य । यद्वा व्यधिकरणे षष्ठी सतां स्वस्य यो भगवान् तस्येत्यर्थः । तेषां भगवति स्वामित्वेन ममतास्पदत्वात् । अत्र पुनन्तीत्यनेन पूर्व्वोक्तः स्थूलधारणामार्गश्च परिहृतः भक्तियोगस्यैव स्वत पावनत्वादलं तत्प्रयासेनेति । तत्र कथामृतं प्रशस्यमानं श्रीभागवताख्यमेव मुख्यं, यस्यां वै श्रूयमाणायाम् इत्यादिकञ्च तथैवोक्तमिति ॥ ३७ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवंफलंनिरूप्योपसंहृत्यएतन्मार्गप्रवेशेकियंतउपायाःसंतीत्याकांक्षायामाह नह्यतोऽन्यइति अस्मात्पूर्वोक्तात्अन्यःशिवःकल्याणरूपः साधनद्वयाभावमपिसुखकरः पंथा आदौतत्रनिविष्टस्यपुनर्धर्माभावार्थमार्गरूपःकोऽपिनास्ति बहूनांजगतियोग्यः एतद्ज्ञानेनइहसंसारेविशतां मनुष्याणांसंसारैकस्वभावानांतंमार्गंपुनःस्मारयति वासुदेवेभगवतिभक्तियोगोयतोभवेदिति मोक्षदानार्थमागतेभगवतिसाक्षात्परब्रह्मरूपेतत्साकारेणापरिच्छिन्नेपरिणतेतःकरणेनत्वासनेषड्गुणैश्वर्यरूपेणाविर्भूतेयेनैवोपायेनपरमाप्रीतिर्भवतिसएवोपायइत्यर्थः अवणादिभिःस्नेहः ततोमननादिध्यासनरूपेणासर्वभावस्नेहःद्वितीयः ततोऽपिसुखमध्यानेनहृदिभगवतिसमागतेतत्रयःपरमस्नेहःसाक्षाद्भगवत्प्रवेशहेतुः सफलरूपोभक्तिसाधनरूपोऽपिअवांतरव्यापाररूपोऽपीतितत्रैहेतुर्मार्गः गृहान्निर्गतस्येष्टदेशपर्यंतंविततः तत्रपूर्वभागः साधनरूपः मध्यमभागोवांतरव्यापाररूपः अग्रिमोभगवत्संबद्धःफलरूपः तत्रश्रवणादिध्यानद्वयंचक्रमादिततभूमिः प्रीतिपादौ सावंतर्प्रीतिःअन्मार्गेणतावत्पर्यंतं गच्छतितदाभगवंतंप्रापयति नान्यथेति ॥ ३३ ॥

फलसाधननिर्धारः पूर्वमेवजातइत्याह भगवानिति ब्रह्मैवकृत्स्नंवेदमुक्त्वाप्रियमाणश्चवेदमापितद्ब्रह्मकव्यमिति पूर्वोक्तमनादिसिद्धं रात्रिभूवेदमनीषयाविचारकबुद्ध्याआलोचनमेकहेतुत्वमानितावर्तितोभवतसाधनविचारेक्रियमाणे "एवमेवपृष्टुत" इत्यादिवाक्यैःप्रीतिमेवाधोतरव्याणांरतात्वाभगवंतमुक्तिम्भ्यंतीतिविचार्यमुख्यसाधनंभक्तिमुक्तवातत्साधकत्वेनान्यादिरयच्छुत्वायत् तत्रापिकूटस्थोनिश्चलः ॥ ३४ ॥

एवंप्रमाणेनयुक्त्याचभक्तिमार्गेस्थिरीकृतस्तत्रत्यानांश्रद्धांवरंपरोत्कर्षेणकुर्वन्नाह, भगवानिति अतिपुरुषेतिविशेषणं सार्व्वज्ञैश्वर्य्यादीनि सर्वविनसर्वथाबाधितविषयाणि परंपरोपचीयमान भगवद्रूपैः सर्वैः सर्वभूतेषुप्रकाशितः कल्पकवाक्यतः नैयायिकैः कर्तृत्वेन मीमांसकैर्यज्ञपुरुषत्वेनसांख्यादिभिः करणत्वेन अन्येश्चतत्तेदेवतानतत्वेन शास्त्रत्वेनचान्यैर्द्रष्टात्वेनचसर्वैरेवप्रमाणैरुक्तोलक्षितः संपद्यतइतिसम्बन्धः अनुभवेनयुक्त्याचस्वात्मनाअनुभवेन दृश्यैर्द्रष्टा बुद्ध्यादिभिरिन्द्रियैः मनसाचरक्षुर्विद्वद्भिःजीवेनुभवेनसकलमनोभिःक्रियादिभिः अवयवानुभवकैःतर्कसहकृतैःपरोक्षज्ञानजनकैः लक्षितइतिसंबंधः लक्षणयाद्योतितइत्यर्थः ॥ ३५ ॥

तस्मात्सर्वेषामेवदर्शनानामप्रयोजकत्वात्पूर्वोक्तप्रकारेणैवकर्त्तव्यमित्युपसंहरति तस्मादिति सर्वात्मनेतिउत्तरांशसाहित्येनराजर्षिविश्वासार्थमुक्तं हरिरितिसाधनदशायांजातरुचेरदूरीकरणार्थं सर्वत्रसर्वदेतिदेशकालविचारोनकर्त्तव्यः पूर्ववत्श्रोतव्यादिफलार्थे भगवानिति नृणामितिमनुष्यमात्राधिकारित्वम् ॥ ३६ ॥

पूर्वमार्गेवस्तुतस्तंत्रोक्तप्रकरणस्यसमासतस्तात्साधारणभक्तस्यापिशुद्धिद्वारामगवत्प्रापकत्वमाह पिबंतियेभगवतइति बहिःस्थितस्यतेशंगंधमात्रंभगवतःआत्मनः सतामितिसर्वेषांमत्वभगवत्त्वेनभगवान्स्फुरतिसतांत्वात्मत्वेनापि सर्वेसकामाः संतः प्रेमलक्षणोविभागः कथे वासूतं श्रवणपुटेषु उत्तमितकर्णपुटेषुपूर्णं विषयैर्विदूषितमाशयंपुनंति यथांतरसाध्यरोगव्याप्ताः वैद्यैः अमृतरसेनसिद्धाक्रियंतेतथांतः करणमपिविषयेअत्यंतसहितैःविशेषेणदूषितं सर्वथासन्मार्गेनहितादृशमपिपुनंतिक्रमात्तच्चरणसरोरुहांतिकंवैकुंठभक्तिंवाप्नुवंतीत्यर्थः ॥

इतिश्री भागवत सुबोधिन्यांद्वितीयेस्कंधेद्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

किन्तु सर्व्वसाध्यपरमसारप्रापकत्वयमेव पन्थाइत्याह न हीति । यतः भक्तियोगः प्रेमा भवेत् अतोऽन्यः शिवः सुखरूपो निर्व्विघ्नश्च पन्था नास्त्येव । अत्र पूर्व्वम् उक्तलक्षणं स्मृतिद्वयं यथा मोक्षप्रापकं तथायं पन्था भक्तियोगप्रापक इति प्रापकस्यास्य पथः परमोत्कर्षप्रतिपादनादेतत्प्राप्यस्य भक्तियोगस्यापि स्मृतिद्वयप्राप्यान्मोक्षात् परमोत्कर्षो युक्तिसिद्ध इतिभक्तियोगस्यास्य प्रेमलक्षणस्य मोक्षसाधनत्वं न व्याख्यातुं शक्यमित्यवधेयम् ॥ ३३ ॥

ननु त्वं मनीषया सर्व्वसारत्वेन स्वाभिमतत्वेन चेममेव पन्थानं निश्चिनोष्यन्यो वा तत्र सामान्यस्य वा का कथा भगवानेव स्वमनीषया प्रथममेव निरवधीदेवेत्याह । भगवान् स्वप्रकाशसार्व्वज्ञ्यादिगुणः परमेश्वरोऽपि स्वनिश्वासोद्भूतं ब्रह्म वेदं कार्त्स्न्येन त्रिरन्वीक्ष्येति यथान्ये मुनयः शास्त्रं द्विस्त्रिरन्वीक्ष्यैव तत्तात्पर्य्यं पर्य्यालोचयन्ति तथैव "स मुनिर्भूत्वा समचिन्तयत्" इति श्रुतेर्भगवानपि मुनिलीलत्वेनैव सर्व्ववेदाभिधेयसाराकर्षणलीलया वेदार्थानां दुर्ज्ञेयत्वं लोके व्यञ्जयन् त्रिर्विचार्य्येत्यर्थः । अनन्तवैकुण्ठवैभवादिमयानामनन्तविरिञ्चिपाठ्यभेदानां वेदानां तथेक्षणञ्च तेनैव सम्भवतीत्याह कूटस्थः, "कालव्यापी स कूटस्थ एकरूपतयैव यः" इत्यमरः । अतएवोक्तं स्वयमेव—किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ इति । सः तत् वस्तु अध्यवस्यत् सर्व्ववेदप्रतिपाद्यत्वेन निश्चिकाय यतः आत्मनि स्वस्मिन् रतिः प्रेमा भवेत् । प्रेम्णो हि प्रथमावस्था रतिः ॥ ३४ ॥

सा च रतिः, येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् इति भगवद्वाक्येनाग्रे प्रतिपादयिष्यमाणा शान्तिप्रीतिसख्यवात्सल्यप्रियताभिधाना पञ्चविधा भवति । तत्र प्रथमं शान्ताख्याया रतेरसाधारणत्वेन प्रकारं विषयालम्बनञ्च दर्शयति भगवानिति । स्वात्मना स्वस्य जीवस्यात्मना अन्तर्यामितयेव स्वस्मिन्निव सर्व्वभूतेषु सर्व्वव्यापकत्वात् तद्वती भगवान् हरिः लक्षितः शास्त्रमुखैरनुभवगोचरीकृत इत्यर्थः । विदुष्यहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति भगवदुक्तेः । ननु जीव एव कथं लक्ष्यते तदन्यजीवो वा येन भगवान् कृष्णो लक्षयितव्यः तत्राह । दृश्यैः बुद्ध्यादिभिर्हेतुभिः द्रष्टा जीवः लक्षितः दृश्यानां जड़ानां बुद्ध्यादीनां दर्शनं हि चेतनं द्रष्टारं विना न सम्भवेदित्यनुपपत्तिमुखेन तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिमुखेन चानुमितः तथा अनुमापयन्ति यानि लक्षणानि चिह्नानि तैर्द्रष्टा अन्तर्यामी च लक्षितः ; तानि च सर्व्वस्यापि जीवस्य कर्तृत्वभोक्तृत्वयोरखातन्त्र्यं तथा कर्म्मसाम्येऽपि फलतारतम्यं क्वचित् फलाभावश्चेत्यादीनि ज्ञेयानि । तथाहि जीवाः प्रयोजककर्तृस्वामिकाः, अस्वातन्त्र्यात् यथायोग्यस्वामिदत्तकर्म्मफलतारतम्यतदभाववत्त्वाच्च, तक्षादिकर्म्मकरजनवदिति ॥ ३५ ॥

भक्तियोगो यतो भवेत् इत्यत्र रतिरात्मन् यतो भवेत् इत्यत्र च यत्पदद्वाक्यं साधनमाह तस्मादिति । यस्मात् न ह्यतोऽन्यः शिवः पन्थाः तस्मादित्यर्थः यस्मात् सर्व्वभूतेषु भगवान् लक्षितस्तस्मादिति वा । सर्व्वत्र सर्व्वदेति नात्र देशकालनियमोऽपेक्षितव्य इत्यर्थः । सर्व्वेणैवात्मना मनसा, न च कुत्रचन मनोवृत्तौ ज्ञानकर्म्मार्थमपेक्षणीयमिति भावः । तस्मादेकेन मनसा भगवान् सात्वतां पतिः श्रोतव्यः कीर्त्तितव्यश्च इत्यनेनैकवाक्यत्वात् । श्रोतव्य इति प्राधान्यात् श्रवणकीर्त्तनस्मरणान्युक्तानि, पादसेवनादीन्यपि ज्ञेयानि ॥३६॥

प्रीत्यादिचतुर्द्दशा रतेः साधारणयेनानुभावमेव प्रेम्णश्च साधनं वदन् तत्फलमपि दर्शयति । आत्मनः स्वस्य यो भगवदुपास्यस्तस्य नारायणस्य रामस्य कृष्णस्य वा कृष्णस्यापि स्त्रीयभावावतारस्य बालस्य पौगण्डस्य किशोरस्य वा कथामृतं तथा तादृशस्य तस्य सतां भक्तानां नारदादीनां हनुमदादीनां ब्रह्मादीनां श्रीरामादीनां गोपबालादीनाञ्च कथामृतम् । पिबन्तीत्यनेन तत्कर्त्तृकं आस्वादनं व्यञ्जितं तथात्वे एव माधुर्य्योपलब्धेरेव पानपदप्रयोगसिद्धेः । अज्ञातरतीनां तु तस्मात् सर्व्वात्मना इत्यनेन श्रवणकीर्त्तनादीनि रतेः साधनान्युक्तान्येव । आशयमन्तः करणं पुनन्ति क्षालयन्तीत्यनुसंहितं फलं व्रजन्ति साक्षात् सेवित्वमित्यनुसंहितं चाहमिति, अतः पृच्छामि संसिद्धिम् इत्यस्य प्रश्नस्योत्तरमुक्तम् ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र द्वितीयोऽयं जातः सतां मुदे ॥ २ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

[illegible] इत्यादिनाभिधत्ते अवधृतौ समाधावमलमनसा निर्मलमतिना प्राप्तेन पुरुषोत्तमविभूतिविशेषतः नैर्गुण्यस्थामतेरमुष्यानुकथनेहेतिति हेतोपगुह्यादेपदंपदेहरयादिनाभिपरामर्शिन्यदर्शिता तेनात्मना स्वात्मनुपैतीति भगवत्प्राप्तिरूपंतत्फलंचदर्शितमथेदानीं च भक्त्यंगस्वपुरुषार्थत्वमाह नहीतिद्वाभ्याम् यतोभक्तियोगोभवेदतोऽन्यः संसृतौ क्षितौजीवस्यशिवःक्षेमकरः पंथानेवास्तिहीतिनिश्चये ॥ ३३ ॥

भगवान्ब्रह्माकूटस्थःस्थिरप्रज्ञः [illegible] आत्मन्परमात्मनिरतिर्भवेत्तदेवाध्यवस्यत निश्चितवान् ॥ ३४ ॥

नन्वलक्षेकर्थरतिःस्यादित्यत्राहभगवानिति सर्वभूतेषुपरतंत्रतयोपलभ्यमानेषुजन्मवृद्ध्यपक्षयमृत्युशीतोष्णवर्षादिकर्तास्वतंत्रोभगवान् हरिर्लक्षितोदृष्टोऽस्तिकिंचदृश्यैर्घटादिभिर्बुद्ध्यादीनिकरणान्यनुमीयंतेऽनुबुद्ध्यादिभिःस्वात्मकरणानांनियंताऽधोऽनुमीयते तेनस्वात्मना सर्वपुरुषयापुरुषसाक्षीदृष्टाऽनिष्टफलकंबुकर्मबुद्धलाक्षियोजकतयालक्षितोऽस्ति शिष्यबुद्धिवैचित्र्यार्थमिदमुक्तम् वस्तुतस्तुदेवैकवेद्योभगवानस्तीत्याहलक्षयंतीतिलक्षणानिवेदवाक्यानितैःतदर्थस्मारकैःस्मृतिवाक्यैर्भगवान्लक्षितः "सर्वेवेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्य" इत्यादिभिः" ॥ ३५ ॥

यस्माद्वासुदेवेभक्तियोगोभवेदतोऽन्यःशिवःपंथानास्तितस्माद्धेतोः हेराजन् ! परभक्तिलाभायसर्वत्रसर्वावस्थासुसर्वदाभगवान्निर्दिशंति श्रोतव्यः सतिश्रोतरिकीर्तितव्यः उभयाभावेस्मर्तव्यः कृष्णांनृभिः ॥ ३६ ॥

श्रवणादिफलमाह पिबंतीति भगवतः आत्मनः परमात्मनः सतांमहतांधनभूतंकथामृतम् अर्थोस्तेरवसद्भिःश्रवणपुटेषुसंभृतंपूरितंये पिबंति तेविधयैर्धिधूपितमपवित्रीकृतमाशयमंतःकरणंपुनंति पवित्रीकुर्वंति, ततोनिर्मलंज्ञानं ततः परामक्तिस्तयातस्यभगवतश्चरण सरोरुहयोरंतिकंनिकटंव्रजंतिगच्छंति ॥ ३७ ॥

इतिश्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधीयेद्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषाटीका ।

जिस इसयोग से भगवान् वासुदेव में भक्ति योग होजाता है इस योग से संसार में प्रवेश होनेवाले को दूसरा कोईमार्ग नहींहै ३३

भगवान् ने वेदको सब प्रकारसे बुद्धि पूर्वक तीन वक्त देखकर निर्विकार स्वरूप से यह निश्चय किया कि जिससे परमात्मा में रति होसके वही परम पुरुषार्थ है ॥ ३४ ॥

भगवान् सर्वभूतात्मा सर्वसाक्षी श्रीहरि दृश्य अनुमापक बुध्यादि गुणोंसे स्वरूपही से लक्षित होतेहैं ॥ ३५ ॥

हे राजन् ! जिससे सर्वकाल सर्व देशमें भगवान् श्रीहरिही मनुष्यों के श्रोतव्य तथा कीर्तनीय तथा स्मरणीय होतेहैं ॥ ३६ ॥

*जो पुरुष भगवान् परमात्मा की कथारूप अमृत जोकि सज्जनोंका जीवनहै जिसको कर्णरूपी दोनाओं में भरकर पीते हैं वेपुरुष विषयोंसे दूषित अंतःकरणको नाशकर के उस परमात्मा के चरण कमल के समीप को चले जातेहैं ॥ ३७ ॥

इति द्वितीयस्कंध का दूसरा अध्याय ॥ २ ॥

तृतीयोऽध्यायः ।

शुक उवाच । एवमेतन्निगदितं पृष्टवान् यन्नवान् मम ।
नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥
ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणः पतिम् ।
इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥
देवीं मायान्तु श्रीकामस्तेजस्कामो विभावसुम् ।
वसुकामो वसून् रुद्रान् वीर्य्यकामोऽथ वीर्य्यवान् ॥ ३ ॥
अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् ।
विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम् ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः ।
भक्त्युद्रेकेण तत्कर्म्मश्रवणादर ईर्य्यते ॥ ० ॥

इदानीम् अन्यदेवताभजनस्यापि पुत्रादिभजनवदेव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्व्वोक्तमनुवदति एवमिति । ममेति माम् । कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रियमाणास्तेषां विशेषतः एवम् एतत् हरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ १ ॥

ब्रह्मणः पतिं वेदपतिं ब्रह्माणम् । इन्द्रियपाटवकामस्त्विन्द्रम् । प्रजापतीन् दक्षादीन् ॥ २ ॥

मायां दुर्गाम् । विभावसुम् अग्निम् । वसुकामः धनार्थी । वीर्य्यं प्रभावः तत्कामः वीर्य्यवान् सन् रुद्रान् यजेत ॥ ३ ॥

अन्नाद्यं भक्ष्यं भोज्यं (भोग्यं) च । अदितेः सुतान् द्वादशादित्यान् । विशां देशस्थप्रजानां स्वाधीनतामिच्छन् साध्यान् यजेत ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तटिप्पणी ।

० ॥ १—४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंमुमुक्षोर्भगवच्छ्रवणादिकंकर्तव्यमित्युक्तम् अथतदेवव्यतिरिक्तमुक्षेत्रद्रर्थायतुमन्यदेवतानांक्षुद्रफलत्वंवक्ष्यन्पूर्वोक्तमनुवदति एवमिति मनुष्येषुकदाचिद्दैवशान्मनुष्यत्वंप्राप्तेषुजीवेषुयेमनीषिणः तेषांतत्रापियेम्रियमाणास्तेषांविशेषतोयत्कर्तव्यंपुरामांप्रतिपृष्टवान् तद्भगवच्छ्रवणादिकमेवेत्येवंनिगदितमुक्तमित्यर्थः ॥ १ ॥

कामफलप्राप्त्यर्थमन्येषांदेवतानांभजनमाह ब्रह्मवर्चसेत्यादिना ब्रह्मवर्चसंकामयमानः ब्रह्मणस्पतिंवेदपतियजेत इंद्रियकामः इंद्रियसामर्थ्यकामःइंद्रंयजेतत्यनुषंगः एवमग्रेऽपि प्रजापतीन्दक्षादीन् ॥ २ ॥

देवींदेवस्यविष्णोःसंबंधिनींमायांविस्मापनीयशक्तिं विभावसुमग्निं वसुकामः अर्थकामः वसून्यजेत वीर्यकामस्तुरुद्रान्यजेत यजनफलमाह वीर्यवानितिभवेदितिशेषः इदंसर्वत्रतत्फलावाप्तेरुपलक्षणम् ॥ ३ ॥

अन्नंभोज्यम् आद्यंभक्ष्यं खरंविशदमन्यवहार्यंभोज्यंखरंकठिनंविशदंविविक्तावयवंभक्ष्यमितिविशेषः तदुभयकामोदितियजेत अदितेःसुतान्द्वादशादित्यान्साध्यान्विशांसाधकःदिक्पतित्वकामः ॥ ४ ॥

श्रीमद्विजपर्व्वजकृत पदरत्नावली ।

हरेःश्रवणादिजनितभगवद्भक्तिरेवापेक्षितोपुरुषार्थसाधनमन्यदन्यदेवतायागादिकंप्रातिस्विकफलत्वंतदपिहेयंकायत्तमित्येतदस्मिन्नध्यायेनिरूप्यते तत्रप्रथमतोक्तमनुवदति एवमिति. भवान्मनुष्येषुमध्येम्रियमाणानांमनीषिणांनृणांयत्कर्तव्यत्वेनमत्सकाशेपृष्टवान्तदेवंनिगदितं यद्वा मनुष्येषुम्रियमाणानांनृणांयत्कर्तव्यत्वेनमनीषिणांमतंपृष्टवानेतादिति ॥ १ ॥

इदानीप्रातिस्विकफलप्रदेयागप्रकारमाहब्रह्मेति ब्रह्मवर्चसकामोबृहच्छ्रवणसंपत्कामः । शिष्यप्रशिष्यादिषुवेदप्रणेतृत्वेन ब्रह्मणस्पतिं वेदस्यपतिंबृहस्पतिं बृहज्जातिंजीवकमलासनशब्दराढिभिश्चितायातां यजेत । तत्तत्प्रोक्तसद्द्रव्यैरितिशेषः तुनाब्रह्मणिवृद्धिं सुखयति इंद्रियकामश्चक्षुरादींद्रियपाटवकामःशुक्रस्तंभकामोवा प्रजाकामःप्रजातुजनपुत्रपौत्रादियादवः प्रजापतीन्दक्षवपादीन् ॥ २ ॥

[illegible]
श्रीवर्चोऽन्नमन्नाद्यं विभावसुमाग्नेयं "तेजोबलेप्रभावेऽग्नेज्योतिष्मान्विभावसु" इति च वसुकामोहिरण्यकामः वीर्यकामः "वीर्यंवैराजमेतेजस्व [illegible]दित्यत्रोक्तोऽपि" इतिच ॥ ३ ॥
विशांवैश्यानाम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

॥ ० ॥ १ ॥ २ ॥
वीर्य्यवान् गलच्छ्रदनादिसाहस्वानित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

श्रीमद्वल्लभार्यकृत सुबोधिनी ।

ज्ञातव्यविषयत्वेनतत्त्वमेवंनिरूपितम् । उद्देशोनास्यनिपुणैःसाधनंविनिरूप्यते ॥ १ ॥
अरक्षंसाधनंवाक्यंदक्षंवाप्यत्रसंमतम् । अन्यथाक्रियमाणस्तुविघ्नौघ्यर्थतांव्रजेत् ॥ २ ॥
इंद्रियाणामदुष्टत्वेह्यनुकूलेतथेश्वरे । साध्यंसंपद्यतेपूर्णमतोऽत्रह्यमीर्यते ॥ ३ ॥
भजापितदभिप्रायात्प्रोतुर्वक्तुश्चगम्यते । तस्मात्साधनसंयुक्तःश्रृणुयाज्जतरोदृथा ॥ ४ ॥

एवमध्यायद्वयेनभवणंसविषयंनिरूप्यमहाफलेभवणेसर्वेषामप्रवृत्तिरदृष्टादिकंचिदस्तिनिमित्तंयतःसर्वेनप्रवर्तेतेइत्याकांक्षायांविघ्नवस्तूनि पुंसत्वादकरणहेतोर्बाधतदधिष्ठातृहेतोर्बाधाभवेत् । इत्याशंक्ययतोरप्यधिष्ठातुर्बलिष्ठत्वात्तत्प्रतिबंधादेवभवणादिष्वप्रवृत्तिरितिविनिश्चि त्यदेवतानांभजनेतत्प्रतिबंधोगमिष्यतीतिपूर्वंदेवतांतरभजनंसाधनमियम् । ततइंद्रियाणांचशोधनमित्याशंक्यदेवतांतरभजनेपुनर्बहिर्मुखत्वा त्तेषांनियतफलजनकत्वात्तत्प्रतिबंधाभावार्थंक्रियमाणोभजनेहेतोरंतरमापद्यतेतितेषांफलानांनियतत्वंप्रतिपादयितुंग्रथमंपूर्वेषुसंक्लेशनिवा रयितुंपूर्वोक्तमुपसंहरति एवमेतदिति ममममेति नृणांमध्येयेप्रियमाणाःतेषामप्युक्तं मनुष्याणामपिमध्येयेमनीषिणःतेषामप्ययंश्रवणादि कमुक्तमित्यर्थः ॥ १ ॥

पूर्वोक्तमुपसंहृत्यदेवतांतरभजननिराकरणार्थंस्वमतेभद्राविंशतिदेवाःतत्स्वरूपाःवेदेचयेत्रयस्त्रिंशद्देवाःवसवोरुद्राआदित्याःइंद्रःप्रजापतिश्चे तित्रिंशत्कोटीःतत्स्वरूपेण । किंबहुनासर्वेतेष्वंतर्भूताःतेत्वद्राविंशतिः । एतेदेवाःकलाविष्णोरितिवाक्यात् । तेचप्रजापतिप्रभृतिसोमांताः । तत्रप्रथमंरजोगुणाभिमानिनीदेवताब्रह्मणस्पतिःवेदादिकर्त्ताजगन्निर्माताचेत्यर्थः । तद्भजनेब्रह्मतेजोभवतीतिब्रह्मवर्चसकामएवतंभजेदित्यर्थः तत्सत्त्वाभिमानिनीइंद्रोदेवतायज्ञरूपःतद्भजनेइंद्रियसिद्धिर्भवतीतिइंद्रियकामस्तंभजेत । एवमुत्तरत्रापि । प्रजाकामःपुत्रकामःप्रजापतीन्दम रीच्यादीन्तमोधिष्ठात्रीदेवताम् ॥ २ ॥

देवींमायां प्रकृत्यधिष्ठात्रीदेवताम् । श्रीकामः धनकामः संपत्तिरूपंधनम् । तेजस्कामःस्वस्मिन्नधृष्यंतेजःपुरुषत्वमितिवावत् । विभावसु रग्निः वसुकामः धनमात्रकामः वसून्द्रोणादीन् । रुद्रान्वामादीन् वीर्यकामःपराक्रमकामः । अत्रफलेविशेषमाह अथवीर्यवानिति तदनंत रमेववीर्यवान्भवति वागभिमानिनीदेवताअग्निः गंधाभिमानिनीदेवतावसवः रुद्राआकाशस्य । अदितिर्भूमेः ॥ ३ ॥

अन्नाद्यकामः अन्नभोजनकामः अन्नभक्षणसामर्थ्यमन्नसमृद्धिर्वा । स्वर्गकामःस्वर्गलोककामः अदितेःसुतानद्वादशादित्यान् । तेजोऽभिमा नित्वं विश्वेदेवाःविश्वायाःपुत्राः राज्यकामः राजत्वकामः साध्यान्साध्यायाःपुत्रान् विशांदेशस्थप्रजानांसंसाधकःस्वाधीनकरणेच्छुः विश्वेदे वाश्चास्य साध्यावायोः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तृतीये तु वृथा श्रुतफलैवान्यश्रुरार्थना ।
तथैवेन्द्रियवैफल्यश्लोकं भक्तिमृते हरेः ॥

त्रिवमाख्यानां वृथां कृत्यं यत् पृष्टं तदेतत् योगमते मृतिश्चयं निगदितम् । तथा तेष्वेव मनुष्येषु मध्ये ये मनीषिणो त्रिवमाख्यास्तेषां भवद्विधानामेवम् एतत् श्रवणकीर्तनस्मरणकथामृतादि निगदितम् ॥ १ ॥

ये च तेष्वेव मनुष्येषु मध्ये मन्दधियस्तेषाञ्च कृत्यं श्रुत्यित्याह । यद्वा किं वा भजनीयमिति यत् पृष्टं तत्र प्रथमं मन्दधियां भजनी यामाह ब्रह्मवर्चसेत्यादिना कामकामो यजेत सोमम इत्यन्तेन । ब्रह्मणः पतिं वेदपतिं ब्रह्माणम् । प्रजापतीन् दक्षादीन् ॥ २ ॥

मायां दुर्गाम् । विभावसुम् अग्निम् । वीर्य्यवान् बलवान् पुरुषः वीर्य्यकामः बहुस्त्रीसम्भोगार्थं शुक्राधिक्यकामश्चेत् रुद्रान् यजेत ३ अन्नादं भोज्यं भक्ष्यञ्च । अदितेः पुत्रान् द्वादशादित्यान् । विशां कृषिवाणिज्यादीनां साधकः साधने प्रवृत्तः साध्यान् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

यांतमनवद्यभजनस्यमोक्षदेनुतथाप्यनुकूलपादेयत्वमुक्तमिहानींतिहेयद्वदर्शयितुमितरदेवभजनस्यबहुक्लेशपादेयत्वंवदन्पूर्वोक्तमनुवदति एवमि ते यनुष्येषुकथाश्चिद्दैवयोगेनमनुष्यत्वंप्राप्तेषुजीवेषुयेमनीषिणस्तेषांतत्रापिविशेषतोत्रिवमाख्यानांबलवत्कौतुकंप्रतिममांवृष्टवान् । तदेवमे तत्परिकथाश्रवणादिकंनिगदितमुक्तम् ॥ १ ॥

ब्रह्मवर्चसंकामयमानोजनः ब्रह्मणस्पतिंवेदपतिंयजेतपूजयेत् इंद्रियकामस्तमेवकामः प्रजापतीन्दक्षप्रभृतीन् ॥ २ ॥

देवींमायांदेवस्वभगवतःसर्वशक्तिमोहनायाःप्रकृतिरूपाम् विभावसुमग्निम् वसुकामोधनकामः वीर्यकामः प्रभावकामः रुद्रान्यजेत [illegible]यजमानांतरवीर्यवान्स्यात् ॥ ३ ॥

आयुस्कामोऽ[illegible] इलां यजेत् ।
प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥
रूपाभिकामो गन्धर्व्वान् स्त्रीकामोऽप्सर-उर्व्वशीम् ।
आधिपत्यकामः सर्व्वेषां यजेत परमेष्ठिनम् ॥ ६ ॥
यज्ञं यजेत् यशस्कामः कोषकामः प्रचेतसम् ।
विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम् ॥ ७ ॥
धर्म्मार्थ उत्तमःश्लोकं तन्तुं तन्वन् पितॄन् यजेत् ।
रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अन्नभोज्यंसंश्लिष्टावयवम् आद्यंभस्यंविविक्तावयवम् तनुमयकामः अदितेःसुतान्द्वादशादित्यान् विशांदेशस्थप्रजानांसंसाधकः स्वकी यामभिच्छन्साध्यान्यजेत ॥ ४ ॥

भाषा टीका ।

श्रीशुकउवाच—यह हमने तुम से कहा है जोकि तुमने हमसे पूछा है जोकि मनुष्यों के मध्यमें अवश्य मरने वालों को कर्त्तव्य है ॥ १ ॥

ब्रह्मतेज की कामना करने वाला पुरुष ब्रह्मा का यजन करे इंद्रिय पुष्टि कामना वाला इन्द्रका यजन करे प्रजाकी कामना वाला दक्षादि प्रजापतीयों को पूजे ॥ २ ॥

लक्ष्मी के कामनावाला मायादेवीकूं पूजे तेजकी कामना वाला अग्नीको पूजे धनकी कामना वाला वसुदेवताओं को पूजे और वीर्य की कामना वाला रुद्रों को पूजे ॥ ३ ॥

अन्नभोजनकामना वाला अदितिको पूजे स्वर्ग कामना वाला देवताओंको पूजे राज्यकी कामना वाला विश्वदेवों को पूजे त्रैलोकांपति होना होतो साध्य नामक देवताओं का पूजन करे ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

इलां पृथ्वीम् । प्रतिष्ठा स्थानाद्प्रच्युतिः । रोदसी द्यावाभूमी ॥ ५ ॥

अप्सराश्चासौ उर्व्वशी च ताम् ॥ ६ ॥

यज्ञं यज्ञोपाधिं विष्णुम् । कोषो वसुसञ्चयः । वसुकाम इत्यत्र धनमात्रमिति भेदः । दाम्पत्यम् अन्योऽन्यप्रीतिः । तदेवार्थो यस्य सः ॥ ६ ॥

धर्म्मार्थः धर्म्मकामः उत्तमःश्लोकोपाधिं विष्णुम् । तन्तुं तन्वन् सन्तानवृद्धिमिच्छन् । रक्षा बाधानिवृत्तिः तत्काम: पुण्यजनान् यक्षान् ; ओजो बलं तत्कामः मरुद्गणान् देवान् ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य टिप्पणी ।

वसुकाम इत्यत्र इति । पूर्व्वोक्ततृतीयश्लोके इति यावत् ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

पुष्टिर्देहबलंतत्काम:इलांपृथ्वींयजेतप्रतिष्ठाकाम:स्थानादप्रच्युतिकाम:रोदसीद्यावापृथिव्यौ तयोःसर्वलोकाधारत्वाल्लोकमातृत्वम् ॥ ५ ॥

रूपमभिकामयमानः अप्सराश्चासावुर्वशीचेतां सर्वेषामाधिपत्यकामः प्रभुत्वकाम:परमेष्ठिनंब्रह्माणम् ॥ ६ ॥

यज्ञंविष्णुं कोशोवसुसंचयः वसुकामइत्यत्रधनमात्रमितिभेद:प्रचेतसंवरुणंविद्याकाम:ज्ञानकाम: दांपत्यार्थेदंपत्योरन्योऽन्यप्रीत्यर्थं, सतीमित्युमाविशेषेणांपतिव्रतामुमांदेवीमित्यर्थः ॥ ७ ॥

उत्तमश्लोकं विष्णुं तंतुंसंतानंतन्वन्विस्तारयन्संतानंसृष्टिकामइत्यर्थः रक्षाकाम: बाधानिवृत्तिकामः पुण्यजनान्यक्षानोजस्कामः बलकामः ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

इलांभूमिं प्रतिष्ठाकामःस्थानाद्रसेभ्यः लोकमातरौलोकस्यजनतायाविधात्र्यौ द्यावापृथिव्यौ चोक्ता "मधुधौरस्तुनःपिता" इतिश्रुतेः ॥ ५ ॥

अप्सराश्चासावुर्वशीचेत्यप्सरः उर्वशी । तां परमेष्ठिनंचतुर्मुखम् ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

[illegible] कलमेदाजपुत्रवत्ति: कोशकामोनिधिकाम:प्रचेतसंवरुणं रसनेंद्रियाधिष्ठातारं दांपत्यार्थेदंपत्यो:प्रीत्यर्थम उमांसतीं [illegible] ॥ ७ ॥

धर्मार्थधर्मसिद्ध्यर्थमुत्तमश्लोकंविष्णुम् "अकामोधीरसकामोमोक्षकामउदारधीरेव सर्वकामोवा:सविष्णुंपुरुषंयजेदि"त्यनेनो क्तुरेवोत्तमश्लोकतिनिष्ठीयते अकाम:पुरुषंपुमानित्यत्रापिपुरुषोविष्णुरेवास्मादुक्तप्रमाणात् तंतुंसंतत्यविच्छेदंतन्वन्वितततंकुर्वन् । पुरुषयज्ञान् रक्षादर्शनेमद्रादीन् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ: ।

उत्तम:श्लोका: पुरुषश्लोका धार्म्मिका नलादय: तदुपाधि तदधिष्ठानकं विष्णुमित्यर्थ: । उत्तम:श्लोक: धर्म्माचरणव्याप्तिर्वा ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

आयु:काम:आयुष्याभिवृद्धिकाम: आश्विनौअश्विनीकुमारौ प्राणदेवता पुष्टिकाम:स्थूलत्वकाम: सर्वाम्बोआम्बाकामयते इलामूमि:शब्दा धिष्ठानदेवता प्रतिष्ठाकाम:लोकेसम्माननाकाम: पुरुषइति योग्यस्यैवैषाकामना एवमन्यत्रापिज्ञातव्या रोदसीद्यावापृथिव्यौ लोकानांमातरौ लोकमातृत्वंगुण: मातृकापूजायांविहितेवा इस्ताभिमानिनी ॥ ५ ॥

रूपाभिकाम:सौंदर्यकाम:गंधर्वान्विश्वावसुप्रमृतीन्पतारोवृन्दभृतोदेवता: "एतेवैगंधर्वाप्सरसोयद्वाष्टभृत"इतिश्रुते: स्त्रीकाम:सुंदर स्त्रीप्राप्तिकाम: अप्सरसोरूपामुर्वशीम् अधरारणिदेवतां देवपत्नीमध्येवा आधिपत्यकाम:सर्वेषामहमधिपतिर्भविष्यामीति परमेष्ठिनं गुणाधिष्ठातारम् ॥ ६ ॥

यज्ञंयज्ञपुरुषं चरणाधिष्ठात्री यज्ञस्काम:कीर्तिकाम: कोशकाम:मंडारकाम: कोशोधनसंचय: प्रचेतसंवरुणं रसनेंद्रियाधिष्ठा तारं विद्याकाम:ब्रह्मविद्यादिविद्या: गिरिशंमहादेवं अहंकाराधिष्ठातारं दांपत्यार्थेदंपत्यो:प्रीत्यर्थम उमांसतीं जन्मद्वयव्यापिनींमहादेव भार्याम् ॥ ७ ॥

धर्मार्थधर्मसिद्ध्यर्थमुत्तमश्लोकं वेदवेद्यं तंतुंतन्वन्संततिविस्तारयन् पितृन्अग्निष्वात्तादीन् रक्षाकाम:मूतादिभ्य:शत्रुभ्य: रक्षार्थिच्छन् पुरुषयज्ञानूयक्षादीन् ओजस्काम:इंद्रियबलकाम: मरुद्गणानदितिपुत्रान् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

इलां पृथ्वीम । प्रतिष्ठा स्वपदाद्प्रच्युति: । रोदसी द्यावापृथिव्यौ ॥ ५ ॥

अप्सराआसावुर्वशी च ताम् ॥ ६ ॥

यज्ञं यज्ञसंज्ञमिन्द्रम । दाम्पत्यं स्त्रीपुरुषयो: परस्परोपरि प्रीति: ॥ ७ ॥

उत्तम:श्लोकं धर्म्मम । तन्तुं तन्वन् सन्तानवृद्धिमिच्छन् । पुरुषयज्ञान् यक्षान् । मरुद्गणान् देवान् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप: ।

पुष्टिकाम: देहस्यबलंस्थौल्यमिच्छन् इलांपृथ्वीम प्रतिष्ठाकाम: स्थानाद्प्रच्युतिकाम: रोदसीद्यावापृथिव्यौलोकमातरौलोकाधार भूते ॥ ५ ॥

रूपाभिकाम:रूपमभिकामयमान: अप्सराआसावुर्वशीचताम आधिपत्यकाम: प्रभुत्वंकामयमान: परमेष्ठिनंब्रह्माणम् ॥ ६ ॥

यज्ञंयज्ञमूर्तिविष्णुम् कोशकाम:विपुलधनालयकाम:प्रचेतसंवरुणं दंपत्यांरम्योऽन्यहिताचरणंदांपत्यंतदेवार्थ:प्रयोजनंयस्यस: ॥ ७ ॥

धर्मार्थ: धर्मकाम: उत्तमश्लोकंसर्वोत्तमकीर्तिविष्णुम् तंतुंतन्वन्सतानंविस्तारयन्रक्षाकाम:बाधानिवृत्तिकाम:पुरुषयज्ञानूयक्षान् ओज-स्काम: बलकाम: ॥ ८ ॥

भाषा टीका

आयु की कामना वाला अश्विनी कुमार देवों को पूजे पुष्टि की कामना वाला पृथि को पूजै प्रतिष्ठा चाहने वाला पुरुषतो लोक के माता पिता आकाश पाताल को पूजे ॥ ५ ॥

रूपकी कामना वाला गंधर्वों को पूजै स्त्रीकी कामना वाला उर्वशी अप्सरा को पूजै सबका अधिपति होने की कामना वाला चतु-र्मुख ब्रह्मा को पूजे ॥ ६ ॥

यज्ञ की कामना वाला यज्ञनाम विष्णु को पूजे खजाने की कामना वाला वरुण को पूजे विद्या ज्ञान की कामना वाला श्रीमहादेवजी को पूजे निश्चल पति पत्नी भाव चाहने वाला सतीजी पार्वती को पूजे ॥ ७ ॥

धर्म चाहने वाला उत्तम श्लोकोनामि विष्णु को पूजे संतानों के विस्तार की कामना वाला अग्निष्वात्तादि पितरों को पूजे बाधा निवृत्ति के कामना वाला मणि भद्रादि यक्षों को पूजे तेज की कामना वाला देवगणों का पूजन करे ॥ ८ ॥

राज्यकामो मनूंश्चेज्य [illegible]
कामकामो यजेत् [illegible] पुरुषं परम् ॥ ९ ॥
अकामः सर्व्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥
एतावानेव यजतामिह निःश्रेयसोदयः ।
भगवत्यचलो भावो यद्भागवतसङ्गतः ॥ ११ ॥
ज्ञानं यदाप्रतिनिवृत्तगुणोर्म्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः कोनिर्वृतो हरिकथासु रतिं न कुर्य्यात् ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

राज्यं राजत्वं तत्कामः मनून् मन्वन्तराधिपान् देवान् । राज्ञः कार्म्मे राज्ये तत्कामः विश्वादि देवानिति विशेषः । अभिचरन् शत्रु रक्षसमिच्छन् निर्ऋतिं राक्षसम् । कामकामः भोगेच्छुः । अकामः वैराग्यकामः । पुरुषं परं प्रकृतिव्यतिरेकोपाधिर्भोधरम् ॥ ९ ॥

अकामः एकान्तभक्तः । उक्तानुक्तसर्व्वकामो वा । पुरुषं पूर्णं परं निरुपाधिम् ॥ १० ॥

पूर्व्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति । इन्द्रादीनपि यजतां इह तत्तद्यजनेन भागवतानां सङ्गतो भगवत्यचलः भावः भक्तिः भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयो लाभः । अन्यत् सर्व्वं तुच्छमित्यर्थः ॥ ११ ॥

भागवतसङ्गत इत्यनेन सूचितां हरिकथारतिं स्तौति ज्ञानमिति । यत् यासु कथासु ज्ञानं भवति । कीदृशम् आ सर्व्वतः प्रतिनिवृत्तम उपरतं गुणोर्म्मीणां रागादीनां चक्रं समूहो यस्मात् । उत अनन्तरं तद्धेतुरात्मप्रसादश्च । यत्र यासु मनःप्रसादहेतुः गुणेषु विषयेषु असङ्गः वैराग्यञ्च । उभयत्रेति पाठे इहामुत्र च गुणेष्वसङ्गः । अथ कैवल्यमित्येव सम्मतः पन्था यो भक्तियोगः । निर्वृतः अवश्यम्भावेन आत्मज्ञानेनेति वा । तासु हरिकथासु को न रतिं कुर्य्यात् ॥ १२ ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य तट्टिप्पणी ।

विशेष इति । पूर्व्वोक्तचतुर्थश्लोकादिति शेषः ॥ ९ ॥ १० ॥

संयोगपृथक्त्वेनेति । सम्बन्धस्य भिन्नत्वेनेत्यर्थः । तत्तद्देवतायजने तत्तत्फलसिद्धिरिति पृथक्त्वम् । तत्तद्देवताभजनेन पारम्पर्य्यात् भागवतप्रसङ्गः तत्सङ्गत्या च भगवत्यचला भक्तिरिति संयोगः आदिरादिवदिति व्याख्यालेशः । अयमाशयः—एकस्य तुभयत्वे संयोगपृथक्त्वम् । अस्यार्थः—एकस्य तु उभयत्वे उभयफलसाधकत्वे संयोगपृथक्त्वम् । यथा—आदिरो यूपो भवति, आदिरो वीर्य्यकामस्येति यथैकस्य खदिरयूपस्य क्रत्वङ्गत्वं वीर्य्यसाधकत्वञ्च, तथात्र नानादेवतायजनं तत्तत्फलसाधकं हरिभक्तिफलसाधनञ्च । तत्रोभयफलसाधकत्वे स्थिते हरिभक्तिकामनयेन्द्रादयो यद्यद्याः नाम्यकामनयेति समुदायार्थः । यथा गोप कुमारिकाणां कृष्णकामनया कात्यायन्यर्च्चनम् ॥ ११—१९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

राज्यकामःमनुरूपान्देवानभिचरन्शत्रुमरक्षाभिच्छन्निर्ऋतिंराक्षसं कामकामःभोगेच्छुः अकामःवैराग्यकामःपरंपुरुषंपरमपुरुषं "योवो यांयांतनुंभक्त"इतिन्यायेनेंद्रादिरूपिणोऽपिपरमपुरुषस्यैवांतवत्फलदत्वात् तत्तत्फलेप्सुभिरिज्यमानःपरमपुरुषएवांतवत्फलानिप्रयच्छति "अनन्याश्चिंतयंतोमांये"तिरीत्यानुभजमानस्वरूपमेवमुक्तिंप्रयच्छतीत्यभिप्रायः ॥ ९ ॥

उदारधीरितिमोक्षकामविशेषणं तीव्रेणअविच्छिन्नेनभक्तियोगेन ॥ १० ॥

एवंयजनेनेंद्रादिःकदामोक्षंवाप्यतइत्यतआह एतावानिति इहास्मिन्लोकेयजतांनिःश्रेयसस्यमोक्षस्योदयोलाभः एतावान्एतदेवयत्किंचिद् भागवतसंगाद्भगवत्यचलोभावइतियत्भागवतसंगात्भगवत्यचलेभक्तिसतिनिःश्रेयसोदयःसिद्धएव तस्माद्भागवतसंगात् अन्यत्सर्वंतुच्छंपृथग्इतिभावः ॥ ११ ॥

यद्भागवतसंगतइत्यनेनसूचितांहरिकथांप्रस्तौतिज्ञानमिति यासुहरिकथासुज्ञानादीनिसंपद्यंतेतासुहरिकथासुरतिंकोनकुर्य्यादित्यन्वयः यद्वाहरिकथारतिंद्वाराप्रतिनिवृत्ताः गुणाः सत्त्वादिकार्य्याण्यविद्याकामकर्म्मलक्षणाः अनादिप्रवाहायोऽयमोहस्तदात्मकयोयस्मात्तस्मादात्मभूतेभ्योऽपि प्रियतमेभ्योऽन्यम् उभयत्रलोकद्वयेगुणेषुशब्दादिषुविषयेष्वसंगोवैराग्यं कैवल्यंमुक्तीनांपंथाःपथादृष्टयः कैवल्यसंमतपथः तत्प्राप्तीनांकैवल्यं संपद्यंतेसंपत्स्यंते तथाभूतासुहरिकथासुनिर्वृतः सुखितःरतिमासक्तिंकोनकुर्य्यात्सर्वोऽपिकुर्य्यादेवेत्यर्थः ॥ १२ ॥

[illegible] निर्ऋतिकोणाधिपतिं [illegible] अकामोनिष्कामरहितः पुरुषंपूर्णंपरंपुमान् ॥ ९ ॥

अकामोभगवत्प्रसादमंतरेणान्यत्रकामःसर्वकामः [illegible] देवतायजनमिच्छद्परंपूरुषंयजेतविष्णुयजनेसाधनमाह तीव्रेति ॥ १० ॥

नन्वेतानुद्दिश्यस्वयमुक्तिसाधनतास्यात्तंप्रकारमाह एतावानिति इहकर्मभूमौयजतांकाम्यानुष्ठानंकुर्वतांनिःश्रेयसोदयएतावान् भागवतानांसंगतःसेवालक्षणात् भगवतिहरौभक्तिलक्षणइतियत्सहेति ॥ ११ ॥

भागवतसंगाद्यत्रलोभावःकथंस्यादित्याशंक्यतेषांसहसिप्रसक्तानांहरिकथामृतानांश्रवणलक्षणपानादिनाप्रसक्तांतःकरणस्यपुंसोहरेरि तरत्रविरक्तस्य ज्ञानसाधनंभगवत्यचलाभक्तिस्तथाज्ञानंभविष्यतीत्याह ज्ञानमिति यदासत्सभासुप्रसक्ताभिःश्रुताभिर्याभिर्हरिकथाभिः पुंसःआत्मप्रसादोमनसःप्रसन्नतानैर्मल्यलक्षणा तदोभवत्यहेपरमहंसानांगतौपुविषयेष्वसंगःफलस्नेहराहित्यलक्षणावैराग्यंभवति अथ भक्तिसाधनवैराग्यजन्मानंतरंकैवल्यसम्भृतपथः सम्यक्संपादितमोक्षमार्गोभक्तियोगोजायतेतुशब्दात्तद्भक्तेष्वपिअथात्मनोहरेः प्रसादः स्यादनंतरंहरेरपरोक्षज्ञानंभवति कीदृशंप्रतिनिवृत्तमपक्रांतंसत्त्वादिगुणानिमित्तानामस्तिजायतइत्यादिषड्भींगाच्चक्रंपुनःपुनरावर्तनेनतत्स्थोक्तं यद्वापसारितसत्त्वादिगुणाएवऊर्मयस्तरंगास्तेषांचक्रंवेनतत्स्थेति यद्वा यासांहरिकथानांश्रवणाद्भगवद्परोक्षज्ञानंतदाप्रतिनिवृत्त गुणोर्मिचक्रंसत्त्वादिगुणानिमित्ताशनापिपासाशोकमोहरागद्वेषलक्षणाऊर्मयस्तेषांचक्रंनिरस्तंभवतितस्मादात्मप्रसादस्तस्मादुभयत्रगुणे- ष्वसंगस्तस्माद्वैराग्यात् कैवल्यंसंभ्रियतेऽनेनेतिकैवल्यसंभृतमपरोक्षज्ञानंतद्वेषपंथा मार्गोवस्यसतथोक्त एवंविधोभक्तियोगोजायते अथ- कस्मात्कोनिवृत्तोरसज्ञःपुरुषस्तासुहरिकथासुरतिंनकुर्यादित्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अकामः सर्वकामनाक्षयकामः । अत्र टीकायां पुरुषं प्रकृतिव्यतिरेकोपाधिमीश्वरमिति—प्रकृतेः सकाशात् यो व्यतिरेकः पूर्वं तत्सम्बन्धमारोप्य पश्चात् तद्भावचिन्तनं. वस्तुत एव तद्भावात् सोऽप्युपाधिर्यस्य तमित्यर्थः । प्रकृत्येकोपाधिमिति तु पाठः क्वचित् ॥ ९ ॥

एवं प्राक्तनाध्यायाभ्यां कर्म्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेऽपि सर्व्वदेवतोपासनेभ्यः श्रेष्ठत्वप्रवचनेन भगवद्भक्तियोग- स्यैवाभिधेयत्वमाह अकामः सर्व्वकामो वा इति । टीका च—अकाम एकान्तभक्तः । उक्तानुक्तसर्व्वकामो वा । पुरुष पूर्णं परं निरुपा- धिम् इत्येषा । तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता । कामना तु यादृच्छिकेनापि स्यात् । यथोक्तं महा- भारते—भक्ताख्याने क्षणं विष्णोः स्मृतिः सेवास्ववेद्यमनि । स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम् ॥ इति । तदुक्तं श्रीकर्दमं प्रति श्रीकपिलेन—न वै जातु मृषैव स्यात् प्रजाध्यक्ष मदर्हणम् इति अथवा यस्तत्कामस्तीव्रेणैव यजेत । ततश्च शुद्धिभक्तिसम्पादनायैवान्ते पर्य्यवसिष्यत्यसाविति प्रायेण सविशेषणमुपादिष्टम् । तदनेन एकान्तभक्ते मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यम् अपि तु सर्व्वकामेष्वपीति तदेव सर्व्वथापि निर्णीतम् । यद्वा अकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वम् । भक्तिमात्रकामत्वे व्याख्याते धर्म्मपुरुषार्थिन्यतिव्याप्तिः स्यात् तीव्रेण सर्व्वेषु साध्येषु परमसाधकतमेन ॥ १० ॥

किञ्च एतावानिति । टीका च—पूर्वोक्तनागादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति । इन्द्रादीनपि यजतामेव तत्तद्यजनेन भागवतानां सङ्गतो भगवत्यचलः भावः भक्तिः भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयः लाभः । अन्यत्तु सर्व्वं तुच्छमित्यर्थः इत्येषा । अत्र इन्द्रमिन्द्रियकामस्तु इत्याद्युक्तम् इन्द्रियपाटवादिकं पृथक्त्वेन फलं । भागवतेन संयोगे तु भावः फलम् । [खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्येत्यादौ] खादिरयूपसंयोगं यागस्य फलवैशिष्ट्यवदिति ज्ञेयम् ॥ ११॥

ज्ञानमिति । प्रपञ्चातीतत्वात् कैवल्यरूप एव विद्वद्भिः सम्मतः पन्थाः भगवत्प्राप्त्युपायश्चेत्यर्थः । एको नारायणो देव इत्यादौ "परावराणां परम आस्ते केवल्यसंज्ञितः" इत्युक्तदिशा कैवल्याय श्रीनारायणं लब्धुं सम्मतः पन्था उपायो यो भक्तियोगस्तत्प्रमा स.च यजेति वा ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

राज्यकामः राज्याधिपत्यकामः मनून्देवान्पुरुरवायंभुवादीन् तन्मन्वंतरदेवताश्च निर्ऋतिं मृत्युम् अभिचरन्नात्मनोमरणमिच्छन् कामकामः कंदर्प-मिच्छन् सोमम् । अकामःसर्वकामनारहितस्तु परंपुरुषंपुरुषोत्तमम् अथमेकोनत्रिंशत्सर्वतत्त्वपतिः सोमोमनसः निर्ऋतिःपायो मनवोदेवाश्चक्षुषः मरुद्गणाःस्वच्छः पुण्यजनाःजलस्य पितरोमहत्तत्त्वस्य उत्तमश्लोकः पुरुषस्य उमाश्रोत्रस्य ॥ ९ ॥

एवंकामनाभेदेनप्रकृतोपयोगिसर्वबलसिद्ध्यर्थंतत्तद्देवताभजनंकर्त्तव्यमित्युक्तं वैराग्यार्थंचभगवान् तत्रकामनाःब्रह्मवर्चसादिविषयाः । इहंहिभक्तिःसाक्षात्परब्रह्मणोवासुदेवस्यअसाधारणोधर्मः स्नेहात्मानंदैकप्रकाशतेयदातत्रवर्चः तेजः प्रकाशकंभवति येनब्रह्मात्मप्रकाश विद्युच्चकंतुब्रह्मधर्मः साक्षात्नापिप्रत्यक्षतया प्रत्यक्षसमवेतानपिभक्तियजकानावेशप्रकाशते अतोब्रह्मादिभगवतियद्वर्चः तेजस्तद्विरक्त गच्छेत्तदिहस्तत्रवर्चसंपश्येत्मतः प्रथमंब्रह्मवर्चसकामनाकर्त्तव्या वेदस्यवाप्रकाशनसामर्थ्यं नहिचक्षुर्व्यतिरेकेणरूपालोकमध्यवर्त्तिवस्तु प्रकाशते तद्ब्रह्मगतंवेदगतंवाकोवादातुंशक्नुयादितिविचारेणब्रह्मणः पतिः वेदस्यवेदार्थस्यवानियामकः येनवात्सामर्थ्यंतत्रनिहितंभवति तेनैव- मनुक्रमवद्भक्तिब्रह्मधर्मान्सर्वान्गृहीत्वाऽग्रगतिप्रकटनायैवाऽऽनुगुण्येदेवतासेवोपास्याप्रकटनार्थमेवतत्प्रवृत्तेःनापिकूटस्थं तदर्थं मप्रवृत्तत्वात् । एवंकामनाविशेषेंद्रियव्यतिरेकेणाप्यतोजीवात्माप्रकाशकेऽपिब्रह्मवर्चसेकरणाभावात् नह्यतुंशक्नुयादितिइंद्रियमपेक्ष्यम इंद्रियप्राणेषुभगवच्छा क्त्यधिकारी कोनुराजन्निंद्रियवानितिवाक्यात् तत्रेंद्रियेष्वतीवविषमाण्यपिज्ञानकर्मकौशलानवद्यविषयार्थस्तुबोधकस्वरूपत्वाभावादपे क्षितेंद्रियाद्विशिष्टं इंद्रस्यब्रह्मजन्यपंचेंद्रियवीर्योभित्यादिश्रुतौतत्तद्विशिष्टं अन्यथाहृहरब्रह्मप्रजापत्युपधावनंचनस्यात् अतोलौकिकपदार्थेषु

नकरणेन्द्रियप्राप्त्यर्थमिन्द्रउपास्यः तेनहितदुपायेनप्राप्तं [illegible] सेव्यः मन्यर्थेद्रस्यपुनःपुनरुपादानंनभवेत् अतोविनोपसंतं [illegible] पुत्रादिरूपमपेक्ष्यते अन्यथाभगवद्भजनेनैश्वर्यंनस्यात् तत्रखतोजायमानाः प्रजाः [illegible] वसेव्याः तेहिब्रह्मणोऽभिप्रेतंकृतवंतइति इदानींभगवद्भजनेलक्ष्मीकृपासंपादिरपेक्षते [illegible] यात् अतोभजनौपयिकांसंपत्तिमिच्छन्मायामेवभजेत तत्रैकामायाव्यामोहिकाब्रह्माजगत्कारणभूता तेजसेनसेव्ये अन्यजाधिकृतत्वात् देवता रूपासात्त्विकी मोक्षदातुर्वासुदेवस्यमोक्षदानार्थमेवतादृशंरूपंगृहीतवतः तदुपयोगिसाधनसंपादनार्थेलक्ष्मीरेव "विष्णोर्देहानुरूपास्तेकरो-त्येवात्मनस्तनु"मितिवाक्यात् तन्नार्थारूपेणमायारूपंगृहीतवती मयासहगंतव्यमितिनियोगकरणात्मायेत्यभिधानम् "इत्थंविधिश्चपरमः सतुवासुदेवनामावभूवनिजकारणमुक्तिदाता तस्याश्रयानियताऽथरमापिरूपंबभ्रेद्वितीयमिवयत्प्रवदंति मायामि"तिवाक्यात् अतएवमुक्तदेवा-न्यनिवारिते किंच इंद्रियेणासंपस्यासहायेन प्रकाशेनचभगवद्धर्मेषुसमर्पितेषुब्रह्मस्थारणसामर्थ्यसिद्ध्यर्थस्त्रिमूर्तेस्त्रःअपेक्षते अन्यथातेसमागतास्तत्रनानिविशेयुः निविष्टा वातदाश्रयंदहेयुः अतःस्वयोग्यतासिद्ध्यर्थंतेजःअपेक्षितं तद्विसर्वाभिभावकंसर्वमेवरूपंस्वस मानंकरोति तद्भगवच्छिष्टमेवर्द्धिनाप्रासंविशेषेणाभार्दीप्तिःवसुधनंयस्येतिविभावसुशब्दनिर्वचनात् अतस्तेजस्कामःविभावसुमेवसेवेत। एवं धनस्यापि भगवद्भक्तेषुआनन्त्यर्थंअवणादिसिद्ध्यर्थमुपदेशनार्थंवाहेयमपेक्षते साधनरूपश्रवणादिकंतादृशंदेवभवतीति शुक्लकृष्णकृष्णकल रूपं हरूपत्वाच्चतदपेक्षातएव तत्तत्रामनावसुष्वेयप्रतिष्ठितं तदमंलोकमयजेत्रिमिनिभुतेः एवंवीर्यस्य बलस्यापिभगवत्सेवोपयिकत्वात् बला धिष्ठानदेवतावायोःस्थानभूतस्यांतरिक्षस्यरुद्राःप्रभवइति देवतापितदधीनेतिवीर्यकामःरुद्रानेवभजेत तेऽतरिक्षमयजन्नितिश्रुतेः एवमन्नादे रपि अन्नभक्षणास्यवा"यथादिष्टमंलोकंयजातिप्रियमात्मनः"इतिवाक्यात अन्नाद्यमपिकाम्यं तत्रादितिरियमेवभूम्यधिष्ठात्रीदेवता। सादिति रत्रवीद्वरंवृणुअथमयाभिगृहीष्वमित्युपाख्यानेतस्यास्तादृशत्वप्रसिद्धेःभूमौभगवद्भजनंकृत्वादित्यानांपदार्थानामभावात्स्वर्गेकर्तव्यमितिस्वर्ग कामनाभवति तत्रादित्याःप्रभवःतेमुंलोकमयजन्नितिश्रुतेः विश्वेदेवास्तुराज्येअधिकारिणः सर्वदेवताधिष्ठातृदेवतारूपत्वात् राजाचसर्व देवतामयः अतोऽत्रसर्वसंपत्त्यामजनसिद्ध्यर्थराजत्वमपेक्षितं भक्तिमार्गस्त्वलौकिकइति असाध्यसाधकपदार्थसिद्ध्यर्थतृतीयकारिणः साध्यान्भजेत सर्वाश्चेत्प्रजाः स्वाधीनाभवेयुः तदासर्वत्रभक्तिप्रचारोभवेदितिभक्तिप्रसरणार्थंतत्साधकत्वमपेक्ष्यते आयुस्तुभक्तसंगा-द्यर्थमुपयोगस्यएव तत्राश्विनौआयुषःप्रभूइतितदुपाधावनमेवंपुष्टिरपि लोकार्तिता भगवत्कार्यसाधिकेतिसर्वपोषकत्वीं भूमिंभजेत यतोभूमिष्ठाएवसर्वेवर्द्धतेअंकुरादयः प्रतिष्ठायामपितद्वृत्तानुवृत्त्याप्रचयार्थमपेक्षाभवति प्रतिष्ठात्वमाहात्म्यात् वैचित्र्याद्वा तत्त्वाद्यापृथि-व्योरेवोभयंप्रसिद्धमिति भगवदधिष्ठानेषुरूपाभिव्यक्तिसामर्थ्यार्थंरूपमितिगंधर्वाइतिश्रुतेःतेसेव्याः नृत्यादिनाभगवद्भजनार्थंतादृशस्त्री कामनायामनेकरूपकरणसमर्थोउर्वशीसेव्या नारायणोत्पत्तेरत्वात् ऋषिमानृत्यात् वैराग्यबोधनेनमुक्तिदातृत्वाच्च पूर्वचित्त्यादयमुनेरूपाः आज्ञापनसामर्थ्यसिद्ध्यर्थंतथाभूतः परमेष्ठीत्वतुमुंजःसेव्यः सहिसर्वानाज्ञापयतीति आज्ञापनस्यचभक्तिकारणतास्पष्टा तथायशोऽपि कीर्त्यर्थंहिसर्वेसमायांति पश्चात्तवृत्तमनुतिष्ठते यतोह्ययशःप्राप्तवान् देवार्षिसत्रमासततसिद्ध्यंपरिमितंयशस्कामाद्दत्यत्रयंनैवयशसः प्राप्तत्वात्ससेव्यःप्रचेतानिधिपतिःअलौकिकार्थदानेहिभगवद्रुसवादिर्भवतिविद्यायास्तुसाक्षादुपयोगात् ईश्वराज्ञानमन्विच्छेदितिवाक्यात् प्रतिकूलेगृहंत्यजेदितिदांपत्यंभगवद्भजनार्थमपेक्षितं तत्रपरमभक्तायाःपरमभक्तैस्त्वर्यामितिनष्ठयाबहुजन्मसिद्धत्वाद्दुमासेव्या धर्मेणाचभक्ति र्भवतीतिपूर्वंसाधितमुक्तमैश्वलोकेवेदधर्मप्रतिपादकएवसेव्यते भक्तिमार्गस्यपरंपरासिद्ध्यर्थसंततत्यपेक्षायांपितरोहितदाशंसकाइति तेषां भजनं रक्षायांकूराणामपेक्षितत्वात्यक्षभजनं ओजतःइंद्रियशक्तेश्चक्षुनेत्रश्रोत्रपाटवरूपत्वात्मरुद्गणाश्चपटवोभवंति बहुधाच्छिन्नाअपिन मृताइति महापुरुषपूजयासिद्धाइतिपरित्यक्तदोषाइतितेसेव्याःअधिकारिणाःसर्वविनियोगसामर्थ्यात्स्वर्गेमन्वंतराधिपतयःसेव्याः प्रति-बंधकनिवृत्तेरपेक्षितत्वात्निर्ऋतिःसेव्यःकामनयासर्वंभवतीतिभगवद्विषयककामनोत्पत्त्यर्थंरासप्रकरणेनिरूपितस्तपसोमस्यभजनंकर्तव्यं । तेनहिभगवतःकामःपूरितइतितादृशकामयितामहत्त्वाच्चएवंभगवद्दंशानांतत्तत्साधकत्वमुक्त्वासत्साधनभक्तिसिद्ध्यर्थमपिभगवानेवसेव्यइ-त्याहुभकामइतिवैराग्यकामःपूर्वाध्यायोक्तन्यायेनस्वतंत्रतयानिष्कामोवासर्वकामःएतदध्यायोक्तकामःमोक्षकामोवाउदाराधीर्यस्येतिस्वतंत्रो वा तीव्रेणशीघ्रंभगवत्प्रापकेन पूर्वोक्तमेवपरंपुरुषंभजेत भगवतैवससाधनंसाध्यंसेत्स्यतीति ॥ १० ॥

ननुभजनमेवकर्तव्यंसिद्ध्यैतत्कामनाभावेबंधकबंधप्रयासवैयर्थ्यादंशकयकामनयातत्साधनेऽपिअंतरंगसाधनसाधकमेवसेव्यमित्यभिप्रायेणाह एतावानेवेतिसर्वाण्येवसाधनानिसाधनद्वयेप्रविशंतिभगवद्भक्तसंगसाधनत्वेनभगवतिरतिसाधकत्वेनचएतावानर्थोऽसिद्धःतदानान्यत्काम नाकर्तव्याअतएवयजतांमध्येइहअस्मिन्भक्तिमार्गेश्रेयसःपरमःउदयःएतावानेवद्वयमेवतदुक्तंतयोरप्येकमसाधनंयेनतौभवतएव ॥ ११ ॥

तदाह ज्ञानमिति हरिकथासरतिःतयोःसाधिका कथारतिर्यस्यभक्तस्यकथाकाअपिमिलंति प्रेमापिभवतीति आनुषंगिकंचान्यद्वक्ष्यतेभवतीत्याह य.सुकथासुआसक्तमतात्प्रतिनिवृत्तंगुणेभ्योमायासृत्पन्नादेवादीनांचक्रंरागादिधर्मसमुदायोयेनसर्वोविद्यानिवर्त्तकामितियावत् तादृशंज्ञानं भवति । तत्साधनमंतःकरणप्रसादोऽपिभवति । तस्यापिसाधनमैहिकामुष्मिकगुणेषु वैराग्यम् एवं समाधनं ज्ञानमपिसिद्ध्यति । सोपायोमार्गो कैवल्यसंमतस्तुमार्गः भक्तियोगः । अथेति विभिन्नप्रक्रमे स्वतंत्रःज्ञानसाधनंनचातत्सहायः । किंतुपूर्वोक्तकामनया सिद्धसाधनसाध्यः यत्रानुषंगिकंज्ञानंभक्तिश्चभवति । भगवतिप्रेममकसंगश्चमुख्यतयाभवति । तादृशीकथासुसन्मार्गवर्त्ती कोवारति नकुर्यादित्यर्थः । तत्रापिनिर्गुतः अत्रकृांतमार्गपदः एवं असाधनंभक्तिमार्गमुपदिदिक्षयतस्य विशेषाकांक्षायामन्यद्वक्ष्यमितितूष्णीं भूतः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

राज्यं राजत्वं तत्कामः मन्वन्तरपालान् देवान् । राट् कर्म राज्यं तत्कामः विश्वान् देवानिति विशेषः । अभिलषन् [illegible] मिच्छन् निर्ऋतिं राक्षसस्य । कामकामः कामभोगेच्छुः । [illegible] सन्दधियां क्रियमुद्दा उदारधियां कार्यमाह । अकामः कामनाशून्यकामः । तं पुरुषं पुरुषोत्तमं भगवन्तमित्यर्थः ॥ ९ ॥

[illegible] एव परमपुरुषं यजेत अपि तु उक्तानुक्तसर्वकामोऽपि निष्कामश्च भगवन्तमेव यजेदित्याह । अकामः एकान्तभक्त इति श्रीधरस्वामिनिरस्तः । अकामः भजनीयपरमसुखसुखमात्रसुख इति क्रमसन्दर्भः । इत्यनेनैव सकामसामान्ये लब्धे मोक्षकाम इति मुक्तानुपादानं तदधिकारिणां वयं निष्कामा इत्यभिमानखण्डनार्थम् । किंवा सर्वकामेभ्योऽपि मोक्षकामस्य, सकामात्यतिशयज्ञापनार्थम् । तथाच खस्य दुःखशमनेच्छा सुखप्राप्तीच्छा च काम उच्यते । सा च खस्य तात्कालिकार्किञ्चिन्मात्रदुःखशमनार्थं नश्वरस्वर्गादिषु सुखार्थञ्च प्रवृत्तेभ्यः कर्मिभ्यो देवतान्तरोपासकेभ्यश्च ज्ञानाधिकारिणां स्त्रीयसंसारदुःखखण्डने प्रवृत्तानां ब्रह्मसुखमनुभवभूयस्त्वमिच्छद्भ्य इव्यते अकामान्तु भजनीयपरमेश्वरसुखार्थमेव प्रवृत्तानां निष्कामता तद्भक्तैरेवावसीयते । तानि च यथा—नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् । तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥ इति । स्वकर्म्मफलनिर्देशं यां यां योनिं व्रजाम्यहम् । तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥ इति । तथः समाधिशोषायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह इति । प्रायोपवेशारम्भे राज्ञोऽपि वचनं यथा—पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु । महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥ इति । उदारधीः सुबुद्धिः । कामराहित्ये कामसाहित्ये वा भक्तेर्भगवद्विषयत्वमेव सुबुद्धित्वचिह्नं तदभाव-एव मन्दबुद्धित्वचिह्नमित्यर्थः । तीव्रेण ज्ञानकर्म्माद्यनभिभवेन मेघाद्यमिश्र एव सौरकिरणो यथा तीव्रः स्यात् तथेत्यर्थः १०

ननूक्तलक्षणानां देवतान्तरभक्तानां लब्धतत्तत्कामानामन्ते खलु का गतिः स्यादिति चेन्न कापि किन्तु यदि यादृच्छिकमहत्कृप स्यात् तदैव भक्तिः स्यादित्याह । एतावानेव यजतां देवतान्तरयाजिनां निःश्रेयसोदयः । कोऽसौ यत् यदि भागवतानां सङ्गतो हेतोर्भगवद्भावः सेव्यत्वभावना स्यात् अन्यथा न निःश्रेयसम् । तत्तद्देवतानामपि निःश्रेयसाभावादिति भावः । तदुक्तं भगवता—येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ इति । देवतान्तरस्य यजनन्तु नैव भगवद्भावकारणं किन्तु भागवतसङ्ग एव । स च यदृच्छयैव भवेदितिप्राक् प्रतिपादितम् ॥ ११ ॥

ननु यावज्जीवनपर्य्यन्तं यो यम् स्वाश्रितस्तस्यान्ते खलवाश्रयान्तरानौचित्यमेव तस्मात् सर्वकालमेव तत्तद्देवोपासकस्यान्ते भागवतसङ्गादपि भगवति भावः कथं कर्त्तुमुचित इति चेत् देवतान्तरोपासकः खलु को वराकः यतो ब्रह्मोपासकोऽपि भगवति शुद्धां भक्तिं करोतीत्यत्र क्रमरीतिं दर्शयन्नाह । ज्ञानं यदा स्यात् । कीदृशं प्रतिनिवृत्तमुपरतं गुणोर्म्मीणां चक्रं समूहो यस्मात् तत् । ततो आत्मप्रसादः स्यात् । यत्र आत्मप्रसादे सति गुणेषु असङ्गः वैराग्यम् । उभयत्रेति पाठे इहामुत्र च गुणेष्वसङ्गः । कीदृशः कैवल्ये सम्मतः पन्थाः । अथ तदनन्तरञ्च भक्तियोगः । भक्तियोगस्य यादृच्छिकतायाः प्राक्प्रतिपादितत्वादसङ्गकार्य्यत्वं नाशङ्कनीयं भगवत्कृपया सनकादीनामिव भागवतकृपया शुकस्येव कीर्त्तनादिरूपः । अतः कः खलु निर्वृतः भक्तिसुखे निमग्नः । रतिम् आसक्तिम् । यो रतिं न कुर्य्यात् स स्वनिर्वृत इति भावः । अत्र कर्म्मज्ञानयोगदेवतान्तरोपासनेभ्यः शुद्धभक्तेरुत्कर्ष इति, तथा तत्तत्साध्यं केवलया भक्त्यैव सिद्ध्यतीति, तथा तत्तत्साधनवतामप्यन्ते पुनर्भक्त्यैव निःश्रेयसमिति, कर्म्मज्ञानादिनिरपेक्षा निष्कामा अवणकीर्त्तनस्मरणप्रधाना शुद्धा भक्तिरेव प्रेमभक्तिसाधनमिति शुकदेवस्य स्वाभिमतं, तत्रापि नामकीर्त्तनं सर्वोत्कृष्टतममिति वस्तुपञ्चकं निरूपितमिति प्रकरणार्थसंक्षेपः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

राज्यकामःमनून्देवान् विश्वान्देवानूराज्यकाम इतिद्विरुक्तिःगुणप्रधानविवक्षयाथोध्या अभिचरणंशत्रुमरणमिच्छन् निर्ऋतिंराक्षसं कामकामः भोगकामः सोमम्अकामःनिष्कामःपरंपुरुषंपुरुषोत्तमम् ॥ ९ ॥

किंच अकामः सर्ववासनाशून्यः अतएवोदारधीः सर्वकामोवाविशेषतोमोक्षकामोवातीव्रेणभक्तियोगेनपुरुषंपुरुषोत्तमंयजेत ॥ १० ॥

तीव्रेणभक्तियोगेनमोक्षकामोयजेतेतियदुक्तंतदुपपादयति एतावानिति इहलोकेयजतांसाधकानांनिःश्रेयसस्यमोक्षस्यउदयः उपक्रमः एतावानेवतमाह भगवति अचलोभावस्तांत्रोंभक्तियोगइति ननुसकृतांवाप्यतेइत्यत्राह यद्भागतसंगतइति भागवतानांसंगादवाप्यते ॥ ११ ॥

भागवतानांसंगतःमोक्षासाधारणोपायः अचलोभक्तियोगोभवतीत्युक्तंतदुत्पत्तिक्रममाह ज्ञानमिति भागवतसंगतोहरिकथाप्राप्तिरित्यर्थोलभ्यते यदाथानुभागवतसंगात् प्राप्तासुज्ञानमुत्पद्यते कथंभूतमासमंततः प्रतिनिवृत्तमुपरतंगुणानांगुणकार्य्याणांरागादीनांजन्ममरणशोकमोहक्षुधापिपासास्थानामुर्मीणांचचक्रंपुनःपुनरापतनंयस्मात्तत् तदनंतरमुभयत्र इहामुत्र असंगोवैराग्यंचभवति तदनंतरंकैवल्येसाध्यभूतेमोक्षसंमतस्तदसाधारणोपायतयाभिमतः भक्तियोगोभवति ततआत्मनःभगवतःमोक्षलक्षणःप्रसादःस्यात् तासुहरिकथासुरतिंप्रीतिंको नकुर्य्यात् ॥ १२ ॥

भाषाटीका ।

राज्य की कामना वाला मनुओं को और देवतों को पूजे शत्रु मारण की इच्छा वाला निर्ऋति राक्षस को पूजे काम की कामना वाला सोम को पूजे निष्काम हो तो भी हरि को पूजे ॥ ९ ॥

निष्काम अथवा सर्व कामना वाला पुरुष अथवा उदार बुद्धि मोक्ष कामना वाला तीव्र भक्ति योग से परम पुरुष विष्णु का आराधन करे ॥ १० ॥

इस संसार में सब के पूजने वालोंको इतनाही परमपुरुषार्थ है जोकि भागवत (भगवद्भक्तों) के संगसे श्रीनारायणमें निश्चल प्रेम होजाना ॥ ११ ॥

जिन श्रीहरिके कथाओंमे क्षुधापिपासादि छे ऊर्मियोंकी निवृत्ति होकर दिव्य ज्ञान होता है, आत्माकि प्रसन्नता होती है, मोक्षका देनेवाली भक्तियोग होता है, सब प्रकार सुखकी प्राप्ति होती है, उन हरिकथाओंमे कौन प्रेम नहीं करेगा अर्थात् सबही करेंगे ॥ १२ ॥

शौनक उवाच । इत्यभिव्याहृतं राजा निशम्य भरतर्षभः ।
किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविम् ॥ १३ ॥
एतच्छुश्रूषतां विद्वन् ! सूत ! नोऽर्हसि भाषितुम् ।
कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥
स वै भागवतो राजा पाण्डवेयो महारथः ।
बालः क्रीडनकैः क्रीडन् कृष्ण-क्रीडां य आददे ॥ १५ ॥
वैयासकिश्च भगवान् वासुदेवपरायणः ।
उरुगाय-गुणोदाराः सतां स्युर्हि समागमे ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अभिव्याहृतम् उक्तम् । ऋषिं परब्रह्मदर्शिनम् । कविं शब्दब्रह्मनिष्णातम् ॥ १३ ॥
श्रवणेच्छायां हेतुः । हरिकथा एवोदर्कः उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां स्युः ॥ १४ ॥
एतत् प्रपञ्चयति स वै इति द्वाभ्याम् । कृष्णपूजादिरूपां क्रीडां यः स्वीकृतवान् ॥ १५ ॥
उरुगायस्य गुणैरुदारा महत्यः कथाः स्युः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंहरिकथाप्रभावेउक्तेपुनर्जगद्व्यापारूपहरिकथाबुभुत्सयामुनिनृपयोः संवादमवतारयितुंशौनकःपृच्छति इतीत्यादिना । इतिपूर्वोक्तप्रकारेणाभिव्याहृतं निशम्यश्रुत्वाभरतर्षभः भरतवंशश्रेष्ठोराजापरीक्षीदृषिंपरब्रह्मदर्शिनंकविंशब्दब्रह्मणिनिष्णातंवैयासकिं व्यासपुत्रं श्रीशुकंप्रत्यन्यत्किंपृष्टवान् ॥ १३ ॥

एतच्छुश्रूषतांनःअस्माकंहेसूतहेविद्वन्!भाषितुंवक्तुमर्हसि तत्प्रश्नेतवकोलाभइतिचेत्तत्राह कथाइतिहरिकथैवउदर्कःउत्तरफलंयासांताःहरिकथोदर्काः हरिकथाप्रधानाइत्यर्थःतथाभूताः कथाः सतांभगवद्भक्तानांसंसदिसभायांराजशुकयोःस्युर्ध्रुवंनिश्चयः । अतः भगवत्कथाश्रवणमेवलाभइतिभावः ॥ १४ ॥

भगवद्भक्तत्वमेवाह सहतिसार्द्धेन । पांडवेयोमहारथोराजामहाभागवतः योराजाबालक्रीडनकैः बाल्यक्रीडाभिः क्रीडन्कृष्णक्रीडां श्रीकृष्णसेवारूपांक्रीडामाददे । तस्यक्रीडाअपिश्रीकृष्णपूजारूपाएवातः आबाल्यंभागवतत्वंइत्यभिप्रायः ॥ १५ ॥

एवंभगवान्, त्वंसिप्रलयंचैवभूतानामित्यादिगुणविशिष्टोवैयासकिःवासुदेवः परायणंपरमप्राप्यंपरमोपायश्चयस्यसतथोक्तः एवम्भूतोऽपिभागवतत्वात्तत्संवादएवप्रष्टव्यइत्याह । हियस्मात्सतांभागवतानांसमागमेसंगतौ उरुगायस्यभगवतोगुणैरुदाराःमहत्यःकथाःस्युःप्रवृत्ताभवेयुः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

परीक्षित्पृष्टशुकोक्तभगवत्कथातद्गुणाभूतरसेवस्यादित्याशयवान्शौनकःसूतंपृच्छति इतीति । ऋषिमात्रस्यत्रिकालदर्शित्वप्रसक्तीत्कः कविमितिभगवंतमपरोक्षतोजानातीति ॥ १३ ॥

शुश्रूषतांश्रोतुकामानां सत्सुसभायांकदाचित्प्रसंगादितरकथापिसंभाव्यतइतिनेत्याह कथाइति ध्रुवमित्यनेननियमोदर्शितः ॥ १४ ॥

अनयोरेकस्याप्यसत्त्वेनियमभंगःस्यादितिनेत्याह सवाइति तत्रहेतुमाह बालइति ॥ १५ ॥

अस्तूभयोःसत्त्वंततःकिंतत्राह उरुगायेति उरुगायेत्यनेनहरिकथायाअवश्यसद्भावंदर्शयति उरुमिर्वेदविद्याविरदैर्मद्भिर्गीयतइति उरुगायःसतांसभ्यैःप्रायुर्येणहरिकथासत्त्वेऽपिप्रसंगादन्यकथास्यात् ततथाश्रीशुकपरीक्षितोरित्येतस्मिन्नर्थेहिशब्दः कथाहितद्घोषः॥१६॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

इत्यभीति । सम्भाव्यैवेदं पृच्छति ॥ १३ ॥

कथा इति । लौकिक कथा अपि । हरिकथास्तु आदित एव तद्रूपाः स्युरित्यर्थः ॥ १४ ॥

स वै इति । या या श्रीकृष्णस्य वृन्दावनादौ बालक्रीडा श्रुतास्ति ततप्रेमावेशेन तत्सख्यादिभाववान् तां तामेव क्रीडां यः वानित्यर्थः ॥ १५ ॥

अतएव स वै भागवतो राजा इत्याद्यनन्तरं राज्ञा समानवासनत्वेन वकारमाह । वैयासकिश्चेति । चशब्दः प्राग्वर्त्तिनेन संबन्धनार्थं बोधयति । तस्मात् श्रीवसुदेवनन्दनत्वेनैवात्रापि वासुदेवशब्दो व्याख्येयः । अन्येषामपि सतां समागमे बालचरितप्रधाना एव तादृशेपुरिति भावः ॥ १६ ॥

श्रीमद्वंशीधराचार्यकृत सुबोधिनी ।

तथासूतोपि । अथमर्थोगुप्ततमोपि कृपितहृतिशौनकादीनांहृदयसमर्पणायेतिसंदेहमुत्पाद्यस्थिते स्वाभिप्रायंशौनकः प्रकटयन्गुप्ततमो ह्यर्थप्रकटयितुमाह । इत्यभिव्याहृतमित्यादि यावद्[illegible] । [illegible] तत्साधनेषुप्रवृत्तिर्भवति । यस्तुसिद्धसाधनस्यभगवान्संगेपुत्रैरेकथायामपिरतोसत्यांभगवतिस्नेहार्थमेवप्रयत्नोऽवशिष्यतइति ॥

अस्मद्वंशस्थाराजामहान् । अतस्तत्प्रभानुसारेणैवमेकत्युपायंब्रातेतत्कर्तव्यमित्यभिप्रायेणाप्रथमंप्रश्नंपृच्छति । इत्यभिव्याहृतइतिचतुर्भिः अभिनोव्याहृतःउपदिष्टइत्यर्थः । निशम्यतदभिप्रायंज्ञात्वाभरतस्यरूपमात्रस्यास्मोहः अतःपूर्वोक्तमेवनपृष्टमित्यर्थः । अन्यदेवपृष्टवान् । यद्यपिसर्वमुक्तंचरितं । तथापिप्रकारांतरेणातदुपपादकरूपेणवार्किंभूयःपृष्टवानित्यर्थः । शुकस्यविरक्तत्वात्पबहुकालस्थित्यभावेन न किंचिदपूर्वंभविष्यतीत्याशंक्याहवैयासकिमिति । सर्वंविस्तरकर्तुःपुत्रोपि तादृशइति । तत्रापिभागवतलक्षणमन्त्राधिष्ठातृभगवदभिप्रायंजानातीतिसर्वथाकथयिष्यतीतिकीर्त्यभिप्रायेणाऋषिपदं । विशेषकथनसामर्थ्यार्थंकविपदं ॥ १३ ॥

तेनकिंभवतामित्यपेक्षायामाह एतदिति । एतच्छ्रवणंअस्माकंमहतीच्छा त्वंचजानासि । सर्वत्रकथनंचतवाधिकारएवेतिसंबोधनद्वयं विद्वन्सुतेति अतोस्मद्यंभाषितुमर्हसि । श्रोतृवक्तृपरत्वव्याख्यार्थमाह । कथाहरिकथोदर्काइति । अन्याअपिकथाःसतांसदस्हरिकथो दर्कांएवभवंति हरिकथैयउदर्कोमुत्तरफलंयासु ध्रुवमितिमात्रसंदेहः । सत्सभायामेवैवंभवतिसुतरामपूर्वंसत्संगेतत्रोभयोःसत्वमुक्तातत्संगेकथाबहुयकत्वंवक्तव्यं ॥ १४ ॥

तत्रप्रथमंसमागतस्यपृच्छकाधीनत्वात् पृच्छकस्यभगवद्भक्तत्वमाह सवैभागवतइति । निश्चयेनसराजापिभागवतएव अथवाराजाहिबहु पृच्छति भागवतश्चभगवद्दीयंतस्योभयरूपत्वात् भगवद्दीयंबहुपृच्छतीत्यर्थः । तस्यभगवद्दीयत्वेसाधनभूतंहेतुद्वयंआहपांडवेयइति । भगवद्दीयवंशेअवतीर्णत्वात् स्वधर्मनिष्ठत्वाच्चफलमुक्तमुत्तरंसाधनंतस्यैवसत्सभाभोभागवत्परइत्याह । यस्तुबाल्येबालक्रीडनकैः क्रीडन्पूर्णंभगवंतंस्वाधयित्वातत्सेवकसंगजलीलामिवक्रीडति । वृन्दावनस्थांभगवत्क्रीडांयाआभिनेदेनानुकरोति ॥ १५ ॥

शुकोऽपिभगवद्भक्तइत्याह वैयासकिश्चेति । श्रोतातुभवदीयानांवंशजोभगवदीयः । शुकस्तुभगवतःपुत्रोभगवान् तथाभूतःसन्वासुदेवपरायणाः स्वकरतल्यरि. तादृशाः । अतः सर्वेऽपिसतः । तेषांचनूतनः समागमः । तादृशेकथाः सर्वभक्तानांसम्मताः । सर्वपुरुषार्थानां स्वतंत्रतयासाधनाभावेपि दातारोयेभगवद्गुणाः ते यासु । अतस्ताः कथयेति पूर्वेणैव सम्बन्धः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किमन्यंइह पृच्छामीति उक्तेनैतेनैव सर्वंजिज्ञासितसिद्धेरिति विस्मयः सूचितः । ऋषिं परब्रह्मदर्शिनम् । कविं ऋषिष्वपि मध्ये तद्गुणंनातिशयचतुरम् ॥ १३ ॥

श्रवणकीर्तनादीन्येव स्वकर्तव्यत्वेन ज्ञात्वापि राज्ञा यदन्यत् पृष्टं तस्मात्तेषामेव श्रवणादीनां विषयाः कृष्णकथा एव पृष्टव्या सेवितव्यास्तीत्याशयेनाह यतइति । न च सर्गविसर्गमन्वन्तरनानाराजादिकथानामपि तदन्यकथात्वं वाच्यमित्याह । कथा अपि हरिकथा एव उदर्कः उत्तरफलं यासु ताः सर्गादिकथानामपि कृष्णकथायामेव पर्यवसितत्वात् ता अपि श्रवणादिविषया इति भावः ॥ १४ ॥

सतां सदस्यापि प्राग्भिन्नाऽर्वाचीनेषु मध्ये सा सभा सर्वतः श्रेष्ठा यत्र श्रोता वक्ता च सर्वतोऽपि विलक्षण इत्याह स वै इति द्वाभ्याम् । कृष्णक्रीडां कृष्णक्रीडानुकरणाम् ॥ १५ ॥

भगवान् सर्वज्ञः । सतां समागमे सति उरुगायस्य कृष्णस्य गुणा एव उदारा मनोवाञ्छितार्थप्रदातारः तत्रस्थानां जिज्ञास्यमाणानाञ्च जनानां ध्रुवं स्युः । अतस्तान् गुणानेव प्रवर्तयेति । तेन कृष्णकथोदर्कः कथाश्च भक्तैरास्वादनीया इति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

एवं संक्षेपतः सर्वंशास्त्रार्थं श्रुत्वा पुनर्विस्तरतस्तद्बुभुत्सया शुकपरीक्षित्संवादमवतारयितुं शौनक आह । इतीति । अभिव्याहृतं । श्रीशुकेनोक्तं । निशम्य श्रुत्वा भूयः पुनः ऋषिं परब्रह्मदर्शिनं कविंशब्दब्रह्मदर्शिनं वैयासकिंव्यासपुत्रं शुकम् प्रति । अन्यत्किंपृष्टवान् ॥१३॥

हरिकथैवउदर्कःउत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां ध्रुवं स्युःअतो यद्राजा पृच्छमेतच्छ्रुभूषतां श्रोतुमिच्छतां नो ऽस्माकं भावितुमर्हसि ॥ १४ ॥

उभयोर्भागवतस्थं तयोः संवादे हरिकथाप्रवृत्तिं चाह स इति द्वाभ्याम् । यो बालक्रीडनकैःबालक्रीडाभिःक्रीडन् कृष्णक्रीडां श्रीकृष्णलीलाकथां क्रीडामाददे अतः सत्सभावत एव भागवतः ॥ १५ ॥

[illegible] सः सतां सज्ञानमे संगतौ उरुगायस्य भगवतो गुणैरुदाराःश्रोतृणां सर्वांर्थसाधकाः कथाःस्युः प्रवृत्तास्तेषु[illegible] ॥ १६ ॥

भाषा टीका ।

शौनकजी बोले परीक्षित महाराज इस प्रकार शुकदेवजी के वचन सुनकर फिर त्रिकाल दर्शी ब्रह्मज्ञानी व्यासपुत्रजी से क्या प्रश्न करने लगे ॥ १३ ॥

हे विद्वन् ! हे सूतजी ! सुनने की इच्छावाले हम लोगों को आप कथन करने के योग्य हो क्योंकि महात्माओं के समाजमें हरि कथा ही से पवित्रकारी कथा होती है अन्यसे ॥ १४ ॥

[illegible] संतों का तुम महाराज परम भागवत हैं क्योंकि बालकों की क्रीडामें भी श्रीकृष्ण ही की क्रीडाकु करने से ॥ १५ ॥

श्रीव्यासपुत्र शुकदेवजी भी भागवत [illegible] हैं सत्पुरुषों के समाज में पुरुषार्थ के उदार गुणों वाली कथा होती है ॥ १६ ॥

आयुर्हरति वै पुंसामुद्यन्नस्तञ्च यन्नसौ ।
तस्यर्ते यत् क्षणो नीत उत्तमःश्लोक-वार्तया ॥ १७ ॥
तरवः किं न जीवन्ति ? भस्त्राः किं न श्वसन्त्युत ? ।
न खादन्ति ? न मेहन्ति ? किं ग्रामे पशवोऽपरे ॥ १८ ॥
श्व-विड्वराहोष्ट्र-खरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्ण-पथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥
विले वतोरुक्रम-विक्रमान् ये न शृणुतः कर्ण-पुटे नरस्य ।
जिह्वासती दार्दुरिकेव सूत ! न चोपगायत्युरुगाय-गाथाः ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

किञ्च वृथैव क्षीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह आयुरिति त्रिभिः । असौ सूर्यः उद्यन् उद्गच्छन् अस्तम् अदर्शनञ्च यन् गच्छन् यत् यंश पुंसां उत्तमःश्लोकस्य वार्तया क्षणो नीतः तस्यायुः ऋते वर्जयित्वा अन्येषां वृथैव हरति ॥ १७ ॥

ननु जीवनमेव तेषामायुषः फलमस्तु तत्राह तरव इति । ननु तेषां श्वासो नास्ति तर्हि भस्त्राश्चर्म्ममयकोषाः । ननु तासामाहारादिकं नास्ति तत्राह । न खादन्ति नाश्नन्ति । न मेहन्ति रेतःसेकं मैथुनं न कुर्व्वन्ति किम् ? । उत अपि । तमपि नराकारं पशुं मत्वाह अपरे इति ॥ १८ ॥

तदेवाह । श्वादिभिः संस्तुतः सदृशत्वेन निरूपितः । यस्य कर्णपथं कदाचिदपि न गतः सः । अवज्ञास्पदत्वात् श्वभिः कृष्णविषयासक्तत्वात् विड्वराहैः ग्राम्यशूकरैः कण्टकवद्दुःखविषयासक्तत्वादुष्ट्रैः भारवाहित्वात् खरैस्तुल्य इत्यर्थः ॥ १९ ॥

तस्याङ्गानि च निष्फलानीत्याह विले इति पञ्चभिः । वत इति खेदे । नश्शृण्वतः अशृण्वतः नरस्य ये कर्णपुटे ते विले वृथारन्ध्रे । नचेदुपगायति तस्य जिह्वा असती दुष्टा । दर्दुरो भेकः तदीया जिह्वेव ॥ २० ॥

श्रीराधारमणदासगोस्वामि विरचित दीपनाख्य टिप्पणी ।

[न चेति । चशब्दश्चेदर्थे इति बोपदेवीयमुक्ताफले कैवल्यदीपिका ॥ २०—२५ ॥]

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

किंचवृथैवक्षीयमाणमायुर्हरिकथायामेवसफलंकुर्वित्याशयेनाह आयुरितित्रिभिः असौसूर्यउद्यन्नुदयं प्राप्नुवन्नस्तंव्रजन् तिरोधानं प्राप्नुवन्तिरोधिन्नित्यर्थः । उत्तमश्लोकस्यभगवतोवार्तयाकथयायत्क्षणोनीतःयःक्षणोनीतःतस्यऋतेतंक्षणंविनाआयुर्हतंसतुक्षणोनहृतः सफलइत्यर्थः ॥ १७ ॥

ननुजीवनमेवतदायुषः फलमस्तुतत्राहतरवइति । उत्पत्तिनाशमध्यस्थितिर्जीवनंननुतेषांश्वासोनास्तितत्राह भस्त्राइति चर्मकोशानश्वसंति किं वायुमूर्ध्वंनिःसारयंति किं । ननुतासामाहारादिकंनास्तितत्राह ग्रामपशवः अपरेआयुर्व्ययंकुर्वंतश्चनखादंतिनादन्तिनमेहंतिनरेतः सिंचंति मैथुनं न कुर्वंतीत्यर्थः ॥ १८ ॥

विड्वराहः ग्रामशूकरः ॥ १९ ॥

ऊरुक्रमस्यभगवतोविक्रमान्व्यापारान्नशृण्वतोऽशृण्वतोनरस्ययेकर्णपुटेतेविलेवृथारंध्रे हे सूत ! उरुगायगाथाः भगवत्कथाः नचेदुपगायति तस्यजिह्वाऽसतीदुष्टादार्दुरिकीमंडूकजिह्वेव ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

वासुदेवकथामंतरेणाजीवनंव्यर्थमित्याह आयुरिति उद्यन्नस्तंचयन्गच्छन्नसावादित्यःपुंसांयदायुर्हरतिवै । "आदित्यस्यगतागतैरहरहःसंक्षीयतेजीवन"मितिश्रवणात् तस्यायुर्योयउत्तमश्लोकवार्तयाऋतेविनाक्षणः कालविशेषः सनीतएववृथेत्यन्वयः ॥ १७ ॥

हंतलोकेदीर्घकालंजीवन्पुमान्स्तूयतइतितत्राह तरवइति तरूणांश्वासाद्यभावादित्यतउक्तंभस्त्राइति भस्त्राहतयः । अयःसंतापनार्थाश्चर्मविशेषाः ॥ भस्त्राणांनिश्चेतन्याज्जडतरसाम्यमाह नेति ग्रामपशवः सारमेयाइत्योमेहन्तिरेतोमूत्रादिकमुत्सृजंति अपरेतिरश्चोऽतिरिक्ताःस्त्रीपुरुषाः अनेनहरिचरितश्रवणाभावेचेतनत्वप्रयोजकमित्युक्तंभवति ॥ १८ ॥

एतदेवविशिनष्टि श्वविड्वरेति विड्वराहोऽमेध्यशूकरः पशुर्विवेकशून्यः गदाग्रजइतिपाठेगदाभृतइत्यर्थः ग्रामंमितइति वत् ॥ १९ ॥

हतोपिहरिकथाभावंश्रावंश्रावंवर्तमानस्यपुंसःश्रोत्राहीन्द्रियसाफल्यंबायुषःसाफल्यमुच्यतेव्यर्थमित्याशयेनाह विलेइति [illegible] विलेऽवतस्योतिशेषः उरुगायगाथानप्रगायतिचेत्तर्हिदार्दुरिकादर्दुरस्यविद्यमानाजिह्वाऽसतीव ॥ २० ॥ [illegible]

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अनन्तरं श्रीशौनकेनापि व्यतिरेकोक्त्या तस्यैवाभिधेयत्वं दर्शितम्। तदाह आयुर्हरतीति। असौ सूर्यः उद्यन् अस्तञ्च यन् गच्छन् हरति वृक्षगामित्वात् बलादाच्छिनत्तीव। यत् येन क्षणोऽपि नीतः तस्य आयुः ऋते वर्जयित्वा। तावतैव सर्वसाफल्यात्। यद्यपि क्षणं भगवद्वार्तयापि सर्वमायुः सामान्याकारेण सफलं जायते एकस्यां शाखायां फलितायामक्षयवटवृक्षवत्, तथापि प्रति विशेषावश्यमपि सफलं जायतामित्येतदर्थं मम प्रश्न इति भावः॥ १७॥

तत्रायुरेकदेशोऽपि तत्सम्बन्धबहिर्भूतान्निर्व्यर्थमेव हरयति तरव इति द्वयेन। न च तरूणां श्वासो नास्तीति तेषु न्यूनत्वं वाच्यम्। सत्यपि श्वासे जीवनाभावदर्शनात् सोऽयमकिञ्चित्कर इत्याह भस्त्रा इति। ननु तरूणां रसनादिभोगो नास्ति तत्राह न खादन्तीति। न मैथुनं न कुर्वन्ति। तानपि नराकारान् पशूंश्च मत्वाह अपरे इति॥ १८॥

तदेवाह श्वविड्वराह इति। श्वादिभिस्तुल्यैस्तत्परिकरैः सम्यक् स्तुतोऽप्यकृत्यो पुरुषः पशुः। तेषामेव मध्ये श्रेष्ठश्चेत्तर्हि महापशुरित्यर्थः। यद्वा श्वादिभिः संस्तुतः सम्यक् स्तुतः सर्वेषामस्माकं यत्किञ्चिद्गुणादिकं तत् सर्वमनेन धृतमित्यर्थः॥ १९॥

अथायुर्विशेषावस्थावैफल्यदृष्टान्ततया तत्तदङ्गविशेषवैफल्यमाह विले यतेति त्रिभिः। न-शृण्वतः अशृण्वतः नरस्य ये कर्णपुटे ते विले वृथारन्ध्रे इत्यर्थः। असती दुष्टा। (भेकस्य कालापकर्षकत्वेन दृष्टान्तत्वम्। न योपेति क्वचित् पाठः। स च स्वाम्यसम्मतः पूर्ववत् युक्तछन्दोऽभ्यामनन्वयात् वेच्छन्दाध्याहाराच्च)॥ २०॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

इदानीं विद्यमानानां भक्त्यसाधकत्वे वैफल्यं वक्तुं भक्तिसाधकत्वे सफलत्वं वक्तुं कैमुतिकन्यायेन दर्शयति। आयुर्हरतीति। योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति मामेप्रजायामापशूनामाममप्राणायादायोदगाः असौयोऽस्तमेति स सर्वेषांभूतानां प्राणानादायास्तमेति मामेप्रजायामापशूनामित्यादि श्रुतिवाक्ये असौसूर्यः सर्वेषां प्राणिनां उद्यन्नस्तमयन् सर्वेषामायुर्हरतीत्युक्तं। तत्रमामेप्रजाया इति कथनात् कस्यचिदायुर्नहरतीतिज्ञायते। तत्रकोऽपेक्ष्यपेक्षायां आयुर्हरणार्थंस्थापितस्यसूर्यस्य अधिकारिणः लोकन्यायेन अधिकारहातुर्न तरंगस्य न हरतीतिज्ञायते। हृतंचायुः भगवदीयेभ्यः प्रयच्छति। विनियोगस्यावश्यकत्वात्। यद्यपिवाक्ये प्रार्थकस्यैव आयुर्नहरणं। तथापि हरणास्यानित्यत्वज्ञापनेनतथावसीयते तस्य आयुःऋते। शतायुर्वैपुरुषइतिपुरुषस्यशतमायूंषिभवंति। एकेनवत्सरेणसर्वब्रह्मांड परिभ्रमणेनएकमायुर्हरति। तत्रतस्यायुऋतइति। यस्मिन्नायुषिसक्षणोभवेत्यःउत्तमश्लोकवार्तयाभगवत्सम्पर्कंनीतःतदायुर्नगृह्णातीत्यर्थः। यत्तदोर्नित्यसंबंधात् तच्छब्देनक्षणएवोच्यते। संबंधित्वंचस्वरूपतएवेतिसर्वस्मिन्नायुषिभवतीतिसिध्यति। वर्षमध्येएकोपिक्षणः उत्तम श्लोकवार्तया स्वार्थेभगवदर्थेवानीतश्चेत्स्वकार्यंवार्तयैवकृतमितिशिष्टमपिसैवहरिष्यतीतिस्वयंनहरतीतिभावः॥ १७॥

एवंक्षणमात्रेपिभगवत्कथासंबंधेआयुषः कृतार्थतेतिउपलक्षणाविधयासर्वेषांकृतार्थत्वंनिरूप्यतदभावेबहूप्यायुःप्रार्थनयाऽकृतमपिव्यर्थं मितिसदृष्टांतमाह। तरवइति। वृक्षाःकिंबहुकालंनजीवंतिननतेषांस्वार्थेकश्चनउपयोगःमुक्ताश्चनभवंति। अतोबहुकालजीवनंप्रार्थनयापि प्राप्तव्यर्थामित्यर्थः। ननुतेषामायुःप्राणंधृत्वानतिष्ठतीतिप्राणाधारकत्वेननदुपयोगाभविष्यतीत्याशंक्याह। भस्त्राःकिनश्वसंत्युतेतिपूर्वमपि नासाचर्मपुटरूपैवतन्मार्गेणवायुरागच्छतिगच्छतिच। भस्त्रायामप्येवमितिनप्राणाधारणंनकोप्युपयोगःसिध्यतिनन्वत्रस्वपरोपकाराणांसिद्ध-त्वान्नदृष्टांततुल्यतेत्याशंक्याह। उतेतिपुनःतथाकृत्वापिव्यर्थइत्यर्थः। यथाङ्गालाभस्त्राःश्वासेनतप्तामवंति। अन्यैपितत्संबंधाल्लोहादयः। तप्तानामाघातश्चभवति। अतःपरोग्नितापाद्युपद्रवकर्तृत्वंतथार्जावनस्यार्पातिनकोपिविशेषइतिभावः। पुरुषार्थासिद्धभावस्तूभयत्रतुल्यः। ननुभोगोस्तीतिचेत्तत्राह। लोकानांभोगभ्रमः अन्नादिभक्षणं। वस्तुतस्त्वेकत्रप्रविष्टोऽन्यत्रनिर्गच्छति। यथा स्वशरीरान्निर्गतंशूकरमुखे प्रविश्यपुनर्निर्गच्छति। तथाभूमिवृक्षादेर्निर्गतंस्वस्यापिमुखेप्रविश्यविनिर्गच्छतीतिनशूकरादिभ्यःकश्चनविशेषः तुल्यत्वंयस्यनस्फुरतिनं प्रत्येतदापादनमनिष्टं। नन्नह्मविदंप्रति। सहिप्राकृतःस्वात्मानंबहुमन्यते। अपरेइत्यनेनअयमप्येकःपशुः। तस्मान्नयःपशूनांहस्तादाना इतिश्रुतेः। परंग्रामपशुत्वेननिंद्यत्वम्॥१८॥

एवंनिंद्यैःसहतुल्यतामापाद्यततोपिनीचतामाह। श्वविड्वराहोष्ट्रखरैरिति। एतेचत्वारःपशवःसर्वलोकेषुनिंदिताः तेषांस्तुतिकोपिन करोति। भगवद्विमुखेपुरुषेचदृष्टेलोकास्तानेवस्तुवंतीतितैरयंसंस्तुतः। भगद्विमुखेदृष्टेएतस्मात्श्वादयः समीचीनाः इतिलोकास्तुवंतीतिनेतज्ज्ञानन्य स्यानयंस्तावयतिसमीचीनइत्येतैरयंस्तुतोभवतीतिभावः। यद्यपिश्वापुच्छचालनादिनाग्राममात्रेपिक्षिप्तालालसतांज्ञापयति। तथा अय-मपिगृहस्थःपरस्वामिहितोभवति। अल्पसंतोषीच। प्राकृतस्तुतद्विपरीतः। एवंविड्वराहोपिकुत्सितविषयासक्तःचिरमुग्रस्थानेरमते। तथायमपि। तथापिसर्वानुपयुक्तमुपजीवतिनतत्रकेपिभाग्निः। अयंतुसर्वेषांभागंस्वयंमश्नाति। यद्यप्युष्ट्राःकंटकादितिपरुषविषयभोक्तारः तथापिस्वामिभारवाहकाः अयंतुतद्विपरीतः। नभगवतःकिंचित्कार्यंकरोति। यद्यपि खरःखरीपादताडितोपगच्छति। पुरुषतुल्यतथापि न वक्त्रःस्वामिकार्येहठंकरोति। अस्यतुतदीयादोषाएवनगुणागणाःसंतीतिततोपिनिंदितइत्यर्थः। नैतत्पुरुषमात्रसाधारणं। येषांपुनरत्र भक्षणेउपयोगोस्तितद्व्यावृत्त्यर्थमाह। मोघमक्षंविदंतेअप्रेचताःअन्नेनप्राणाः अन्नात्प्राणाभवंतीतिचवेयर्थ्यज्ञानभक्त्युपयोगौचअक्षस्यनिरू-पितौ। तत्रवैयर्थ्येपक्षेतुल्यता। पक्षद्वयेतुपुरुषार्थपर्यवसानात्नेतितद्वैपरीत्यमाह। नयत्कर्णपथोपेतइति। यस्यकर्णमार्गेकदापिगदाग्रजः कृष्णःकेवलंभक्तिप्रकाशनार्थंप्रकटोयस्यकर्णमार्गेनगतः। स्वानामितिन्यूक्त्यात्। अयंचतदीयोनभवतीतिनिश्चितं। अतोभक्तिमार्गेज्ञाने-निंदारिते। गदस्तुमाताप्यिोर्दुःखदूरीकरणानंतरमुत्पन्नइतियत्रभगवत्कृतदुःखदूरीकरणमभिप्रेतंतत्रगदाग्रजइत्युच्यते॥ १९॥

एवमायुषोहेयस्य च भागायतनस्य वैफल्यमुक्त्वाइन्द्रियाणां वैफल्यमाह। विलेइति। यतेतिच्छेद उडक्रमस्य अतिविचित्रचरित्रस्य विक्रमाज्जगद्गुरवतः पुरुषस्यैकर्णपुटेतेविलेइत्यर्थः। तत्रस्वाभिप्रेतेन्द्रियाभावात् अपकारिसर्परूपप्राकृतेन्द्रियस्य विद्यमानत्वात् शरीरैकपक्षेऽपकारिच्छिद्रे। यथागृहे तादृशेविलेप्रविष्टः सर्पः गृहपतिं खादति। तथाप्राकृत्यः कथाः एतत्कर्णं प्रविष्टाः एनंसर्वतो-भाग्युच्यन्तीत्यर्थः। "तांस्तांक्षिपन्त्यशरणेषु तमक्षुद्रजन्तू"ति वाक्यात्। जिह्वाच असती। भगवताहिस्वेन्द्रियेभ्यः विरलंयंकृतासंश्रिताच स्वंदानहन्तेभ्योरक्षांकरोति। एवमपिसानभगवत्परा किन्तुस्वाभिचारिणी च। अन्यस्तोत्रकरणात् अन्यगामिनी। तत्रापि विशेषमाह।

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

दार्वुरिकेव। तस्य जिह्वानभगवता पृथक्कृता न रक्षकत्वेन दत्ता दत्ताः। साक्षात्तयैव परया कीटादीन् भक्षयति। तथाऽस्यापि जिह्वानि रक्षकरहिता स्वनएवक्रूरपरघातार्थं प्रवृत्तेत्यर्थः। एवमपि तुष्टाविषयार्थमपि उरुगायगाथाश्चेद्गायति तदापि नकाचिच्चिन्ता तत्रापि नास्तीत्याह। नचोपगायतीपि ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

नात्र विलम्बः कार्य्य इत्याह आयुरिति। असौ सूर्य्यः उद्यन् उदयं प्राप्नुवन् अस्तम् अदर्शनञ्च यन् गच्छन्। तस्य आयुः ऋते विना यत् येन क्षणः अवसरः। यद्वा क्षणोऽपि निमेषत्रयमपि। तावतैव कालेन सर्व्वमायुः सफलं भवति। एकस्यामेव शाखायां फलितायां वृक्षोऽयं फलवानिति यथोच्यते। प्रतिशाखं फलत्वञ्च कैमुत्यादेव सर्व्वस्यायुषः कृष्णवार्त्तायुक्तत्वमपेक्ष्यम्। नन्वेवञ्चेत् आयुर्हरणाभावात् कृष्णवार्त्तायापितक्षणो जनो न म्रियेत। सत्यम्। सत्पात्रीकृतविष्णो जनोऽक्षयविष्णो यथोच्यते परत्र तद्भोगानन्त्यप्राप्तेः। "सममन्नाश्नतो दानं द्विगुणं ब्राह्मणो भवेत्। अधीते शतसाहस्रमनन्तं वेदपारगे" इति स्मृतेः। तथैव कृष्णसात्कृतस्वायुर्जनः परत्र तत्पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः। जरामरणरोगादिकं तु भक्त्युत्कर्षवाहनार्थं मतान्तरोत्खातार्थञ्च स्वभक्तेः रहस्यत्वरक्षणार्थञ्च भगवदिच्छयैव भवति, न तु तत्र वस्तुतः कालकर्म्मादेः कारणत्वमुपपादितं भीष्मनिर्याणाध्याये ॥ १७ ॥

न चायुर्हरणाभावस्य मर्त्यलोके जीवनमेव फलमित्यत आह तरव इति। प्रत्युत मनुष्येभ्योऽपि तेषां जीवनाधिक्यम्। ननु तेषां श्वासो नास्तीति अत आह भस्त्रा इति। प्रत्युत मनुष्येभ्योऽपि भस्त्राणां श्वासाधिक्यम्। ननु तासामाहारादिकं नास्तीति तत्राह न खादन्तीति। न मेहन्ति स्त्रीसम्भोगं न कुर्व्वन्ति। मेहनं रेतःसेकः। प्रत्युत मनुष्येभ्योऽपि तेषां खादनाद्याधिक्यम् अपरे इत्यनेन तेषामपि नराकारपशुत्वं व्यञ्जितम् ॥ १८ ॥

तेषां पशुत्वेऽप्यतिगर्हणीयत्वमाह। श्वादिभिः सम्यक् स्तुतः। अस्माकं चतुर्णामपि धर्म्मान् अयमेक एव धत्ते वयन्तु परस्परधर्म्मग्रहणेऽप्यसमर्था इति, तथा अयं मनुष्योऽपि भूत्वा वयन्तु पशवोऽपि भूत्वा पश्वन्तरस्यैकस्यापि धर्म्मं धर्त्तुं न शक्नुम इति, तथाचं शास्त्रादिष्टं स्वधर्म्ममप्युल्लङ्घ्य अतिरागेणैव धत्ते वयन्तु नियतिकृते स्वस्वधर्म्मे एव पतिता इति, तथायमस्मद्धर्म्मैः जनिष्यमाणां नरकं ज्ञात्वापि वयन्तु मूढा एवेति अनुज्ञा स्तुतिः। तेषां श्वादीनां धर्म्मास्तु निर्हेतुरोषणत्वामेध्यभोजित्वमहाभारवाहित्वस्त्रीपादताडितत्वादयः। यस्य कर्णपथं न जातु, कदाचिदपि न, उपेत्य गतः। गदाग्रजः इति गदस्य रोगस्याग्रे प्रतियोद्धेव जायते प्रादुर्भवतीति श्लेषेण तदैव ते क्रोधादयः पुरुषस्य रोगा नश्यन्तीति भावः ॥ १९ ॥

एवं पुरुषमात्रं निन्दित्वा प्रत्येकभक्त्या विना प्रत्येकतदङ्गानि निन्दति बिले इति पञ्चभिः। बत खेदे। न-शृणोतः अशृण्वतः पुंसो ये कर्णपुटे न बिले एव ग्राम्यवार्त्तोभुजङ्गगृहतुल्ये। बहिरो भेकस्तदीयेवासती मिथ्याभूता दुष्टा श्लेषेण असती स्त्रीव तस्य सुकृतसर्व्वस्वं विप्लावयति। अत्र यद्यपि भुजाद्येकाङ्गकृतयापि भक्तः पुरुषः कृतार्थ एव भवति तदापि तस्याङ्गान्तराणि तु व्यर्थान्येव भवन्तीत्याशयेनाङ्गानां निन्दा ज्ञेया ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

हरिभजनंविनावृथैवदेहधारणामित्याह। आयुरित्यष्टभिः। यत्येनउत्तमकीर्तेर्भगवतोवार्तयाक्षणोनीतस्तस्यायुः ऋतेविना। असौसूर्यः उद्यन् उद्गच्छन् अस्तमदर्शनं च यन् गच्छन् पुंसामायुर्हरति वृथैवनाशयति ॥ १७ ॥

भस्त्राः चर्मकोषाः अपरेऽसिद्धपशुभ्योनराकाराःपशवः नमेहन्तिनरेतः सिञ्चति। देहधारणमात्रेण वा वायुधारणमात्रेण भोजनमैथुनपरत्वेन वायद्यायुः सफलंस्यात्तर्हि तर्ह्यादिभ्यः पुंसांकोविशेषइति भावः ॥ १८ ॥

अतएवनामप्रसिद्धोयः गदाग्रजः श्रीकृष्णः यस्य जनस्य जातुकदाचिदपि कर्णपथोपेतोनभवति स श्वादिभिः संस्तुतः सदृशोनिरूपितः ॥ १९ ॥

बतेति खेदेउरुक्रमस्य त्रिविक्रमस्य भगवतः विक्रमान् नश्शृण्वतः अशृण्वतः नरस्यकर्णपुटेबिलेनिरर्थकेछिद्रेयः उरुगायस्य बहुधागीयमानस्यभगवतः गाथाः कथाः नचोपगायति तस्य जिह्वा असतीदुष्टादार्वुरिकेवददुरस्थेयंदार्वुरिकातुल्या ॥ २० ॥

भाषा टीका

यह सूर्य उदय तथा अस्त होता हुआ तिन पुरुषों के आयु को हरता है जिन लोगों का एक क्षण भी भगवत्कथा के विना बीतता है ॥ १७ ॥

जीनको वृक्ष नहीं जीते हैं क्या श्वास लेने को लोहार की भांथी नहीं श्वास लेती है क्या खाने को मक्ष सूअर करने को होता ग्राम के और कुक्कुरादि पशु नहीं करते हैं क्या ॥ १८ ॥

जिसके कर्ण मे कदापि भगवन्नाम नहीं पड़ा है वह पुरुषतो कुत्ता गाम सूअर ऊट गधा इन सबों मे बड़ा मानने योग्य है ॥ १९ ॥

जिस पुरुषके जो दोनो कर्ण भगवद् कथा को नहीं सुनते हैं वेकर्ण बिलसदृश के हैं जिसको जो जिह्वा [illegible] है वह जिह्वा मेंडक की सदृश की है ॥ २० ॥

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥ २१ ॥
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २२ ॥
जीवञ्छवो भागवताङ्घ्रिरेणून् न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ॥ २३ ॥
तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥
अथाभिधेह्यङ्ग ! मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे महापुरुषोपवर्णनं नाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

पट्टस्त्रीष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न नमेत् तर्हि केवलं भार एव । शावौ मृतकः तत्करतुल्यौ । लसन्ति काञ्चनकङ्कणानि ययोस्तौ । अप्यर्थे वाशब्दः ॥ २१ ॥

ये नयने विष्णोर्मूर्त्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छेन तुल्ये । द्रुमवज्जन्म भजेते इति तथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

नाभिलभेत अभितो न स्पृशेत् न धारयेत् । श्रीविष्णुपद्याः विष्णुपदलग्नायाः । न वेदेति अवघ्राय नाभिनन्देदित्यर्थः ॥ २३ ॥

अश्मवत् सारो बलं काठिन्यं यस्य । विक्रियालक्षणमाह अथेति । गात्ररुहेषु रोमसु हर्षः उद्गमः ॥ २४ ॥

यस्मात् अमरूकस्य सर्व्वमिदं व्यर्थं मनसोऽनुकूलञ्च प्रियं ब्रूषे । अथ अतः साधु पृष्टः सन् वैयासकिर्नृपतिं प्रति यदाह तदभिधेहीति ॥ २५ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

यदिमुकुंदंननमेन्नमस्कुर्यात्तदुत्तमांगंशिरःपट्टकिरीटजुष्टंपट्टेनशस्त्रोल्लेखेन किरीटेनवाजुष्टमपिपरं केवलंभारःहरेःसपर्यांपूजांनोकुरुतः नकुर्वंतीत्यर्थः शावौकरौहस्तौचलसन्तौकांचनकंकणौययोस्तथाभूतावपिशावौशवसंबंधिनाविवमंगलाविस्वर्थः ॥ २१ ॥

विष्णोर्लिंगानिमूर्त्तीः ननिरीक्षतेनेक्षेतेनयनेबर्हायितेमयूरपिच्छनेत्रतुल्ये क्षेत्राणि श्रीरंगादीनि नानुव्रजतोनेक्षतौनृणांपादौद्रुमजन्मभाजौ द्रुमजन्मभजतः इतितथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

भागवतांघ्रिरेणुंजातुकदाचिदपि यस्तुमर्त्योमनुष्यः नाभिलभेताऽभितोनस्पृशेद्धारयेत्सजीवन्छवः जीवन्मृतशवतुल्यः श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाःतुलस्या गंधं सुगन्धंयस्तुमनुजोनवेदाभिघ्रायनाभिनन्देदित्यर्थः सश्वसन्जीवःप्राणयुक्तोपिशवः शवतुल्यः ॥ २३ ॥

गृह्यमाणैः स्मरणकीर्तनादिभि र्गृह्यमाणैर्भगवन्नामभिर्यदीयं हृदयंनविक्रियेतविकारं नप्राप्नुयात् अथमुक्तेविकारः नेत्रेजलमार्गादायुद्विंदवः गात्ररुहेषुहर्षः रोमांचश्चनस्यात् तद्धृदयमश्मसारंकाष्ठायसंभवेति वेदे यदाममोविकारोभवति तदाममंहाहुः रोमांचश्चस्यादित्यर्थः ॥ २४ ॥

भागवतप्रधानस्त्वं मनसोऽनुकूलंप्रियंभाषसेमह्योऽतः आत्मविद्यायांविशारदः निपुणः वैयासकिः श्रीशुकः पृष्टः सन्नृपतिं प्रतियदाह-तदभिधेहीत्यन्वयः ॥ २५ ॥

इतिश्रीमद्भागवतमहापुराणे द्वितीयस्कंधे वीरराघवकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजध्वजकृत पदरत्नावली ।

[illegible] ॥ २१ ॥

बर्हायितेपिच्छनेत्रवदाचरितेनिष्फलेहत्यर्थः लिंगानिप्रतिमाः द्रुमवद्जन्मभजतइति क्षेत्राणिपुण्यस्थानानि क्षेत्रंपुरेणदेहेक्षेत्रंक्षारंयोनि-मात्रयोः पुण्यस्थानेसमूहेचघृतमाज्येऽनुसर्पिषीतिविश्वप्रकाशः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्ति-सारार्थदर्शिनी।

भागवतस्वभगवद्भक्तजनस्यांघ्र्योरेणुं यद्वाभागवतयोर्भगवतोविद्यमानयोरंघ्र्योरेणुं आत्मनिवेदनकांक्षेतजीवन्मुक्तोऽपीत्यर्थः श्रीविष्णु-पद्याः श्रीविष्णुपदाप्रियायाः श्रवस्थलः सकृत्कुर्यात्तुलस्याः ॥ २३ ॥

पुनश्चस्यवतहृदयंकथाकण्ठेनगृह्णमाणैर्हरिनामधेयैर्नविक्रियेतद्रुहीभावात्मकंविकारंनाप्नोति तर्हिवज्रसमसारवद्दृढिकठिनमतीवनेत्रा अथदैवाद्यहिविकारः तस्येदंलक्षणं। मुखेधिकासलक्षणाविकारः। नेत्रेजलंस्रवति। गात्रवहेपुरोमहर्षो लोमांचलक्षण स्या-दितिशेषः ॥ २४ ॥

यतएवहरिकथाश्रवणाभावेजन्मादेर्वैफल्यमतस्तमानमनृपतिमात्मविद्याविशारदः परमात्मविद्यायांपुनरतीवकुशलोवैयासकिर्शु-पतियदाहतन्मामभिधेहि हरिकथाभिधानेमहान्यःकिमस्यहृदाह मनइति मनोनुकूलंयथाभवतितथाप्रभावसे हेत्यंतरमाह भागवतेति अतस्त्वत्तएवश्रोतुमिच्छाप्रवर्तनइति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे विजयध्वजकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

भारः परमिति। पद्मवल्कोष्णीषेण किरीटेन वा जुष्टमपि। अप्यर्थे वाशब्दः ॥ २१ ॥

द्रुमवज्जन्म भजेते इति वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

अथ तत्तत्सर्वकारणाविशेषं विना तत्तदपि न सम्पद्यते। तथाच श्रीवैष्णवचरणरजसि सर्वाङ्गस्नानमेव नमस्कारादिषु कारणं श्रीचरणतुलसीगन्धस्तु हुङ्कारकारणं हुङ्कारस्तु पुलकादिषु कारणमिति ज्ञेयम्। इत्यभिप्रायेणाह जीवन्निति। श्रीविष्णुपद्याः तत्पदलग्नायाः ॥ २३ ॥

तदश्मसारमिति। अश्मवत् सारो बलं काठिन्यं यस्य। विक्रियालक्षणम् अथेति। यदा हृद्विकारो भवेत् तदा नेत्रादौ अश्रादिकं भवतीत्यर्थः। इदमेवन्यायेन श्रीमता राज्ञा हृढीकरिष्यते। सा वाग्यया तस्य गुणान् गृणीते इत्याख्याम्। तदेवं श्रीशुकवाक्यारभ्य-ध्यायत्रयाभिधेयत्वेन श्रीभक्तिरेव लब्धा। टीका च—तत्र तु प्रथमेऽध्याये कीर्त्तनश्रवणादिभिः। स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते द्वितीये तु ततः स्थूलधारणातो जितं मनः। सर्व्वसाधिष्ठिणा सर्व्वेशे विष्णौ धार्य्यमितीर्य्यते ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं भूयसो ग्रन्थेः। भक्त्युद्रेकेण तत्कर्म्मश्रवणादर ईर्य्यते ॥ इत्येषा ॥ २४ ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी।

पद्माभिषिक्तस्यशिरःकुत्रापिनानमते तादृशमपिपद्मकिरीटजुष्टं पद्मकिरीटाख्यांप्रीत्यासेवितं मोक्षद्वारंचेन्न नमेत् तदाउत्तमांगमपि भारएव सामान्योपयोगस्याप्यसिद्धत्वात्। भोगजीवनेतुपूर्वनिषिद्धे। अतिभारवाहकोऽपि हि न नमति। शाखोशाखसंवंधिनौ। अंतः प्राणरहितौ। तथान्तर्भगवत्सेवारहितौ उपरिशोभापि तत्रापि शाखालंकरणैः क्रियते। अत्रापिकांचनकंकणौ वेत्यनादरे ॥ २१ ॥

नयनेपुनः मुखशोभांकुर्वती प्रयोजनान्तराभावात् मयूरपिच्छनेत्रवत् भगवतोवैचित्र्यंज्ञापयतः ननुतत्रचैतन्यं। भगवतोहिद्विधासृष्टिः चेतनाचेतनाच भगवत्कार्यरहिता चैतन्यस्य भगवद्रूपत्वात् बर्हवद्वाचरतीति बर्हायितं लिंगानीति भक्ताः अधिष्ठानानिचये न निरीक्षतः नपश्यतः। पादाद्यपिजंगमस्याअपि द्रुमजन्मैव भजतः। द्रुमेजन्मद्रुमजन्म यद्यपि। *यानसाधनंनभवतः। तथापिभूमिस्थितिमात्रेतदुप-योगात्तत्तुल्यता स्वावयवैनमुच्चतयास्थापयतः ॥ २२ ॥

जीवन्शवः शवोहिद्विविधः। अर्द्धजलेपतितोद्विविधस्तिष्ठति। मुमूर्षुर्मृतश्च। तत्रभागवतांघ्रिरेणुंयोनलभेत। आतिथ्येनतत्पूजां-नकुर्यात्। यस्यवागुद्गृहेतकदापिनायाति। सतुकेवलंमरणार्थमेव जीवतीत्यर्थः। यस्तुभगवत्प्रसादंनप्राप्नोति केनापि प्रकारेण तस्य तुजीवनमपि नास्ति। जीवनरूपस्य भगवदीयरसस्याभावात् परंश्वसिति। यथार्द्धजलेकेवलचेतनारहितेश्वसिति। अन्येषामपि कार्ये रुणद्धि। तथाश्रीविष्णुपदैकनिष्ठत्वेनैव याप्रसिद्धातुलसीतस्याः गंधंकदापिनाघ्रातवान्। भगवच्चरणारविंदप्रसादत्वेन नगृहीतवान् घ्राणस्य गंधग्राहकत्वात् तुलस्यांगंधस्य च विद्यमानत्वात्। सर्पपुच्छछेदनेचलनवत् इन्द्रियतदधिष्ठातृदेवतापगमात्। केवलंक्रियाभावान्न मरणीत्याह। श्रीविष्णुपद्याइति ॥ २३ ॥

अन्तःकरणवैफल्यमाह। तदश्मसारमिति। वतइतिखेदे। यद्यपिधैर्यगुणः। भगवच्चरित्रमपि श्रुत्वाधीरएवदृश्यते। तथापि लोहस्य-तस्य धैर्यं अश्मसारभूतं इदमिति भक्त्यावेशात् स्वकीयमेवनिन्दति। अनेनतत्रभगवच्चरणारविन्दस्थापनसंभावनामिवारिता। अतः-तत्प्रक्षालनेऽस्वर्थं मितिभावः। यद्हृदयंगृह्यमाणैः स्वयमन्येनवा दुःकामिनिवेशाभ्यांहृदस्यैर्हरेः नामधेयैः वाचकैः पदैः यदाविकारं-नप्राप्नोति। यस्यहिगृहेभगवदागमनं संभावितं तत्रहिमार्जननिवेचनाद्यलंकाराभवंति। यत्रतुसंभावनैव नास्तितत्रजालगृहवत्तच विनिर्मा-णोत्पद्यते। अथविकारानिरूप्यंतेपरिणामार्थं। यदाविकारः अन्तःकरणेभवेत् तदाद्रवंत्यापकंभवेत्। नेत्रेजलंरोमांचश्च। विकारोहिभग-वदीयत्वेन परिणामः। तदातदीयानांवैष्णवत्वं। तत्ररोम्णांहृष्टत्वादुन्नतिः वैष्णवत्वाद्युक्ता। रसस्यान्तः पूरणाद्गलनेनैव कमलंभवति सजलम्। अन्यथास्वस्थानच्युतंकेवलं शुष्कमितिभावः ॥ २४ ॥

तस्मात्सर्वेन्द्रियाणांदेहादेश्च साफल्यार्थं भगवत्कथाममिभेधेहीत्याह। अथाभिधेहीति। अंगेतिकोमलसंबोधनं। अथोभिप्रायविचार-व्यनिरेकेणापि श्रवणमात्रेणैव त्वद्वाक्येमनोहरताअनुभूयते। अतस्त्वंभागवतप्रधानः त्वद्वाक्येभगवत्संबंधात्। परंवैयासकिर्यदाह। सहिषष्टिसहस्रमुनिवार्त्तानकरिष्यति आत्मविद्यायांनिपुणत्वात् व्यासपुत्रत्वाच्चराजानंप्रतितेनैवप्रश्नेकृतेत्वयकत्वाच्च अनेनश्लोकेवदभक्तिविरुद्धं तद्वचनमित्युक्तंभवति ॥ २५ ॥ इति श्रीभागवते सुबोधिन्यां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

* पानसाधनमित्यपपाठः।

[illegible] शिरः पङ्कजकोष्णीषेण च किरीटेन च जुष्टमपि वर्ष्म केवलं भारः । संसारसिन्धौ पतितानां तमं प्रति किमिदं विलक्षणमीति भावः । शवो मृतकस्तत्तुल्यमित्यर्थः । शवो मृतकस्तत्सम्बन्धिनाविति देवपित्राद्योऽपि तद्दत्तं तत्कालिकमधुचिन्नाद्य गृह्णन्तीति भावः । वा-शब्दोऽप्यर्थे ॥ २१ ॥

ये तमङ्घ्रे विष्णोर्नुवतीर्न विरीषेते ते वर्हायिते मयूरपिच्छतुल्ये इति ताभ्यामात्मन उद्धारपदवीमपश्यन्तः संसारकूपकक्षेत्रे एव पतन्तीति भावः । द्रुमजन्म भजेते इति तथा तौ वृक्षमूलतुल्याविति यमदूतैरेव कुठारैरिछद्यमानौ तौ भविष्यत इति भावः ॥ २२ ॥

एकैकाङ्गानि निन्दित्वा समुदितानि निन्दति । नाभिलभेत अभितो न स्पृशेत् सर्व्वाङ्गेषु न धारयेदित्यर्थः । स जीवच्छवः प्रेत शरीरविशेष इव वेदमानः क्षणं भीषयते ततपाणिकृतसपर्य्यादिकमपि भगवान् गृह्णातीति भावः । श्रीविष्णुपद्याः विष्णुपदकल्पत्वेन विष्णुपदीत्यभिधानायास्तुलस्या गन्धं न वेद अवघ्राय नाभिनन्देदित्यर्थः । श्वसञ्छवः पूर्ववत् सोऽपि जीवच्छव इत्यर्थः ॥ २३ ॥

तदेवं व्यस्तसमस्ततत्रा बाह्यमङ्गं प्राधान्येन निन्दित्वा आध्यन्तरमपि निन्दति । तत् अश्मसारं लोहमयमेव हृदयम् । यत् खलु गृह्यमाणैः कीर्त्यमानैरपि बहुभिर्हरिनामधेयैर्न विक्रियेत । विक्रियालक्षणमाह अश्रेत्यादि । गात्ररुहेषु रोमसु हर्षः रोमाञ्चः । बहुनामग्रहणेऽपि चित्तद्रवाभावो नामापराधलिङ्गमिति सन्दर्भः । किञ्चाश्रुपुलकावेव चित्तद्रवलिङ्गमित्यपि न शक्यते वक्तुम् । यदुक्तं श्रीमद्रूपगोस्वामिचरणैः—स्वभावपिच्छिलस्वान्ते तदश्वासपरेऽपि च । सत्त्वाभासं विनापि स्युः काप्यश्रुपुलकादयः ॥ इति । तथा अतिगम्भीरमहानुभावभक्तेषु हरिनामभिश्चित्तद्रवेऽपि बहिरश्रुपुलकादयो न दृश्यन्ते इति । तस्मात् पञ्चमिदमेवं व्याख्येयम् । यद्हृदयं न विक्रियेत । कदा । यदा विकारस्तदापीत्यर्थः । विकार एव कस्तत्राह नेत्रे जलमिति । ततश्च बहिरश्रुपुलकयोः सतोरपि यद्हृदयं न विक्रियेत तदश्मसारमिति वाक्यार्थः । ततश्च हृदयविक्रियालक्षणान्यसाधारणानि क्षान्तिनामग्रहणासक्त्यादीन्येव ज्ञेयानि । यदुक्तम्—क्षान्तिरन्यर्थकालत्वं विरक्तिर्मानशून्यता । आशाबन्धः समुत्कण्ठा नामगाने सदा रुचिः ॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले । इत्यादयोऽनुभावाः स्युर्जातभावांकुरे जने ॥ अश्रुपुलकादीनि तु साधारणान्येव । अयमर्थः—उत्तमाधिकारिणां निर्मत्सराणां नामग्रहणे सत्येव नाममाधुर्य्यस्यानुभवः स्यात्, तस्मिंश्च सति हृदयविक्रिया च स्यात्, सत्यां च तस्यां तद्वयञ्जकाः क्षान्त्यादयोऽश्रुपुलकादयश्च भवन्त्येव । कनिष्ठाधिकारिणां समत्सराणान्तु सापराधत्वान्नामग्रहणबाहुल्येऽपि तन्माधुर्य्यानुभवाभावे चित्तं नैव विक्रियेत, तद्वयञ्जकाः क्षान्त्यादयोऽपि न भवन्ति, तेषामेवाश्रुपुलकादिसत्त्वेऽप्यश्मसारहृदयतया निन्देयम् । किञ्च तेषामपि साधु सङ्गेनानर्थनिवृत्तिनिष्ठारुच्यादिभूमिकारूढानां कालेन चित्तद्रवे सति चित्तस्याश्मसारत्वमपगच्छत्येव । येषान्तु चित्तद्रवेऽपि सति चित्तस्याश्मसारता तिष्ठेदेव ते तु दुश्चिकित्स्या एव ज्ञेयाः । तथा च वक्ष्यते तृतीये सवीजयोगध्याने—एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् । औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥ इति । अत्र द्रवद्धृदय इव इति चित्तद्रवः । तच्च चित्तबडिशमिति चित्तस्याश्मसारता, बडिशस्य लोहमयत्वात् अश्मसारस्य लोहपर्य्यायत्वात् । प्रतिलब्धो भावो येनेति भावोऽयमाभासरूप एव, चित्तद्रवोऽपि तादृश एव ज्ञेयः यथार्थत्वे शनकैर्वियुङ्क्ते इति तस्य पुरुषार्थबुद्ध्या हत्यागानुपपत्तेः । अतएव तादृशध्यानभक्त्याप्यय भक्तशब्देन नाभिधीयते, किन्तु योगिशब्देनैव । चित्तस्य बडिशत्वेन कठोरत्वकुटिलत्वाभ्यां तद्विषयस्य भगवद्धृदयस्य दुःखदान एव पर्य्यवसानमिति । एवञ्च सा वाग् यया तस्य गुणान् गृणीते करौ च तत्कर्म्मकरौ इत्यादिवक्ष्यमाणवाक्यैरन्वयेन सिले वत इत्यादिवाक्यैर्व्यतिरेकेण च भक्तेरेव शास्त्राभिधेयत्वं दृढीकृतम् ॥ २४ ॥

*यस्मादेवं तस्मादभिधेहि । ननु किमभिदधामीति तत्राह । त्वं मनोऽनुकूलं प्रभाषसे तस्माद्यद्वैयासकिराह तदेव । ततोऽधिकमन्यत् किं वक्तव्यमस्तीति भावः ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र तृतीयोऽपि सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पद्शब्दः पद्नोष्णीषवाचकः पद्नोष्णीषेणकिरीटेनचजुष्टमपि । उत्तमांगंशिरो । यदिमुक्तिप्रहेननमेवतर्हिपरंकेवलंभारएव । लसंतीकां चर्मकंकणंचययोस्तावपिवाशब्दोऽप्यर्थे । हरेःसपर्यापूजांनकुरुतः नकुर्वतीतर्हिशावौशवोमृतकः तत्करतुल्यौ ॥ २१ ॥

विष्णोर्लिंगानिमूर्त्तीः । नराणांयेनयनेननिरीक्षतः ननिरीक्षेतेचेत् । तर्हितेवर्हायितेमयूरपिच्छनेत्रतुल्ये । हरेःक्षेत्राणिश्रीमद्वृन्दावनादीनियोनानुव्रजतश्चरतः । तौपादौद्रुमजन्मभाजौद्रुमजन्मभजतइति । तथाद्रुममूलतुल्यौ ॥ २२ ॥

यस्तुभागवतानांमंघ्रिरेणुंजातुकदाचिदपिनाभिलभेत अभितोनस्पृशेत्धारयेतसजीवन् । अपिशवःमृततुल्यः यस्तुश्रीविष्णुपद्याः श्रीविष्णुपदकल्पायाः गंधंनवेदअवघ्रायनाभिनंदेतसश्वसन् । निश्वासान्मुंचन्नपिशवःशवतुल्यः ॥ २३ ॥

कृष्णमार्य्यैः देवाद्यधिकटवर्त्तिभिर्भागवतैरुच्चार्यमाणैर्हरिनामधेयैर्यदधिक्रियेतविकारंनप्राप्नुयात् । तद्हृदयमश्मसारम् । काण्यांयसम् । विक्रियालक्षणमाहअश्रेति । नेत्रेविकारः । आरुण्यंजलंचगात्ररुहेषुरोमसुहर्षःउद्गमः ॥ २४ ॥

हेभगवत्सुतयतोऽभक्तस्यसर्वंव्यर्थम् । अथअतःराजासाधुपृष्टःसन्वैयासकिः । नृपतिंप्रतियदाह । तदभिधेहित्वंचमनोनुकूलंमनसःप्रियं । भावसेतृषेऽतोऽभिधेहि ॥ २५ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधेतृतीयाध्यायार्थप्रकाशः ।

राज पट्ट मुकुट से भूषित भी शिर मुकुन्द को जो नमस्कार नहीं करते वे केवल भार भूत है और जिन हाथों से हरि की पूजा नहीं करें वह हाथ कांचन के कंकणों से भूषित भी मुर्दे के हाथों के तुल्य हैं ॥ २१ ॥

और हरिके श्रीविग्रहों को जो नेत्र नहीं दर्शन करते हैं वे मोरके पिच्छ के तुल्य हैं और जिन पैरों से हरिके क्षेत्रों में न जावें वे पैर वृक्ष मूलके तुल्य है ॥ २२ ॥

और जो पुरुष वैष्णवों के चरण रज को कभी न प्राप्त होवे वह जीताभी मृत के तुल्य है और विष्णुप्रिया तुलसी जी के सुगंध को सूंघकर अनुमोदन करे वह जीता हुआ मुर्दा के तुल्य है ॥ २३ ॥

और हरि के नाम लेने से जिसका हृदय विकार को न प्राप्त होवे वह हृदय पाषाण के तुल्य है विकार यही कि नेत्रों में जल और रोमटों में आनन्द ॥ २४ ॥

हे सूत वैष्णवों में श्रेष्ठ श्री शुक आत्म विद्या विशारद परीक्षित जी से जो कुछ मन के अनुकूल कहा हो वह आप कहिये ॥ २५ ॥

इति द्वितीयस्कन्ध का तीसरा अध्याय ॥ ३ ॥

चतुर्थोऽध्यायः ।

सूत उवाच । वैयासकेरिति वचस्तत्स्वनिश्चयमात्मनः
उपधार्य्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥
आत्मजायासुतागारपशुद्रविणबन्धुषु ।
राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥ २ ॥
पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ? ।
कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥
संस्थां विज्ञाय संन्यस्य कर्म्म त्रैवर्गिकञ्च यत् ।
वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥

तुर्य्ये परीक्षिता पृष्टं मृत्यवादि हरिचेष्टितम् ।
शुकेन ब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते ॥ ० ॥

राज्ञः प्रश्ने कथयितुं तस्य प्राक्तनीं स्थितिमाह चतुर्भिः । वैयासकेः शुकस्य इति एवम् आत्मनस्तत्स्वस्य निश्चयो यस्माद् तद् यच्च उपधार्य्य आकलय्य सतीं शुद्धां कृष्ण एव सेव्यो नान्य इत्येवम्भूताम् ॥ १ ॥
आत्मा देहः । पशवः गजादयः ॥ २ ॥
इममेवार्थं हरिलीलालक्षणम् ॥ ३ ॥
संस्थां मृत्युम् । त्रैवर्गिकं धर्म्मार्थकामप्रधानम् । संन्यस्य त्यक्त्वा । आत्मभावं परमप्रेम्णा भगवद्दास्यं गतः प्राप्तः सन् पप्रच्छ ॥४॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य तट्टिप्पणी ।

॥ ० ॥ १—१७ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवमापृष्टःसूतोराजःप्रश्नंकथयितुंतस्यप्राक्तनींस्थितिमाह वैयासकेरिति वैयासकेःश्रीशुकस्यात्मनः तत्त्वनिश्चयंयथावस्थितस्वरूपनि श्चयकंयच्च इत्युक्तप्रकारेणोपधार्यश्रुत्वौत्तरेयः उत्तरापुत्रः राजाश्रीकृष्णेसतींप्रीतिंव्यधादकरोत् ॥ १ ॥
किंच आत्मादेहःद्रविणंधनमात्मादिषुअधिकलंनिरूपद्रवेराज्येचनिरूढांनित्यरूढांममतांस्वत्वाभिमानितांत्यजा ॥ २ ॥
हेसत्तमाः? शौनकादयः इममेवहरिकथालक्षणमेवार्थंपप्रच्छमांप्रतियत्पृच्छथ यूयंकथंभूतः पप्रच्छश्रीकृष्णानुभावश्रवणेश्रीकृष्णलीलाश्रव णेश्रद्दधानः अतएवमहाशयाः ॥ ३ ॥
संस्थांमृत्युंविज्ञायज्ञात्वात्रैवर्गिकंधर्मार्थकामसाधनंकर्मसंन्यस्यत्यक्त्वाभगवतिवासुदेवेआत्मभावंस्वस्यात्मत्वंममात्मावासुदेवइतिदृढं विश्वासपरंदृढंगतः प्राप्तइत्यर्थः एवंविधः परीक्षित्पप्रच्छेतिपूर्वेणान्वयः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

संक्षेपतःश्रुतहरिचरितस्यात्तस्मिन्नेवावहितांतःकरणस्यपरीक्षितोमत्तप्रतिशयात्पुनर्विशेषतःश्रोतुकामस्यहरिसकाशलीलाविलासविष-यप्रश्नप्रकारः श्रीशुकाचार्यस्यगुरुदेवताप्रमस्कारपुरःसरंतत्प्रश्नप्रतिवचनप्रतिज्ञाप्रकारश्चास्मिन्नध्यायेप्रतिपाद्यते तत्रप्रथमतः शुकोपदे शात्तस्यप्रकृतविज्ञानविरक्तीअनुवदति वैयासकेरिति आत्मनःसर्वशुद्धपूर्णस्यहरेस्तत्त्वस्यनिश्चयोयेनतत्तथा उपधार्यहृदिनिधायसतींप्रीति मकिंपरिप्लुताम् ॥ १ ॥
आत्मजायाराज्यादिषुतामसकालिलांतःकरणस्यतस्यश्रोतुंसन्मतिविज्ञानंकथयन्नाह आत्मेति सचौत्तरेयआत्मजायाद्यात्मन्येवनित्यं निरूढांममतांजहावित्यन्वयः हरेःसर्वेश्वरस्यतत्त्वविज्ञानविधुरात्मामहंममेतिनित्यानिरूढाममतेननित्यंतद्विमुखापुरैवस्यकाप्रीतिरविवेकस्य वाद्यात्मनिसिद्धेरित्यर्थश्चशब्दः आत्मादेहः आत्मजात्मीयपुरराष्ट्रकोशदंडोत्यादयोसुहृद कलत्रतानिसमस्तानिलोकैकरिमद्राज्यसुखप्रतिमंतुच तद्विपरीतंसप्तप्रकृतिपूर्णं ॥ २ ॥
किमन्यत्पृच्छामितिप्रश्नंपरिहरति पप्रच्छेति ॥ ३ ॥
संस्थांमृत्युं त्रैवर्गिकंधर्मार्थकामसाधनंकर्मसंन्यस्यत्यक्त्वाभगवतिवासुदेवेआत्मभावंस्वस्यात्मत्वंममात्मावासुदेवइतिदृढं विश्वासपरंदृढंगतः प्राप्तइत्यर्थः एवंविधः परीक्षित्पप्रच्छेतिपूर्वेणान्वयः ॥ ४ ॥ इत्यनेनार्थेपरिपप्रच्छ शुकमितिशेषः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सती विद्यमाना कृष्णे या मतिस्तामेव व्यधात् विशेषेण अधात् । अकाम इत्यादिना सामान्याकारेणोपधारितेऽपि विशेष तात्पर्यावगमात् कृष्णे इति विशेषोक्तिः ॥ १ ॥

जहौ यः पूर्वमेवेति हेयं विमर्शितो हेयतया पुरस्तात् इत्युक्तेः ॥ २ ॥ ३ ॥

आत्मनो भावं प्रेमाणमेव दृढं यथा स्यात् तथा गतः प्राप्तः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

साधनं द्विविधं प्रोक्तं क्रियाकर्तृ विभेदतः ।
पूर्वाध्याये क्रियांगानि वर्णितानिद्विरूपतः ॥ १ ॥
प्रश्नेष्युत्तरशेषत्वात् क्रियायाश्च निरूपणात् ।
स्वरूपतोज्ञानतश्च कार्यसिद्धिर्यतो द्विधा ॥ २ ॥

साधनं श्रोतृवक्तोभयविमर्षाधिक्रियायतः तदुच्यतेमुख्ययोर्हिप्रश्नस्तत्त्वाशेषसाधनः ज्ञात्वाथममनंदेवेगुरावपिविशेषतः सामान्य मुत्तरंयच्चितद्वक्तुरधिकारकृत् अतोऽध्यायेचतुर्थेतुपरीक्षिच्छुकयोःक्रमात् विमर्षणाधिकारोहिविचारांगनिरूप्यते व्यवसायात्मिकाबुद्धि-ममतात्यागएवच कथायाःश्रवणेश्रद्धासन्यासोज्ञानमेवच प्रश्नाचतुष्टयंपूर्वंश्रोतुरंगमिहोच्यते एवंपूर्वाध्यायांतेराज्ञःशुकस्यचसंबंधिनी कथावक्तव्येतिप्रश्नउक्तः तत्रोत्तरमाह वैयासकेरितिचतुर्भिः प्रथमतोभगवतिसतीमतिरुत्पन्नेत्याह यद्यपिपूर्वंभगवतिमतिःस्थितैव तथापिश्रद्धामात्रेणसाजातेतिअज्ञानसहितस्यअसतीवदेवभवति इदानींसामान्यतोभगवंतंज्ञात्वाअस्तिकश्चिद्भगवान्फलरूपोभक्तिसाध्यः भवणादिनासेव्यइति । सर्वरूपोऽन्तरश्च तस्मिन्ज्ञातेतत्सायुज्यंचफलमिति तद्भजनार्थमेवसर्वाकाममाकर्त्तव्या । साधनानिचतत्रैवयोजित व्यानीतिवैयासकेर्वचः श्रुत्वा । अनेनात्मतत्त्वंआत्मनोभगवतःस्वस्यचतत्त्वंयाथात्म्यंविनिश्चित्यमनसिपुनर्विचार्यतद्धृदयेस्थापयित्वाराजा ध्योभगवान्सर्वंहरतिसहृत्स्थितोकृतधानित्यर्थः । पूर्वेसामान्यतोगृहीतंयत्कर्मापिममतायाविद्यमानत्वात् अस्यत्यक्तमिवभवतितदिदानींवैयासकेर्वाक्यात्तत्यक्तवानित्याह ॥ १ ॥

आत्मेति । ममताहिव्याप्तुत्यभगवतिप्रविष्टा । अतोममतायाउत्तमंविषयंप्राप्यपूर्वेस्थामसमीचीनांत्यजति आत्मादेहःजायामुतागारा: भार्यापुत्रगृहाःगावोद्रविणंधंधवश्चतेषु राज्यचससाधनेसिंहासनोपवेशनप्रभृतिअद्यावधिनिर्म्मितरूढांममतांजहौ । पूर्वंयत्काममताविषये देहादावितिकृत्यचिंताकरोति । तर्यदानींममताविषयंभगवंतंहतिकृत्यचिंतापरपर्यायंसंदेहंतनुतेसिद्ध्यर्थंपृष्टवानित्याह ॥ २ ॥

पप्रच्छचेति । चकारस्तूक्तसमुच्चयार्थः जहोपप्रच्छच उक्तार्थस्यचसाधनतासिद्ध्यर्थंतेनपूर्वमुत्तरमुक्तमिति इदानीमपिपृच्छ्यतेत्यत्र प्रश्नेतस्यचप्रश्नेसरस्वतीसंवादेजातइत्याह । हे उत्तमाः ! यन्मांपृच्छत । इममेवार्थंसपृष्टवान् । शुकवाक्यस्यसाधनत्वात् तस्यचभवणाश्र श्रोतृत्वेनतुल्यत्वाद्यथाभवतांतथातस्यापिप्रश्नेबुद्धिरुत्पन्नायुक्तेत्यर्थः । परमवांतरभेदःकश्चिदस्तिभवतांतुतद्वाक्यप्रकारेणापदार्थज्ञानेच्छा तस्यतुभगवन्माहात्म्यज्ञानमेवेष्टमितितदाह कृष्णानुभावश्रवणेश्रद्धानइति भगवन्माहात्म्यश्रवणेतस्यहृद्यंजातं । श्रद्धामनसोविप्लुता च श्रद्धयातद्ग्रहणं विपुलतयाअपुष्टिः शिष्टमन्यत्कृत्यंकृतयानित्याह ॥ ३ ॥

संस्थांविज्ञायेति ममसंदेहंमृत्युंवज्ञायधर्मार्थकामोपयोगिकर्मत्यक्त्वा तत्साधनान्यपित्यक्त्वा मोक्षदातरिभगवतिवासुदेवेआत्मनोंऽकर णस्यभावंरतिंज्ञानंदृढंप्राप्यपप्रच्छेतिसम्बन्धः । आत्मनःस्वरूपस्यवासत्तांअग्रेस्थितिरूपांआत्मत्वंवा । एवंप्रश्नसाधनान्युक्त्वाप्रश्नंवक्तुमभि नंदनमाह ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

चतुर्थे तु शुकः प्रोक्तः सृष्टिलीलां परीक्षिता ।
ब्रह्मनारदसंवादेनाह नत्वा गुरुं हरिम् ॥ ० ॥

आत्मनस्तत्त्वस्य निश्चयो यस्मात् तत् । कृष्णे सतीं विद्यमानामेव मतिं विशेषेण अधात् । यत औत्तरेयः उत्तरायागर्भे प्रविष्टं कृष्णं तदवधि सदा स्मरन्नेवेत्यर्थः । यद्वा सतीम् अव्यभिचारिणीम् ॥ १ ॥

आत्मा देहः ॥ २ ॥

यन्मां पृच्छथेति आयुर्हरति वै पुंसाम् इत्यादिवाक्यैर्व्यञ्जितां कृष्णकथां बूहीति यत् पृच्छथ इममेवार्थं राजा शुकं पप्रच्छेत्यर्थः ॥ ३ ॥

संस्थां मृत्युम् । संन्यस्य त्यक्त्वा । आत्मनो भावं प्रमाणं पूर्वसिद्धमपि तदा दृढं गतः प्राप्तः ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

एवंमुनिनापृष्टःसूतःपरीक्षिन्निश्चयनिरूपणपूर्वकंतत्प्रभृच्छाह । वैयासकेरिति । सार्द्धैर्दशभिः । औत्तरेयःपरीक्षित्वैयासकेःश्रीशुकस्य द्वादशं भूतंपूर्वोक्तम् । आत्मनःस्वस्यतत्त्वेश्रीकृष्णेभजनीयेनिश्चयोयस्मात्तच्च उपधार्यश्रुत्वाकृष्णेसतीं । श्रीकृष्णएवसेव्योनेतरइत्येवंभूतांज्ञानं व्यधादकरोदित्यर्थः ॥ १ ॥

आत्मादेहः । अविकलेनिरूपद्रवेममनांसकीयत्वबुद्धिजहौतत्याज ॥ २ ॥

हे सत्तमाः ! हे मुनयः ! कृष्णानुभावश्रवणेकृष्णलीलाश्रवणेश्रद्धानः यद्यूयंमांप्रतिप्रश्नचतुष्टयमनेनैवप्रकारेणकृतवंतः । [illegible] स्तन्यनिद्रविनाशंविधायद्वारा । यत्रैवर्षिकंधर्मार्थकामसाधनंप्रहृत्यकर्मसंन्यस्यत्यक्त्वाचासुदेवेऽधिति । आत्मनोऽप्रभूतस्यपूर्व स्थितितादात्म्यंदृढंगतः : प्राप्तःसन्पप्रच्छ ॥ ४ ॥

राजोवाच। समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ।
तमो विशीर्य्यते मह्यं हरेः कथयतः कथाम् ॥ ५ ॥
भूय एव विवित्सामि भगवानात्ममायया।
यथेदं सृज्यते विश्वं दुर्विभाव्यं मुनीश्वरैः ॥ ६ ॥
यथा गोपायति विभुर्यथा संयच्छते पुनः।
यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान्।
आत्मानं क्रीड़यन् क्रीड़न् करोति विकरोति च ॥ ७ ॥
नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्म्मणः।
दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥ ८ ॥

भाषाटीका।

सूतउवाच—आत्माके तत्वका निश्चय करनेवाला वैयासकी (शुकदेव) का यह वचन सुनकर औत्तरेय (राजा परीक्षित) ने कृष्ण में रती मती विधानकी ॥ १ ॥

और आत्मा (शरीर) जाया (स्त्री) सुत, आगार (घर) पशु, द्रव्य, बन्धु, और अखिलक राज्य में नित्य निरत अपनी ममताको त्यागदी ॥ २ ॥

हे सत्तमाः कृष्ण के अनुभाव श्रवण में श्रद्दधान महा मना राजाने यही अर्थ पूछा जो आप मुझसे पूछते हैं ॥ ३ ॥

अपनी मृत्युको निश्चयजान धर्मार्थ काम प्रधान कर्म को त्यागकर वासुदेव भगवान में दृढ आत्मभाव को प्राप्त हुआ है ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

मह्यं मम तमः अज्ञानं विशीर्य्यते नश्यति। तव कथयतः सतः। अतः समीचीनम् ॥ ५ ॥

पुनश्च वेदितुमिच्छामि। इदं दुर्विभाव्यम् अचिंतर्क्यं विश्वं यथा सृजति ॥ ६ ॥

गोपायति पालयति। संयच्छते संहरते। पुरुशक्तिः बहुशक्तिमान्। क्रीडन् यथा करोति। आत्मानंब्रह्म हिरण्यं क्रीडयन् विकरोति विविधं करोति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका।

स्वबुभुत्सितमवतारयितुंमुनिवचोऽभिनंदति राजा समीचीनमिति हे ब्रह्मञ्जनघमह्यंहरेःकथाः कथयतः सर्वज्ञस्यतवयतः समीचीनं यतस्तमोऽज्ञानं विशीर्यतेनश्यति ॥ ५ ॥

बुभुत्सितंपृच्छति भूयइति भूयःपुनःविवित्सामिवेदितुमिच्छामि अधीश्वरैर्ब्रह्मादिभिर्दुर्विभाव्यमप्रतर्क्यं इदंविश्वंयथासृजति ॥ ६ ॥

यथागोपायतिरक्षति यथापुनःसंयच्छतिसंहरतिपुरुशक्तिरनंतशक्तिःपरःपुमान्परमपुरुषः यांयांब्रह्मादिरूपांशक्तिशरीरंउपाश्रित्याधिष्ठाय ॥ ७ ॥

आत्मानंब्रह्मरुद्रादिरूपेणस्वात्मानंक्रीडयन्सृष्ट्यादिव्यापारविशेषामिनिर्वर्तयन्स्वयंक्रीडन्स्थित्यादिव्यापारंकुर्वन्करोतिस्वयमेवतत्तदंतरात्मतयासृष्ट्यादिव्यापारंकरोतिविकरोतिविरुद्धंकरोति उपसंहरतिहंयंजगद्व्यापारकृपाक्रीडास्वातंत्र्यमूलानतुवालादीनामिवकर्ममूलस्वभिप्रायः ॥ ८ ॥

हे भगवन्नद्भुतकर्मणः विस्मयनीयव्यापारस्यहरेः। विचेष्टितंकविभिर्ज्ञानाधिकैरपिदुर्विभाव्यमप्रतर्क्यमिवाभातिप्रतीयते ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली।

स्वाभीष्टंप्रष्टुंशुकवचनंस्तौति समीचीनमिति यदिष्टसाधनत्वबोधकंतत्प्रतिबंधनिवर्त्तकंचतदेववचनंसमीचीनंहृद्यमेतत्कथमत्राह तमइति मह्यंममतमआंतरमज्ञानंविशीर्यतइत्यनेनसमूलभूतमुच्छिद्यतइत्युक्तंभवति मह्यमित्यनेनखेष्टसाधनज्ञानंचयेनदीयतइतिसूचितंभवति हेतुर्वाअत्रोच्यते मह्यंतमोविशीर्यतइतियेनतस्मात्समीचीनमिति ॥ ५ ॥

आत्ममायययेच्छयाकृतियतयाप्रकृत्याजन्यैर्दुर्विभाव्यंदुरुत्पादमिदंविश्वंयथायेनप्रकारेणसृजते ॥ ६ ॥

येनप्रकारेणगोपायतिरक्षति पुनर्येनप्रकारेणसंयच्छतेसंहरतितंप्रकारंभूयःपुनरपिविवित्सामिज्ञातुमिच्छामिपुरुशक्तिरनंतशक्तिः परःपुमान् ॥ ७ ॥

आत्मानंक्रीडयंस्तत्तत्क्रीडयत्वेनाक्रीडद्वयांयांशक्तिमुपाश्रित्यविश्वस्यपदवेदितंततत्सर्वंसाधारण्यतोविशेषतश्चकरोति तदपिविवित्सामीति चशब्देनानिर्विकारःसदाशुद्धइति शास्त्रंप्रमाणयति भगवद्वेदाविषयस्यज्ञानस्यचकाष्ठादिष्वपिदुर्लभइतिभावेनाह नूनमिति अहोदुर्विज्ञेयमिति विपूर्वकभातिशब्दस्यवैचक्षण्यं ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत तात्पर्यचन्द्रिका ।

वर्तां ममापि तमो विशीर्य्यते अतो हरेः कथां कथयतः कथयितुमात्मसमाहृत्य सर्वज्ञस्य तव वचः समीचीनमित्येव बोध्यम् ॥ ५ ॥

भूय इति । एतदपि ज्ञातुमिच्छामीत्यर्थः । आपाततः साक्षाद् श्रीकृष्णचरितश्रवणे तद्विपरीतबुद्धिः स्यादिति निजवैदुष्यापहाराय तदैश्वर्यविशेषप्रश्नोऽयं ज्ञेयः ॥ ६ ॥

यथेति सार्द्धद्विकम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

समीचीनमिति यद्यपि स्वद्वचनस्यार्थज्ञायनेसर्वज्ञवचनत्वात् । तथापि स्वद्वचनंसमीचीनं । ब्रह्मन्निति संबोधनंवक्तृदोषाभावाय । अनभ्यभिमानाद्यभावाय तथापि ममस्वरूपाज्ञानरूपंतमः स्वद्वाक्याद्विशीर्यते । तत्तुमदर्थमेवोक्तं अर्थतुमयाविनिर्मितं । स्वद्वाक्येनममाज्ञानंनाई मदर्थमेवकृतत्वयोक्तं । भगवतश्चकथाकथितेति अर्थापरिज्ञानात्संदेहात्इदानींविशेषाः पृच्छंतइत्याह ॥ ५ ॥

भूयएवेति । विवित्सामिज्ञातुमिच्छामि । तत्रसंदेहपञ्चकं उत्पत्तिस्थितिप्रलयेषुआधारेसाधनेषुच । तत्रोत्पत्तौसंदेहमाह । यथेवमिति इदंजगद्यथासृज्यते किंकुम्भकारवत् आहोस्विन्सिद्धवद्वाङ्मात्रेण । आहोस्विद्योगिवन्मनसा । आहोस्वित् कल्पवृक्षवत्प्रसूते आहोस्वित् अभिव्यनक्तीति उत्पत्तौपंचसंदेहाः एतएवरक्षाप्रलययोरनुवर्त्तते किंच दुर्विभाव्यमनीश्वरैरिति येमयापंचप्रभाःकृताः तेकेपिभगवति नसंभवंति यद्वायतः उत्पाद्यमानस्यमनसाप्याकलयितुमशक्यत्वात् ॥ ६ ॥

एवमुत्तरत्रापि तर्हिनकरोत्येवेतिकिमितिनिश्चीयतेनपालयतीति तत्राह विभुरिति पुनःपुनर्नोदितस्यनाशनमुत्पादितस्योत्पादनमिति चतुर्थप्रश्नमाह यांयांशक्तिमिति अत्रसृज्यःकःपदार्थः किंकेवलआत्मा शक्तिसहितोवा साद्यन्येपिकिमात्मैवोत्पद्यतेशक्तिरेववेतिसंदेहेतेष्वपिपक्षेषुकालभेदेनक्षतिभेदेनवाव्यवस्थितेषु कस्यांकतौ यांशक्तिमुपाश्रित्यपुनर्द्वितीयकृतौयांशक्तिमिति एवंपंचस्वपि तत्राप्यवांतर भेदाःसंति यतःपुरुशक्तिः कालभेदाश्चबहवःसंतियतःकालादिनियंताअयंपुमान् आत्मानमेवकरोति विरुद्धमपिकरोति नकरोति विविधं वाकरोति अथवा आत्मानमेवक्रीडयन् अन्यदेवाकिंचित्करोतीत्यादिसंबंधः अथवा क्रीडन्आत्मानमेवकरोतीति चकारादन्येपिपक्षाःअथमूढाः तर्ह्येवमनेकधासंदेहेगुरुःप्रष्टुंनार्हति अतिवादात् अतोन्यएवप्रष्टव्यइत्याशंक्याह ॥ ७ ॥

नूनमिति ब्रह्मन्निति अतिप्रश्नेप्यक्षोभाय भगवतोहरेरितिदुःखाभावसुखयोःसिद्ध्यर्थमुक्तम् किंच सामान्यतएवभगवत्परिचर्यंदुर्बोधं केन गुणेनकरोतीति तत्रापिहरेःअन्यदुःखनिवारणार्थंकरोति तत्राप्येषामानंत्यात्दुःखानांचानंत्यात्केनप्रकारेणाकृतेसर्वेषांदुःखंनगच्छतीतिमत्वाह ते तत्राप्यकृतकर्मणः अन्यत्करोत्यन्यत्संपद्यतइति अतएवकविभिरपिनिपुणैरपिअनेकधाकल्पकैरपिदुर्विभाव्यं अतोमान्यःपृच्छमर्हतीत्यर्थः किंच केनसाधनेनभवान्करोति गुणैरितिचेत्तानगुणान्किंक्रमशोगृह्णातियुगपद्वा नहिसर्वेयुगपदुत्पद्यंतेलीयंतेवा किंच भूरिशोवा गृह्णाति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तमः अज्ञानम् । मह्यं मम ॥ ५ ॥

भूय एवेत्यत्र राज्ञोऽयमभिप्रायः—म्रियमाणस्य मम कृत्यानि श्रवणकीर्त्तनस्मरणाख्येवोक्तानि, तेषाञ्च विषयाः कृष्णलीलारूप गुणाधाराः । तत्र प्रथमं मायाशक्तिमतस्तस्य सृष्ट्यादिलीला जिज्ञास्या ततश्च चिच्छक्तिमतो गोवर्द्धनोद्धरणाद्या इति । भूय एव पुनरपि वेदितुमिच्छामि इड्भाव आर्षः । दुर्विभाव्यं ध्यातुमप्यशक्यम् ॥ ६ ॥

गोपायति पालयति । संयच्छते संहरति । पुरुषो बह्वर्थाश्चिन्मया जीवा अन्तरङ्गावहिरङ्गातटस्थाभिधानाः शक्तयो यस्य सः । क्रीदृङ् मायाशक्त्या सह दीव्यन् आत्मानं करोति महदहङ्कारादिरूपत्वेन सृजतीति सर्गप्रश्नः । तथा क्रीड़यन् ब्रह्मरुद्रादीन् देवयद् विकरोति आत्मानं देवतिर्यङ्नरादिरूपत्वेन सृजतीति विसर्गप्रश्नः ॥ ७ ॥

नन्विदं स्वं प्रायः सर्व्वं जानास्येव तत् किं पृच्छसीति तत्राह । नूनं निश्चितमेव भगवतोदितम् इदं सृष्ट्यादिचरितं कविभिरपि स्वायादिशास्त्रकृद्भिरपि दुर्विभाव्यमिव दुर्ज्ञेयमिव विभाति । ममास्यत्र का वार्त्तेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अन्यंखलुमुत्सिसृक्षितमब्रह्मारथिनुंशुकवचोभिनंदतिसमीचीनमिति । ब्रह्मंस्तमतमोऽज्ञानंविशीर्यतेनश्यति ॥ ५ ॥

विवित्सामिवेदितुमिच्छामि । अधीश्वरैः ब्रह्मादिभिर्दुर्विभाव्यमचिंतकर्त्तव्यम् । यथेदंसृजति ॥ ६ ॥

विभुःव्यापकःपरःपुमान्जिःसमानातिशयः पुरुशक्तिः यांयांशक्तिमुपाश्रित्याधिष्ठाय । यथागोपायतिरक्षतियथासंयच्छतेसंहरतेआत्मानं मक्षजयंक्रीडयन्स्वयंक्रीडन्यथाकरोति । यथाविकरोतिचसृष्टिस्थितिसंहारव्यापाराद्विपरीतंकरोतिमुक्तंकरोतिचेत्यर्थः ॥ ७ ॥

एकःपुरुषरूपेणाबुगपत् भूरिशःसत्त्वनियंताख्यावतारः रजोनियंताख्यानुगृहीतः क्षेत्रज्ञोब्रह्माद्वितीयावतारः । तमोनियंताख्यानुगृहीतः क्षेत्रज्ञः रुद्रस्तृतीयावतारः एवंजन्मादिगुणावतारैः क्रमशोन्यायमार्गतेगुण्यान्दधिमर्त्तिगृह्णातितेचावतारः । नारायणोवोपाख्यानेश्रीकृष्णो नोक्ता । तपोयज्ञश्चखड्गश्चपुराणाः पुरुषोविराट् । अनिरुद्धइतिप्रोक्तोलोकानांप्रभवाव्ययः । ग्राह्यः । राजिताश्वेमासेतस्यब्रह्मणितेतसः । प्रतिपाद्यस्त्रायुरभवत्पद्मांपद्मनिभेक्षणः । ततोब्रह्मासमभवत्सतस्यैवप्रसादजः । अहःश्वेवलक्षादाश्चतुर्दशदेवःस्वयंतथा । क्रोधाविष्टस्यसंजातोरुद्रः संहारकारकः । एतौद्वौविबुधश्रेष्ठौप्रसादक्रोधजावुभौ । उदयेविलयंयातोमृत्युसंहारकारकौ । निमित्तमात्रतायत्रजगत्सृष्टिविधौविधिः ॥ ८ ॥

तथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा ।
विभर्षि भूरिशस्त्वेकः कुर्व्वन् कर्म्माणि जन्मभिः ॥ ९ ॥
विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा ।
शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु ॥ १० ॥

सूत उवाच । इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः ।
हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥

शुक उवाच । नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥

भाषा टीका ।

राजोवाच—हे ब्रह्मन् ! हे अनघ ! आप सर्वज्ञ हैं आपका वचन समीचीन है हरिकथा कहते हुए आपके वचनसे मेरे हृदयका अंधकार विशीर्ण होता है ॥ ५ ॥

मैं फिर यह जानना चाहता हूं कि अधीश्वरों के दुर्विभाव्य इस विश्वको भगवान् अपनी मायामें जैसे सृजते हैं ॥ ६ ॥

पुरुशक्ति परपुरुष जिस जिस शक्तिका आश्रय कर जैसे इस विश्वकी रक्षा करते हैं और विभु भगवान फिर जैसे इस विश्वकी प्रलय करते हैं ॥ ७ ॥

हे ब्रह्मन् अद्भुत कर्मा हरि भगवान का चेष्टित निश्चय बड़े बड़े कवियों के भी दुर्विभाव्य, सा, प्रतीत होताहै ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एकः पुरुषरूपेण युगपत् । जन्मभिः ब्रह्माद्यवतारैः क्रमशो वा । यथा प्रकृतेर्गुणान् गृह्णाति ॥ ९ ॥

विचिकित्सितं सन्दिग्धम् । शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन ॥ १० ॥

उपामन्त्रितः प्रार्थितः । प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥

तदेवाह त्रयोदशभिः परस्मै सर्वोत्तमाय । तत्र हेतुः भूयसे अपरिमितमहिम्ने । तदेवाह यतः प्रपञ्चस्य उद्भवादिषु निमित्तीभूता या लीला तया गृहीतं ब्रह्मादिरूपेण रजआदि शक्तित्रितयं येन तस्मै । अन्तर्भवाय अन्तर्यामिणे । अतएव सर्व्वान्तरत्वात् अनुपलक्ष्यं वर्त्म यस्य तस्मै ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अथैवमिति पृच्छति यतेति स्वयमेकः जन्मभिरवतारैर्भूरिशः कर्माणि चेष्टितानि कुर्वन्प्रकृतेर्गुणान्सत्त्वाद्दीन्युगपदविवाक्रमः वा । यथाधिमर्त्यं अभूत्यर्थं सृजतीतिनिमित्तोपादानाधिकरणानांप्रश्नः । यथागोपायतीत्यनेनरक्षितुःस्वस्यकिंसृष्ट्यादावितरक्षणेऽपिजीवांतर्यामित्वेनोतस्यावतारेश्वरक्षणमितिप्रश्नः । यथात्मेयच्छतीत्यनेनसंयमाधिकरणप्रश्नः । नारदीयानांप्रश्नानांतत्रैवावतारिण्यमाणत्वात् । यथागुणात्मित्यनेनभगवदवतारस्यगुणत्रयात्मकत्वमथवात्रयाणामेवसत्त्वमन्यतमगुणात्मकत्वमथवाऽप्राकृतत्वमेवेतिप्रश्नः अत्रयद्यपिनतृतीयपक्षः प्रश्नाकृढः तथापिप्रश्नदुरभिप्रेतः । तस्यैवसिद्धान्तकोटित्वात् ॥ ९ ॥

एतत्पूर्वोक्तमेवमविचिकित्सितंविचारयितुमिहंभगवान्मवान्यथावदूचीतु । त्वमेवकथयितुंसमर्थइत्याह शाब्देब्रह्मणिशब्दब्रह्मात्मके । ब्रह्मणिनिष्णातःपरिनिष्ठितः । कृत्स्नशास्त्रार्थवित् । परस्मिंश्चब्रह्मणिनिष्णातःअविच्यन्वयः । अनेनपरब्रह्मविषययोगजन्यज्ञानसंपत्तिरुक्ता ॥ १० ॥

हरेर्गुणानुकथनप्रत्युक्तप्रकारेणोपामंत्रितः प्रार्थितः हृषीकेशंभगवंतंसर्वेंद्रियनियंतारमनुस्मृत्यप्रवक्तुंदेवतागुरुनमस्कारादिरूपमुपक्रमं कृतवान् ॥ ११ ॥

तदेवाह त्रयोदशभिः नमइति परस्मैप्रकृतिपुरुषविलक्षणायपुरुषाय तत्रहेतुःभूयसेस्वरूपतोगुणतश्चात्यर्वहिश्चाप्यपरिमिताय तदेव दर्शयति यतः प्रपञ्चस्योद्भवस्थितिः स्थानंपालनंनिरोधः संहारः तत्रलीलातयागृहीतशक्तित्रितयायगृहीतहिरण्यगर्भस्वावतारशंकरस्वरूपशक्तित्रितयेनतस्मै अनेनचैवंभूतत्वमुक्तं भूयस्त्वमाह अतएवान्तरात्मने "अनेनसर्वस्यस्वव्याप्यत्वात्तदपेक्षयास्वस्यव्यापकत्वमुक्तम" अनुपलक्ष्यवर्त्मनेतस्मै "अनेनाह:गंतव्यमार्गोऽन्यकोऽपिसाक्षात्पञ्चाविषयीभूतमगवत्स्वरूपरूपादिपरःतथाचारा अनेनप्राकृतकरणागोचरत्वमुक्तंइदमविचिकित्सितवाचादकम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अथाप्येकः प्रश्नोऽस्तीत्याह अथेति एकोऽद्वितीयोऽन्यभिन्नांशावतारैर्भूरिशः सृष्ट्यादिकर्माणि कुर्वन्प्रकृतेः सत्त्वादिगुणान्बहुविधान्कृत्वा तत्तद्गुणाधिष्ठातृदेवताकं विभर्ति । युगपत्क्रमशः क्रमेणापीति तुशब्देनगुणानामविरुद्धस्वभावत्वेनयुगपद्ग्रहणेऽनुपपत्तिसूच्यते अपिपदेनक्रमशोग्रहणेसंभावितमिति ॥ ९ ॥

नकेवलंविधिरस्माभिःकिंतुवक्तव्यमितिप्रार्थयेदित्याह विचिकित्सितमिति यथायथावत् एतद्भवतुल्यपांडित्यंचास्तीत्याशयेनाह शब्देति अनेनालौकिकमपिवस्तुयथावोद्धुंशक्यंतथावक्तावोधयितुंत्वंसमर्थइत्युक्तंभवति ॥ १० ॥

परीक्षित्पृष्टःकिंचकारेतिसूतःशौनकस्यहार्दंकांक्षापरिहरति इतीति इतिशब्दःप्रकारवचनः हृषीकेशःमेयेनमुख्यतोबाह्यादींद्रियशक्तयुद्बोधकत्वंहरेरित्यभिप्रेतिप्रतिपक्तुंप्रक्रमप्रारब्धवान् भागवतसंहितामितिशेषः ॥ ११ ॥

परीक्षित्प्रश्नोत्तररूपत्वेनभागवतपुराणंवक्तुकामःशुकःशिष्टाचारंपरिपालयन्स्वेष्टदेवतांप्रणमति नमःपरस्माइत्यारभ्यनमस्तत्मात्मस्थायेइलोकैः । भूयस्वमुपपादयति सर्गादिनेति सतःसत्यस्यजगत उद्भवउत्पत्तिस्थानं पालनरूपस्थितिः निरोधोलयः एतान्यभिलक्षीलयागृहीतशक्तीनामिच्छाज्ञानक्रियाख्यानांत्रितयेनसतथोक्तस्तस्मै इच्छाज्ञानंक्रियाचेतिनित्याःशक्तयईशितुरितिवचनात्तत्रेत्येतिपदमध्याहार्यंनिमित्तशक्तित्रितयायेत्यर्थः वेदादिरवाग्प्रमाणोनप्रत्यक्षमितिभावेनाह देहिनामितिदेहिनांजीवानांचक्षुरादिनानुपलभ्यस्वयंमूलेनुद्भेदमार्गादूरस्थत्वाद्दातनेत्याह अंतर्ध्रुवायेति अंतर्यामित्वेनसततमंतःस्थिताय योवैभूमातत्सुखं द्वाविमौपुरुषौलोकेइत्याद्विवाक्यमत्रप्रमाणम् ॥१२॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तत्र प्रथमं भगवत्तत्त्वं विवृण्वन् नमस्करोति नम इति त्रयोदशभिः । परस्मै स्वयंभगवते श्रीकृष्णाय । यतः भूयसे सर्वतः परिपूर्णाय । अतोह्यंशतः पुरुषादिरूपायस्वतस्त्वनुपलक्ष्यवर्त्मने ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

प्रकृतेर्गुणान्त्रयबहुविधान्कृत्वाभूरिशोराशिप्रकारेणगृह्णाति अथवा तुपुनःस्वयमेकोऽप्यनेकोभूत्वायुगपदादिभेदेनगृह्णातिकिंचकर्माणि जन्मभिःकुर्वन् नानाजन्मानिकृत्वाकर्माणिकुर्वन्करोति कर्माधीनतयाकरोतीत्यर्थः एवंपंचप्रभाभिरूप्यसामिलाषतयापंचप्रभानुपसंहरति ॥ ९ ॥

विचिकित्सितमेतन्मइति मह्यमेतत्ज्ञातुमिष्टं यथायथावत्भगवान्प्रभोतु कथयतुकथनेसामर्थ्यमाह शब्देपरस्मिन्नपिब्रह्मणिस्तत्साधनैर्भवान्निष्णातः खल्वितिप्रसिद्धं ॥ १० ॥

शुकोऽपिसत्साधनमुत्तरमाहेत्याह इत्युपामंत्रितइति उपामंत्रणांप्रार्थना तदास्मिन्नर्थेसर्वसंदेहवारकोभगवानेवेति हृषीकेशंबुद्धिप्रेरकमनुस्मृत्यप्रत्युत्तरंदातुंप्रचक्रमे उपक्रमोनामदेवतागुरुनमस्कारः हरेर्गुणानुकथनेउपामंत्रितइति स्कंधादावयं पक्षभेदेतुः सर्वशास्त्रार्थनिर्धारः सप्तभिर्मनोक्तिभिः पंचभिः प्रार्थनावाक्यैर्माहात्म्यंतस्यवर्ण्यते एकेनव्यासनमनमेतावच्छुकश्रुतिअन्यत्कथाप्रसंगेनपरीक्षावानिरूपितं नमनादेवभगवान्सर्वसंशयवारकः प्रार्थितःकामनांदद्यात्नान्यथेतिद्वयेशं यद्यपितेनपंचप्रभाःकृतातथापिसर्वसंदेहनिवारणार्थंभगवान्स्मृतइति तत्तत्संदेहनिवृत्तिपूर्वकंभगवंतमनूद्यनमस्करोति ॥ ११ ॥

तत्रादौसृष्टिप्रकारेसंदेहानंप्रतिप्रकारंवक्तुमनस्यति नमइति आदौपरःअसंगोदासीनएकएवेत्यर्थः तदनुसएवपुरुषः अनेनअशरीरस्यविष्णोः पुरुषशरीरस्वीकारआदौकथितः तदनुबहुस्यामितिवांछयाएकएकभूयान् तदनुक्रीडार्थंजगदुत्पत्तिस्थितिसंहारैः स्वमायायागुणान्भूशक्तित्रयस्वीयारमाह गृहीतशक्तित्रितयायेति सहितिवचनात्तत्रेत्येतिसप्तम्यंतस्यवर्ण्यते एकेनव्यासनमनमेतावच्छुकश्रुतिअन्यत्कथाप्रसंगेनपरीक्षावानिरूपितं नमनादेवभगवान्सर्वसंशयवारकः प्रार्थितःकामनांदद्यात्नान्यथेतिद्वयेशं यद्यपितेनपंचप्रभाःकृतातथापिसर्वसंदेहनिवारणार्थंभगवान्स्मृतइति तत्तत्संदेहनिवृत्तिपूर्वकंभगवंतमनूद्यनमस्करोति ॥ ११ ॥

तत्रादौसृष्टिप्रकारेसंदेहानंप्रतिप्रकारंवक्तुमनस्यति नमइति आदौपरःअसंगोदासीनएकएवेत्यर्थः तदनुसएवपुरुषः अनेनअशरीरस्यविष्णोः पुरुषशरीरस्वीकारआदौकथितः तदनुबहुस्यामितिवांछयाएकएकभूयान् तदनुक्रीडार्थंजगदुत्पत्तिस्थितिसंहारैः स्वमायायागुणान्भूशक्तित्रयस्वीयारमाह गृहीतशक्तित्रितयायेति सहितिवचनात्तत्रेत्येतिसप्तम्यंतस्यवर्ण्यते एकेनव्यासनमनमेतावच्छुकश्रुतिअन्यत्कथाप्रसंगेनपरीक्षावानिरूपितं नमनादेवभगवान्सर्वसंशयवारकः प्रार्थितःकामनांदद्यात्नान्यथेतिद्वयेशं यद्यपितेनपंचप्रभाःकृतातथापिसर्वसंदेहनिवारणार्थंभगवान्स्मृतइति तत्तत्संदेहनिवृत्तिपूर्वकंभगवंतमनूद्यनमस्करोति ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

यथा एकः पुरुषरूपेण युगपत् प्रकृतेर्गुणान् विभर्त्ति तत्रात्मिन एव ईक्षणादिभिर्वारयति पालयति च । तथा जन्मभिः ब्रह्मरुद्रादिप्रादुर्भावैः भूरिशः बहुरूपः क्रमशोऽपि क्रमेणापि वा विभर्त्ति । कीदृशः कर्म्माणि सृष्ट्यादीनि कुर्व्वन् ॥ ९ ॥

विचिकित्सितमिति सन्दिग्धम् । ननु कविभिस्त्वापि दुर्विभाव्यमिदं चेदहं जानामीति तत्त्वं कथं जानासि तत्राह । यथा भगवान् कृष्णस्तद्भक्तो भवानपि तथेत्यर्थः । तत्रापि शब्दे ब्रह्मणि वेदे विचारेण निष्णातः परस्मिन् ब्रह्मणि कृष्णे च स्वस्वनुभवेनेति एवमपरे शास्त्रकर्त्तारस्तु नैवानुभवन्तीति ते न जानन्ति । किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन इति भगवदुक्तेः । इह विचक्षणैःप्राधान्येन कृष्णावतारलीला इव मायाशक्तिप्राधान्येन पुरुषावतारलीला ब्रह्माण्डनिर्म्माणादयश्चैर्गीयंते अन्या एव नात्र कटाक्षः कार्य्य इति श्रीशुकोः परीक्षित्शुकयोरभिप्रायोवर्णितव्यः ॥ १० ॥

हृषीकेशं सर्वेन्द्रियप्रवर्त्तकमिति मद्वाचि स एव स्थित्वा प्रतिवक्तीत्यभिप्रायेण । प्रथमं ईश्वरगुरुनमस्कारपूर्वकमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥

भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्त्तये ।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥
नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ १४ ॥
यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥ १५ ॥
विचक्षणा यच्चरणोपसादनात् सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तमेवाह । त्रयोदशभिः । परस्मै पुरुषाय पुरुषोत्तमाय श्रीकृष्णाय नमः । प्रथमैश्वर्यमाह । भूयसे पुरुषावतारैरपरिमितमहिम्ने । तत्र प्रथमंपुरुषावतारलीलामाह सदुद्भवंति । शक्तित्रितयं रजःसत्त्वतमः । द्वितीयतृतीयपुरुषावतारलीलामाह । देहिनां ब्रह्मादीनां समष्टिव्यष्टीनाम् अन्तर्भवाय अन्तर्यामिणे । अनुपलभ्यं योगिभिरपि दुर्ज्ञेयं वर्त्म भक्तियोगो यस्य तस्मै ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एतत्पूर्वोक्तं । विचिकित्सितंसंदिग्धंयथावद्भगवान्ब्रवीतु । तत्रयोग्यतामाह । शाब्देहत्यादि ॥ १० ॥

हरेर्गुणानुकथनेउपामंत्रितः हृषीकेशंसर्वेन्द्रियनियंतारंश्रोतृणांश्रावयितुश्चेन्द्रियमैश्वल्यहेतुत्वेनोपकर्त्तारमनुस्मृत्य । प्रथमक्रमेहरिगुरुत्यादिरूपमुपक्रमंकृतवान् ॥ ११ ॥

तवेत्याह । नमइतित्रयोदशभिः । परस्मैचिदचिद्भिन्नस्वरूपायपुरुषायनमः । तत्रहेतुः । भूयसेऽपरिमितगुणस्वरूपायसतः प्रथमस्य उद्भवस्थाननिरोधेषु । उत्पत्तिपालनसंहारेषुनिमित्तभूतयातयापाशस्त्रावतारुद्ररूपैर्गृहीतंरजः सत्त्वतमोलक्षणंशक्तित्रितयंयेन तस्मै अंतरात्मनेमभक्तैर्नोपलभ्यंवर्त्मप्राप्तिमार्गोयस्यतस्मै ॥ १२ ॥

भाषा टीका

जैसे प्रकृति भूरिशः गुणोंको युगपत् (एकबेर) वा क्रमशः एकही भगवान पुरुष रूपसे वा ब्रह्मादि जन्मसे कर्म करते हुए धारण करते हैं ॥ ९ ॥

भगवान् मेरे इन सब संदेहों को कहिये आप निश्चय शब्द ब्रह्म और परब्रह्म में निष्णात हैं ॥ १० ॥

सूतउवाच—हरिके गुणानु कथन में राजाने इस प्रकार प्रार्थना किये शुकदेवजी हृषीकेश का स्मरण कर प्रति वचन करने को प्रवृत्त हुए ॥ ११ ॥

शुकउवाच—इस सत् जगत् के उद्भव स्थान और निरोधलीला से जिन्होंने तीन शक्तियों को ग्रहण किया है, जो देहधारियों के अंतर्यामी और अनुपलक्ष्य वर्त्म है, उन अपरिमित परम पुरुषको नमस्कार है ॥ १२ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

विचिकित्सितफलकातृत्वमनुस्मरन् प्रणमति । भूयः पुनश्च नमः । सतां धर्म्मपरायणानां वृजिनच्छिदे दुःखभंग्रे । असतां अधर्म्मशीलानाम् असम्भवाय अनुद्भवहेतवे । अखिलसत्त्वमूर्त्तये तत्तद्देवादिरूपेण तत्तत्फलदायेत्यर्थः । समग्रसत्त्वमूर्त्तये इति वा । पुनरिति पूर्वश्लोकाभ्यवैलक्षण्यमेवाह । पारमहंस्ये प्रत्यङ्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसाम् अनुमृग्यम् अन्तरन्वेषणेन पुनः पुनर्मृग्यं यत् आत्मतत्त्वं तस्य दाशुषे दात्रे ॥ १३ ॥

सात्वतां भक्तानाम् ऋषभाय पालकाय । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य दुर्ज्ञेयायेत्यर्थः । तदेवं वैषम्यप्रतीतावपि निर्दोषत्वाय अखिलैश्वर्यमैश्वर्यमाह । निरस्तं साम्यम् अतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ १४ ॥

सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति यत्कीर्त्तनमिति द्वाभ्याम् । अर्हणं पूजनम् । सुभद्रं सुमङ्गलं श्रवो यशो यस्य तस्मै ॥ १५ ॥

विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजनात् अन्तरात्मनः मनसः उभयतः इह परत्र च सङ्गं व्युदस्य निरस्य गतक्लमाः प्रवासरहिताः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

सनुभक्तस्यतस्मैऽनुपादेयत्वंस्यादित्यतआह भूयोनमइति सद्वृजिनच्छिदेसतांपापच्छिदेअसतांदुष्कृतामसम्भवायविनाशायाखिलसत्त्वमूर्त्तयेऽखिलपूर्णसत्त्वमेवमूर्त्तिर्यस्यतस्मैउपास्तपूर्णसत्त्वदेहायेत्यर्थः स्वतोऽनिन्द्रियत्वेऽपिलीलयातिशयेनसोपूर्वपरभावदुःकृतनाशाद्व

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

यत्र अखिलमनुजनयनविषयाभिरामकृष्णादिरूपेणागतायदित्यर्थः प्रकृतिपुरुषविलक्षणत्वात्सर्वजनसाधारणत्वाच्चास्य विष्णुत्वं परिपूर्णत्वं मुमुक्षूपास्यत्वं मोक्षप्रदत्वं चाह पारमहंस्येपरमहंसानांसंविधिनिमार्गेणतुर्याश्रमेणस्थितानां इदंमुमुक्षूणामाश्रीयमाणे परमहंसानां प्रायेणामुमुक्षुत्वात्तदाश्रमानर्हेण: ब्रह्मविद्यांगत्वेनतदनाश्रमप्रयुक्तधर्मानुष्ठानपराणामनुमुग्वदाशुषेनमुग्धोलभ्यमिहोऽर्थः तस्यदाशुषेदानशीलायएवंभूतायभूयोनमइति ॥ १३ ॥

सौलभ्यविशिष्टमेवनमस्करोति नमइति सात्वतांयदूनामृषभायश्रेष्ठायाभिनवात्सल्यातिरेकात्सात्वतश्रेष्ठत्वेनावतीर्णायेत्यर्थः एवं भूतोपिदुर्योगिनांदुर्लभएवेत्याह विदूरकाष्ठायेति कुयोगिनांकुत्सितयोगिनांभगवद्भक्तिरहितयोगनिष्ठानांविदूरकाष्ठायाविदूरेदूरतएवकाष्ठा दिक्यस्यतस्मैदुर्योगिभिर्यस्यदिगपिदुर्लभेत्यर्थः तदेवं वैषम्यप्रतीतावपिनिर्दोषत्वायाभिरूपैश्वर्यमाह निरस्तेति स्वराधसाम्यतेजसानिरस्तंसाम्यमतिशयश्रयस्येनतेजसाउपलक्षितेस्वधामनि स्वमहिम्निप्रतिष्ठितइतिश्रुत्युक्तरीत्यास्वप्रतिष्ठितेनस्वयंज्योतिष्टिङ्गाभिस्वस्मिन्मूरंस्यतेरममाणायतेनुभ्यंनमोनमोऽस्तु तत्तद्गुणाधिशयाधारोहंशनमस्कृतेः पौंस:पुंस्यं निःसमाप्यधिकस्वकीयतेजसोपलक्षितेस्वस्मिन्नेवरममाणायस्यनकिञ्चिदर्थंवैषम्येणाप्रयोजनमिति नहिकल्पद्रुमस्यभजतामभीष्टामृतदत्तोवैषम्यमितिवक्तुंयुक्तम ॥ १४ ॥

यतएवविचित्रैश्वर्यरूपेणवैषम्यमतएवतत्कीर्तनस्मरणादेःसमस्तदुरितनिबर्हणत्वमित्याह यत्कीर्तनमिति ईक्षणमर्चाविग्रहादिनिरीक्षणमर्हणंपूजनं यत्कीर्तनादिकंकीर्तनादिनिष्ठस्यकश्मलंदुरितंविधुनोतिसद्योविनाशयति तस्मैसुभद्रश्रवसेसुभद्रंसुमंगलंश्रवःकीर्तिःयस्यतस्मैनमः ॥ १५ ॥

नकेवलंश्रवणादिभिर्दुरितनिवृत्तिरेवकीर्तनादिभिर्विशुद्धेनात्मनापरिपूर्णाभक्तियोगं ततोब्रह्मप्राप्तुंवर्तीत्याह विचक्षणाइति यच्चरणोपसादनाद्यच्चरणयोरुपसत्तेः भजनाद्धित्यर्थः तस्मादंतरात्मनोमनसःउभयतः इहामुत्रचसंगंस्थुल्यस्यगतकल्मषाः निवृत्तसांसारिक तापत्रयाः ब्रह्मगतिंब्रह्मप्राप्त्यांगतिंपरमंप्राप्यं विदंतिप्राप्नुवंतिहीतिप्रसिद्धिद्योतयति ब्रह्मविदाप्नोति परमितिश्रुतिप्रसिद्धेः तस्मैसुभद्रश्रवसेनमोनम इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सर्वस्माच्चारायणप्रसादसाधनाद्भक्तिपूर्वकंपुनःपुनर्नमनमेवतत्प्रीतिजनकमितिभावेनाह भूयइति भूयोऽपिपरस्मैपुरुषायनमइत्यन्वयः यत्रहृत्वाप्रीतस्तत्प्रतिबंधकनिवृत्तीस्यात्तांसएवबंधोऽष्टाक्षरोमंत्रइतिनिगद्यते । सदिति सतांप्रपन्नादिप्रशस्तकर्मणांपुंसांवृजिनंदुःखकारणपापं छिनत्तिनिर्मूलयतीतिसद्वृजिनच्छित्तस्मै असतामप्रशस्तकर्मणामसुरादीनामसंभवायासत्तापादकाय सुखप्रतिबंधकजनकनिर्मूलकायेत्यर्थः । एतत्करणसामर्थ्यमस्यास्तीतिभावेनाहअखिलेति अखिलसत्त्वमूर्तयेपूर्णसाधुभावस्वरूपाय । निःशेषगुणापूर्णत्वात्सत्त्वइत्येवंविदुरिति यत्नात् साधुभावोगुणइतिज्ञायते अनेनेसमस्तचराचरलक्षणाप्राणिमूर्तयइत्येतन्निरस्तम अथाप्यस्मदिष्टाप्तिःकथंभवतीत्यत्राह पुंसामिति परमहंससंविधिन्यायमेवेत्यसस्थितानांसंन्यासधर्मवतांपुंसामनुमृग्यदाशुषेनिजानंदानुभवलक्षणमोक्षदायदाशृदानइतिधातुः अवधारणवाचिनापुनःशब्देनान्ययोगंनिवारयति एतेभ्यएवानुमृग्यंददातीत्यन्येभ्यइत्यर्थः ॥ १३ ॥

नन्वन्यशब्देनसंन्यासीतरज्ञानिविषक्षायांतमेवंविद्वांसमपृहतइतिमप्रमाणांस्यादज्ञविषक्षायामज्ञानांज्ञानहोविष्णुरितिवाक्यः केऽत्रविषक्षिताइतिमंदाशंक्यां परिहरिष्यन्भागवतशास्त्रोक्तविरुद्धयोगापेक्षइतिवक्ति नमोनमइति सात्वतसंहितोक्तविधिनाविष्णुमर्चयंतःसात्वतस्तेषां सात्वतां ऋषंज्ञानंभासयतिदीपयतीत्यृषभः ज्ञानमुद्दीप्यमुक्तिददातीत्यर्थस्तस्मै सत्त्वंतुशोभनत्वस्यास्तदुक्ताःसात्वतामसाहनिधनानां सात्वताःशोभनत्वयंतः तेषामनुपन्नज्ञानानांतद्योगपुरुषयतांज्ञानंददातीत्यृषभः तस्मादितिवाऽनेनोक्तंवाक्यद्वयमपिप्रमाणमित्याद्यातमिति यःपरस्मैपुरुषायेतिप्रक्रांतःततस्मै यद्वास्वचित्तस्थंसंबंध्यनेनुभ्यंनमइति एवंविधफलदातृत्वेनतत्स्वामीतिवाक्यार्थः । भक्तभक्तसंबंधेदंपरोरितिधात्वोर्हिलोपेनसलोपः शास्त्रकुत्सितोयोग ऐकध्यानलक्षणाःसएषामस्तीतिकुयोगिनस्तेषांविदूरकाष्ठापरिपूर्तिरपरिच्छिन्नलक्षणाऽस्यमतथा तस्मैभगवदधिष्ठितदिङ्मात्रमपिनजानंतीत्यतोयाविदूरकाष्ठायेति आशास्तुककुभःकाष्ठाइत्यमरः । स्वतरत्पत्त्वेनस्वप्रयोजनमपेक्ष्याद्यादिदातृत्वमितिभावेनाह निरस्तेति निरस्तंसाम्यातिशयोयेनतथोक्तं तेनराधसासंसिद्धयास्वधामनिस्वयंप्रकाशेब्रह्मणिअनवच्छिन्नादिदानंहेकरसेरेरंयतेरममाणाय सदातनोऽनुभावोयमितिशतृप्रत्ययः ॥ लोकविलक्षणोयेरतिरितिधातुंपरस्मैपदप्रयोगः प्रतिपदमनुसंधेयमितिनमसांबहुत्वं ॥ १४ ॥

कीर्तनाद्दर्शनादिभूतस्यकश्मलस्यनमस्क्रियासंपन्नइतिभावेनाह यत्कीर्तनमिति सुभद्रश्रवसेसुमंगलकीर्तये सद्यइत्यनेनभक्तिपूर्वकमितिसूच यति भद्रंश्रेयस्तुमंगलइतियादवः ॥ १५ ॥

वैराग्येणदर्शनीभूतयाभक्त्याभगवच्चरणनिषेवणंब्रह्मज्ञानसाधनंभवतीतिभावेनाह विचक्षणाइति यच्चरणोपसादनात् यच्चरणैकशरण्यप्राप्तिलक्षणानिषेवणाद्भजनादंतरात्मनोऽतःकरणस्य । उभयत इहामुत्रविषयेषुसंगंस्थूल्यस्यनिरस्यब्रह्मगतिंब्रह्मज्ञानेनमोऽस्तुविदंतीति ॥ यस्यगुरुरूपस्यहरेश्चरणोपसत्तेरंतरात्मनः क्षेत्रज्ञस्योभयतःसंगंस्थूलसूक्ष्मशरीरसंगंस्थुल्यस्यापोह्यब्रह्मगतिंब्रह्मरूपंविदंत्यनवच्छेदेनेतियन्मंत्रेकेषु चाविनाहिशब्देननिरस्तं यतोभेदःप्रत्यक्षादिप्रमाणसिद्धोऽतोऽनुपपन्नऐकपवादः । सुभद्रंश्रवःश्रवणंयस्यसतथातस्मै ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र स्वप्रयोजनं लीलावतारं दर्शयन्नाह भूय इति द्वाभ्याम् । सतां वेदमार्गानुसारिणां देवादीनां दुःखहन्त्रे । असतां तद्विरुद्धमुखानां दैत्यादीनामपि असम्भवाय मुक्तिदाय । पुंसां पुमर्थेति । अत्रानुमृग्यं भक्तियोगैकाक्षरं स्वचरणारविन्दमेव ज्ञेयम् । तथा परमहंसानां मुनीनामममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ इति प्रथमे, परमहंसमहामुनीनामन्तेषद्मजवरजौ ब्रह्मवद् ब्रह्मणः इति तृतीये च निरूपितत्वात् ॥ १३ ॥

नन्वात्मरमणमेवास्तु किमन्यैरित्याह । साम्यता यद्यपि मुक्तयाप तैरेव प्राप्यते तथापि कुयोगिनां तद्बहिर्मुखयोगनिष्ठानां विदूरकाष्ठाम् । पुनश्च यथावदवस्थितिमेव दर्शयति निरस्तेति । ब्रह्मणि ब्रह्मस्वरूपे स्वधामनि वैकुण्ठे रंस्यते तत्पश्चादेव रममाणाय ॥ १४ ॥

न केवलमवतारसमय एव तस्य तादृशत्वं किन्त्वन्यदापीत्याह यत्कीर्तनमिति । यच्छब्दादृश्यैकवचनेन च सकृत् तत्सम्बन्धमपीत्यभिहितम् ॥ १५ ॥

शरच्छागतिमात्रमपि यस्य सिद्धिकरमित्याह विचक्षणा इति । तथोक्तं श्रीगीतान्ते मन्मना भव इत्यादि सर्वधर्मान् इत्यादि च । ब्रह्मगतिं ब्रह्मस्वरूपा च सा गतिः गम्यो लोकश्च तान् ॥ १६ ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

भूयादिति अंतर्यामितयाकरोत्येवपापादिनाशंबहिरपिकरोतीतिभूयःपदं अत्युपकारित्वाद्ज्ञानमस्कारविशेषणं भगवतोऽवतारस्यसतांदुःखदूरीकरणमेवप्रयोजनं यद्यपिप्रकारांतरेणापिदुःखदूरीकरणंभवति तथापिनसर्वात्मनाऽभिमुखंभवति साधुःअरंततिःभगवद्विनिर्गमनमारभ्यपुनःप्रवेशपर्यंतउद्भूतानुद्भूतरूपेणातिष्ठति तांदूरीकर्तुंभगवत्संबंधएवशक्तइतिमध्येप्रादुर्भूतस्तांहिनस्ति किंच सतामसंभवाय पुनरुत्पत्तयेभावाय परब्रह्मणोदेहग्रहणेआविर्भावेवानार्यनिमित्तमस्ति संतोहिभगवद्धर्मसंबंधात्सत्वंप्राप्ताः ननुचिदानंदत्वं पुनःसंभवेसत्यरूढेर्हांऽपि साधनानितुसत्वएवोपक्षीणानीति अतोभगवान्स्वयमाविर्भूतःतेषामाविर्भावाभावाय अतोदुःखच्छेदनमलंपतद्विषोभावोपिच्छद्यमंगीकियतइति किंच अखिलानिसत्वानिसत्वगुणभेदाःमूर्तौयस्य सत्वगुणाः सर्वोशेनसाधनापेक्षायामपिस्वयमेवसर्वसाधनानिकरोति देवान्वा आविर्भावयति एतदर्थमेवसत्वगुणाविर्भावइतिलोकप्रसिद्धिः अखिलात्मनिसत्वानिजीवगणाःमूर्तयेस्योतथा अनेनानंतजन्मसंभवेपितत्र निमित्तयासर्वविधसर्वजीवानुत्पादितवान् अतस्तेषांभगवतारेणैवस्वप्रतिनिधितयासर्वावतारान्प्रैषांविधोभक्तवत्सलइतिभजनीयरूपमुक्तं किंच नकेवलंभक्तानामेवोद्धारार्थेभगवानवतीर्णः किंतु ज्ञानिनामपीत्याह पुंसामिति पारमहंस्यआश्रमेव्यवस्थितानांप्रतिकल्पेसन्यासिरूपेणैवजातानांसनकादीनांज्ञानेनपदार्थनैकट्य भासमानानांदूरस्थितत्वेपितथाभानरहितानांतदर्थमतिक्लेशंप्राप्नुवतां मृग्यंमृग्यमनु क्रममुक्तिसाक्षान्मुक्तिमवांतरभेदानपिसामीप्यादीनापेक्षाद्युपदाय अनुमृग्यानांदाय वैदिकपद्धत्यागात्फलानांकेवलं वैदिकत्वं अनुमृग्यंविचार्यवा हृदानीमपिजन्मकोटिभिः विचारमेवार्हति अतस्तेषांक्लेशनिराकरणायस्वात्मदृत्यर्थःनहिप्रकारांतरेणभगवानात्मालभ्यते ज्ञानेनापिआत्मत्वं नभासतएवबालानांहस्ताग्रस्थचंद्रवत् पुनरितिपुनःपुनः पारमहंस्याश्रमइति प्रत्यक्निष्ठारूपआश्रमेतत्रप्रविष्टाअवहिर्मुखाएवभवंतीति हंसास्तुमानसेऽपिरमंते परमहंसास्तुततोप्यंतरतमेआत्मन्येव आत्मानात्मसंघातेषाआत्मन्यिमर्शनादनुमृग्यत्वं एवमवतारसंदेहंवारयन्दुःखं वर्णानामावहयकभजनीयत्वंनिरूपितम् इदानींप्रयोजनसंदेहंवारयन्भक्तैकलभ्यत्वंसोपपत्तिकमुपपादयन्नमस्यति ॥ १३ ॥

नमोनमस्तेऽस्त्विति अतएवभक्त्युद्रेकेणबहुवारंनमस्यन्तदेवप्रार्थयते शास्त्रेपूर्णानांभगवद्दर्शनेजातेनमस्कारएवकर्त्तव्यइतिसदुपदिक्षाविचारेणान्यस्यस्वस्तेाकर्त्तव्यत्वात् किमासनेतेगरुडासनायेत्यादिवाक्यात् अतस्तथाभूतानामस्माकंभगवन्साक्षात्कारेतथानमनमेवास्तित्यादिप्रार्थनयैवापतावदेवप्रयोजनमित्युक्तंसर्वैरेवसाधनैः किंच ते तुभ्यमितिप्रत्यक्षतयानतुमह्यमितितस्माहति इतःपरमधिकंप्रयोजनंउद्देश्यंनास्तीति शास्त्रसंग्रहः किंच सात्वतामृषभायेति सात्प्रत्यययुक्तानांतदधीनवचनेसातिरितिसातिप्रत्ययःव्याकरणेविहितः आत्मसादिति तत्रसाधुक्ताःसात्वंतःकदाचिद्पिनस्वतंत्राःकिंतुभगवदधीनाएवेति तेषामृषभः एवंभावेनभगवत्स्वामित्वमपिप्रयोजनं मानेनमाक्षेपीयस्वतःपर्यवसानं तदधीनत्वलक्षणोमाधिकधर्मेउपपन्नस्वसेवामपिकारयतीतिवंदनानंतरंदास्यंप्रयोजनमितिनिरूपितं येपुनर्योगादिनातंप्राप्स्यामइतिविचारं कुर्वंति तेकुयोगिनः पृथिव्यामेवयोगिनइति नहिभूमावेवस्थिताः ब्रह्मांडात्परतःस्थितंवस्तुप्राप्नुवंति अयंचकुत्सितोयोगः कुत्सितंफलंभूमिष्ठत्वंप्रयच्छेत् अतएवायंमादृग्एवतत्फलत्वेननिरूपिताः योगास्तुस्वाधीनः भगवांश्चस्वाधीनः योगेश्वरश्च अतोयोगेव्यवस्थितमतीनांयस्यांहिशिभगवानस्तिसादिपिदूरे साधनान्यपितोऽपिदूरेनयंतीतिविशेषेणदूरंकाष्ठाप्राप्तस्येति अनेननान्यसाधनसाध्यंप्रयोजनमित्युक्तं सकृत्कुयोगिन्वेऽपिउत्तरत्रश्रद्धयादियोगश्चेत्तदाप्राप्नुयादपि मुहुःकुयोगित्वेआशापिनास्तीत्यर्थः प्राप्त्याशाभावएवदूरकाष्ठात्वं मुहुःपदेनतेषांसाधनाभावःसूचितः अतोभक्त्यैकलभ्यत्वंसाधितमन्वयव्यतिरेकाभ्यां किंच निरस्तसाम्येति काचिद्भगवतःसिद्धिरस्तिराधसूशब्दवाक्या मताद्दशीसिद्धिःकचिदन्यत्रनास्तीतिप्रोक्तेापिअधिका तयाभिजुष्टाभगवानूरुगृहएवरमते तत्वाक्षरात्मकंब्रह्म रंस्यति स्वनिष्ठमेवरंस्तेसंबंधात् अभिमुख्यंकरोतीति एतावतास्वरूपस्थितिर्व्यतिरेकेणान्यत्रारंस्यतीतिभगवदीयोरसस्तत्रैवप्राप्तव्यः गृहंचतस्यैवतत्साधनंचनिरस्तसाम्यातिशायिसिद्धिः अतोऽन्येषांसंबंधात्तद्रसप्राप्तिर्दुर्लभागृहसेवकस्यतुसुलभेति सहिस्वगृहेतांमित्वारंस्यतीति अनयाऽपेक्षयाभक्त्यैकलभ्यत्वं स्पष्टमनीस्पनेनब्रह्मन्यस्तमनुस्यातुंस्यातुंशक्नोतीतिसूचितं ब्रह्मत्वाद्हेयत्वं निरंतररसप्रवाहात्मनासायुज्यापेक्षा अतस्तादृशभक्त्यैकलभ्यत्वं सर्वोत्तमत्वं तादृशायनमहत्याह रंस्यतेनमहति एवंह्यात्मानमनमपिप्रयोजनमितिशुकादीनांतावन्मात्रपर्यवसानंसूचितम् ॥ १४ ॥

एवंभक्तिमतोनकिंचित्कर्त्तव्यत्वमित्युक्त्वाब्रह्मभक्तेःफलंनियमयन्नमस्यति यत्कीर्तनमिति संसारिणांबाह्यबुद्धिभक्त्यातत्क्षणंपापक्षयहेत्वर्थः ईक्षणंपादसेवनसाध्यं अतएवप्रश्नस्यतारतम्यंनिरूपयितुंभिक्षुःक्रमोनिरूपितः अत्रकीर्तनस्यस्वस्याश्रयेणांहसंक्षयेपापनिवारकत्वात्तत्क्षणापेक्षयापिमहत्त्वंनिरूपयितुंप्रथमंनिरूपितंतदनुतस्यापिमूलभूतस्यैतत्सिद्धेर्हेतुकस्यस्वात्मनाश्रयेणापिआध्यात्मिकपापनिराकरणात् अंतःकरणशोधकत्वेनस्मरणंनिरूपितम् एवंकीर्तनस्मरणाभ्यांप्रेमोद्रेमेजातेयद्भगवतईक्षणंभगवदागमनेनस्वगमनेनवा सानुभावाधिष्ठानस्यभगवत्प्रतिनिधित्वात्प्रीतेश्चालंपत्वात् भगवत्कृपालाभाशक्तौयहिस्तदीक्षणं अंतर्बोधनयातद्दर्शनेनआधिदैविकपापनिवृत्तिः "यद्देवानांचक्षुष्पागोअवस्त" इतिश्रुतौतत्पापंनिरूपितं तद्भगवद्दृष्टिविषयंतांभूयाद्दिर्निवर्त्तनंतद्दितद्दोषनिवृत्तिः तद्मंतरंयद्वंदनंतद्भगवदीयापराधक्षमणादोषनिवर्त्तकं वस्तुतोजिजीवःभगवत्सेवकोभूत्वाबहुकालंतत्सेवामकृत्वास्थितइतिक्षमधर्मपरित्यागेनअधर्मोभवति तद्दर्शनांतरंवंदनेनेवनिवर्त्तते तदंतरंतद्भगवदीयानांमुखात्यद्भगवन्माहात्म्यंश्रवणंतत्सेवनंवस्तुतस्तुवाचाभाव्यंवाक्यंकथितंतदज्ञानकृतंपापंमूलभूतमितिनिवर्त्ततेततोज्ञातेऽरुद्धेऽनुसंधेभगवतःअर्चायांपूजनंसत्कारेतियावत्तत्भगवन्मयांरूपंतद्भावामोहनंदिव्याकृतमवर्त्तनिवर्त्तयति तदर्हणादिप्रकृतिरूपं अनन्य

त्वाभावात्तत्वेनाव्यपदिष्टं अतोभक्तिमार्गानभिज्ञानामन्येषामपि एवंप्रकारेणाकृष्टानां तत्त्वावलम्बनत्वेन सर्वपापनिवृत्तिः फलं भवति अतोभगवत्कीर्तिमूलत्वात्सर्वेषांभगवत्कीर्तिः सुभद्राभवति भद्रःभद्रयोस्तुल्यत्वात् अभद्रनाशिकासुभद्राभवति प्रथमश्रवणकीर्तनादनिर्वाच्य प्रविष्टयालंडनेनभूतेभ्यः देहादिभ्यः पापनिवर्तनात्सर्वमंगलमितिप्रथमंतत्रनिर्दिष्टं कीर्तनंतुतत्रावान्तरमिति विवेकः ॥ १५ ॥

एवंषड्विधभक्तेः षड्विधपापक्षयकर्तृत्वमुक्त्वाकर्मभिस्तावन्मात्रपर्यवसायित्वेनांशपर्यवसानाभावाच्छास्त्रविरोधः प्रसज्येतेतिस्वयमुत्थाप्य पर्यवसायित्वंप्रकारांतरेणवदति विचक्षणाइति अथतुराजामेधांवद्विधाभक्तिरुक्ता एवंषड्विधयाचातुर्वेसंपन्नेषश्चाद्विचक्षणाः संतःभगवच्चरणारविंदएव भयसज्ञाभयंति ततःपदार्थांतरेउपयुक्तामयंति तदातत्रैवावसन्नाःउभयतः संगात्निवृत्ताभवंति अवसादोहिसंगानांशैथिल्यं युक्तमेव तत्रापिभंतःकरणेनभगवत्यवसादनात् अंतःकरणस्यैवउभयतःसंगव्युदासः तदापश्चात्कर्मकानामभावात्भगवतासहगमनसाम्यं भवति चरणंहिउपसत्तेश्चरणेनसहगंतुंसमर्थोभवंति अतोब्रह्मगतिंप्राप्नुवंति ब्रह्मणासहगतिः ब्रह्मणिवागतिः अक्षरस्यचरणावेवृहत्वेवात् उभयमुपपद्यते अतोमार्गांतरेणापिएवंसाधनेनपूर्वतुल्यताभवतीतिद्वयोरप्येकएवार्थइतिवक्ष्यमाणउपपद्यंभवति तस्यहिगतिर्ज्ञानरूपा अतएव ज्ञानस्यक्रियात्वंधात्वर्थत्वंचोपपद्यते ज्ञानस्यचक्रियात्वंभगवत्क्रियात्वेनभगवतःइंद्रियाभावाज्ज्ञान्यक्रियानसंभवति नित्यातुक्रियाज्ञप्तिसिद्धा यागानांतुक्रियारूपेणाभगवद्विभावात्पदार्थांतरवत्क्रियापिभवति भगवद्रूपंतदेजनितत्रैजतीत्यादितुविरुद्धसर्वधर्माश्रयत्वेनधर्मरूपेणा विर्भूतरूपंप्रतिपाद्यति तस्मात्सच्चिदानंदवत्तनाक्रियास्वरूपभूताभवति अतोज्ञानमेवतेजःस्वभावंगच्छतीवप्रतिभातीतिस्मरणेनमनोगच्छतीति वत्भगवतांज्ञानमेवक्रियारूपं तस्माद्भगवतोगतिश्चैतन्यरूपंवेदितव्यं अलब्धलाभवत्प्राप्नुवंति चिंतितन्मंत्रेणतदात्मकत्वाविति प्रकारेण । अतएवमुख्यसिद्धांतात्फलेऽपिभेदः हियुक्तश्चायमर्थः यतःकीर्तिमुक्तेः पर्यवसायिनी गतक्लमाइति मार्गांतरेणापिज्ञानादिनाअक्षरोपासनया वा तदेवस्वरूपंप्राप्नुवंति तथापिक्लेशाधिकतरस्तेषामितिवाक्यात्क्लेशयुक्ताभवंति कीर्तनप्रणालिकयातुयेनच्छंतितेनगतक्लमाएवगच्छंतीति साधनांतराद्वैलक्षण्यम् अतएवकीर्तिपुरःसरंतन्नमस्यंति सुभद्रंभवसइति पूर्ववत् वाल्लभक्तव्याप्येवमनुग्रहंकरोतीत्यादरेणनमनधीरसो सोभयत्र ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

कृपामाधुर्य्यमाह । भूयः पुनरपि नमः । सदृजिनच्छिदे रामकृष्णाद्यवतारैः स्वभक्तदुःखहन्त्रे । असतां पापिनाम् अभक्तराक्षसासुरादीनामपि स्वकर्तृकवधेन असम्भवाय सम्यग्भवदुःखनिवर्तकाय । खिलं निकृष्टं प्राकृतं सत्त्वम्, अखिलं प्रकृष्टम् अप्राकृतं सत्त्वं, शुद्धसत्त्वमेव मूर्त्तिः शरीरं यस्य तस्मै । परमहंसानां भावः पारमहंस्यं तस्मिन् विषये य आश्रमः तत्र विशेषतोऽवस्थितानां भक्तिभिश्चानिनां शुद्धभक्तानाञ्च अनुमृग्यो यो ब्रह्मानन्दः प्रेमानन्दश्च तस्य तस्य दात्रुपे दात्रे ॥ १३ ॥

ऐश्वर्य्यमाधुर्य्ययोः परिपूर्णत्वमाह । नमो नम इति धीप्सया निरन्तरमेव नम इत्यर्थः । ते तुभ्यम् इति युष्मत्पदप्रयोगेण साक्षात्कारात् स्वेष्टदेवत्वं ध्वनितम् । सात्वतां यादवविशेषाणाम् ऋषभाय देवकीनन्दनाय । सात्वतां भक्तानां पालकायेत्यर्थस्तु पूर्वश्लोके व्यञ्जित एव । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य तस्मै । न च त्वं दूरे वा गुप्तो वा वर्त्तसे इत्याह । निरस्तं साम्यमतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्य्येण स्वधामनि मथुरामण्डले रंस्यते रममाणाय रमणोचितजनैः सहेत्यर्थतो गम्यम् । स्वधामनि कीदृशे ब्रह्मणि ब्रह्मस्वरूपे "तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि" इति गोपालतापीश्रुतेः । अत्र राधसेत्यैश्वर्य्ये रंस्यत इति माधुर्य्यम् ॥ १४ ॥

तत्प्राप्तिप्रतिबन्धकं कलमघं तत्कीर्त्तनादिभिरेव नश्यतीत्याह यदिति । यदीक्षणं यत्प्रतिमावलोकनम् । सुभद्रं सुमङ्गलं भवो यस्येति कीर्त्तिमाधुर्य्यमुक्तम् ॥ १५ ॥

धीतकलमघा ज्ञानिनोऽपि यमेव भजन्तीत्याह विचक्षणा इति । उभयतः इह परत्र च । व्युदस्य निरस्य । अन्तरात्मनः अन्तःकरणस्य गतक्लमा इति अन्ये त्वभजन्तः श्रममेव लभन्ते श्रेयःसृतिं भक्तिमुदस्य इत्यादेः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

सतांसाधूनांवृजिनच्छिदेपापहंत्रे भूयःपुनश्चनमः अखिलंसम्पूर्णंसत्त्वमेवमूर्त्तिर्यस्यतस्मै पारमहंस्येपरमहंसानांमुनीनामाश्रमेव्यवस्थितानाम् अनुमृग्यंलब्धुमिष्टंनिजपादपद्मदातृत्वेनदात्रुपे दात्रे ॥ १३ ॥

सात्वतांनिजोपासकानां ऋषभायपालकायकुयोगिनांकुत्सितयोगिनांविदूराकाष्ठादिगप्यस्यतंतरमैनिरस्तंसाम्यं अतिशयश्चयस्यतेनराधसातेजसोपलक्षितेस्वधामनिस्वेमहिम्निब्रह्मणिस्वस्मिन्रंस्यतेरममाणाय ॥ १४ ॥

अर्हणंपूजनम्सुभद्रंसुमंगलम् भवोयस्यतस्मै ॥ १५ ॥

विचक्षणाःविवेकिनःयस्यचरणयोरुपसादनादुपसत्तेरुपासनात् अन्तरात्मनःमनसःउभयतःइहामुत्रचसंगव्युदस्यनिरस्यगतक्लमाः निवृत्तक्लेशाः ब्रह्मगतिंगम्यतेइतिगतिः ब्रह्मगतिस्तांविंदंतिप्राप्नुवंति ॥ १६ ॥

भाषा टीका ।

सत् पुरुषोंके वृजिनच्छिद और दुष्टोंके और असत् पुरुषों के अनुभवके हेतु अखिल सत्त्वमूर्ति, और परमहंस आश्रम में स्थित पुरुषोंको मुक्ति देनेवाले भगवानको फिर नमस्कार है ॥ १३

सात्वतों के ऋषभ, कुयोगियों को जिनकी काष्ठाभी दूरहै और न जिसके समान और न अधिक ऐसे अपने तेजसे उपलक्षित स्वधाम में रमण करते हुए भगवान को नमोनमः ॥ १४ ॥

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदःसुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥
किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः शकादयः ।
येऽन्ये च पापा यदपाश्रयाश्रया शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥
स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्म्ममयस्तपोमयः ।
गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥ १९ ॥
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥ २० ॥

भाषा टीका ।

जिनका कीर्त्तन जिनका श्रवण जिनका दर्शन जिनका वंदन जिनका स्मरण जिनका पूजन शीघ्रही लोकके कल्मषको विनाश करता है उन सुभद्रश्रवा भगवान को नमोनमः ॥ १५ ॥

विचक्षणजन जिनके चरणों के उपसादन से अन्तरात्मा का ऐहिक और पारत्रिक संगछोड़कर गतक्लम होकर ब्रह्मगति प्राप्त होते हैं उन सुभद्रश्रवा भगवान को नमोनमः ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

भक्तिशून्यानां सर्व्वसाधनवैफल्यं दर्शयन् नमति तपस्विन इति । मनस्विनः योगिनः । सुमङ्गलाः सदाचाराः । यस्मिन् तपआद्यर्पणं विना । सुभद्रश्रवसे इति । अस्यावृत्तिर्यशःश्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥

भक्तेः पन्थशुद्धिहेतुत्वं दर्शयन्नाह । किरातादयो ये पापजातयः अन्ये च ये कर्म्मतः पापरूपाः यदपाश्रया भागवताः तदाश्रयाः सन्तः शुध्यन्ति । असम्भावनाशङ्कां परिहरति प्रभविष्णवे प्रभवनशीलायेति ॥ १८ ॥

सर्व्वोपास्यत्वमनुस्मरन् प्रार्थयते । स एष आत्मवतां धीराणाम् आत्मा आत्मत्वेनोपास्य इत्यर्थः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वं विवक्षितम् । गतव्यलीकैः निष्कपटैर्भक्तैः वितर्क्यम् अत्याश्चर्य्येण धीक्षणीयं लिङ्गं मूर्त्तिर्यस्य सः प्रसीदतु ॥ १९ ॥

सर्व्वपालकत्वमनुस्मरन्नाह श्रिय इति । पतिः सर्व्वापत्सु रक्षकः ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

किरातेति । शबरात् पर्णशबरीजाताः किराताः आटविकाः । वैदेहकात् पुल्कसीजाताः हूणाः । वैश्यात् ब्राह्मणीजातो वैदेहकः । वैदेहकपुत्रा आन्ध्राः पुलिन्दाः अज्ञातविप्रादिभाषाः मधुपायिनः । निषादात् किरातीजाताः पुलिन्दाः व्यभिचाराज्जातश्चारस्तस्माज्जाता वा । शूद्रात् ब्राह्मणीजातश्चण्डालस्तस्माज्जाताः पुल्कसाः । ब्राह्मणाद्वैश्यायां जातोऽम्बष्ठः ब्राह्मणात् तस्यामम्बष्ठस्य कन्यायां जाता आभीराः । कङ्काः कर्पराः । नृपाद्वैश्यायां जाता यवनाः श्मश्रुलाः । शौकास्तुरुष्कविशेषाः । होम्बुकुरुविन्दपूतिस्वपूर्व्वा आहिण्डाश्च गृहीताः । तथा चानुक्रमैः सह चत्वारिंशज्जातयः । तथा चोक्तम्—ब्राह्मणस्य त्रयः पुत्रा वर्णास्त्रिष्वनुलोमजाः । शूद्रस्य च त्रयः पुत्रास्तेष्वेव प्रतिलोमजाः ॥ त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः । एते द्वादश वर्णानां पुत्रा एकैकशस्तु ते ॥ चातुर्वर्ण्ययें प्रसूयन्ते चतुरश्चतुरः सुतान् । ते चत्वारिंशदष्टौ च पूर्व्वैर्द्वादशभिः सह ॥ ब्राह्मणाद्यैश्चतुर्भिश्च चतुःषष्टिर्हि जातयः ते सर्व्वे दस्यवो हेयैरुपेयाद्यैः सदूरहिष्कृताः ॥ इति जातिविवेकाभिधाने । इति विजयध्वजः ॥ १८—२३ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

भक्तिशून्यानांसर्वाण्यपिसाधनानिनिष्फलानीत्याह तपस्विनइति तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः मनस्विनः मनआदीन्द्रियनिग्रहपराः मन्त्रविदःमन्त्रजापपराः सुमंगलाःसदाचारपराः एतेसर्व्वेतपआदिर्यदर्पणंयस्मिन् भगवतिसमर्पणंयदुपासनांगत्वेनानुष्ठानंविनेतियावत् क्षेमंततत्तपआदेःपरमफलंनविंदंतिनलंभंते यद्यपियत्किंचिदुदुरितनिवृत्त्यादिकंफलमाप्नुवंतितथापिनाक्षय्यंफलमाप्नुवंति भक्तियोगांगत्वेनतपआदिकुर्वाणास्तुनिरतिशयंफलंप्राप्नुवंतीत्यभिप्रायः ॥ १७ ॥

किंचकर्त्तव्यंभागवताश्रमंविशोध्यब्रह्मप्राप्नुवंतीतिभागवताश्रिताहीनजातीयामपिप्राप्नुवंतीत्याह किरातेति किरातादयोहीनजातयः अन्येचयेपापाःपापजातयः यदुपाश्रयाश्रयाः यंपरमपुरुषमुपाश्रितायदुपाश्रयाभागवतास्तदाश्रयाभागवताश्रिताःशुद्धंति असंभावनाशंकांपरिहरति प्रभविष्णवेप्रभवनशीलायपूर्वोक्ततपआदीनांफलप्रदायेत्यर्थः अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचेतिभगवद्वचनात्सर्वेषांफलप्रदत्वेनसर्वसाधनानांतत्समर्पणमेवमुक्तमितिभावः ॥ १८ ॥

एतद्धेवोपबृंहयतिसइति सप्रसिद्धएषः आत्मापरमात्मात्मवतांकेवलयोगिनांब्रह्मेश्वरःयोगफलप्रदःत्रयीमयःपूर्वभागोक्तकर्म्मफलप्रदत्वेनस्वाराध्यफलप्रदत्वेनचधर्म्ममयःस्मार्त्तदानादिधर्म्मोपाख्यःतत्फलप्रदत्वेनतपोमयउपनिषद्भागोक्तोपासनात्मकज्ञानमयः तत्तज्ज्ञानप्राप्तुर्वंते च स्वाराध्यफलप्रदत्वेनतत्तदुपबृंहणत्वेनचतत्तदात्मत्वमभजन्नारकपतत्तत्तद्भेदसर्वैकमोक्षाध्यक्षमित्यतआह गतव्यलीकैर्यतदोषैरजशंकरादिभिर्ब्रह्मरुद्रादि

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सज्जनसेवायाअप्येतादृशमाहात्म्यंकिमुतभगवत्सेवायाइतिभावेनतन्माहिमा । किरातेति किरातादयोयेऽन्येपापास्तेसर्वे यदपाश्रयाश्रयाच्छुध्यंतितस्मैप्रभविष्णवे । यस्मादन्यआश्रयोनास्तियेषांतेयदपाश्रयाधिप्राद्दयस्तेषामाश्रयस्यबालक्षणात्शुध्यातिधिपापाभवंतीत्यर्थः शबरात्पर्णशवरीजाताःकिरातास्ते आटविकाः वैदेहात्पुल्कसीजाताहूणाः । वैदेह्यांतुब्राह्मणीजातोवैदेहकः वैदेहकपुत्रआंध्रः पुलिंदा म्लेच्छ विप्रादिभाषा मधुपायिनः । निषादात्किरातीजाताःपुलिंदाः व्यभिचाराज्जातश्चौरस्तस्माज्जातायां शूद्रादब्राह्मण्यांजातश्चांडालस्तस्माज्जाताः पुल्कसाः ब्राह्मणाद्वैश्यांजातोऽम्बष्ठः ब्राह्मणात्क्षत्रियांजातायांजाताआभीराः कंकाःकपोताः नृपाद्वैश्यांजातायवनाःइमश्रुलाः शकास्तुरुष्क विशेषाः डाबुकुरुंबपूतिबपूर्वादिशब्दगृहीताः तथाचानुक्रैःसहचतुःषष्टिजातयस्तथाचोक्तं ब्राह्मणस्यत्रय पुत्राश्चत्वारिंशत्तुलोमजाः शूद्रस्यपञ्चत्रयःपुत्राःषष्टेचप्रतिलोमजाः त्रयस्त्रयःक्षत्रविशोःप्रतिलोमानुलोमजाः एतेद्वादशवर्णानांपुत्राएकैकशस्तुते चानुक्रमेणप्रसूयंतेषडनुलोमपुत्रान् तेचत्वारिंशदष्टौचपूर्वैर्द्वादशभिःसह ब्राह्मणाद्यैश्चतुर्भिश्चचतुःषष्टिर्हिजातयः तेरूपंदस्यवोदोषैर्व्याधेःसङ्गाद्दिष्कृताइति जातिविवेकाभिधाने अन्येपापाब्रह्महत्यादिकंतारःतस्मैप्रभविष्णवे प्रभवनशीलायनमइत्यन्वयः ॥ १८ ॥

यएवंविधमहिमत्वेनप्रसिद्धःसएषआत्मापरमात्माभगवान्प्रभविष्णुरित्यन्वयः किंविशिष्टः । आत्मबतांभक्ताऽपरोक्षीकृतपरमात्मतत्त्वा नांमुक्तानां प्रशंसायांमतुर्वसि प्रशस्तमनसांज्ञानिनांवाऽधीश्वरः वेदधर्मतपोनुसारिणांपुंसांवशगत्वान्नयोधर्ममयस्तपोमयःधनेनयक्ष्यमाणःसत्त्वेदर्शितं तदुक्तं वेदानुसारिशास्त्रेरुच्यते तत्रप्रमाणमाह गतेति व्यलीकंत्वप्रियंऽनृतहृत्यभिधानात् गतव्यलीकैरजैःकरादिभिर्ब्रह्मशिवादिभिर्वंदितकर्मविशेषणानुमेयलिंगजगज्जन्मादिलक्षणोयस्तस्तथोक्तः ॥ १९ ॥

चित्तीकृततत्तदभीष्टसिद्धयेतत्तद्गुणविशिष्टस्यहरेःप्रसादंप्रार्थयते श्रियःपतिरिति श्रीधरयोःपतिरित्यनेनसर्वाधिपत्यंसिद्धंऽपिहृदयं तत्तद्देवतानामाधिपत्यंनिवारयति यद्वाद्विषाड्मात्राभिमानिन्येनश्रियःसाद्योऽपिप्रार्थनीयत्वाभिप्रायेणश्रियःपतिरितिरविशेषणान्येवमनुसं धेयानीति बहुजनाश्रयत्वेनक्षमागुणान्वितेनस्थिरायाधरायाःपतिः । मनआदीन्द्रियव्यापारमाध्यस्थ्यंदेहांतरभोग्यफलस्वयज्ञकर्मणांफलदा तृत्वेनतत्फलपालकःफलपालनंकिमर्थमित्यतआह प्रजापतिरिति कर्मण्यधिकृतस्यजनस्यजीवनहेतुत्वेनपतिः प्रजानुजनपुत्रयोरिति प्रजा पतिशब्दवाच्यत्वंमुख्यमस्येतिवा प्रवृत्तेर्ज्ञानपूर्वकत्वेनसंभवात्तदर्थंधियांपतिरिति लोकपतिरित्यनेनपुरंदरादीनांतत्पतित्वंनिवारयति पतिर्गतिरित्यादिनाभक्तवात्सल्यातिशयंदर्शयति निरपेक्षत्वेनसतांस्वामित्वापेक्षानास्तीतिवा निवारयति सतांपतिः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भक्ताश्रितानां पापजीवानामपि परमशुद्धौ हेतुत्वं दर्शयन्नाह किरातेति । अत्र यदपाश्रयाश्रयत्वं व्यवहारेऽहर्यत्वं । परमार्थेऽक्षुद्रे तु पूर्वेषामपि भगवदपाश्रयाणां ततपूर्वं भक्तान्तराश्रयत्वं विद्यत एवेति न विरोधः स्यात् ॥ १८ ॥

प्रत्यक्षवत् स्फुरणात् स एव इत्युक्तम् । त्रयीमयः कर्म्मकाण्डोपास्यः । धर्म्ममयः मन्वादिधर्म्मशास्त्रोपास्यः । तपोमयः उपासना काण्डोपास्यः । गतव्यलीकैः प्राक्प्रक्षिप्तकैतवैः मोक्षपर्यन्तकामनाशून्यैः परमभक्तैः ॥ १९ ॥

तदेवं निजोपास्यधिशेषं रहस्यत्वेनाभिव्यज्य परमप्रेमावेशेनैव प्रकटं व्यञ्जयन्नाह । श्रियः सर्व्वसम्पदधिष्ठात्र्याः पतिः स्वामी । अतः यज्ञानां सर्व्वश्रेयःसाधनानां च पतिः फलदाता । अतः प्रजानां सर्व्वासामेव पतिरीश्वरः । यतो धियां पतिः तासामन्तर्यामी च । ततस्ततश्च तासां ये लोका भोग्यभुवनानि तेषामपि पतिर्भोक्ता । य एव च धरापतिः कृपयाऽवतीर्य्य धरापतित्वलीलाश्च व्यञ्जित वानित्यर्थः । कोऽसौ इत्यपेक्षायामाह पतिरिति । पतिः पालकः गतिः निराश्रयश्च । तत्र प्रमाणमाह । सतां तदनुभविनां पतिः आश्रय इति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवंज्ञानभक्तिमार्गौसम्यगुपपाद्यकर्म्ममार्गेऽपिभजनावश्यकतांदर्शयतेषांसकलसंदेहंनिवारयति तदस्तिनइति यद्यस्तिनःकुतोरामादिकतीरः मंत्रविद्योमंत्रोपासका यांत्रिकाश्च सुमंगलाः सदाचाराः एतेहिकर्म्ममार्गेकृतिधाऽधिकाः तपोहिसंतापात्मकंतत्पाकजःसाधनपर्यवसायिनसुखं प्रयच्छतिनहिदेहेंद्रियासुकिलष्टानिसुखप्रयच्छंति विहितत्वात्फलदानेऽपिहेतुःसंबंधाभावात् आज्ञाभंगेशास्त्याकरणेऽपिस्वात्मसमर्पकत्वेनैव तद्बोधनाविघ्नायात् अदृष्टद्वाराफलजननेमानाभावात् कर्षयंतःशरीरस्थंभूतग्रामंमिलित्वाभक्तशरीरंतपसापृथिव्यादिरूपंहेतुत्वंप्रदेहाद्बहिरं तराकल्पनाऽयोगानाभावात् भगवत्क्रीडोपयिकतांसंपादयतदेहंभगवद्योग्यंकरोति यद्भगवान्सर्वान्तरःक्लेशंदूरात्कृत्स्नंप्रयच्छतिअतएवकलेश निवृत्त्यर्थंवा तत्रैमात्मकं नहिभगवताद्रष्टसदृष्टासुखादिरहितंभवितुमर्हति एवंभक्तांभागिनांचयमस्यश्चाप्रकृष्टांश्चोपेक्षतेसुखदुःखेनतत् मथविष्टानिशोधयंति दृष्टहेत्वस्यतुत्रासीविधयोगसेत्रासफलस्यैवकर्मणोनिवर्तकं तीव्रभगवत्स्मृतिकारकाः प्रयच्छतितदुत्तम

पंचेन्द्रियतत्त्वनिर्मथनसुदर्शनचक्रप्राप्तिः कृपारामाद्यिष्वर्पितस्वात्मतत्त्वमगवद्भक्तिकीर्तितकरणादुद्धवदेवतस्यनिर्णयः मनस्विनस्तुयो गिनएवतेकुयोगिविचारेश्वरविचारिताः सर्वेषामेवमिरोधितसर्वसिद्धादेवदीक्षादेवभावेव मनवत्समर्पणेनुसङ्गमनेनतदुक्तमेवकृतमितिनकोऽपिदोषःसंभवति धर्ममार्गेऽपिधर्मैःसदतितकीर्तनादित्यादिनाशास्त्रसंकरवात्सर्वेषुकं लोकेऽपिमहाराजसमर्पणादौभोगोवाकालनाशोवा संभवति भगवदीयानांकालनाशाभावात्भगवद्भोगेपुनस्तदीयत्वंवाप्रसादोवाभविष्यतीतिपूर्ववदेवज्ञानमार्गेभक्तिमार्गेवाग्रवेशोभविष्यतीति सुमङ्गलंच सदस्तुकं मार्गत्रयस्थाअपिभगवदीयाइतिभगवत्कीर्तिः अन्येषांतुतत्रप्रवेशाभावात् आहरणाद्वीप्सयाज्ञानमग्नं एवंसाक्षाद्भगवत्संबंधिनांभगवत्प्रवेशप्रकारमुक्त्वासाक्षात्संबंधरहितानामपितत्प्रवेशनेप्रकारमाहतृतीयेगतिव्याकृत्यर्थं तद्भक्तयतिभगवान् उदासीनोऽरिषड्वर्ग्येइति तद्भगवदीयिताभगवदीयाश्रितावापकत्व अन्येद्वितीयकोटाविनिर्देशोऽवतिततत्राह ॥ १७ ॥

किरातेति किरातादयस्तत्संज्ञकम्लिंचालिनोऽन्त्यजाः जातितःकार्यतश्चपुनः भक्तसमाश्रयणमात्रेणशुद्धाभवंतीति भक्ताइवभगवत्सेवा योग्याभवंति अन्येऽपिपापाःप्रायश्चित्तानधिकृताअपि एतेनविधिभागीगीताः अहंद्विजमध्येविबुधया भक्तद्वाराअपिमाहात्म्यात्प्रभविष्णुत्वं अपपरीवर्जमहतिद्वापनात्अपोपसर्गः अतिशयार्थेऽपिवर्तते व्याप्यर्थेवा परितहत्वर्थेवा तेनविश्वाधारत्वेनदुष्टानामपिदैत्यादीनांतदाश्रयत्वं निवारितं एवंस्वरूपतःप्रमाणतश्चसर्वसंदेहवारणंकृत्वाफलतःसाधनतश्चतस्याहात्म्याह ॥ १८ ॥

स्वपदेति तत्रप्रथमंसाधननिर्धारमाह प्रसीदतामिति साधनंभगवत्प्रसादएवफलंस्वपदभयोरेवविनिश्चयः तदाहभगवान्प्रसीदता मिति मन्यत्रसाधनंप्रसादोपक्षीणां लोकद्वारानुभवद्वाराचसर्वाणिशास्त्राणिप्रवृत्तानि वेदस्यापितत्परत्वेनार्थोनिरूप्यते तत्रअधिकारी प्रमाणंचसंतश्चप्रीतिहेतवः एतेष्वापाततःप्रोक्तास्तस्मात्संप्रार्थनंवरं संप्रार्थनहिसुमहान्साधनंफलमेवचा कायादिभिःकरोत्येवतस्मात्सा धननिश्चयः तत्राधिकारिणोत्रिविधाः येहिभगवत्प्रसादयोग्याः तेह्यात्मवंतः आत्मशब्देनहिअंतःकरणंआत्माच तत्रतेषामात्मत्वेनायंप्रकाशते येपुनरंतःकरणवंतः यथासुखमंतःकरणंकर्तुसंभवंति तेषामधीश्वरः स्वामी अंतःकरणप्रेरकोवा स्वसेवांवाकारयति तथोक्तंवाकरोतीति प्रमाणंचत्रिविधं श्रुतिस्मृतिपुराणाख्यं तत्रप्राधान्येनवेदइति तेनापियद्यःप्रतिपादितइति यद्यप्रतिपादकत्वेनत्रयीप्रमाणं स्मृतीनांतुधर्मप्रति पादकत्वेन तत्रार्थस्यैवप्राधान्यात्धर्मप्रयोगः पुराणांतुतपःप्रतिपादकं यावंतिहिफलानिनिरूपयतितपसैवतानिनिरूपयति तन्नित्यरूपोऽपिभग वानेव अर्थतत्स्वरूपतश्च ततःकिमधिकारेणाकिंवाप्रमाणेन उभयोरपिफलकोटावेवप्रवेशात् सतामाश्रयणेऽपितथा यतः अजशंकरादिभिरपि वितर्क्यमेवलिंगंयस्य सतांहिपराकाष्ठाब्रह्मावामहादेवोवा तच्छिष्यास्तत्पुत्राअन्येतैरपिविशेषेणातर्क्यमेवलिंगंयस्य नत्विदमिष्टतयाहेयं तर्किंतर्हिभवतिनभवतिच तेऽपिस्वस्यमाहात्म्यमेवदृष्ट्वाभगवत्कृपयातत्रनितामितिभगवत्साक्षात्कारेणाचतत्स्वरूपप्रसादयोर्निर्णयंकल्पयंति एतादृशोहिभगवान्एवंप्रसन्नोभवतीति तत्रप्रमाणेनानाप्रकारेणनिरूपणात्लोकतश्चतथाप्रतीतेः नतावन्मात्रतेतिनिश्चीयते तेतुशब्दात्प्रत्य क्षलीयइतिविशेषेणातर्कयंति तस्मादेवमवगम्यतेभगवानेवप्रसादंप्रार्थनीयः नान्यज्ञान्योपि तस्मात्प्रार्थनायांसंभवत्यांनान्यत्कर्त्तव्यमिति सिद्धं यदिप्रार्थनायांभगवान्क्रुध्येत् लोकेहिअनधिकारिप्रार्थयतांक्रोधमुत्पादयति यद्यपिप्रसादस्यसाधारण्यात्अन्यस्यप्रार्थितत्वात्क्रोधो नसंभवति तथापिसामान्येऽप्यनधिकारिणंप्रतितद्भवत्येव अतस्तन्निरासायार्थप्रार्थनायोग्यंरूपमाह ॥ १९ ॥

श्रियःपतिरिति पतिःप्रार्थनीयइत्यविवादंकुध्यतुमावातद्येपांपतिःतैःप्रार्थनीयः तत्रप्रथमंपद्मिधानांपतित्वंनिरूपयति प्रथमंभगवान्लक्ष्मी पतिः ततोलक्ष्म्यंशैःस्त्रीभिः प्रार्थितोनक्रुध्यति अनेनस्नेहमार्गानुवर्त्तिभिरन्यैरपिप्रार्थितोनक्रुध्यति एवंयज्ञपतिः यज्ञपुरुषैःप्रार्थितोनक्रुध्यति अतएवयेयत्कामयतेइति बहुधावचनंभगत्पतित्वज्ञापकं किंच प्रजापतिः येकेचल्लौकिकाःप्रजामात्ररूपाः प्रकर्षेणजातावा तेषांपतिः सा धारणैरपिप्राप्यं अल्पविशेषैरपि किंच धियांपतिः येकेचित्कामंपिबुद्धिजानंतिक्रियायांज्ञानेवा शब्दार्थतोवा तैरपिप्रार्थनीयः किंच लोक पतिः स्वर्गादिलोकानांपतिः अतस्तद्भक्तैरपिप्रार्थनीयःततोधरायाश्चपतिःअतोभूमिस्थैरपिप्रार्थनीयःस्त्रीभिश्चयाहिकैलोक्यबुद्धिमद्भिस्थितैःकश्चि असाधनैरपिह्येतैःप्रार्थनीयोहरिःपतिः किंच अंधकवृष्णिसात्वतांपतिर्गतिश्च पूर्वंभवत्प्रार्थनायोग्यतानिरूपिता इदानींफलमुक्ततानिरूप्यते पतिःफलं गतिःस्वनिष्ठसाधनं तच्चत्फलंस्वनिष्ठत्वेसतिसाधनतांभजेत तदाफलोपभोगोभवति नहिस्वसुखंदुरस्थं असाधनंवास्वसंत्रोवातस्यां क्रियायांहेतुर्भवति तद्भगवान्यादवैःप्रार्थितःपतिःसन्तेषांक्रियारूपोऽपिजातः अतोअनेनयावत्कर्मशक्यतेतावत्तेषांभवति अतःफलमुक्तपति त्वमत्रसिद्धमितिक्रोधसंभावनाऽपिदूरे चकाराक्रियासाध्यरूपञ्च त्रिविधादियादवागीताः तामसराजससात्विकपुरुषभजनीयत्वंनिरूप यितुं किंच यत्रगुणव्यतिरेपिभगवान्प्राप्यतेप्रार्थ्यतेच तत्रास्मदादीनांकाचिंतेतिप्रसीदतांमहत्याह महाप्रसीदतामिति किंच सतामयंपतिः येभगवत्येवसंतिगुणेषुप्रविष्टाः गुणद्वाराभगवदाश्रयाःतेषांतुपतिरेव अन्यान्प्रत्यौपचारिकंपतित्वं युक्त्याशास्त्रेणचसतामेवपतिः अतोऽपि महाप्रसीदतामितिभावः ननुभगवद्गुणेषुपृष्ठेषुतत्कथनपरित्यज्यभगवत्प्रार्थनाकुत्रोपयुज्यते तत्राह ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किं बहुना भक्तिं विना महात्मानोऽपि विफलसाधना विगीता एव भवन्तीत्याह । तपस्विनः ज्ञानिनः । दानपराः कर्म्मिणः । यशस्विनः कर्म्मविशेषाः अश्वमेधादिकर्त्तारः । मनस्विनः योगिनः । मन्त्रविदः आगमीयाः । सुमङ्गलाः सदाचाराः । सुभद्रश्रवसे इति । अस्यादृ ष्टैश्वर्यादेः प्राधान्यज्ञापनाय ॥ १७ ॥

अकिंचनस्यापि केवलेन युक्ताश्चेत् पापात्मानो विगीता अपि कृतार्था भवन्तीत्याह । किरातादयो ये जातित एव पापाः अन्ये च ये कर्म्मत एव पापाः ते च शुध्यन्ति । यद्यपाश्रया वैष्णवा एव गुरुत्वेनाश्रयाः येषां ते तथाभूताः सन्तः इति सद्गुरुचरणाश्रयमात्रेणैव आजिकर्मेऽपां सकाशात् पापिनः शुध्यन्तीति प्रारब्धाप्रारब्धपापनाशकत्वं भक्तेर्व्यञ्जितम् । तथाहि किरातादीनामशुद्धौ दुर्जातिरेवकारणम दुर्जातिरारब्धभक्तं यत् पापं तत्प्रारब्धमेव । शुध्यन्तीति शुद्धस्वभावानुपपत्त्या दुर्जातित्वनाशे दुर्जातित्वस्य नाशान्यथाऽनुपपत्त्या च प्रारब्धपाप नाशेऽपितत्सङ्गत एव । तथापि ते तज्जातित्वेन यद्यदाचरन्ति तत् व्यवहारत एव, न तु तत् परमार्थत इति ज्ञेयम् । अकर्म्यैविष्णौ शिक्षागीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिः इति तेषु जात्यादिबुद्धेर्निषेधात् । तथाच तादृशदुर्जातीयेऽपि भक्तिमुपदेष्टुमेव इति विधिश्च प्राप्तः । श्रूयते चैका-

यदङ्घ्रिध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत् कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम् ॥ २१ ॥
प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ।
स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥
भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्म्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्टाखिलसिद्धवत्तमः मे ॥ २३ ॥
नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥ २४ ॥
एतदेवात्मभू राजन् नारदाय विपृच्छते ।
वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मनः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं नाम
चतुर्थोऽध्याय ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

दशे—श्रियः शूद्रादयश्चापि तेऽनुकम्प्या भवादृशाम् इत्यत्रादिपदेन दुर्जातय एव लक्ष्यन्ते । अत्रासम्भावनादिसर्व्वाक्षेपपरिहारार्थमाह प्रभविष्णवे इति । एषाप्येका भगवतः प्रभुता स्वाभाविकी नात्र युक्तियोजनीयेति भावः ॥ १८ ॥

एवं श्लोकद्वयेन व्यतिरेकान्वयाभ्यां भक्तिमतामेव सर्व्वोत्कर्षमभिव्यज्य परेषामप्ययमेव प्रतिलाभार्थसिद्धये उपास्य इत्याह । सः प्रसिद्धःएषः अधीश्वरः आत्मवतां ज्ञानिनां योगिनाञ्च आत्मा आत्मत्वेनोपास्यः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वम् । न च कैरप्येष ज्ञातुं शक्य इत्याह । गतव्यलीकैः निष्कपटैः वितर्कयेव न तु निश्चयेन ज्ञातुं शक्यं लिङ्गं लक्षणमपि किमुत लिङ्गगर्भं स्वरूपं यस्य सः । सकपटानामात्मवादिनां का वार्त्तेति भावः ॥ १९ ॥

सर्व्वपालकत्वमाह श्रिय इति । तत्रापि विशेषमाह पतिः गतिश्च प्राप्यश्च अप्रकटप्रकाशे सः यादवरूपत्वेनेत्यर्थः ॥ २० ॥

श्रीमच्चक्रवर्त्तिकृत सिद्धांतप्रदीपः ।

तपःस्विनः कृच्छ्रादितपोनिष्ठाः दानपरायज्ञादिमिषेणासर्वस्वत्यागिनः यशस्विनः यशोऽर्थेशुभकारिणः मनस्विनः निर्जितकरणाः मंत्रविदः मंत्रार्थज्ञानपूर्वकतज्जपपराः सुमंगलाः सदाचारपराः । यद्यस्मिन् तप आद्यर्पणाविनाक्षेमंतपआदेः फलंनविंदंतिनप्राप्नुवंति॥१७॥

यस्यांपाश्रयाः भागवतास्तदाश्रयाः सन्तः किरातादयोयेपापाः पापजातयः अन्येचयेकर्मतः पापास्तेशुद्ध्यंति तस्मैप्रभविष्णवे प्रभवनशीलायनमः ॥ १८ ॥

सएषअधीश्वरः एषसर्वेश्वरः प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादिश्रुतिप्रसिद्धः भगवान् प्रसीदताम् कथंभूतः गतव्यलीकैर्गतदोषैः ब्रह्मशिवादिभिः वितर्क्य उपासनार्थंलिंगंचिन्हंयस्यसः एतदग्रेस्फुटीभविष्यति पुनः कथंभूतः त्रयीमयः तपोमयश्च केवलाश्रमधर्मरूपाद्यः तत्तदाश्रमधर्मफलदइत्यर्थः तत्रत्रयीमयइत्यनेनत्रयीप्रोक्ताग्निहोत्रादिगृहस्थधर्मेण धर्ममयइत्यनेनब्रह्मचारिधर्मेण तपोमयइत्यनेनाश्रमद्वयधर्मेण्यतपः प्रधानत्वात्तेनच आराध्यः तेषुयेज्ञानभक्तिसम्पन्नास्तान् प्रतिविशेषमाह आत्मात्मवतामिति आत्माश्रीभगवानुपास्यतयाविद्यतेयेषां तेषां महतामाद्या आश्रयः ॥ १९ ॥

पतिः पालकः गतिः सर्वापत्सुरक्षकः ॥ २० ॥

भाषा टीका ।

तपस्वी दानपर यशस्वी मनस्वी मंत्रवाले सुमंगल ये सब जिनके अर्पणविना क्षेमको नहीं प्राप्त होतेहैं उन सुमङ्गलका भगवान् को नमोनमः ॥ १७ ॥

किरात हूण अन्ध पुलिंद पुक्कस आभीर कंक यवन खस और सभी पापजाति सब जिनके भक्तों के आश्रय से शुद्ध होजाते हैं उन प्रभविष्णु भगवान को नमस्कार है ॥ १८ ॥

वह आत्मज्ञानियों का आत्मा अधीश्वर त्रयीमय धर्ममय तपोमय और गतव्यलीक (निष्कपट) अज, शंकर, आदि देवता के वितर्क्य लिंग भगवान प्रसन्न होवें ॥ १९ ॥

श्रियःपति यज्ञपति प्रजापति धृतिके पति लोकपति धरापति अन्धक वृष्णि और सात्वतों के पति और गति सब पूरवों के पति भगवान हमपर प्रसन्न होय ॥ २० ॥

श्रीवंशगोपिकृत भागवतदीपिका ।

[illegible] अथ स्वस्वमुखेनाह यदिति द्वाभ्याम् । यस्याङ्घ्रियोरभिध्यानमेव समाधिस्तेन धौतया शोधितया । यथावत् तत्त्वमुसारेण सगुणनिर्गुणादिभेदैः यद्वा तत्त्व तत्त्वप्रतिभा यथामतीत्यर्थः ॥ २१ ॥

किञ्च पुरा कल्प दौ अजस्य हृदि सती मूर्तिविषयं स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता स्मात् लक्षणानि शिक्षाशुक्लानि यस्याः सा । ऋषीणां ज्ञानप्रदानाम् ऋषभः श्रेष्ठः ॥ २२ ॥

इदानीं भगवतः श्रीमुखनाशाहार्दानं मृत्युरक्षणाद्विशेषां प्रार्थयते भूतैरिति । स मे, वचांसि अलङ्कुर्वीष्ट अलङ्करोतु । अन्यत्र यच सामान्येनालङ्कारासम्भवमाशङ्क्य तस्यान्तर्यामितामाविष्करोति । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमुषु पूर्षु अन्तर्यामितया शेते वसति । अत्र पुरुषसमाख्यां प्रमाणयति यत् यस्मात् पूरुष इति । अतएव यः एकादशेन्द्रियपञ्चमहाभूतरूपाणि षोडश गुणाम् कलाः भुक्ते प्रकाशयति पालयतीति वा । तद्वा त्वात्मनेपदमार्षम् । तत्र हेतुः यतः षोडशानामात्मा चेतयिता कार्ये कः । न त्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् ॥ २३ ॥

श्रीव्यासं नमस्करोति नम इति । सौम्याः भक्ताः । यस्य मुखाम्बुरुहे आसक्तो मकरन्दस्तम् ॥ २४ ॥

इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति यदादि । उत्पत्तिसमय एव वेदा गर्भे यस्य । साक्षात् हरिर्यदाह ॥ २५ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तात्पर्यिणी ।

[नमस्तस्मै इति ॥ भगवते अतीतानागतादिज्ञानवते । तथाच विष्णुपुराणम्—उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ वासुदेवावतारत्वात् वासुदेवः तस्मै । यद्वा वसुदेवं शुद्धसत्त्वं नवूयांगात् वासुदेवः तं ह्यधमाने वेति टण् । इति व्याख्यालेशः ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

ज्ञानप्रदत्वेनस्तवांपतित्वमेवव्यक्तीकुर्वन्तत्प्रसादंप्रार्थयति यदित्यादिद्वाभ्यां यस्याङ्घ्रेरभिध्यानमेवसमाधिस्तेनधौतयाशोधितयाधिय आत्मनः तत्त्वंयाथात्म्यंकवयः स्वयंपश्यतिजानाति अन्येभ्यश्चयथारुचंयथामतिरुक्तप्रतिभावदंतिचउपदिशंतिचेत्यर्थः सभगवान्मुकुंदोमेमह्य प्रसीदताम् ॥ २१ ॥

किंचप्रचोदितेति पुराकल्पादौअजस्यब्रह्मणः हृदिस्मृतिंसृष्टिविषयांस्मृतिंवितन्वताविस्तारयता येनपरमात्मनाप्रचोदितासंचोदिता सरस्वतीत्रयीरूपास्वलक्षणास्वरविशेषादिस्वसाधारणाचिह्नवतीआस्यतःमुखतःप्रादुरभूत्प्रादुर्भूतवतीसप्रचोदयिताऋषीणांज्ञानप्रदानांऋष भः श्रेष्ठःमेप्रसीदताम् ॥ २२ ॥

इदानींभगवानेवस्ववाचांप्रतिपाद्यःस्यादितिप्रार्थयते भूतैरिति सभगवान्मेवचांसिअलंकुर्वीष्टालंकरोतुप्रतिपाद्यःस्यादित्यर्थः वाचांभग वत्प्रतिपादनमेवमहालंकारः यथोक्तंतद्वाग्विसर्गोजनताघविप्लवइत्यादि ननुभवतोवार्यमाणानानानार्थशब्दानांकथंसएवप्रतिपाद्यःस्यादि त्यतआह महद्भिर्भूतैर्महदादिपृथिव्यंतैर्भूतैरिमाःपुरःपुराणिशरीराणिनिर्मायविभुःस्वयंतत्तच्छरीरांतर्व्यापकस्वभावःअमूष्वनुपुर्वीषुशेते अत एवपुरुषः पुरिशयनात्पुरुषशब्दवाच्यःअवतिष्ठतेनकेवलंशेतेकिंतुलीलारसमप्यनुभवतीत्याह षोडशगुणान्शब्दादिविषयांश्च पंचबाह्यादि व्यापारान् प्राणादिवायुवृत्तीःपंच एकंमनसोगुणंसंकल्पादि एतान्षोडशगुणान्स्वयंषोडशात्मकः एकादशेंद्रियपंचभूतात्मभूतः भुंक्तेलीला रसमनुभवतीत्यर्थः जीवांतर्यामित्वेनगुणान्गृह्णतोभगवतागुणग्रहणंलीलारसः जीवस्यतुकर्मायत्तभोगइतिभावः एवंचेदृशानामरूपा णांपरमात्मपर्यंतस्था अतस्मसर्वंचचसांप्रतिष्ठायत्रशाश्वतीतिन्यायेनमद्वचसांसएवविषयःस्यादितियुक्ताप्रार्थना ॥ २३ ॥

एवंभगवंतंनमस्कृत्यात्मगुरुंपितरंचव्यासंनमस्करोति एतदेवेति व्यासस्यापिवासुदेवावतारत्वाद्वासुदेवायेत्युक्तिः वेधसेसर्वज्ञायसौ व्यास्तच्छिष्यायज्ञानमर्थयन्मुखांबुरुहासक्तंयन्मुखांभोजेयोमकरंदःतंपपुःतस्मैनमहत्यन्वयः ॥ २४ ॥

• एवंगुरुदेवतेनमस्कृत्यप्रकृतप्रश्नस्योत्तरमवतारयितुंतस्यसांप्रदायिकत्वसूचनायनारदहरिसंवादयति एतद्धीति यथायतपृष्टमेतदेवानुपृच्छतेनारदायवेदःयस्यगर्भः अंतः स्थः सर्वेवेदगर्भः चतुर्मुखः अभ्यधात् किमित्यतआहहरिर्भगवानात्मनःस्वस्मै यदाह भगवांश्चतुर्मुखायवदाह सचनारदायतदेवाहतदेवाहंभवतेऽभ्यधास्यामीत्यभिप्रायः ॥ २५ ॥

इतिश्रीमद्भागवतद्वितीयस्कन्धे वीरराघवकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

उक्तार्थेजातसंदेहंप्रमाणकंकथंयथाचातुशक्यमितितत्राह यदंघ्रीति कात्स्न्येनानिवृत्तविषयसंस्कारस्मरणमभिध्यानंनिवृत्तविषयसंस्क रोऽसंप्रज्ञाताख्यःसमाधिः यदंघ्रिविषयाभ्यांधौतयानिर्णीकाविशुद्धाकाममलयाधियाआत्मनःपरमात्मनस्तत्त्वमनुपश्यंतिहियस्माच स्मात्तद्दर्शनप्रमाणं ॥ ब्रह्मचर्यया रुचंयथारुचिशिष्यादिभ्यस्तत्तत्त्वंवदंतिचेत्यतस्तदुपदेशशास्त्रयोगाद्वातुंशक्यमित्यर्थः ॥ २१ ॥

प्रश्नप्रत्ये सरस्वतीचतुर्मुखाद्विप्रसादमभीप्सुसाधनंभवतीत्यभिप्रायेणाह प्रचोदितेति पुरासर्गादौअजस्याऽऽपरब्रह्मणोजातस्यचतुर्मु खस्यहृदिसतींसर्वंचेतनेभ्यउत्तमांस्थितिंसनिषमलक्षणांवितन्वतासंस्कारोद्बोधद्वारेणाविस्तारयतायेनभगवताप्रचोदितामेरितास्वलक्षणाख्य रूपभूतानित्यस्वावयलक्षणाख्यरूपानित्यांचकमङ्गनाख्यलक्षणावा सरस्वती वाग्ऋगादिवेदरूपातस्यास्यतआस्यचतुष्टयात्प्रादुरभूदाभ्यक्ष ऽभूत् चत्वारोनिर्गतावेदास्तद्यथाऋक्चतुष्टयादित्यादेश्च ऋषीणांब्रह्मज्ञानिनामृषभोज्ञानप्रदः परमयोगीश्वरीपतिर्नारायणोमेप्रसीदतां प्रसन्नो भवतिस्वभक्तेषु किलेत्यनेनसर्वेभ्यआदिसंवादंदर्शयति वार्तासैवादयोःकिलेतिस्मृतेश्च यद्वापुराणालक्षणप्रबंधेऽभिप्रेतेनाजस्यसमर्पितमहस्य परांशस्यहृदिसतींज्ञानोपदेशलक्षणांस्थितिंवितन्वतायेनव्यासेनप्रचोदितासंकलितास्वलक्षणास्वयोरथसर्गादिदशलक्षणासरस्वतीभागवत-

सुहिनाकृपावश्याऽऽस्यतः प्रादुरभूत् सञ्जघीणामृषभोऽत्रासोमेप्रसीदतामित्यन्वयः अजः पितामहेऽमादात्मेति प्रथमेऽस्मिन्नेवेऽध्याये पुरुषेणाग पुरेतिच छागेविष्णौहरेरजइत्यतोऽजस्यविष्णोः सर्तीस्थितिंवितन्वतादृक् लोकस्येतिशेषइतिवा ॥ २२ ॥

इदानींहृषीकेंद्रियादिप्रवर्तकंहरिंप्रसादयति मूर्तैरिति योविश्वंसृजेदद्भिर्व्योमैर्मूतैःपृथिव्यादिभिः पुरः शरीराणिनिर्माणादात्मपुरुषंजीवं तेइतियस्ततएवयःपुरुषःपुरिशयनयोगेनपुरुषनामा । "तस्येदमवशिष्टं"इतिश्रुतेःगोलकात्मकदेहव्याप्तस्वाद्वाषोडशात्मकएवाहङ्कारोद्भिन्नपंच भूतव्यापीषोडशगुणानूशब्दादिविषयसाधनमुंक्ते न दुःखानिसमगवान्मुक्तविषयपुरांस्याकंमुकामस्यमेवांस्वलंकुर्वीहस्वप्रीतिजनकानि कुर्यादित्यन्वयः ॥ २३ ॥

इदानींभक्त्यतिशयेनदेवकीनंदनैकदाक्षीकृत्यनमति नमइति सौम्याज्ञानसोमार्हाः ब्रह्मादयोज्ञानमयैज्ञानात्मकंयस्यहरेर्मुखांबुरुहादुत्पन्न मासयंमधुपपुस्तस्मैवेधसेकर्त्रेवासुदेवायभगवतेनमः सौम्या उक्तवादयोज्ञानमयंयन्मुखांभोरुहात्सवंपपुस्तस्मैवेधसेकंसायसुरद्विषे वासुदेवायशौरयेनमइतिवा सौम्यानारदादयोज्ञानमयंज्ञानप्रतिपादकं भागवतपुराणंनामयन्मुखांभोरुहात्सवंपपुस्तस्मैवेधसेचतुर्मुखायनमः कीदृशायत्रासुदेवायनारायणपुत्रत्वेनशौरेःपुत्रः शौरिरितिवत्सौम्याः व्यासादयस्तस्मैवेधसेविधिपुत्रायनारदायवासुदेवायवासुदेवभक्तायं सौम्यावैशंपायनादयः तस्मैवासुदेवायवासुदेवावतारायव्यासायनमःवेधसेभारताद्याख्यकर्त्रे ॥ २४ ॥

स्वाभीष्टदेवतानामप्रार्थयित्वासांप्रतंपरीक्षित्प्रश्नंप्रतिवक्तुमुपक्रमते एतदेवेति हरिरात्मनः स्वहृदयपुराणाहात्मभूःपरमात्मपुत्रो वेदगर्भोब्रह्मातदेतत्सर्वमितित्वत्प्रश्नप्रकारेणपृच्छतेनारदायाऽयधादित्यन्वयः अर्थऽव्ययासांनार्स्तीत्येवशब्दः एतदुक्तंभवति आहौनारदोमो नब्रह्मणाप्रोक्तं ब्रह्मणानारदाय नारदेनव्यासायव्यासेनमह्यंतदेतत्प्रश्नपरिहारत्वेनवक्ष्यामीति ॥ २५ ॥

इति श्रीमद्भागवतमहापुराणोद्वितीयस्कंधेविजयध्वजकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तादृशानुभवे कारणमुपन्यस्यन्नाह यदङ्घ्रीति । आत्मनः भगवतः तस्यं याथार्थ्यम् । अन्यदा तु कवयः पण्डितम्मन्या अपि यथा-कथञ्चिद्वदन्तीत्यर्थः । यद्वा तथाप्यनन्तमहिमत्वात् तेऽपि कवयो यथात्मप्रकाशमेव वदन्तीति ॥ २१ ॥

अथ तद्गानसामग्री मम स एवेत्याह । प्रचोदितेति द्वाभ्याम् ॥ २२ ॥ २३ ॥

नम इति श्लोकायां श्रीव्यासं नमस्करोतीति । पप्रच्छेत्यादिस्वारस्यात् । उत्तरवाक्येन तु चतुःश्लोकीवक्तारमित्यायाति ॥ २४ ॥

आत्मन इति आत्मानं ब्रह्माणं प्रतीत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

यदङ्घ्रियनुध्यानेति केवलंभगवत्प्रार्थनाव्यतिरेकेणापिअङ्घ्रियनुध्यानमात्रेणात्मप्रसादमाधौप्रक्षालनमात्रेणैवयःसर्वप्रमाद्यतीरपि रूपेणभवति तादृशमात्मतत्त्वंभगवत्स्वरूपयाथात्म्यंपश्यति बुद्धिःस्वभावतोवस्तुप्रकाशिका साक्षाच्चरणारविन्दविषयावरणा दुत्पन्नाऽपिनविष यंप्रकाशयति इंद्रियाणामावरणोनांत्पन्नत्वेविषयमात्रंबुद्ध्युत्पत्तौकारणात्वेनमृग्यते नतुयत्प्रकारिकाबुद्धिःतद्विशिष्टं रजनादिभ्रमानुपपत्तेः अतोविषयमात्रपुरस्कृत्यसामग्र्यंतत्रशास्त्रवस्तुनोयाथात्म्यंयथातथ्यंबाधोधयति तत्रशुद्धावस्तुनोयाथात्म्यंगृह्णाति अत्रभगवच्छास्त्रेसर्वेषां पदार्थानांनित्यत्वात्कारणत्वेनापितैरपिव्यक्तीकियते एकत्रपदार्थः नजातिव्यक्तिभिन्नेतकल्पना एकएवघटःअनेकधाभवति आविर्भवति तिरोभवतिच पदार्थानांसर्वेषांभगवत्त्वात् तथाशब्दानांनित्यतातुमर्यादैरेवाभियुक्तैःकात्यायनादिभिर्व्यवस्थापितेतिनास्माभिरत्रयत्नेननिरूप्यते नित्येशब्दार्थसंबंधइति नित्येशब्दे अर्थसंबंधइतिक्वचिच्चारणं आश्रयाभावेचजातिसंबंधयोःस्थितिकल्पनान्यंतप्राप्ताशास्त्रदृष्टस्यपदार्थस्वरूपस्या न्यथाकल्पनंनप्रामाणिकं बहुकल्पनापत्तिश्च अतएकैकएवबुद्धिःबहुधापरिमृज्यमानाशोधकद्रव्याणातारतम्येनमलनिराकरणाशास्त्रसिद्धं बहुधापरिमृज्यमानाशोधकद्रव्यसंयोगसंघर्षणेननिर्मलाभवतिदर्पणवत्तथाभगवच्चरणारविंदद्रव्यबुद्धौसंयोज्यसंघर्षणक्रियमाणेशुद्धिविशेष प्राप्नोति अंजनादिवत्तथाप्रसिद्धेःयथांजनविशेषेणोलूकसंयुक्ततोनिर्गतादृष्टिःदेवानामपिपश्यति तथात्रापितिनकाऽप्यनुपपत्तिः अन्यानुवस्तुनो याथात्म्यंनबोधयति दोषावृतत्वात् यद्यायथादोषनिवृत्तिःतथातथावस्तुयाथात्म्यस्फूर्तिः अतएवश्रुत्यासमृश्मोक्षादीनामुपयोगः विषय-तृष्णोनास्त्येव सुतरांभगवद्विषये आत्मविषयेच अपहतपाप्मत्वादितिश्रुतेः तु इति निश्चयेन अनुध्यानमात्मतत्परतयाचिंतनं तथाचिंतनेन नापितदात्मकताभवतीतिसमाधिः ननु योगसंबंधी किंच एतदात्मतत्त्वं कविभिर्मयेयाबुद्धिनिरूप्यते कविपदेनचउत्प्रेक्षासामर्थ्येनोपलक्षितं कदाचित्कथंचिदुत्प्रेक्षते यदतिचतथा असोमवाक्याल्लौकिकीतत्त्ववस्तुयाथात्म्यस्फूर्तिः किंच भगवान्मुकुंदःमोक्षदाता वस्तुयाथात्म्यस्फूर्तिः मोक्षांगं तत्त्वतश्चैवसंपद्यते यदाभगवान्मोक्षदातृत्वमिच्छति इच्छापुनःअग्रेअनुध्यानेनैवभविष्यतीति तस्माद्यःकश्चित्पुरुषकिंचिन्नइच्छतिमत्रभगवान्प्रार्थनीयः सकलतत्त्विदुष्यर्थं गुणाअपिह्यातएवबुद्धयः ज्ञानसाधनंचांघ्र्यनुध्यानं नकेवलंतावन्मात्रमेव किंतुप्रार्थनाऽपिहितं भगवतःस्वतंत्रत्वाज्ज्ञानमुध्यानमात्रेणातयाकर्तुमिच्छति अतआह प्रसीदतामिति। यद्यपिभागवतनिर्माणेविषयप्रकाशेप्रसादोऽनुत्पन्न एवतथाप्युत्पन्नदर्थंपुनर्भवेत् स्वस्यापिरसस्सिद्ध्यर्थं इदानींसामान्यतःप्रसादंप्रार्थयित्वाप्रकृतोपयोगिप्रसादंप्रार्थयिते अस्यप्रसादात्तत्त्वमाह ॥ २१ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

प्रश्नोदितायेति अवश्यंइंद्रियव्यापारेकर्त्तव्येभगवान्प्रार्थनीयः तत्रापिवाग्विषये तत्रापिभगवद्गुणप्रदार्थवाचके यतोब्रह्मणाऽपिपूर्वं भगवद्गुणानात्प्रार्थितोभगवान्तस्यब्रह्मणोहृदयंप्रविश्यस्वप्रकाशिकां वेदरूपांवाणीमाविर्भावयतीत्यागतम् अतोभगवद्गुणेषु वक्तव्येषु नित्यवाग्यथैवतद्भवतीति प्रकृते भगवत्प्रार्थनाआवश्यकी ननु योगेन पदार्थान् स्मृत्वातद्वाचकपदाना-मुपनिबंधनेसंभवति किंभगवद्ज्ञानेनेत्यतआह यस्याब्रह्मणः हृदिसतींस्मृतिंवितन्वतेति वाक्यार्थवाक्ययोःनित्यत्वेऽपिपूर्वमनुभूतेऽपिस्मरणा मावश्यकं स्मरणमात्रंचनप्रमाणमितिस्मृतपदार्थानुभवसहितामापेक्षिता योगवद्भगवद्ज्ञानस्यापिप्रत्यासत्तित्वात् अतोऽन्तःकरणप्रथमस र्गेभगवदनुभवसहितांस्मृतिंपूर्वानुभूतांभगवदीयानांपदार्थानांनिर्माणप्रक्रियेणभगवत्प्रेरितेनअतर्वेदप्रादुर्भावात्पुनर्भगवत्प्रेरितावाणी आस्यतोनिर्गता नहिभगवद्वार्तायास्तोवद्निर्गंतुंशक्नोति इयमपिवार्त्तावक्तुमयुक्तेत्याशंक्यकिलेत्याह स्वस्यलक्षणमिवलक्षणंयस्या नित्यत्व ब्रह्मशब्दवाच्यानेतत्वाद्रूपं अथवा स्वयमेवलक्षणंयस्याः वेदानामिदमेवासाधारणंचिह्नंयद्भगवानेववाच्यइति अतःपूर्वानुभूतस्मरणेतद्वा गनिर्गमेऽपिसर्वेंद्रियप्रेरकोभगवान्प्रसीदतां एवंशब्दानांभगवद्धर्मानत्वेनतत्प्रत्यायनेभगवत्प्रार्थनायुक्ताअर्थोऽपिभगवद्वर्णनइतिअस्मन्मुख निर्गतायांवाण्यिभगवान्पतिरलंकरणरूपेणाविशतामितिप्रार्थयते ॥ २२ ॥

भूतैर्महद्भिरिति स्थानिभोगश्चसर्वत्रभगवत्कर्तृकोयतः अतोवाचिस्थितःकृष्णःतांभुक्तामितिकामना यद्यपिविराट्पुरुषएवतथाप्रक्रिया सर्वत्रप्रसिद्धा तथापिपुरुषत्वाविशेषात्स्वस्यभगवत्त्वंभगवतैवसाधितमितिज्ञापनार्थंभगवतएवेदंशरीरंमितिअभिमानाभावार्थंवाव्यष्टिष्वपिस मष्टियत्प्राकट्यायाह भूतैर्महद्भिःपंचमहाभूतैःस्वनिर्मितैरेवइमाःदेवादियद्यन्मनुष्यादिरूपा अमूःपुरःपुरुषस्यमेवशेते अन्यथास्वस्यपुरुषत्वमेवनस्यात् पुरिशेतइतिव्युत्पत्त्याहियः इदंहिशयनंनेत्रद्वारूपं किंतुसंभोगार्थमिव अतएवदक्षिणेऽक्षिण्डः इतरत्रद्वाणिव्युपास्यानमेतत्परमेवभवति अत्र चसुप्त्यानकेवलंस्पर्शमात्रमुपभुंक्तेकिंतुयोऽशापिगुणान् भोगेऽपिपाण्डशात्मकोभूत्वाभुंक्तेजडंशुष्केरसाभावात् भगवान्हिव्यापक आनंदम यश्च तत्रस्वरूपेणैवस्वरूपानुभवेतथारसानभवति स्त्रीपुरुषाद्यवयवेषुतथोपलंभात् अतःस्वस्थितरसाविर्भावेनस्पष्टभोगार्थंभेदरूपमात्मानंवि-भाव्यतस्मिन्स्वस्मिन्प्रविष्टेष्वनुप्राविशन्सन्अन्योऽन्यस्यरसमनुभवति देहधारणाप्रयत्नेनभोग्यसंगोभविष्यतीतियुक्तंयतथाभुक्ते यद्यपि विषयाःपंच तथापिस्वत्वएवस्थानविशेषेसुखविशेषजननात्इंद्रियपुरःसरंरागयोविषयसंभवतयानिर्दिष्टइतिपाण्डशत्वं यत्रेंद्रियाणांगौणत्वं तत्रविषयप्राधान्यं भोगेकचिदिंद्रियाणामप्राधान्येकचिदिंद्रियाणामेवप्राधान्यं महाराजशरीरवत् अतउभयविवक्षयापाण्डशेतिवचनं एवंभगव न्माहात्म्यंसर्वत्रपूर्णमेवज्ञातंभवति अलंकृषीष्टामेवचांसिअलंकरोतु छांदसोदीर्घः नन्वेवंनानात्वमापन्नःकथमलंकारार्थंप्रार्थ्यते तत्राह भगवा निति बहुवचनंसप्तार्थाभिप्रायमेइत्यन्यत्रसप्तार्थाभावोद्योतितः भागवतएवसप्तार्थायतः एवंप्रार्थनामुक्त्वास्वगुरुंव्यासंभगवंतंनमस्यति नमस्तस्मैभगवतइति वासुदेवइतिसर्वमोक्षदानार्थमेवभगवतोव्यासस्यावतारः शब्दरूपांसृष्टिकरोतीतिवेधसइतिमोक्षोपायकथनं व्यासनम स्कारस्त्वबोधयति पशुरिति ज्ञानमर्थंसर्ववस्तुयाथात्म्यज्ञानप्रकाशकंभारतादि सोम्यइतिशांत्याज्ञानानिष्ठयोग्यतासूचिता यस्यमुखमेवबंधुरं हंकमलंतत्रत्योमकरंदएवप्रपंचविस्मारकत्वात्आसवशब्देनोक्यते मोक्षस्यफलत्वात्वक्तुश्चभगवत्त्वात्मुखासवपदाभ्यांपानेच्छाप्रतिबंधेऽपिपा नेसूचितं कामनीमुखामोदेनयोपलंभात् तस्मात्सर्वेषांगुरुत्वाद्भगवत्वाच्चसभायामपिव्यासनमनयुक्तं एवंदेवतागुरुनमस्कारंकृत्वामहताप्रबं धेनतन्निरूपयितुंपूर्वप्रश्नउत्तरमाह ॥ २४ ॥

एतदेवेति यद्भवान्पृष्टवान् एतदेवनारदेनपृष्टः आत्मभूर्ब्रह्मा प्रमेयबलपृष्टः वेदागमैर्यस्येतिप्रमाणबलपृष्टोऽपि प्रमेयस्यप्रमाणात्येन विशिष्टबलपृष्टोपि यदाहहारीरात्मनइतिवाक्यात् तादृशमुखेनवतयोक्तंसंदेहनिवृत्तिर्भविष्यतीतिपूर्ववत्पुनःसंदेह प्रहताभावायस्वतोनि रूपणं पूर्वमेवकरणानांदोषतारतम्यस्यनिरूपितत्वात्नात्रपुनरुक्तिः साक्षादितिउभयविशेषणं आत्मनेब्रह्मणेति परंपरा कथनेनमध्यवक्तृदोषः प्रसज्येतअतएवस्वतः कथनमपिनिवारितं दोषाभावोऽपिप्रार्थनयाज्ञानेनचसूचितः अनेनउत्पत्त्यापत्त्याचविचारद्वयंवक्तव्यत्वेनप्रतिभातमिति सूचितम् ॥ २५ ॥

इति श्रीमद्भागवत सुबोधिन्यां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

स श्रीकृष्ण एव मे ज्ञान प्रदो भवत्विति प्रार्थना व्यज्यते । यदङ्घ्योरभिध्यानेन समाधिनंतु ततोऽन्यस्तेन शोधितया । चकारस्त्वर्थे । कवयस्तु स्वपाण्डित्यबलेनैव यथारुचंस्वस्वरुच्यनुसारेण एतत् परमात्मनस्तत्थं स्वरूपं साकारं निराकार वा जीवात्मस्वरूपम् अणु-प्रमाणं सर्वगतं वा, यद्वा एतत् विश्वं मिथ्यैव सत्यमेव नित्यमेवत्येवं वदन्ति युक्त्या प्रतिपादयन्ति न तु तेषां धीर्धैर्या अत आत्मन-स्तत्थं न पश्यन्ति ॥ २१ ॥

यथा ब्रह्मणो मुखादूवेदं प्रवर्त्तयामास तथा मन्मुखात् स्वलीलाकथां स एव प्रवर्त्तयत्वित्याशास्ते । येन प्रचोदिता प्रेरिता सरस्वती वेदरूपा अजस्य ब्रह्मणः आस्यतः प्रादुरभूत । येन कारुणेन पुरा कल्पादौ अजस्य तस्य हृदि सतीं स्मृतिं वितन्वता प्रकाशयता । सरस्वती कथम्भूता स्वं श्रीकृष्णं लक्षयति उपास्यत्वेन दर्शयतीति सा । यदुक्तं भगवतैव—मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्म्मो यस्यां मदात्मक इति ॥ २२ ॥

इदानीं मद्वचःसु स्वमृष्टेष्वेव स्वस्थित्यैव श्रोतृजनाकर्षिणीं शृङ्गारकरुणादिरसध्वनिं गुणालङ्कारशोभां करोतित्याशास्ते भूतैरिति । स मे वचांसि अलङ्कृषीष्ट तेषु स्वयं निवसन्नलङ्करोतु । यथा मनुष्यादिशरीराणि सृष्ट्वा तेषु स्वयं वसन्नेव तानि सफलां-करोतीत्याह । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पूर्षु अन्तर्यामितया शेते वसति । अत्र पुरुषसमाख्यां प्रमाणयति यत यस्मात् पूरुष इति । अतएव एकादशेन्द्रियपञ्चभूतरूपान् गुणान् भुङ्क्ते निर्लेप एव हृषीकैरास्वादयति । अत्र श्रेयसा मद्वचस्यामपि गुणानास्वादयन् प्रसीदत्विति भावः । षोढ़शानामात्मा चेतयिता स्वार्थे कः । तेन शरीराणि निरात्मकानि , वस्त्रालङ्कारादियुक्तान्यपि सद्भिरस्पृष्टयानि यथा तथा मद्वचांसि तद्विनाभूतानि मा भवन्त्विति भावः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

गुरुं श्रीव्यासं नमस्करोति । वासुदेवाय तदवतारायं । वेधसे शास्त्रकर्त्रे । यन्मुखवारुमकरन्दम् । यद्वा वासुदेवाय कृष्णाय । सौम्याः कृष्णकान्ताः । ज्ञानमयमिति नृत्यगीतवाद्यकलावैदग्ध्यरसालङ्कारादिज्ञानं सर्व्वतो विलक्षणमशिक्षितमपि यं पीत्वैव प्रापुर्वेद्यमपि तदनुगास्तत्तदाप्नुयामेवेति भाव इति रहस्यम् ॥ २४ ॥

इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति एतदिति । उत्पत्तिसमये एव वेदा मन्त्रे यस्य । साक्षात् हरिर्यदाह । आत्मनः आत्मानं प्रति ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यस्यांघ्र्यनुध्यानसमाधिधौतयाधियात्मनः पश्यति तत्त्वमात्मनः । भगवतस्तत्त्वयाथात्म्यैकवयः क्रांतदर्शिनः स्वयंपश्यंतिएतदेवस्वहृदयमात्मनस्तत्त्वं-शिष्येभ्यः यथारुचरुक्प्रतिभातामनांतऋग्यवदंति समृकुंदः ममह्यंप्रसीदताम् ॥ २१ ॥

पुराकल्पादौयेनअजस्यब्रह्मणः हृदिमतीपूर्ववत्सृष्टिविषयांस्मृतिविततन्यतासिस्तार्यतांप्रचोदितासरस्वतीवेदरूपावाणीस्वलक्षणाखा-निशिक्षादीनिलक्षणानियस्याः साआस्यतोमुखतः प्रादुरभूत्सऋषीणांमंत्रद्रष्टृणामृषभःश्रेष्ठःप्रसीदताम् ॥ २२ ॥

अथस्वभावतएवभगवद्गुणास्वरूपादिप्रतिपादनरूपपरमगुणायुक्तानांस्ववाचांश्रृंगारकरुणादिसौंदर्यप्रार्थयते भूतैरिति सार्द्धभुःसर्वत्रसर्व कर्तुसमर्थः मेवचांसि अलंकुर्वीष्ट अलंकरोतु धिभुत्वंप्रतिपादयति महद्भिर्भूतैः महदादिविशेषांतैः इमाःपुरःशरीराणिनिर्मायसृष्ट्वा अमूषुआ-सुपुरीषु अंतर्यामितयाशेतेयस्मात अतएवपुरीशयनात्पुरुषइति नचकेवलंशेतेकिंतुस्वान्यभक्तार्पितान् एकादशेंद्रियपंचभूतरूपान्गुणान्भुंक्ते अनुभवति यतः षोडशानामात्माअंतरात्मास्वार्थैकः अनेनभगवतः कर्मायत्तभोक्तृत्वंनास्तीतिसूचितम् ॥ २३ ॥

मुखाम्बुरुहयआसवंमुकरंदस्तंसौम्याःस्निग्धाः शिष्याःपपुः ॥ २४ ॥

हेराजन्पृच्छतेनारदायवेदागर्भेयस्यसः आत्मभूर्ब्रह्माअध्यधात् ननुतेनकुतोज्ञातमित्यतआह साक्षाद्यदाह हरिरा-त्मनइति ब्रह्मणेयद्धरिरध्यधाद्ब्रह्मानारदायतदहंतेऽभिधास्यामीतिभावः ॥ २५ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधये चतुर्थोध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

जिनके चरण कमलके ध्यानकी समाधि से धौत बुद्धिकेद्वारा भक्तजन आत्मतत्वका देखते है और कविजन इस तत्व का यथार्थ दर्शन करते हैं वह मुकुंद भगवान मुझपर प्रसन्न होंय ॥ २१ ॥

सृष्टि के पूर्व ब्रह्माजी को सतीस्मृति विस्तार करते हुए जिन भगवान ने हृदय मे प्रेरणाकी हुई सरस्वती स्वलक्षणा ब्रह्माजी के मुखसे प्रादुर्भाव हुईथी वह ऋषियों के ऋषभ भगवान प्रसन्नहों ॥ २२ ॥

जो भगवान महा भूतोंसे इन शरीरों को निर्माण कर विभू होकरभी पुरुष रूपसे इन पुरोंमें (शरीरोंमे) शयन करते हैं, और षोड शात्मक षोड़श गुणोंका भोग करते हैं वह भगवान मेरी वांणी को अलंकृत करें ॥ २३ ॥

उन ज्ञान मयव्यास स्वरूप भगवान वासुदेव को नमस्कार है कि जिनके मुख कमलसे निःसृत ज्ञानमय आसव को सौम्य ऋषियों ने पान किया है ॥ २४ ॥

हे राजन् पूछते नारदजी से आत्म भू वेद गर्भ ब्रह्माजी ने भी यही कहाथा जो साक्षात् आत्मा हरिने उनसे कहा है ॥ २५ ॥

द्वितीयस्कंधे चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः ।

नारद उवाच । देवदेव नमस्तेऽस्तु भूतभावन पूर्व्वज ।
तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥
यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ।
यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥
सर्व्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः ।
करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥
यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ।
एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थ दीपिका ।

पञ्चमे नारदेनाथ पृष्टः सृष्ट्यादि वक्तयजः ।
हरेर्लीलां विराट्सृष्टिं कालकर्म्मादिशक्तिभिः ॥ ० ॥

नारदाय विपृच्छते वेदगर्भोऽस्यधादित्युक्तम् । तत्र नारदप्रश्नमाह देवदेवेति । हे भूतभावन । अतएव सर्व्वेषां पूर्व्वज अनादे । ज्ञायते अनेनेति ज्ञानं तत्साधनं यत् तत् विजानीहि विशेषेण ज्ञापयेत्यर्थः । कथम्भूतम् आत्मतत्त्वं नितरां दृश्यते येन तत् ॥ १ ॥

उपलक्षणभूतं विश्वमेवात्मज्ञानसाधनम् अतस्तद्विशेषं पृच्छति । यद्रूपं येन रूप्यते प्रकाश्यते । यदधिष्ठानं यदाश्रयम् । यतः येन सृष्टम् । यत् संस्थं यस्मिन् लीयते यत्परं यदधीनम् । यच्चेति यदात्मकम् । स्वतः सत्कारणतो वेत्यर्थः । तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ १ ॥

न जानामीति न च वक्तव्यमित्याह सर्व्वमिति । भूतं जातम् । भव्यं जनिष्यमाणम् । भवत् जायमानम् । तेषां प्रभुर्यतः । अतो विज्ञानेन ज्ञानेनावसितं निश्चितम् ॥ ३ ॥

आस्तामिदम् आदौ तावत् त्वामेव कथय इत्याह । यतो विज्ञानं यस्य कस्तव विज्ञानद इत्यर्थः । यदाधारः कस्तवाश्रयः । यत्परो यदधीनः । यदात्मकः यत्स्वरूपः । तुम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन तु पराशङ्कया पृच्छामीत्याह सार्द्धश्लोकैः । एकः असहायः ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

० ॥ १—११ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

नारदायविपृच्छतेवेदगर्भोऽस्यधादित्युक्तंतत्रनारदप्रश्नमाह देवदेवेति हे देवदेवहेभूतभावनभूतस्रष्टः अतएव हे पूर्वजआत्मतत्वस्यनिदर्शनेनेतरांप्रकाशकंयद्ज्ञानंतद्विजानीहि अंतर्भावितण्यर्थः विशेषेणज्ञापयेत्यर्थः ॥ १ ॥

इदं कार्यं जगद्रूपं यस्यरूपंयदात्मकमित्यर्थः अयंनिमित्तप्रश्नः यतःसृष्टंयतउपादानभूतात्सृष्टंयदुपादानकमिति प्रश्नः यदधिष्ठानं यत्संस्थंयत्परमितिचबहुव्रीहिःयःआधारोयस्यतद्यदधिष्ठानंयदाधारकमित्याधारप्रश्नः यस्मिन्संस्थालयोयस्यतत्यत्संस्थंमयलयाधारप्रश्नः यत्परंयस्मात्परोविलक्षणःतद्यत्परंयदधीनमित्यर्थः यच्चयदप्यन्यद्यदुपकरणत्वादिकमास्तितत्तत्त्वंयाथात्म्यंतत्त्वतोवेद्यमित्यर्थः ॥ २ ॥

नजानामीतिनवक्तव्यंहत्याह सर्वमिति यत्पृष्टंतदेतत्सर्वंभवानेवजानाति कुतहत्यतआह भूतभव्यभवत्प्रभुः भूतभविष्यद्वर्तमानकालीनस्तम्बपर्यन्तवस्तुजातस्यप्रभुरुत्पादकः किंचतत्वत्वयावसितंनिश्चितंजगत्विज्ञानेनभगवत्प्रसादलब्धयज्ञानेनावसितंनिश्चितंकरस्थामलकवत् एवंजगद्विषयः प्रश्नःकृतः ॥ ३ ॥

आस्तांतावदिदंत्वामेवत्वंकथयेत्याह यद्विज्ञानइति यस्मिन्विषयेतवविज्ञानमस्तीतिसप्तमीबहुव्रीहिः यतोविज्ञानंयस्ययद्विज्ञानस्तवविज्ञानः कस्तिवा यदाधारःयआधारोयस्यसःकस्तवाश्रयः यत्परःयःवरोयस्यसःकस्तवस्वामीयदात्मकः यआत्मायस्यसः कस्त्वदात्मेत्यर्थः । ममंतुत्वमेवस्वतंत्रः परमेश्वरइतिभासितपश्चरणेनतुपरशंकयापृच्छामीत्याह सार्द्धश्लोकैः एकोऽसहायः आत्ममायया आत्मनः संकल्पेनभूतैः पृथिव्यादिभूतैर्भूतानिदेवादीनिभूतानिसृजसिरचयसीतिशेषः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

अस्मिन्नध्यायेवेदगर्भनारदाख्यायिकाकथनव्याजेनग्रंथादौप्रतिज्ञातंजगज्जन्मादिकारणत्वलक्षणंतदेकनिष्ठमितिसप्रपंचंप्रतिपाद्यते तत्रा दौनारदप्रश्नप्रकारमाह देवदेवेति यदज्ञानमात्मनःपरमात्मनस्तत्त्वंनिदर्शयतीत्यात्मतत्त्वनिदर्शनंतज्ज्ञानंमह्यंविज्ञापय आत्मब्रह्म णोस्तत्त्वज्ञानेमहान्विक्लेशोऽस्तीतिभेदस्यपरमेश्वरप्रसादमंतरेणवागादींद्रियप्रवृत्तिरपिविपरीताभयनीतितत्त्वातंत्र्यस्यब्रह्माकर्तोऽहंकरणमि तिकरस्यविक्षयाद्यत्यस्योक्तं जीवब्रह्मभेदोहरेःस्वातंत्र्यंनारदस्यकरणत्वमितित्रयंव्यत्ययार्थः तदुक्तंव्यत्ययोभेदस्वातंत्र्यकरणेष्विति॥ १ ॥

ज्ञेयंपृच्छति यद्रूपमिति इदंविश्वंयस्यरूपमिवरूपंनतुसाक्षाद्रूपंचिन्घनसत्त्वेनचसाहश्यात्तद्वशात्वाच तदुक्तं तद्वशत्वादिदंरूपंहरेर्नैवस्व रूपतइति योऽधिष्ठानंमूलाधारोयस्यतद्यदधिष्ठानंतत्वारोप्यमाणसर्पस्यरज्जुवद्यदधिष्ठानं अधिष्ठानमितिप्रोक्तंमूलाधारंविचक्षणैरिति हृदयतः सृष्टेःसंभूतं"यतोवाइमानिभूतानिजायंते"इतिश्रुतेः पीठवद्यस्मिन्संस्थासस्थानंयस्यतद्यत्संस्थं यस्मिंस्थितंहृदयंवस्तुसंस्थानंतद्वदीरितमितिच पूर्वपृथिवीवत् अत्रतुपीठवदितिविशेषाच्चपुनरुक्तिः यःपरोयस्माज्जगतस्तद्यत्परं हरिःपरोऽस्यजगतोह्यव्यक्तादेरधोक्षजस्तन्नशक्ति यस्मात्संस्था मृत्युःसंहारोयस्यतद्यत्संस्थं यतपरंपालनंयस्यतद्यत्परं येनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीतिवा यच्चयदधीनंच यदधीनायस्यसत्तातत्त दित्यत्रभगवतइति विभेदेविद्यमानेऽपिभिदेर्नित्यत्वरूपनइतिच तस्यहरेस्तत्त्वतत्त्वतोयथावद्वेदेत्यन्वयः ॥ २ ॥

ममवक्तव्यांशभवतोज्ञानसामग्रीविघटनइत्याह सर्वमिति हिशब्देन प्रजापतेनत्वहेतान्यन्यइत्यादिश्रुतिप्रसिद्धिद्योतयति सर्वमेतदिति प्रतिज्ञा भूतादिप्रभुरितिहेतुः हीतिव्याप्तिदर्शनं करतलामलकवदितिनिदर्शनविज्ञानेतिनिगमनम ॥ ३ ॥

नैतत्सामान्यज्ञानेकृतविशिष्टमेवहरिप्रसादायत्नत्वादिनिभावेनाह यद्विज्ञानइति यस्यप्रसादाद्विज्ञानेयस्यतनप्रसन्नंयद्विज्ञानः यआधारा यस्यसतथा यःपरोयस्मात्सतथा यश्चात्मास्वामीयस्यसयदात्मकः त्वंतेवेदेतिशेषः उक्तादर्थकंक्षातुंपूर्वपक्षंदर्शयति एकःसृजसीत्यादिना एकस्त्वमेवात्ममायययास्वेच्छयाभूतानिचराचराणिपृथिव्यादिपंचभूतैःसृजसि ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

० ॥ १—३ ॥

यद्विज्ञान इत्यादौ तं वेदेति शेषः । मम तु तत्तद्रूपत्वेन त्वं भासीत्याह एक इति । (अथास्तां इत्यादिटीकायां त्यामेव इत्यत्र आत्मानमेव कथयति तु वाच्यम् ।) ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

विमर्शःषड्भिरध्यायैःक्रियतेसद्विधामतः उत्पत्त्याद्योपपत्त्याचतत्राद्योऽपिद्विधामतः स्थूलांतर्यामिभेदेनमूर्त्तामूर्त्तविभेदतः स्थूलोऽपि द्विविधस्तत्रस्थूलमूर्त्तविमर्शोऽयं उत्पत्त्यध्यायः सोऽपपत्त्यानिरूपकः पुरुषःप्रकृतः प्रकृतिश्चैवंगुणभावादिकृत इत्युक्तानारदाजाश्चैवं त्वमिनैतिगद्यते एकीभूतेप्रवेशेननिर्गमादपिविह्वलः अथवादार्ढ्यैतार्किकेणनारदःपृच्छतिस्मपूर्वं प्रहसन्नयंनारदनिर्णयंतत्त्वनिर्णये आत्मनोऽन्य तश्चापिनिर्द्धारेभजनस्यच हृषीकेशःपत्त्येनप्रत्यक्षत्वेनसमर्हति॥ स्थूलरूपत्वेनेति स्थूलत्वेनस्थूलाधिराजोऽतमुख्यत्वाद्विविधनिर्णयेन स्थूललिंगविभेदोक्तेनाध्यायद्वयंमतं प्रथमस्योत्तरेणशातनंतर्यामिभेदे एवंपूर्वाध्यायेपरीक्षितुंकथांफलमुखेसाधनंनिरूप्यपूर्वोक्तस्य साधनस्यचविचारार्थंअध्यायषड्रारंभः तत्रपंचाध्यायेसाधनस्यस्थूलरूपस्यचउत्पत्त्यानिर्णयउच्यते तत्रप्रथमतत्त्वस्यदुर्ज्ञेयत्वंवदन्नुक्तकार विशिनष्टि देवदेवेति अयंनमस्कारःप्रश्नार्थः नारदोऽज्ञानार्थंप्रवृत्तःसंदेहनमस्कारेणकृतवानित्याशंक्याह हेदेवानांदेवअनेनहेजगतांगुरु रूपोभवानेवममेतिनपृथक्नमस्कारःकर्त्तव्यइतिसूचितं आरुरुक्षतिप्रार्थनाप्रमेयसमाप्तिपर्यंतमंगलानुवृत्त्यर्थं आत्मानमुपदेक्ष्यतीतिनिश्चयेनेति स्वप्रवृत्तौहेतुज्ञापकविशेषणमाह भूतभावनेति भूतानिभावयत्युत्पादयतीतिशोधयतिवा स्वयंवेदानुदरंविद्यामिरूपाद्विदेहयनस्मत्कानुजीवान् शुद्धान्कृत्वापश्चात्स्वकाश्रयतीतिशोधकत्वं पूर्वंजीवेहिपतः सदेहेपूर्वंजडपदवृत्तत्वेन कथंवास्मदोपेक्ष्यतामवानवपूर्वंमुत्पन्नाः अतःतत्त्वतःकोऽप्य स्यामहान्नास्तीतित्वमेवप्रपद्यइत्यर्थः एवंतेस्तुत्वाप्रपद्यमाह तद्विज्ञानीहीति तद्विरोधाकारेणत्वंजानीहि ज्ञापयवाज्ञानंकिमिति सर्वेहिदृष्टि ज्ञानंज्ञानमितितत्किज्ञानंआत्मावा आत्मसाक्षात्कारोवा भगवत्साक्षात्कारोवा श्रुतिसहितोवा प्रवेशहेतुर्वा भक्तिःजनकोवा परोक्षवा स्मृति रूपंवेति तत्रनिर्द्धारितंत्वयायत्तत्प्रत्यभित्यर्थः किंच यत्रात्मतत्त्वस्यविमर्शेविचारोभवति कतेनज्ञानेनंगद्वयमपिपृष्ट कआत्मा किंतत्त्वमिति तत्रापिलोकेप्रसिद्धंतन्नभवति किंतुविचारसाध्यमिति विचारोऽपिकर्त्तव्यइतिसूचितम् ॥ १ ॥

एवंचत्वारःप्रश्नाःसंपन्नाः किंच तत्त्वमेदानपृच्छामीत्याह यद्रूपमिति तत्त्वमनारोपितरूपंतत्सर्वस्यापिजगतोजन्यत्वात आत्मनोऽपिप्रा प्तंतत्वात्सर्वस्यैवारोपविषयत्वात् अतस्तस्यरूपंवक्तव्यं यद्रूपंस्वरूपंयस्य आरोपितत्वानारोपितत्वंहिसाधिष्ठानेभवतः अतःप्रधिष्ठानम पिवदेत्याह यदधिष्ठानमिति लोकेपिजगतस्तन्द्रव्यग्रहणात् तत्त्वानांचतत्त्वव्यग्रहणात्मूलतत्त्वाभावेतद्ग्रहइति जगतःकारणमपितत्त्ववद त्याह यतःसृष्टिरितिवादिविप्रतिपत्तेश्चकृतोजगज्जानमिति किंच यत्संस्थं यस्मिन्मूलेसंस्थास्थितिर्यस्य संस्थामृत्युर्वाविमर्शेशत्वेनजग तोवाप्रश्नः तदातत्त्वेप्रश्नद्वयं सृष्टिप्रश्नश्चतुर्थं उत्पत्तिस्थितिप्रलयाःस्वरूपंचेतिसंज्ञिपदया तस्यभावस्तत्त्वमिति भगवतोभावोजगद्वेव आत्मा तुतत् अथवासामान्यतस्तत्त्वंविचार्यते तेनैकमनेकंवाफलिष्यति यत्परमिति यःपरोनियंतायस्य अनेनाधिष्ठातृरूपा एकपक्षेतत्तत्त्वंकस्यपरं भूतमिति कोवातत्त्वस्यग्राहकइत्यर्थः रूपंहिद्विविधंप्रमाणतःस्वरूपतश्च तत्रयद्रूपमितिप्रमाणतःयच्चेतिस्वरूपतः तत्त्वस्यजगद्रूपत्वेभिन्नत्वे चापरेगानिपृष्टानि एतेषांभेदानांज्ञानंयथातत्त्वतोज्ञानंभवति तथावदेत्यर्थः ॥ २ ॥

यथात्मेजानासितथाज्ञानमस्माकंकुर्वित्यभिप्रायेणात्मस्वरूपज्ञतामाह सर्वेह्यतद्भवान्वेदेति अतीतानागतयोर्ज्ञानेनभविष्यतीतितस्यकालसा ध्यत्वात्कालरूपस्तस्मिंश्चयंनावाभवानेवेत्याह यथारहटघटितायांकेचनउद्गताःमज्जंतिउद्गच्छंतिच तथाकालेजगन्मज्जति ततउद्गच्छति ततोयः कालेबहिरपीतिपुनर्विशेषेणसर्वंजानाति यथाजलेबहिरपिस्थितः किंच यांगजधर्मेणापितत्वंसर्वंप्रत्यक्षमित्याह करामलकवदिति विज्ञानार्थंसिते विज्ञानेस्थैर्येनिश्चितमितिवा आधिक्षतमितिपाठेउत्तरकार्यार्थंसर्वमेवज्ञानेनिघोषितं करस्थितमामलकफलंप्रतिनकोऽपिसंदिग्धे ॥ ३ ॥

[illegible] तत्त्वविज्ञानदर्शनादनुभवैकैः विज्ञातमाधारकः [illegible]
[illegible] सृजसि त्वमेकोऽपञ्चभूतादिभेदैर्बहुधेमजुष्यान्
[illegible] ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

पञ्चमे नारदं प्राह तत्त्वानां सृष्टिमात्मभूः ।
तैर्विराजञ्च तत्पादावर्चैभूरादिकल्पनाम् ॥ ० ॥

भूतानि भावयन्ति कृजन्तीति भूतभावना मरीच्यादयः पूर्वजा अस्मदुत्पादनेन यस्मात् हे तथाभूत । आत्मनां परमात्मजीवात्मनो [illegible] तत्त्वज्ञापकं यद् ज्ञानं तत् विजानीहि विशेषेण जानासि लक्षयेत्यर्थः लोढ् विज्ञापयेति वा ॥ १ ॥

इदं विश्वं यद्रूपं यदस्य लक्षणं, यदधिष्ठानं योऽस्याश्रयः, यतः येन सृष्टं, यत्संस्थं यस्मिन् लीयते, यत्परं यस्याधीनं, यच्च यदात्मकं [illegible] यथार्थ्यं तत्त्वतो वद ॥ २ ॥

सर्वं परमात्मजीवात्मजगदिति त्रिकम् । भूतं पूर्वजातं प्राणिवृन्दम् । भव्यं जनिष्यमाणम् । भवत् जायमानम् । तेषां प्रभुर्यत [illegible] तो विशेषेण ज्ञानेनावसितमधगतं करस्थम् आमलकफलमिव ॥ ३ ॥

आस्तामिदम् आदौ तावत् त्वामेव त्वं वृहीत्याह । यद्विज्ञानः यतो विज्ञानं यस्य सः यस्तव विज्ञानप्रदः । यदाधारो यस्तवाश्रयः [illegible] परः यस्य त्वमधीनः । यदात्मकः यस्तवात्मा । मम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन पराशङ्कया पृच्छामी- [illegible] सार्द्धमृषिभिः । एकः असहायः ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

[illegible] श्रीब्रह्मोपदेशेऽवकुंठावत् श्रीनारदप्रश्नानाह देवदेवेति आत्मनस्तत्त्वस्यनिदर्शनम् प्रकाशकम् यद्ज्ञानंतद्विजानीहिविशेषतो [illegible] ज्ञापय अतश्चोचितमिजर्थः ॥ १ ॥

इदंविश्वंयद्रूपंयेनरूप्यतेप्रकाश्यतेयत्प्रकाश्यम् यदधिष्ठानम् यदाधारकम् यत्सृष्टंयेननिर्मितम् यस्मिन्संस्थालयो यस्यतत्संस्थम् ॥ [illegible] यदधीनम् यच्चयदात्मकम् तत्तत्त्वंतस्यतत्त्वमुक्तषट्प्रश्नप्रत्युत्तरद्वारायाथार्थ्यम् तत्त्वतोवदेतिषट्प्रश्नाः ॥ २ ॥

[illegible] मान्यमहत्त्वाह एतदस्मत्पृष्टंसर्वंभवान्वेद्ययतोभूतभविष्यद्वर्तमानानांप्रभुस्तन्निर्णयेक्षमः तत्रहेतुः करस्थामलकवद्विश्वंतवाधिगि [illegible] ज्ञानेनावसितंनिश्चितम् ॥ ३ ॥

किंच यतोविज्ञानंयस्यसयद्विज्ञानः कुतोविज्ञानवानसीत्यर्थः यस्माश्रयोयस्यसयदाश्रयः कस्तवाश्रयआधाररत्यर्थः यत्परःयदधीनः यदात्मकः यस्मात्मायस्यसयदात्मकः कस्त्वमात्मेत्यर्थः इतिचत्वारःप्रश्नाः महंतुस्त्वामेवपरमेश्वरंजानामि यतएकः असहायस्त्वमात्ममायया [illegible] भूतैः पंचभूतैर्भूतानिदेवमनुष्यादीनिसृजसि ॥ ४ ॥

भाषा टीका ।

नारद उवाच—हे देवदेव ! तुमको नमस्कार है । हे भूत भावन ! हे पूर्वज ! जो आत्मतत्त्व का निदर्शन ज्ञान है वह [illegible] को ॥ १ ॥

यह जगत् निरूपित होता है जो इसका अधिष्ठान है जिसने इसे सृजा है । जिसमें लय होता है जिसके आधीन है स्वरूपतः [illegible] को कुछ है अर्थात् यदात्मक है उसका तत्त्व यथार्थ रूप से कहिये ॥ २ ॥

[illegible] भूत भव्य भवत् के प्रभु हैं अतः यह सब (जो मैंने पूछा है) जानते हैं । आपने विज्ञान से इस विश्व को करामलकवत् [illegible] कर रखा है ॥ ३ ॥

[illegible] जिससे विज्ञान है जो आप का आधार है आप जिसके आधीन है और यदात्मक है आप अकेले ही अपनी माया से भूतों [illegible] आदिकों से] भूतों को [मनुष्य पशु पक्षियों को] सृजते हो ॥ ४ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

[illegible] भावयसे पालयसि स्वयमेव पराभवमप्राप्नुवन् । अक्रमः क्रमैरहितः । यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति [illegible] ॥ ५ ॥

[illegible] अस्मिन् विश्वस्मिन् परम उत्तमम् अपरम् अधमं सर्वं मध्यमञ्च तत्रापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणः शुक्ल- [illegible] कार्यं तत्रापि सदसत् स्थूले सूक्ष्मञ्च किञ्चिदपि अन्यतो न वेद । किन्तु त्वत्त एव सर्वं भवतीति मन्ये ॥ ६ ॥

[illegible] प्रश्नात् ततोऽवरमिति यद् तेन नोऽस्मान् वेदयसे मोहयसि । यतः पराशङ्काम् ईश्वरज्ञानराहित्यं प्रवक्ष्यसि ॥ ७ ॥ [illegible] स्वयानुपपत्तिः विस्मितः यद् पुत्रे पुत्रेण तथा विजानीहि विशेषेण ज्ञापय ॥ ८ ॥

आत्मन् भावयसे नेति न परानात्मनः क्वचित् ।
आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवक्षयः ॥ ५ ॥
नाहं वेद परं त्वस्मिन्नापरं न समं विभो ।
नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः ॥ ६ ॥
स भवानचरद्घोरं यत्तपः सुसमाहितः ।
तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ॥ ७ ॥
एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ।
विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

त्वानिमृष्टमिभूतान्यात्मन्नात्मनिस्वस्मिन्नित्यर्थः स्वयंनपराभावयन्स्वात्मानंपरिभवमप्रापयन् ममोषवांछत्यर्थः भावयसेपालयसि । ऊर्णनाभिः सूत्रनाभिः कीटविशेषस्तद्वदात्मानं शक्तिप्रकृतिं अवष्टभ्याक्रमभस्पृष्टश्रमःसृजसिपासिसंहरसीत्यर्थः ॥ ५ ॥

एतदेवोपपादयति नाहमिति अहंत्वस्मिन्कारणविषयेपरमुत्कृष्टमवरंनिकृष्टंसमंमध्यमंवेदानामद्विपदादिरूपशुक्लादिगुणैर्यान्यस्वस्वरूपाण्यात्मकंचेतनाचेतनात्मकंकिंचिदपिवस्त्वन्यतोनवेद किंतुस्वतएवजानातीत्यर्थः दृष्ट्वा अस्मिन्कार्यावस्थेनामरूपाभ्यांस्वादिगुणैश्चान्यान्यानिष्पादीचेतनाचेतनात्मकंकिंचिदपिवस्तुहृदमनेनसमंमिदंनिकृष्टमिहमुत्कृष्टमितिनजानातीत्यर्थः ॥ ६ ॥

यत्परस्त्वमित्यादिप्रश्नःकृतःप्रसक्तस्यत्राहसइति घोरंहतरैश्चर्तुमशक्यंमहत्तपःसमवान्जगत्सृष्ट्यवान् भगवानितिपाठान्तरेतदनुरुध्य मित्यर्थःअचरदाचरितकृतवान् तेनतपश्चरणेनकिमस्माद्विपरमस्तीतिशंकांप्रयच्छसितततत्त्वंखेदयसेपरशंकाप्रदानेनाचित्तविक्षेपकरोसीत्यर्थः ॥ ७ ॥

प्रश्नमुपसंहरति एतदिति हेसर्वज्ञसकलेश्वरत्वयाऽनुशासितःशिक्षितोऽहंइदंभवतोपदेक्ष्यमाणंयथैवबुध्येजानेतथैतत्त्वंपृच्छतोमेमहिहविशेषणाज्ञापय ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

कुलालादेःकालाद्यधिष्ठानंदृष्टं किमस्याधिष्ठानमत्राहआत्मन्निति अक्रमस्त्वंनानिभूतानिसूत्रनाभिरूर्णनाभिरिवात्मशक्तिंकिंचिज्ज्ञशक्तिं मवष्टभ्यात्मन्नात्मनिभावयसंउत्पादयसिपालयसिच पराक्रत्वस्तावद्दृनेभावयेः ॥ ५ ॥

भावयसेधर्षयसेचरतियत्तस्मादस्माद्धतोर्विश्वस्यपरमुत्तमकारणमहंनवेद अवरंहीनंसमंमध्यंचनवेद तुशब्देनोत्कार्थमवधारयति । निगमयतिनामेति नामत्वाचकेनरूपेणशुक्लादिनागुणैःसत्त्वादिभिःसतस्थूलमसत्सूक्ष्मंचकिंचिद्वस्तुयद्भाव्यमुत्पार्यंतत्त्वंतत्त्वतोनवेद गार्हतेनिर्हितं अतस्त्वमेवसर्वकारणमित्यर्थः ॥ ६ ॥

ज्ञाततत्त्वेनत्वयाप्रश्नःकिमितिकृतइतितत्कारणमाह सभवानितितपोऽचरदितियत्तेनहेतुनात्वंनोऽस्मान्खेदयसे त्वय्यनंशंकुर्विक्षेपसिस्वदितरकर्तृसद्भावेपरांशंकांचयच्छसीत्यन्वयः तस्मात्प्रश्नःकृतइतिभावः ॥ ७ ॥

एतन्मेपृच्छतःसर्वेसर्वज्ञसकलेश्वरेतिविशेषणत्रयमुक्तार्थस्थिरीकरणायोक्तं यथावुद्धेजानामितथेतिशेषः त्वदधीनायतःसर्वज्ञत्वादिकंतस्य पिकेशचेत्यनेनपूर्वपक्षोऽयमितिज्ञायते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

आत्मनि भावयसे न पराभावयसीति च स्वैरमधीक्ष्येऽपि सतीति शेषः । सूर्य्यादौ विद्यमाने दीपादेः परामवहेतोरभावात् उपादानकारणत्वमेव भवत आयाति । सूर्य्यादौ विद्यमाने रहस्यादस्तद्दर्शनादिति भावः ॥ ५ ॥

तदेवाह नाहमिति । तदेतत् तथोत्तरवाक्यञ्च तन्मुखेनैव अन्यान् शिक्षयितुमुक्तम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

त्वत्यसर्वंभवनसामर्थ्येनैवसर्वंसृजसि आत्मन्येवभावयसिपालयसि तान्येवस्वयंपराभावयन्नाशयन् अपराभावयतिविनाशयति प्रापयन् यस्मात्त्वमेवस्वशक्त्यैवजगदुत्पत्तिस्थितिनाशंकरोषीत्यर्थः आत्मानंवापराभवमप्रापयन्सृष्टिस्थितीकरोषीत्यर्थः दृष्टांतमाह अस्सहायकरूपदृष्टांतमाह आत्मशक्तिमिति स्वस्यैवसामर्थ्यमवलंब्यभाकाशगमनेपक्षिणइव ऊर्णनाभिःकीटविशेषः स्वरूपांशमुक्तोनिष्काश्यतेतंविहारस्थानंकृत्वाविहृत्यपुनर्गच्छति तथाऽपिदूरहितश्चभवति एवंभवानित्यर्थः ॥ ५ ॥

एतादृशंतवसामर्थ्यं स्वतएवपरतइति ममप्रतिरित्याह नाहंवेदेति अस्मिन्संसारेसर्वंत्वत्तएवभवतीत्यहंजाने परन्तु समंवामन्योऽन्यं एवंकरणसामर्थ्यमाह हेविभोइति किंच नामभेदाः कर्मजागत् गुणाःसाङ्ख्यादयः तैः सार्वज्ञ्यात् सर्वज्ञत्वात् कार्येकारणरूपकं वा किंचिदपिअन्यस्मात्पुरुषद्वयतिरिक्तान्नाभ्यभित्यहंजाने ॥ ६ ॥

[illegible]

यद्वह्म चेदितः [illegible]

ज्ञानृतं तव तत्रापि यथा मां प्रवदेयुषि मोः ।
अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ।
यथार्कोऽग्निर्यथा सोमो यद्वर्क्षग्रहतारकाः ॥ ११ ॥
तस्मै नमो भगवते वासुदेवाय धीमहि ।
यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

[illegible] सभवानत्वरहितो नहिस्वतंत्रः घोरंतपःकरोति [illegible] नभगवत्तपोव्युदासः नरनारायणादिभिः क्रियमाणोशांततपः [illegible] अतिसावधानः स्वाभाविकतपोव्युदासः तपोमेहृदयमितिवाक्यात्स्वज्ञानमर्थंतपइतिचस्वमायतएवभवतिनहिसः [illegible] करोति तेनह्यर्थेनैतस्मादन्योऽस्तिमहान् यमाराधयितुंतपःकरोमीति किंच तेनतपःकरणेनकर्मेणाज्ञानःअस्मान्खेदयसि [illegible] स्थितः अस्मत्सित्यत्रसर्वोत्तमइति तपस्त्रिक्रियमाणेतद्गच्छति परोऽन्योऽप्यस्तीत्याशंकाप्युत्पद्यते अतःखंदहः ॥ ७ ॥

[illegible] एतत्सर्वंकथयेत्याह एतन्मइति अत्रत्रयोदशप्रश्नामवंतिज्ञानप्रश्नः आत्मप्रश्नः तत्त्वप्रश्नाःषट् ब्रह्मविषय [illegible] ब्रह्मतिमत्रेति सर्वंविजानीहि विशेषेणाविचार्यवद बोधयका यथानुशासितःसन्नशिक्षितःसन्अहंमुह्यं सर्वज्ञत्वात्कथनसा- [illegible] स्वात्मद्रोधजननसामर्थ्यं प्रश्नमात्रेणानवद्देतितस्यभगवद्बोधनं अज्ञानादयंप्रश्नोनभवति किंतुयथापिताकथयेत्तदर्थं [illegible] प्रश्नइतिउपपत्तौवक्ष्यते अनेनप्रश्नोत्तरेअपिअत्रविचारमर्हतइतिज्ञापितं अहंयथावुच्यइतिवचनात्सर्वेषांपदार्थानांउत्पत्तिः [illegible] अन्यथाभगवताऽपत्तेरमुक्तत्वात्ब्रह्मापिनवदेत् अतोयथाधिकारंपदार्थावक्तव्याइतिनिर्धारितम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

[illegible] आत्मनि अधिष्ठाने मायया पालयसि । तानि न पराभावयत् मन्यतः पराभवमप्रापयन् । यथोर्णनाभिरात्मन एव शक्ति- [illegible] सृजति तद्वत् । अङ्गमः अमरहितः ॥ ५ ॥

[illegible] अस्मादहन्तु अस्मिन् जगति, परम उत्तमम्, अपरम् अधमं, समं मध्यमञ्च, तत्रापि नाम मनुष्यादि, रूपं द्विपदत्वादि, गुणाः शुक्ल- [illegible] तैर्योग्यं साध्यं, तत्रापि सदसत् स्थूलं सूक्ष्मञ्च किञ्चिदपि मन्यतो न वेद्मि, किन्तु त्वत्त एव सर्वं भवतीति मन्ये ॥ ६ ॥

[illegible] परावाङ्मयं ईश्वरान्तरावाङ्मयं प्रवक्ष्यसि ॥ ७ ॥

[illegible] मतमेतत् सर्वमभिप्रेतं वस्तिष्यर्थः । विशेषेण जानीहि स्वयं परामृश ततो वदेत्यर्थः । किञ्च यथैवेदम् अनुशासितः सन् [illegible] तथा विजानीहि तेनास्योत्तरमवाधितं देहीति व्यञ्जितम् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

[illegible] आत्मभिर्विराट्शरीरैरात्मनि आत्मविराट्शरीरेमायया पालयसिनपराभावयत्स्वयम् स्वात्मानंपरिभवमप्रापयत् अङ्गमः अम- [illegible] रहितः यथोर्णनाभिः आत्मन एवशक्तिमयष्टन्यसृजतितद्वत् ॥ ५ ॥

[illegible] अस्मिन्लोकेपरमुत्कृष्टमपरंनिकृष्टंसमंमध्यमेवसत्स्थूलंमसच्चामरूपगुणैः संज्ञयानाकृत्याधर्मैर्युक्तमाख्यंनिष्पाद्यं किंचिदन्यतो [illegible] किंतुत्वत्तएवसर्वंभवतीतिजानामि ॥ ६ ॥

[illegible] यदहं वेद्मि ब्रह्मणोयदाधारइत्यादितवप्रश्नोनिरर्थकइत्यवाह सदिति सदकप्रवाहोऽपिभवान्यतस्तपोऽकरत तेनहेतुनानोऽस्माद् वेद्- [illegible] अतःपराणामीश्वरांतरशंकांप्रवक्ष्यसि ॥ ७ ॥

[illegible] सर्वमनुशासितस्त्वदनुविद्धः इदंप्रस्तुतंयथैवबुध्येजानेतथैव एतत्सर्वंपृच्छतोमेब्रह्मविजानीहि विशेषेणाह्यापय ॥ ८

भाषा टीका ।

[illegible] आप विराटही अंग में अपने ही से इन जीवों को पालन करते हैं अपनी शक्ति ही के आश्रय से आप यह सब कार्य करते हैं [illegible] किसी अन्य साधन के अपना आज्ञा पूर्ण लेती है ॥ ५ ॥

[illegible] मैं आप से उत्तम अधम समान नहीं देखता हूं और नामरूप गुणों से युक्त इस स्थूल सूक्ष्म जगत् में जो कुछ है [illegible] किसी से नहीं है सब आपही से है ॥ ६ ॥

[illegible] आप ही ने सावधान होकर तप किया उससे हमको खेद होता है और पर की आशंका होती है ॥ ७ ॥

[illegible] हे परमेश्वर ! यह पूछता जो मैं हूं मुझे बताओ जिससे आपका अनुशासित यह सब मैं समझ जाऊं ॥ ८ ॥

[illegible] । हे वत्स पुत्र [illegible]

अत्र हेतुः यत् यतः परमधर्म्मे भगवद्भक्तियोगाख्ये [illegible]

ननु त्वमेव भवत्वात्युक्तं त्वया एकः सृजसि भूतानीत्यादिना । सत्यम् । [illegible] स्तमद्भुतम् । यतः कारणात् एतावतः एतावत्प्रमाणस्य मम एतावत्कं मेऽस्ति । किन्तु मत्तः परमीश्वरमविज्ञाय मूढे । अतः [illegible] इयेयं भ्रान्तिः न तु बुद्धिपूर्व्वकमनुचितमित्यर्थः । अतः ईश्वराय मम एतावत्कं तव अविज्ञाय इति भावः ॥ १० ॥

तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुर्व्वन्नेव तं कथयति त्रिभिः । येन अमलज्ञानेन दर्शितं प्रकाशितमेव [illegible] सृष्ट्याऽभिव्यक्तं करोमि । यथाऽर्कोदयमैतन्यप्रकाश्यमेव प्रकाशयन्ति । तथाच श्रुतिः—न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा [illegible] भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥ ११ ॥

तस्मै नमो धीमहि । यस्य मायया विमोहिताः सन्तो युष्मदादयो मां जगद्गुरुं जगत्कर्त्तारं वदन्ति तस्मै ॥ १२ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

नमो धीमहीति । मनसा नमनं कुर्व्वीमहीत्यर्थः । एवमेव भगवतो ब्रह्मणा प्रथम एकर्च्चोयपञ्चमाध्यायस्य सप्तविंशत्यूचकटीका-[illegible] मनुरूपमिति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

अथब्रह्मा यथाप्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनन्दति सम्यगिति हेवत्सपुत्रकारुणिकस्यमत्पितुः कृष्णावतः तेत्ववाहंसम्यग्विजिज्ञासितं [illegible] ज्ञातुमिच्छं कुतइत्यतआह यतस्मादहंभगवद्वीर्यदर्शनेभगवत्प्रभावज्ञापनरूपेधर्म्मेप्रवर्त्तितः ॥ ९ ॥

अभिमतार्थजिज्ञासयाप्रश्नंविवृणोति नान्यतमिति भोनारदमांप्रतियत्याप्रश्नचीवि एकःसृजसिभूतानीत्यादिनायत्पृच्छसितत्त्वाविज्ञानेन [illegible] एकःनान्यतमतीवनासत्यं किंतुमत्तः परंभगवंतमज्ञात्वाप्रश्नचीर्षीति अज्ञानहेतुमाह ममएतावत्त्वंएतावन्महिमवत्त्वंयतः परमज्ञात्वाप्रश्नचीर्षीत्यर्थः ॥ १० ॥

तर्हिकोऽसावीश्वरइत्यपेक्षायांभक्त्यानमस्करिष्यन्नाह येनेति अर्कोदयोभगवत्तेजसारोचितंविभ्रंतत्तेजोलेशमुपजीव्यप्रकाशयति [illegible] ज्ञात्मानमभिमन्यंतेएवमहमपीत्यर्थः नतज्जसूर्योभातीतिश्रुतिरनुसंधेया ॥ ११ ॥

तस्मैवासुदेवायनमोधीमहिनमः कुर्महे यद्वा धीमहीत्यत्रर्तामितिशेषं जेतुमशक्यायायस्यभगवतोमाययामांजगद्गुरुंवदंति [illegible] सकला देवा मनुष्याः पशवस्तथा विष्णुमायामहावर्त्तमोहांधतमसावृताहतिन्यायेनमायया मोहितामांजगद्गुरुंवदंति [illegible] इत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

नारदप्रश्नंपरिहरिष्यन्नतज्ज्ञिज्ञासितंस्तौति सम्यगिति अहंभगवतोहरेर्वीर्य्यस्यसृष्ट्यादिलक्षणास्यंदर्शनेव्यापनेचोद्यतइतिय [illegible] किंकिस्तितंसम्यक्समीचीनमित्यन्वयः कारुणिकस्येत्यनेनलोकोपकारकंचेदमितिलक्ष्यते ॥ ९ ॥

तत्रप्रथमतः पूर्वपक्षांशमाक्षिपति नान्यतमिति त्वमेकः सृजसीतियथामांप्रश्नचीर्षितथातदनृतंनकिं । अनृतमेव वतत्वद्वचनमनुश्रुत्यादेवा [illegible] देवानुकंपासंतोषविस्मयार्थमंत्रणेषतइतिवचनात् यद्यमत्तःपरमधिकमीश्वरमविज्ञायमांहंवेदपरंत्वस्मादितिमामात्यत्वानृतमनृतमेव [illegible] कुतइतितत्राह अपीति अतिगर्हितत्वात् अपिःपदार्थसंभावनान्वयसर्गगर्हासमुच्चयेष्विति सूत्रात् गर्हासमुच्चयप्रश्नांकारसंभावनाश्रद्धा [illegible] ज्ञानाश्च कस्मान्मनुक्तमाक्षिपसीतितत्राह एतावत्त्वमिति द्विशब्दश्चार्थे मेएतावत्त्वंतद्वोचिचारोचितरोचकत्वंचेव नातोऽधिकमिति [illegible] द्वितिशेषः ॥ १० ॥

एतदेवस्पष्टयति येनेति तत्रप्रमाणमाह यथेति तमेवांभांतमनुभातिसर्वं यद्वादित्यगतंतेजोजगन्नासयतेखिलमित्यादेः ११ ॥

पुनरूपमानुमेतभवणाप्रापराधोभगवन्नमनेनपरिहर्त्तव्यइतिभावेनभगवंतंनमति नमइति तस्मैवासुदेवायभगवतेनमः [illegible] स्वयः अनेन ओंनमोभगवतेवासुदेवाय नारायणायविद्महेवासुदेवायधीमहि तन्नोविष्णुःप्रचोदयात् इतिह्यादशाक्षरीचतुर्विंशाक्षरी [illegible] द्वेविद्यहिरण्यगर्भेणनित्यंसेव्यइतिदर्शितं यद्वामत्तःपरमधिज्ञायमयथा एकःसृजसीत्यादियंप्रकारंमांप्रश्नचीर्षितत्त्वतत्प्रकारविषयक [illegible] मान्यत् यद्रूपमित्यादि तदेवानृतंकुतइत्यतआह नेतिप्रमाणविरोधात् मामावाम्यविरोधिष्वितिवचनात् अथपक्षःसंभावितइत्याह [illegible] अतसंतोषहेतुत्वात् कुतोऽनृतमितितत्राह एतावत्त्वमिति यतोवस्मात्रिष्वपीमेएतावत्त्वंपरिच्छिन्नप्रभावत्वंहिप्रसिद्धं कथंप्रसिद्धमित्यत्र [illegible] मेवमिशिनहि येनेति अनेनहरेःकरणत्वंतथाकर्तृत्वंप्रतीते मनुहरेःस्रातेष्वकर्तृत्वमित्याशंक्य हासभावकथनेनतत्स्पष्टयति नमइति [illegible] मुक्तःशरीरावाप्तप्रबुधीत्यादावविकरणत्वमपिमुख्यकर्तृत्वंप्रत्येजयतीत्यतःकरणत्वप्रयोगोगौणीकेचित्करः तन्मतंचेत्सकर्तृत्वं [illegible] आह यन्मायययेति त्रिविधामाया एकाहरेरिच्छामुख्याद्वितीयाऽमुख्याप्रकृतिस्तृतीयाऽमुख्यत [illegible] ब्धाधीवयादुर्जयाहरिभजनवर्जितेर्जेतुमशक्यया ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

किंवा तवेदमज्ञानमेवेति विपरीतमाह नान्यतमिति ॥ १० ॥

अर्कोदयस्तत्प्रकाशितान्यस्तत्प्रकाशयन्तीवैव तत्तत् प्रकाशयन्तीत्यर्थः ॥ ११ ॥

[illegible] तत्त्वमादिमत्त्वेन अस्य सदा परत्वाद् सर्वज्ञत्वमन्वयत्वेन परस्य निर्दोषस्य नेत्रगोचरे स्थातुं विलज्जमानया अमुष[illegible] विमोहिता अस्मदादयो दुर्धियः विक्लवन्ते आत्मानं न लभन्ते ॥ ११ ॥ १३ ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

इदानीं प्रथमं भंगिमप्रश्नोत्तरं वक्तुं सर्वेषां प्रश्नानामेकवाक्यत्वमाह सम्यगिति सर्वेषां प्रश्नानामुत्तरं भगवानेव सपत्रज्ञानादिः तत्रैवान्तरभेदा [illegible] इति तपश्चरणं चार्थत्वेनपर्यवसानप्राप्त्यर्थं तत्कथमित्यपेक्षायामाह यदहं प्रेरितः भगवद्वीर्यस्यदर्शनेज्ञानार्थमिति यद्वि सर्वैरेवप्रश्नैः भगवा [illegible] स्वरूपमेवकथ्यमिति तदेवंसंगच्छते परंकेनचित्केनचिद्रूपेणातत्तत्प्रश्नोत्तररूपोभगवान् तानिरूपाण्ययंप्रेक्षकव्यानि अतएवतस्यप्रश्नस्या [illegible] मेदं अन्यथाकोपः कर्त्तव्यःस्यात् भगवद्वीर्याणांवक्तव्यत्वेनोपस्थितत्वाच्चतदभावः यत्तवायंप्रश्नः सकारुणिकस्यतव अनेनव्याजेनसर्वेस [illegible] रान्मोचनीयाहति अहंचकृतार्थःकर्त्तव्यइतिच अन्यथापरमभागवतस्यतज्ज्ञानेनसंभवतीत्यभिप्रायः वत्सेतिस्नेहेनसंबोधन मातुरौधसंपय [illegible] ब्रह्मणोहृदयाद्भगवच्चरित्रमुद्गतमस्तीतिज्ञापयति विचिकित्सितंविचारितं ज्ञातुमिष्टंवा ॥ ९ ॥

एवंप्रश्नाभिनंदनमुक्त्वासंतोषणायकृत्स्नाधिकारंचनिरूप्यसंतिमप्रश्नस्योत्तरमाह नाहंवेत्यस्य नानृतमिति यत्तवयत्वनंत्वत्तोऽन्योब्रह्मा- [illegible] तितदनृतंनभवति अनृतंनामान्यथाज्ञानान्यथावचनंतत्त्वज्ञानात्तदज्ञवचनमित्येवलोकप्रसिद्धिः अप्रामाण्यस्यतुल्यत्वेऽपिएवंवचनेनानृत दोषोनास्तीत्यर्थः ययामांप्रब्रवीषित्वमेवमहानिति सत्यंतुनभवतीत्याह अविज्ञायपरंमत्तइति मत्तःपरमुत्कृष्टंमत्प्रियतरमविज्ञायएतद्वक्ष्य त्यर्थः; कोऽसावित्यपेक्षायामाह एतावत्त्वंयतोहिमइति यावंतःउत्कृष्टाःमयिधर्मास्त्वयोदिताः तेहिसर्वेयत्संबंधान्मयिजाताः सभग- निलयर्थः ॥ १० ॥

एवमंतिमप्रश्नोत्तरमुक्त्वाप्रथमप्रश्नोत्तरमाह येनेति भगवान्ज्ञानंभवति येनरूपेणातद्रूपंउच्यते ज्ञानंहिस्वप्रकाशं सर्वमेवप्रकाशयति हीप [illegible] प्रकाशयतियतः तस्मात्सर्वप्रकाशकंस्वप्रकाशकंयच्चैतन्यंभगवद्रूपंतद्ज्ञानमित्यर्थः येनभगवताखरोचिषास्वप्रकाशनस्वयमेवरोचतेस्वा- [illegible] नंवारोचयतीतिस्वरोचिः विश्वंतेनैवरोचितंप्रकाशितं अर्थ्यक्तेलीनंविश्वंतद्रूपेविषयप्रकाशितंजातं तदाभूत्तस्याब्रह्माभिव्यनक्ति तदाह [illegible] यामीत्यहमिति यथापहाकाष्ठस्थितोवह्निर्मथनेनाभिव्यक्तएवतृणादिभिरभिव्यज्यतेनतुसहसातृणादिभिरभिव्यक्तमर्हति तत्रश्रुतिःसिद्ध [illegible] इतिमाह यथाऽर्कोऽग्निरिति अन्येतुजडानस्वप्रकाशाःतेजस्तुस्वप्रकाशंहवतदपिचेद्भगवताप्रकाश्यंतदाकः संदेहोऽन्यस्यतत्प्रकाश्यत्वंतत्रश्रुति- [illegible] तत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीं"ति तत्रविद्युतांकादार्थित्क- [illegible] तत्तद्रूपं यथाऽर्कोज्ञानेनप्रकाशितमेवस्वयंप्रकाशयति स्वयंचप्रकाशितः यद्वादित्यगतंतेजइतिवाक्यात्तत्रापिभगवत्तेजएवप्रकाशकं तथा [illegible] पीत्यर्थः एवमन्यादयः ऋक्षाणिअश्विन्यादीनि ग्रहाःयुधाद्यः अन्यास्तारकाः ॥ ११ ॥

एवंज्ञानस्वरूपंभगवंतंप्रतिपाद्यतत्कर्त्तव्यांतराभावात्मत्स्वानमस्यति तस्मैनमोभगवतइति लोकवेदप्रसिद्धंतच्छब्देनोच्यते भगवतइति [illegible] धर्मत्वेनांशत्वं प्रयोजनंतुमोक्षः तदाह वासुदेवायेति भक्तिर्नमनं निदिध्यासनमंतरंगंसाधनं तदाह धीमहीति तत्रमोक्षा एवं [illegible] वैषांतदज्ञानंयुक्तमेवेतिविरोधाभावायाह यन्मायेति तस्यभगवतोज्ञानरूपस्यवशवर्त्तिनीकाचिच्छक्तिर्मायातत्साजगत्कर्तृमाया [illegible] मिका एतस्याव्यामोहएवफलं तस्यास्तुजगतःकरणत्वंकर्तृत्वंवा भगवदाश्रयातत्रमायायाःसामर्थ्यमाह दुर्जयेति तस्याःजयःप्राणिमात्र [illegible] शक्यः इयमेवमायावेदस्तुतौमारणायत्वेनवेदैःप्रार्थिता तेहिज्ञानंबोधयंतिएषातुमोहयति तस्याःफलंमहत्त्वापिहहेयतइत्याह मांह्रुवंति [illegible] मुह्यमिति क्रियाशक्तेरन्याधीनत्वाज्जगद्गुरुमित्युक्तम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

प्रश्नमभिनन्दति । हे वत्स पुत्र । विचिकित्सितं सन्देहः । सम्यगतिसमीचीनम् । कारुणिकस्येति सर्व्वज्ञेनापि त्वयैवं पृच्छता [illegible] पि पितरि करुणैव कृता । यदहं विजानीहि इति परामर्शार्थकपदेन भगवतो वीर्य्यस्य विश्वसृष्ट्यादिमयस्य दर्शने विषये प्रेरितः । तदहं ह्यां मनसैव तत् पश्यामीत्यानन्द ॥ ९ ॥

किञ्च भोः पुत्र एकः सृजसि भूतानि इत्यादिना मामीश्वरत्वेन यथा ब्रवीषि तत्रापि नानृतं न मिथ्या । यतो मत्तः सकाशादपि [illegible] परमेश्वरत्वं अविज्ञाय मत्तः परस्मिन् परमेश्वरे अविज्ञाते सतीत्यर्थः, मम एतावत्त्वं स्यादित्यनेककर्तृकत्वेऽपि कत्वाप्रत्यय आर्षः [illegible] मत्तः परम् अविज्ञाय मम एतावत्त्वं लोका ब्रुवन्तीति शेषः । त्वन्तु सर्व्वज्ञोऽपि तानेव ज्ञापयितुं ताननुकृत्य ब्रूषे इति भावः । त्वं [illegible] परम् अविज्ञाय ब्रवीषीति व्याख्याने तु नारद त्वत्तोऽन्यं ब्रह्माणं ज्ञातुमनुचितम् ॥ १० ॥

वस्तुतस्तु अहं को वा वराक इत्याह । येन स्वरोचिषा स्वप्रकाशेन परमेश्वरेणैव प्रकाशितमहं पिपृपेपन्यायेन प्रकाशयामि मृष्या मिथ्यैव करोमि । यथाऽर्कोदयस्तत्प्रकाशितमेव प्रकाशयन्ति । तथाच श्रुतिः—न तत्र सूर्य्यो भाति न च चन्द्रतारकं नेमा विद्युतो [illegible] द्युतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥ ११ ॥

नन्वहं जगद्गुरुर्ब्रह्मा विश्वं सृजतीति सर्व्वत्रैव तव ख्यातिः तत्र सविस्मयं स्तोत्रमासमाह तस्मै नमो धीमहीति ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

उत्तरयति प्रश्नमभिनंदति सम्यगिति हेवत्सपुत्रतेतवकारुणिकस्यसर्वत्रकरुणावतः इदंविचित्रितंसंदेहार्थंप्रश्नरूपंचेष्टितंसम्यक् यतो [illegible] वीर्य्यदर्शनेभगवत्प्रभावज्ञापनेचोदितः प्रवर्त्तितः ॥ ९ ॥

[illegible] यत्तवयपकःसृजतीत्यादिवचोऽपिनानृतम् तत्रहेतुः अविज्ञायेति यतोभगवतः मेममैतावत्त्वंस्रष्टृत्वादियुक्तत्वंमत्तः परमविज्ञाय [illegible] परमेश्वरएवेमांप्रब्रवीषि ॥ १० ॥

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ १३ ॥
द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः ॥ १४ ॥
नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥
नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

नमेवंस्वस्मात्परंकथयति येनेतित्रिभिः अहंयेनपरमेश्वरेणास्वकीयेनधर्मभूतेनरोचिषाप्रकाशेनरोचितंप्रकाशितमेवरोचयामिप्रकाशयामि नतुस्वानंश्यंगार्किंचिदपिकर्तुंशक्नोमीत्यर्थः यथाऽर्कादयोभगवत्प्रकाश्यमेवप्रकाशयंति अनेनयद्रूपमित्यस्योत्तरमुक्तम् "नतत्रसूर्योभातिनचंद्र तारकंनमाविद्युतोभांतिकुतोऽयमग्निस्तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति" तिश्रुतेः ॥ ११ ॥

तस्मैवासुदेवायनमः धीमहि यस्यमाययायोगिभिरपितत्कृपांविनादुर्जयया मोहिताः मांजगद्गुरुंवदंति ब्रह्माद्याःसकलादेवामनुष्याःपशवस्तथा विष्णुमायामहावर्त्तमोहांधितमसावृताहातिस्मृतेश्च ॥ १२ ॥

भाषा टीका ।

ब्रह्मोवाच—हे वत्स ! यह तेरा संशय और संशय पूर्वक प्रश्न बड़ा उत्तम है तैंने जिज्ञासा करके भी मुझ पर कृपाही की है । क्योंकि जो मुझे श्री भगवान् के पराक्रमों के निदर्शना कराने को प्रेरणा किया है ॥ ९ ॥

तैंने मुझ को जैसा कहा है वह बात भी झूठ नहीं है क्योंकि मुझ से भी पर जो है उसे विना जाने कहा है और मैं ऐसा हूं भी ॥ १० ॥

जिन भगवान की शक्ति से प्रकाशित इस विश्व को मैं प्रकाश किया करता हूं जैसे सूर्य अग्नि चन्द्रमा ग्रह तारा सब सिद्ध ही घट पटादिक को प्रकाश किया करते हैं ॥ ११ ॥

मैं उन वासुदेव भगवान को नमस्कार करता हूं जिनकी दुर्जय माया से मुझे जगद्गुरु कहते हैं ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यन्मायेति मायासम्बन्धोक्तेस्तस्या दुर्जयत्वोक्तेश्च तस्यापि किमस्ति संसारः । नैवेत्याह । मत्कृपापदमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानयेव तस्मिन् स्वकार्य्यमकुर्व्वत्या अमुया मायया विमोहिताः अस्मदादयो दुर्धियः अविद्यावृतज्ञाना एव केवलं विकत्थन्ते श्लाघन्ते । अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति ॥ १३ ॥

तदेवं स्वस्मादन्यं परमेश्वरं निरूप्य इदानीं यदधिष्ठानमित्यादिनवप्रश्नानां स एवाधिष्ठानादिकं सर्व्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति । द्रव्यं महाभूतानि उपादानरूपाणि । कर्म्म जन्मनिमित्तम् । कालस्तत्क्षोभकः । स्वभावस्तत्परिणामहेतुः । जीवो भोक्ता वासुदेवात् परोऽन्योऽर्थो नास्ति कारणाव्यतिरेकात् कार्य्यस्य ॥ १४ ॥

तत् प्रपञ्चयति द्वाभ्याम् । नारायणः परं कारणं येषां ते । अनेनैवशास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्व्वज्ञत्वादिकञ्चोक्तम् । देवाश्च तदंगाज्जाताः अतो न तद्व्यतिरिक्ताः । लोकाः स्वर्गादयः तदानन्दांशाः । मखादयस्तत्साधनभूताः ॥ १५ ॥

योगः प्राणायामादिः । तपस्तत्साध्यं चित्तैकाग्र्यम् । ज्ञानं तत्साध्यम् । गतिः तत्फलम् । अनेनैतत् सर्व्वं तदधीनमित्युक्तम् ॥ १६ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

तस्यापीति परमेश्वरस्यापीत्यर्थः ॥ १३—१८ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

इतरेषांमायायादुर्जयत्वंभगवतस्तदसंस्पर्शीचाह विलज्जमानयेति यस्यभगवतईक्षापथेदृष्टिपथेस्थातुंविलज्जमानयातस्मिन्स्वकार्यमकुर्व्वत्याऽमुयामायायाविमोहिताःसंतोममाहमितिदुर्धियःविकत्थंते ॥ १३ ॥

विकत्थनमेवाह द्रव्यमिति द्रव्यंपृथिव्यादिभूतमेवकारणमितिकेचित् कर्मैवकारणमितिकेचित् कालइत्यन्येस्वभावइत्यपरे कर्मजीवइत्यन्ये जीवएवकारणमित्यपरे पर्वयन्मायया मोहिताविकत्थंतेइत्यर्थः एवंतैःस्वतंत्रतयाऽभिमताःपदार्थाःभगवदधीनाइत्याह वासुदेवादिति इत्यादिप्रपंचेषुवासुदेवात्परोऽन्योऽर्थोनास्तिमृषावासुदेवात्परोनास्तितद्वदतदात्मकमतत्परतंत्रंचमास्तीत्युक्तंवक्ष्यमाणंप्रसंचितम् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यविरचित भागवतचन्द्रिका।

एतदेवोपपादयति नारायणपरा इति वेदा:नारायणःपरंकारणंयेषांतेतथोक्ता:"तस्यवाक्यापतस्थुषमहतोभूतस्यनि:श्वसितमेतद्यदृग्वेद"इत्यु दितश्रुते:पञ्चानारायणा:परंप्रतिपाद्यंयेषांतेतथोक्ता:"सर्वेवेदायत्पदमामनंती"तिश्रुते: देवाइन्द्रादय:नारायणस्यांगजातास्तत्क्रूरारभूताश्चेत्यपि विवक्षितं "चंद्रमामनसोजात:सभात्मांगाम्यन्यादिवता"इत्यादिश्रुते: लोकाःनारायणपराःनारायणः परःस्वामीयेषांतेतथोक्ता मखाःक्रतवः नारायणः परमाराध्योयेषांतेतथोक्ताः ॥ १५ ॥

योगोविवेकादिजन्यउपासनात्मकोयोगोनारायणपरः नारायणःपरोध्येयोयस्यस्तथोक्तः तपःविद्यांगभूतकर्मनारायणपरंनारायणः सर्वंवस्तुनभूमिर्यस्यतथोक्तं ज्ञानंशास्त्रजन्यज्ञानं योगस्यपूर्वमुक्तंःतदपिनारायणः परोध्येयोयस्यतत्तथोक्तं गतियोंगफलमर्चिरादिकासाऽपि नारायणः परागंतव्योयस्यास्तथाभूता ॥ ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली।

यस्यहरेरीक्षापथेदृष्टिमार्गेस्थातुंविलज्जमानयाचित्प्रकृत्याऽभिमन्यमानयाशैवल्याख्ययाजीवस्वरूपाच्छादिकया ऽमुयामाययामोहिताश्च स्वयाज्ञानमज्ञातमेवदुर्धियोजनाममवशेविश्वमस्ति। सर्वस्याहंकर्त्तेतिधिकत्थतेतंधीमहीत्यन्वयः मुख्यामायाहरेःशक्तिरमुख्याप्रकृतिर्म तेत्यादिनात्रैविध्यावगमाच्चंद्रजालल्ल्श्रणामायाऽत्रोच्यते ॥ १३ ॥

ननुविष्णोरितरकरणानास्तीतिकथमुच्यते। पृथिव्यादीनांप्रातिस्विककारणात्वप्रतीतेरितिनत्राह द्रव्यमिति द्रव्यंपृथिव्यादि कर्मपुरुष पापलक्षणं पृथिव्यादीनांपरिणामविशेषोवा कालःपरिणामहेतुःभ्रटिलेखात्मकः स्वभावःसात्त्विकादिः जीवःसुखदुःखाश्रयः द्रव्यंपुरोडाशा-दि कर्मऋत्विगादिव्यापारः कालोवसंतादिः स्वभावोब्राह्मणत्वादिः जीवोयजमानसंज्ञइतिवा द्रव्याद्यन्यतरोऽन्योऽर्थोवासुदेवात्परोऽधिको नास्तितर्हितत्समःकश्चित्स्यादत्राह तास्वतइति नेत्यनुषंगते तास्वतःतद्वदवस्थितः समोऽपिनास्तीत्यर्थः तद्वदेवस्थितंयत्पुतास्वतंतत्प्रचक्षत इतिवचनात्,अनेनद्रव्यादीनांप्रातिस्विककारणात्वस्वभगवदकनियतत्वेनहरेरखंडकर्तृत्वंसुस्थिरमितिसिद्धम् ॥ १४ ॥

ननु"हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ब्रह्मादेवानांप्रथमःसंबभूव विश्वस्यगोप्ताभुवनस्यकर्त्ते"त्यादिश्रुतयस्त्वद्गुणप्रति पादनपराःकथमन्यविषयाःस्युरित्याशंक्ययदेतस्यस्यगुणाप्रतिपादकाइत्याशयेनाह नारायणपराइति स्वप्रतिपाद्यगुणवस्तुनारा-यणएवप्रतिपाद्यत्वेनपरोऽधिकोयेषांतेतथोक्ताः सर्वेम्नादुत्कृष्टनारायण मखप्रतिपादयंतीतित्रत्राह देवाइति नारायणस्यचक्षुराद्ययवेऽर्थो जातइत्यनेनदेवानामवरत्वंनारायणस्योत्कृष्टत्वमुक्तमितिज्ञायते नारायणएवपालकत्वेनपरोयेऽयस्तेतथोक्ताः अहंहिसर्वयज्ञानांभोक्त्या-देरित्युक्तेश्चद्रादिष्वयंपरइतिकृत्वानारायणपरामखाइत्युक्तम् ॥ १५ ॥

अष्टांगयोगेनयोज्यमानेष्वपिपरोहरिरेव कृच्छ्रंद्वादशरात्रादिनपवासादिविषयोऽपिमएव अत्रापितपस्यायुज्यमानानांपरइत्यर्थः नारायण परंब्रह्म ज्ञानेनपरमेयोहरिः नारायणपरागतिराश्रयेषुगम्येषुवामुख्याश्रयोमुख्यगम्यश्चायमेव तदुक्तंगम्येज्यज्ञेयधाऽयेषुयोज्येषुचापरोह रिरित्यादि अनेनहिरण्यगर्भादिशब्दानांचतुर्मुखादिविषयत्वमपहस्तितं "सर्वेवेदायत्पदमामनंती"ति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

सर्वशास्त्रसमन्वयेन नारायणपरा इति द्वयम्। श्रीनारायण एव उपास्यत्वेन परः तात्पर्यविषयो येषां ते वेदाः। नन्वन्येऽपि देवास्तत्रोपास्यत्वेनाभिधीयन्ते। सत्यम् तेऽपि नारायणाङ्ग प्रभवत्वेनैव तथा वर्णयंते इत्यर्थः। येऽपि तदाश्रया लोकास्तेऽपि, तत्पद-प्राप्तिहेतवो मखाश्च तत्परा एव। तदानन्दांशाभासरूपत्वात् तत्साधनत्वाच्चेति भावः ॥ १५ ॥

तथा योगोऽष्टाङ्गः सांख्यञ्च। तत्साध्यं तपः चित्तैकाग्र्यं तदुसाध्यं ब्रह्मज्ञानञ्च तत्परम्। तदीयसामान्याकारप्रकाशकत्वात् तज्ज्ञानस्य योगतपसोस्तत्साधनत्वादिति भावः। किं बहुना गतिस्तत्प्राप्यं ब्रह्मापि तत्परा तत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात्। तदुक्तं श्रीमत्स्यदेवेन सत्यव्रतं प्रति—मदीयं महिमानञ्च परब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ इति। अत्र मखादयस्तदुशक्त्यंशरूपाः गतिस्तु तत्तत्फलत्वात् तदानन्दांशभूतैव ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

तर्हीश्वरशक्तिर्मोहकस्वरूपत्वात्स्वाश्रयमपिव्यामोहयेदित्याशंक्याह विलज्जमानयेति साहिभगवतोभार्या स्वस्यभगवतासहनिरंतररमणा यैमन्येषांमुद्धिंमोहयति तस्यास्तथात्वंभगवान्जानाति अतोविलज्जमानायाईक्षापथेऽपिस्थातुंविलज्जते अतएवयेतत्सन्मुखाःताश्चव्यामोहयति पृष्ठतःप्रवृत्तानेवव्यामोहयति तदेवाह अमुयाविमोहिताःममाहमितिविकत्थंते मोहनेद्वारमाह दुर्धियइति यतोधियमेवव्यामोहयति ॥ १३ ॥

एवंज्ञानंसपरिकरंनिरूप्यआत्मनिरूपणार्थंप्रथमस्तत्त्वंनिरूपयति द्रव्यमिति इहेहतत्त्वंनानाकिंतुसर्वैषामेकमेवतत्त्वं तत्रसर्वेषांचांग तेषांपंचानांयदिभगवानेवतत्त्वंततोतत्कार्याणांसुतरामेवतदेवतत्त्वंभवति तानिपंचगणयति द्रव्यंअधिभूतंसमवायिकारणंमहाभूतानि कर्म अगतोऽग्न्यनिमित्तंसाधारणं चकाराद्भूतसंस्काररूपंचकालोगुणक्षोभकः चकारान्निमित्तभूतश्चयस्त्वाधारत्वेनसर्वत्रप्रतीयमानः द्रव्यंतत्रै वसर्वंप्रकृतिकार्यंमग्नेनिरूपयितव्येपतेसर्वेवासुदेवादन्येनभवंतिपतेषांदेवरूपत्वात्सत्त्वमूर्तिभगवान्निर्दिष्टः तत्त्वनिरूपणे स्वभावः परिणाम हेतुः जीवोभोक्ताभगवदंशः चकारात्तदहंभिमानिनीदेवताचतत्रकालकर्मस्वभावानिषेधसम्यक्निरूपिताः जीवोऽपिपृथग्निरूपितः त्यक्तकर्मत-त्त्वतइतिमतीयमानतयाअन्यत्वेऽपिपरमार्थतोऽनन्यत्वंभवतीस्तत्त्वंतस्यैव ब्रह्मान्नितिसंबोधनेनिरूपितेऽर्थेअसंभावनाव्यावृत्त्यर्थंयतस्तत्त्वंब्रह्म ब्रह्मात्मस्वरूपमात्रैकःसंदेहइतिभावः चकाराद्धर्मभेदोऽपिनास्तीत्यर्थः अन्यत्वेनस्वरूपभेदोनिरूप्यतेपरत्वेऽधिष्ठातृभेदः अर्थइतियुक्तिरुक्ता

श्रीमद्बल्लभाचार्यकृत सुबोधिनी ।

नित्योहिशब्दार्थसंबंधः तत्रशब्दार्थोऽनित्याः तेयद्भिर्भगवद्रूपाएवभवंति तदेवसदेकरूपनित्यत्वंसिध्यतीति ॥ १४ ॥

एवंसर्वेषांतरत्वंभगवानित्युत्तरमुत्कार्षिमर्शंगृहीत्वापृष्टंतत्रोत्तरमाह

नारायणपरावेदाअतियदिभिन्नार्थत्वंसंभवतितदाभूयान्विचारः कर्त्तव्योभवेत् तत्रस्वरूपतःअर्थतः फलतः साधनतः परंपरातः द्वितीयकांडेऽपिसाधनतः कार्यतः फलतश्चभगवानेवेतिकस्मिन्नप्यंशेविवादाभावात्भगवानेवतत्त्वमितिविमर्शः तत्रदेवानांभगवद्भिःआज्ञाप्तानिर्गतानांपुनस्तानेवप्रवेशमाज्ञानांतात्पर्यंनारायणइतिनिर्विवादंमध्यपतिस्वार्थेप्रत्ययायंतेतदर्थस्यभगवद्रूपत्वात्भगवत्परापएवभवंति वैदिकानिचतुर्विधाःस्यपियद्यपितेभगवद्वृद्ध्यवस्थितमर्थंव्याप्नुवंतिसंतिलोकं पुरुष प्रयत्नो घतास्तमर्थं मभिधायकृतार्थानिसंति निवर्त्तंतेभगवद्वृद्ध्यवस्थितानर्थान् जानंतीतिहेतोर्नप्रयासः ततोभगवद भिप्रेतार्थं साधकत्वादपिभगवत्परापएवएषशब्दतोऽर्थतोनिधानतश्चभगवत्पराः ननुसंसर्गरूपोवाक्यार्थस्तेषामभिप्रेतार्थोभवति सचचतुर्विधः विध्यर्थ वादमंत्रनामधेयार्थात्मकः तत्रविध्यर्थस्यपुरुषएवप्रेरणालक्षणस्यपुरुषप्रवृत्तेतात्पर्यं । पुरुषप्रयत्नाभिव्यंग्येभावेचा विधेयार्थिस्तवनेत्वर्थवादाः मंत्राअपिवाज्याद्यतिरिक्ताः देवताप्रतिपादनस्तुत्यावाद्युपयुक्ताःयाज्यास्तुवंतोहशद्रव्यत्यागेनामधेयान्यपिभात्वर्थविच्छेदनेतात्पर्ययुक्तानि । तस्मात्तत्तदर्थेउपक्षीणानिकर्मभगवंतितात्पर्यंवदिष्यंति । तत्राहदेवानारायणांगजाः नारायणपरालोकानारायणपरामखाइति सर्वोहिवेदःप्रवर्तमानःचतुर्विधेऽपियागेउपयुज्यते महावाक्यार्थत्वाद्यागस्यतत्राहयागः करणं । स्वर्गादिःसाध्यःतत्रसंप्रतेपुरुषप्रयत्नेनाभिव्यक्तायोगाः स्वव्यापारंदेवताप्रीतिमध्येजनयंति अन्यथाव्यापाराभावात्करणाभावादेवप्रवर्त्यंतेन अदृष्टादिकंतुनव्यापारःपरंतेनाजन्यत्वात्तदृष्टस्यव्यापारस्यविद्यमानत्वात्सतेहिदेवतोद्देशेनद्रव्यत्यागंकुर्वतःस्वर्गसाध्यंतिदेवताचअन्यदीयंहविर्विधानेनगृहीत्वाकिंचिदुपकर्तुमुचिताभवतिलोकेतथोपलब्धेः अन्यथातद्देशद्रव्यत्यागंत्वयागस्यनस्यात्द्रव्यसंस्कारकत्वेनापिदेवतोपयोगस्यवक्तुंशक्यत्वात्निवापादारभ्यतत्संबंधवचनस्यप्रोक्षणादितत्संस्कारकत्वंघटतेयद्यपिदेवतापदेपुविद्यमानाचतुर्थीतादर्थ्येनैवभवति उपपदविभक्तित्वात्। प्रीतिरप्यनित्याकालांतरस्मारकस्याप्यभावात्तत्कल्पनायांगौरवं तथापिचतुर्थ्यानिरर्थकत्वदोषनिवृत्त्यर्थंअवश्यमर्थोवक्तव्यः सचान्यत्रसिद्धत्वात्मंत्रप्रदानएवभवतिदेवतोद्देशप्रसिद्धेश्च । यस्यैदेवतायैहविर्गृहीतंस्यादित्यत्रअग्नयेऽष्टाकपालंनिर्वपामीत्यादौचचतुर्थ्यास्तदर्थत्वेनतित्रनमस्वस्त्यादिपदानिसंनियोगेतुपुनः स्वर्गः फलत्वेनाभिमतइतिकेवलंदेवतायाउद्देश्यत्वाभावात्अवांतरव्यापारविधयश्चार्थनमः स्वस्तिस्वाहेत्युपपदविभक्त्यनुशासनेनचप्रीतिर्व्यापारः तस्यान्यधर्मत्वेनस्वर्गजनकत्वाभावात्देवतातुस्वर्गादाधिकृताफलंदातुंशक्नोति । अतोद्रव्येणापीतादेवताव्यापारः सात्रानित्याचेतनाचयथानुरूपंचफलंनियन्तुंशक्ता परंतस्याअपुरुषार्थत्वात्पुरुषस्याभिप्रेताभवतीतिनहावत्प्रायणयागस्यान्यथासिद्धिः । अतोमध्येव्यापाररूपदेवतापरत्वेऽपिभगवत्परत्वंयतोदेवाः नारायणस्यांगेभ्योह्याद्दिश्याजाताः मद्भंगसेवार्थंप्रवृत्ताः अंगतात्पर्ययुक्ताभवंति किंत्वंगिनियद्यपिअंगिन्येवचक्तव्यानितथापितेषांग्रहकर्त्यवांगत्वात् तत्रजाताअंगजाभवंति प्रीतिपक्षऽपिदृष्टत्वात्प्रामाणिकत्वाच्चपुनःस्मरणादिकल्पनेनगौरवायकिंचयत्रदेवताव्यापारत्वेनगृहीतासस्वर्गादिःउद्देश्योभवतितस्यलोकांतरेसुखत्वेवाभगवदीयत्वेनव्यभिचरतिस्वर्गादिलोकानांह्रदास्वर्गादिलोकाइत्यादिनातदवयवत्वेनप्रतिपादनात्"अस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंती"तिश्रुत्याभगवतएवानंदाशत्वात्स्वर्गादीनांयागकर्त्रंशस्वभंपादनेभगवदानंदोपजीवकत्वात्फलदातृभगवत्क्रियानिष्पादकत्वात्भगवत्परत्वंसुखस्यापिएवमवांतरमहाफलयोर्भगवदीयत्वंतदर्थप्रवृत्तामखाअपिभगवत्परात्यधिकाद्दंशतोवाक्यार्थविवक्षायामपिभगवत्परत्वविमर्शःसिद्धः १५

अतःपरंपुराणानांभगवत्परत्वविमर्शःकर्त्तव्यःपाक्षिकोऽपिदोषःपरिहरणीयइति तत्रपुराणार्थंचतुष्टयंमाश्रयेयोगःपशुपतिमतवैष्णवप्रतिपाद्यं तत्रांतिमस्यैतत्प्रवेशाज्ञाविरोधशंकायोगोहिचित्तवृत्तिनिरोधात्मकःस्वतोपुरुषार्थंसाधनं भवितुमर्हतिनैवेदविरुद्धार्थकल्पयितुंशक्नोतिअप्रामाणिकत्वप्रसंगात्तच्चार्थमादायःतस्यमुख्यंफलंमोक्षपर्यवसायित्वाभावेअशास्त्रत्वापातः सिद्धयस्तुअंतरायभूताःकालक्षपणाहेतवइत्यग्रेवक्ष्यतेअतोमोक्षंसाधयन्नपियोगोभगवतिचित्तैकाग्र्यंसाधयन्नेवसाधयतिमबीजनिर्बीजध्यानयोः भगवच्चरणारविंदविषयत्वात्अतस्तस्याप्यवांतरविषयेक्षयापूर्ववद्भगवत्प्रीतिरवांतरव्यापारइतिकल्पनीयंचित्तसंस्कारपरत्वेऽपिफलंभगवदधीनमेवेतिभगवन्मुखनिस्सृतत्वमवश्यंकल्पनीयं योगाइतिबहुवचनेनसर्वेयागभेदाभगवत्परापएवएतस्यभगवत्परत्वमग्रेविस्तरेणवक्ष्यते भगवत्प्राप्त्युपायत्वात्सामान्यतस्तत्परत्वमविवादं तपस्तुभगवदुपयोगिदेहेंद्रियसंपादकत्वेनतत्परमेव अन्यथाक्लेशात्मकस्यतस्यपुरुषार्थपर्यवसानंनस्यात् पशुपतिमतंतुतपस्यंयोपक्षीणं ज्ञानंद्विविधं औपनिषदं सांख्यसिद्धंच तत्रचयद्यपिपरस्परंविरुद्धं औपनिषदंहिसर्वस्यान्मत्यप्रतिपादनेनात्मत्वेनसर्वविषयकंभवति इदंतुसर्वस्याबृत्तत्वेनात्मविषयकं तथापिप्रथमप्रवृत्तस्यआत्मानात्मसंस्कारात्पृथक्कृत्यात्मावगमनंमुख्यं अन्यथासर्वस्यात्मत्वंप्रतिपाद्यमानंआत्माज्ञानात्अशक्यमेवस्यात् ज्ञानस्यचज्ञेयएवतात्पर्यंज्ञेयस्तुनारायणएव आत्मत्वात्सर्वत्वाद्बृहत्वाच्च गतिरपिपूर्वोक्तामगवत्परैव साहि ब्रह्मज्ञानफलंभवति तदुक्तं विदंतिहिब्रह्मगतिमित्यत्र ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

जगद्गुरुर्विश्वस्रष्टा त्वं भवस्येवेति तुष्यमादरायिनः सन्तः किं मायामोहिताः । सत्यम् । भगवत्सम्बन्धं विना ये आदरवायिनो ये च तस्मादादरग्राहिणश्च ते उभे अपि वहिर्दर्शिनो भगवतः पृष्ठदेशस्थया मायया मोह्यन्त एवेत्याह । विलज्जमानया मत्कपटमसौ जानातीति कपटिन्या स्त्रिया इव यस्य दृष्टिपथे स्थातुं विलज्जमानया अर्थात् तत्पृष्ठदेशे एव स्थितवत्या अमुया मायया विमोहिता विकत्थन्ते । अत्र तद्वैमुख्यंच ततपृष्ठदृशो ज्ञेयः । तद्वैमुख्ये सत्येव तस्याः प्रभावो न साम्मुख्ये इत्यर्थः ॥ १३ ॥

यद्रूपमित्यादिप्रश्नदशकस्योत्तरं वक्तुं प्रथमं भगवद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति । द्रव्यं महाभूतानि रूपादानकरणानि । कर्म्म जन्मनिमित्तम् । कालः गुणक्षोभकः । स्वभावस्तत्परिणामहेतुः । जीवो भोक्ता । वासुदेवात् परोऽन्योऽर्थो नास्तीति द्रव्यादीनां मायाकार्य्यत्वात् मायया जीवस्य च तच्छक्तित्वादिति विश्वस्य वासुदेवरूपत्वमिति यद्रूपमित्यस्योत्तरमुक्तम् ॥ १४ ॥

नारायणः परः कारणं येषां ते । अनेनैव शास्त्रयोनित्वप्रतिपादनेन ईश्वरे प्रमाणं सर्व्वज्ञत्वादिकञ्चोक्तम् । तथा वेदादयो नारायणे[illegible]
ज्यादिष्वर्थेक्षः ॥ १६ ॥

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥
कार्य्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥
स एष भगवांल्लिङ्गैस्त्रिभिरेभिरधोक्षजः ।
स्वलक्षितगतिर्ब्रह्मन् सर्व्वेषां मम चेश्वरः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

नकेवलंभगवन्मायययामोहितामामेवजगद्गुरुंबुधंत्यपित्वहमीश्वरोऽस्मिममैवेदमितिविकत्थंतेइत्याहुः विलज्जमानयेतियस्यप्रधानक्षेत्रज्ञपतिरित्यादि श्रुतेः चेतनाचेतनस्वामिनःईक्षापथेस्थातुंविलज्जमानयाऽमुयामायययाविमोहिताः अतएवदुर्धियःममाहमिति विकत्थंतेऽश्लाघंते ॥ १३ ॥

एवंस्वस्मात्परंपरमेश्वरंनिरूप्य अथयदधिष्ठानमित्यादिनवप्रश्नानांविश्वस्यभगवानेवाधिष्ठानादिकमित्युत्तरंयुक्तंसर्वस्यस्वरूपतोभिन्नत्वेऽपिचिदचिच्छक्तिमतःकारणाद्भगवतःसकाशात्पृथगवस्थानाभावेनाऽभिन्नत्वमाह द्रव्यमिति हेब्रह्मन् द्रव्यंप्राकृतम् महदादिशरीरांतम् कर्मजन्मनिमित्तम् कालःक्षोभकः स्वभावः परिणामहेतुःजीवःक्षेत्रज्ञः एवमुक्तानुक्तःअर्थः अन्योवेदरूपःशब्दश्च वासुदेवात्परःअवासुदेवात्मकस्तत्त्वतोनैवास्ति"सर्वंखल्विदंब्रह्म"इति श्रुतेः वासुदेवःसर्वमितीतिस्मृतेश्च ॥ १४ ॥

एतदेवप्रपंचयति नारायणपराइतिद्वाभ्याम् नारायणःपरःकारणंयेषांतेनारायणपराः"तस्यवामहतोभूतस्यनिःश्वसितमेतद्यग्वेद"इति श्रुतेः देवाःअस्मदादयःनारायणांगाजाताः "नारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायतेएकोहनारायण." इत्यादिश्रुतेः नारायणःपरःआश्रयो यैषांतेतथोक्ताःनारायणःपरःफलंयेषांतेमखाःक्रतवः ॥ १५ ॥

योगःपूर्वोक्तः तपःकृच्छ्रादि ज्ञानंवेदांतजन्यम् गतिरर्चिरादिः ॥ १६ ॥

भाषा टीका ।

जिनकी दृष्टिपथ में स्थित होने को विलज्जमान जिस माया से मोहित दुर्बुद्धि जन जगत् में 'मेरा' कह कर प्रलाप किया करते हैं ॥ १३ ॥

ब्रह्मन्—द्रव्य कर्म काल स्वभाव और जीव वासुदेव भगवान् से भिन्न तत्त्वतः कोईभी वस्तु नहींहै ॥ १४ ॥

वेद सब नारायण पर हैं देवता सब नारायण के अंगज हैं । लोक सब नारायण पर है । यज्ञ सब नारायण पर है ॥ १५ ॥

योगभी नारायण पर है तपभी नारायण पर है ज्ञानभी नारायण पर है गतिभी नारायण पर है ॥ १६ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

तर्हि त्वं किं करोषीत्यपेक्षायामाह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि । ईक्षया कटाक्षेण । तत्र हेतवः द्रष्टुरित्यादयः ॥ १७ ॥

ननु कुतोऽयं जीवेश्वरविभागः यतस्त्वं प्रेर्य्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्त्वमिति त्रिभिः । निर्गुणस्यापीश्वरस्य एते त्रयो गुणाः बध्नन्तीत्युत्तरेणान्वयः । कथम्भूताः तेनैव स्वातन्त्र्येण स्थित्यादयर्थं मायया गृहीताः ॥ १८ ॥

वस्तुतः सर्व्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नन्ति । क । कार्य्यमधिभूते कारणमध्यात्मं कर्त्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं महाभूतानि, ज्ञानशब्देन देवताः, क्रियाः इन्द्रियाणि, तदाश्रयाः तेषां कारणभूताः । तत्तदभिमानेन बध्नन्ति ॥ १९ ॥

अतः स एष (एव) वक्ष्यमाणः । एभिर्गुणैर्लिङ्गैर्जीवानामाबरकैरुपाधिभिः सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य सः । स्वैर्भक्तैरेव लक्षिता गतिर्यस्येति वा ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

[गुणाः शुक्लादयः इत्यमरकोषविधानात् गुणाः शुक्लरक्तकृष्णवर्णा इति पूर्वश्लोकोक्तस्य त्रयो गुणा इति वाक्यस्य विशेषणम् । यद्वा गुणोऽप्रधानमिति मेदिनीकोषात् स्थित्यादयर्थं मायया गृहीता अप्रधानरूपा इति पूर्वश्लोकेनैव सम्बन्धः । अतः स्वामिकृतटीका सम्मतपूर्वश्लोकेनान्वितस्य बध्नन्तीतिपरश्लोकस्यान्तर्गतगुणाइतिपदस्य न पौनरुक्तिशङ्केति ॥] अधिभूतं गोलकम् । अध्यात्मम् इन्द्रियम् । अधिदैवम् इन्द्रियप्रवर्त्तकदेवता ॥ १९ ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका।

एवंसर्वंतदधीनमितिकथनेननूनाहंवेदपरंत्वस्मिन्नित्यंक्षास्योत्तरमुक्तंभवति तर्हित्वंकिंकरोषीत्यपेक्षायामाह तस्येति अखिलांतरात्मनः सर्वांतर्यामिणः अभिद्रष्टुःसर्वज्ञस्येशस्यसर्वस्यवशकृत्यानियंतुः कूटस्थस्यनिर्विकारस्येक्षयैवसंकल्परूपज्ञाननैवसृष्टोऽहंतेनचा दितःसृज्यं सृजामीत्यन्वयः सतुप्रयोजकांहंतुप्रयोज्यइतिभावः ॥ १७ ॥

ननुकुतोऽवनियोज्यनियोजकभावःकुतोवातस्यसर्वज्ञत्वादयोधर्माःस्वस्यतुनद्विपरीताइत्यपेक्षायां मायीश्वरत्वमायावश्यत्वाभ्यामित्याह सत्त्वामिति निर्गुणस्यहेयगुणरहितस्यकल्याणगुणानांसमनंतरमेवोक्तत्वाद्विभोर्व्यापकेनभगवतोमायया प्रकृतिद्वाराश्रितसर्गनिरोधेषुनिमित्तेषुस्थित्यादयर्थं सत्त्वादयस्त्रयोगुणागृहीताः स्वानियम्यत्वेनपरिगृहीताः सृष्टिस्थितिसंहारकपलीलापरिकरत्वेनसत्त्वादयईश्वरणापस्वीकृतीताइत्यभिप्रायः ॥ १८ ॥

एवंगुणानामीश्वरलीलापरिकरत्वमुक्त्वाजीवबंधनत्वमाह कार्येति कार्यशरीरंकारणमिंद्रियंताभ्यांकर्तृत्वेनिमित्तेपुरुषयपार्थनिष्पादनार्थं गुणाःसत्त्वादयःस्वरूपतोऽव्ययमायिनंमायावश्यंसबंधमात्रेणनित्यंपुरुषंजीवंबध्नंतीत्यन्वयः गुणान्विशिनष्टि द्रव्येति मोहनप्रकाशनप्रवर्तन स्वभावाः द्रव्यशब्दस्यमोहनवाचित्वंपारिशेष्यादवगम्यते अतएवास्मिन्नध्यायेबहुशःप्रयोगाश्च सत्त्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः निबध्नंतिमहाबाहोदेहेदेहिनमव्ययं तत्रसत्त्वंनिर्मलत्वात्प्रकाशकमनामयं सुखसंगेनबध्नातिज्ञानसंगेनचानघ रजोरागात्मकंविद्धि तृष्णासंगसमुद्भवं तन्निबध्नातिकौंतेयकर्मसंगेनदेहिनं तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारतेति गीतावचनान्यत्रस्मारितानि ॥ १९ ॥

एवंगुणानांजीवबंधकत्वमुक्तमथस्वलीलापरिकरीकृतमायेःपरमेश्वरःसर्वेषांममचेश्वरइत्याह सइति ।लिंगैःसत्त्वादिगुणैःशरीरभूतप्रकृतिस्थैरुपलक्षितः स्वलक्षितगतिःस्वलक्षितास्वच्छन्दागतिर्यस्यसतथोक्तः ननुतदादर्शितपथानाविदितवदन्यदर्शितमार्गःसएवएवंविधैश्वर्यसंपन्नो भगवान्हे ब्रह्मन्नारदसर्वेषांममचेश्वरःनियंता ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली।

ननुभवतःसृष्ट्वाभायेकथंत्यक्षामलोकेख्यातंवर्त्ततइत्यतस्तंप्रकारंदर्शयति तस्यापीति तद्दृष्टिप्रतिघृष्टुंकोऽपिसमर्थोनास्तीति ईशस्येति ईशित्वंचयरादिग्रामणेति निर्विकारस्येति एतदपिबलवत्प्रतिबंधकेनान्यथानभवतीत्यखिलस्वामिनइति एवंविधस्यतस्यहरेरपिशब्दात्प्रभव-अईक्षयैवकटाक्षयेक्षणेनैवाभिचोदितस्तेनसृष्टोऽहंसृज्यंजगत्सृजामीत्यन्वयः एवशब्देनसृष्टौप्रयोजकांतरंनिवारयति ॥ १७ ॥

एवंहरेर्मुख्यकर्तृत्वंप्रदर्श्याधुनायुगपत्क्रमशोऽपवर्तिप्रश्नंपरिहरति सत्त्वंरजस्तमइति तेनहरिणानित्यंगृहीताअपिसत्त्वंरजस्तमइतित्रयोगुणा निर्गुणस्यसततंसत्त्वादिगुणरहितस्यविभोर्मायययेच्छयास्थित्यादिषुनिमित्तभूतेषुक्रमशोयुगपच्चगृहीताइत्यन्वयःमायययेतिविशेषणान्मूलसृष्ट्यादिषुक्रमशोवेनेदिनसृष्ट्यादिष्ववयुगपत्गृहीताइतिविशेषः तदुक्तं नित्यंगृहीताःस्थित्यादिषुविशेषतः युगपत्क्रमशश्चैवेति ॥ १८ ॥

रजोगुणमुपादानीकृत्यसृष्टिंवक्ष्यन्हरेःसत्त्वादिगुणैर्जीवबंधकत्वमहिमानमाह कार्येति पुरुषमितिजातावेकवचनं द्रव्यज्ञानक्रियाश्रयाः द्रव्यंतामसाहंकारकार्यंशरीरं ज्ञानवैकारिकाहंकारकार्यंमनःश्रोत्रेंद्रियाणिच क्रियातैजसाहंकारकार्यंवागादींद्रियजातं आश्रयोयेषांतेतथोक्ताः एवंविधाः प्रकृतेःसत्त्वाद्यागुणाअभिमानमंतरेणात्मानंपुरुषंजीवसमुदायंकार्यकारणाकर्तृत्वेनबध्नंतीत्यन्वयः तत्रार्यविभागः तमोगुणाःकार्यशरीरेतद्गतदुःखाद्यनुभवेनबध्नाति रजोगुणःकर्मकारणेंद्रियैःकारणेषुकर्मसुबध्नाति सत्त्वगुणास्तुमनसाज्ञानेंद्रियैश्चांतरंयत्सुखमनुभवार्थंतत्रकर्तृत्वेबध्नाति इदमुक्तंभवति शरीरगतदुःखाद्यनुभवे तमोगुणाःकर्मसुरजोगुणोऽहं सुखीतिसुखानुभवेसत्त्वगुणाःकारणं गुणानामचेतनत्वेनस्वतःप्रवृत्त्यनुपपत्तेः तन्नियमनेकारणमीश्वरेच्छेतितदुक्तं ज्ञानेंद्रियैश्चमनसासत्त्वं बध्नातिपुरुषं रजःकर्मेंद्रियैर्नित्यंशरीरेणातमस्तथेत्यादि ॥ १९ ॥

नकेवलमेतानिदेहेंद्रियमनांसिबंधकानि । हरिप्रसादसामग्रीयोग्यानांमुक्तिसाधकानिचेत्याह सएषइति योगेनस्वरोचिषाविश्वमित्यारभ्यकार्यकारणकर्तृत्वइत्येतेनग्रंथेनप्रतिपादितःसएषोऽधोक्षजोभगवानेतैस्त्रिभिर्देहेंद्रियमनोभिर्लिंगैर्ज्ञानोपायलक्षणैर्यमादिसाधनैर्यतमानैरतैर्जीवैःस्वलक्षितगतिःप्रदर्शितस्वरूपोभवति एतदुक्तंभवति देहेंद्रियमनोजयिनस्तेरवसाधनैर्भगवच्छिक्षयंस्तंपश्यंतीति स्वप्रसादादिर्मजीवः पश्यत्तेनस्वलक्षितमितिच अधःकृतेंद्रियजन्यज्ञानत्वेनमुक्तोऽप्यधोक्षजःस्यादित्यतःसर्वेषामिति सर्वेषांमुक्तानां स्वस्यसर्वांतर्भावेऽपिनारद्स्य विशेषशंकापरिहारायममचेतिविशेष्योक्तम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

सृज्यं स्रष्टुं योग्यमपि ॥ १७ ॥

ननु जीवेश्वरयोः प्रेर्यप्रेरकत्वं कुतस्तत्राह सत्त्वामिति त्रिभिः । निर्गुणस्यगुणास्पृश्यस्य विभोः स्वाभाविकशक्त्या व्याप्तसर्वस्य मायया विलज्जमानया यस्येत्याद्यनुसारेण बहिरङ्गया शक्त्या स्थित्यादिषु निमित्तेषु सत्त्वादयस्त्रयो गुणा गृहीता भवन्ति ॥ १८ ॥

त एव गुणाः कार्यादिन्ये तत्तत्तादात्म्येपुरुषं जीवं बध्नन्तीति पृथगनुषङ्गः स्त्रिःपाठात् । तत्र कार्यं गोलकम् अधिभूतम् । कारणमिन्द्रियमध्यात्मम् । ततप्रवर्त्तकतया कर्त्री देवताऽधिदैवम् । कीदृशमपि बध्नन्ति तत्राह नित्यदा मुक्तमपि । नन्विदं विरुद्धं तत्राह मायिनमिति । मायाऽत्रमायाकृतो मोह उच्यते । स चानादिति एवेशविमुखस्य तस्य मायापारवश्यादेव । तेन च गुणावेश एव बन्ध इति साक्षाद्बन्धाभावान्नित्यमुक्तत्वमपि युज्यत इति भावः ॥ १९ ॥

त्रिभिर्लिङ्गैर्द्वारभूतैः सुष्ठु अलक्षिता यत्किञ्चिदेवानुमिता गतिर्यस्य सः । गुणप्रकाशैरनुमीयते भवानित्यादेः । यद्वा भगवान् सर्वभूतेष्वित्यादिरित्यनुमानेन त्रिभिर्लिङ्गैः कारणादितयोपलक्षितो भगवान् भक्तैरेवानुभूतस्वरूप इत्यर्थः । अत्रेत्थम्भूतलक्षणे तृतीया ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवंविधमर्शनिरूप्यतद्रूपमित्यादिषट्प्रश्नानुत्तरेविस्तरतोनिरूपयिष्यन्नयद्विज्ञानमित्यादिप्रश्नचतुष्टयस्यचतुर्भिःश्लोकैरुत्तरमाह तस्यापीति तत्प्रथमंयद्विज्ञानमित्यस्योत्तरं इदंहिज्ञानंजगत्कार्योपयिकमितिनपूर्वेणगतार्थता यतोविज्ञानंयस्येतिप्रश्नात्प्रथमंतस्यविज्ञानंवक्तव्यं तथाचेदमुपादानगोचरापरोक्षज्ञानंतत्साधकप्रकारेणसाधनज्ञानंचप्रथमंभगवतोऽस्तीत्याह तस्यैवकर्तृत्वात् तस्यापियत्सृज्यंतत्तेनैवाभिन्नादितःसृजा मीतिसंबंधः तस्यसृज्यत्वेहेतुः द्रष्टुरिति धिग्ब्रह्मकार्यंभगवतःसृज्यं तस्यैवद्रष्टृत्वात् बंहणाहिकार्यंकर्तुंशक्यं नहिज्ञानमात्रेणकर्तुंशक्यमित्यत आह ईशस्येति ईशःसमर्थःसर्वंकर्तुमिति ननुक्रियाज्ञानशक्तिमत्त्वेऽपिव्यापारावेशेलौकिकवत्कृशमंभवात्आत्मनोविकृतद्वापत्तेःभगवतः कर्तृत्वेनसंभवतीत्याशंक्याह कूटस्थस्येति सहिसर्वंकरोति कूटस्थएव नतुक्रियते यथाकामंधनुःकल्पवृक्षःचिंतामणिर्वायोगाद्यथामनसामृजति अतःकूटस्थस्यैवकर्तृत्वसंभावनयकाऽप्यनुपपत्तिः ननुभगवान्सृष्टिनाहेतिकर्तुंप्रयोजनविरोधात्सहिस्वार्थंजीवार्थंवाकरोति स्वार्थं करणेजीवानाम नुत्पादनेस्यात् तत्रोभक्तिमार्गोविरुध्येतसर्वेऽपिमार्गाविरुध्येरन् बंधमोक्षाद्यभावात् वैचित्र्यमज्ञानेचनस्यात् अतउभयार्थं जीवार्थंवाकर्तव्यमितिमंतव्यंतत्रस्वांशेस्वस्यानंदपूर्णत्वंभंजतपरार्थत्वंवैषम्यंनैर्घृण्यंप्रसज्यतांअतआहआत्मलाभान्नेति आत्मलाभान्नामात्मा आत्म तृप्तेर्नवैषम्यादिभानंदविरोधस्तुनास्ति आप्तेलत्वात् यथाऽखिलाःआत्मानोनभवंतिकेनाप्यंशेन तथांशार्थंसृष्टिश्चाक्रियते उपभोगश्चसंपद्यते

एवंस्वस्यःपूर्णआनंदःतस्याप्यात्मभोगादिनास्यात्पूर्णत्वंन्यूनत्वंवा तस्माद्उभयविधाऽपिसृष्टेःभगवतः कर्तुंयुक्ता तथापीश्वरत्वात्भक्तिमार्गव्यवस्थापनायमांसृष्ट्वाईक्षयैवाक्षाप्यमद्रूपेणैवसर्वंसृष्ट्वास्वयंकूटस्थएवास्थितः तदाअहंतत्सृज्यंसृज्ञामि तत्एवज्ञानशक्तिक्रियाशक्तिंचलब्धातदाह ईक्षयैवेति इष्टयाप्रेरणादुभयप्राप्तिः ॥ १७ ॥

अनेनसामान्यतःसएवाधारःसएवनियंता तदात्मकश्चाहमित्युक्तमेव परमेतस्यहेतुर्विचार्यते कथमयंभगवान्त्वामन्यान्वासृजति कथंवा रक्षत्यमिनियम्यनियामकभावस्तत्राह सत्त्वरजस्तमइतिद्वाभ्यांअवस्थितेरितिकाशकृत्स्नइतिमतमत्रसिद्धंभविष्यति यथार्णनाभिःसृष्ट्यर्थमंकामूर्णामुद्गमंतेतथाभगवानपित्रिविधसृष्ट्यर्थंत्रीन्गुणानुद्गमेत् गुणरूपत्वाच्चगुणशब्दव्यवहारः सद्रूपेणानिर्गतंसत्त्वमित्युच्यते केवलंचिद्रूपेणानिर्गतंक्रियाशक्तिप्रधानत्वात्सदानंदाभावाच्चरजइत्युच्यते आनंदांशात्तमः तेभगवद्रूपात्पत्रभगवतासृष्टाः नचभगवंतंतेपूर्वंस्थिताः तथासतिभगवदात्मकास्तेनभवेयुः यथाकार्पासे न हि सूत्रं तदेवहिपश्चात्स्वावयवैः पौर्वापर्यमापद्यमानःसूत्रतामापद्यते अतएवभगवान्निर्गुणाः तेगुणाः पुनःस्थितिसर्गनिरोधेषुउत्पत्तिस्थितिलयार्थंतेगृहीताः तेषांमध्यहंमायया एषाहिमायाजगत्कर्त्रीनितुल्यामोहिका तदाह विभोरिति समर्थस्यजगत्कर्तुरित्यर्थः साहितच्छक्तिःसर्वरूपभगवत्संबंधात्सर्वप्रतिकृतिरूपासाजगत्करणेकरणरूपाअतःकरणांशस्यतदा त्मत्वात्करणरूपेणैवनिर्गतागुणाहति ॥ १८ ॥

माययैवगृहीताना तेमायावशंतिष्ठतितत्पुत्राइव अतोयएवभगवदंशोजीवःतस्यांरंतुमिच्छतितत्कार्यैवा तेतेगुणावध्नंतीत्याह कार्यकारणाक र्तृत्वेइति कार्यमधिभूतंदेहः कारणमध्यात्मंइंद्रियाणि कर्त्ताअधिदैविकःअंतःकरणं एतेषांभावःकार्यकारणकर्तृत्वं संघातमितियावत् जीव स्यसंघाततत्त्वनिमित्तंयथाकेवलोजीवःसंघातरूपीभवति तेहिमाययागृहीताः स्वकार्येस्थापिताः तदाह द्रव्यज्ञानक्रियाश्रयाइति द्रव्यमधि भूतं ज्ञानमधिदैवं क्रियाआध्यात्मिकी तत्त्रयंतेषामाश्रयः प्रत्येकमेकस्य अतःस्वस्वाश्रयंतेबध्नंति आध्यात्मिकादिभावंपरित्यज्यकेवलंभावंतु नप्रयच्छन्ति सर्वंदाबध्नंति बंधनेमायासंबंधएवहेतुः नचसंबंधमात्रमेवहेतुः अन्यथाभगवतोऽपिबंधनंस्यात् किंतुतत्रस्वात्तंत्र्योऽभिमन्यते तस्याःपतिरहमिति तदाह पुरुषइति ननुतांकरणत्वेनकार्यार्थंयोगृह्णाति अतोगुणबद्धांनियोज्योगुणकर्त्तानियोजकइति एकस्मिन्नबरूपद्वय मुपपद्यते ॥ १९ ॥

एवंजीवब्रह्मभावभेदंनिरूप्यसामान्यतउत्तरितमपियदाधाराद्युत्तरंविशेषाकारेणाह सएवेति मायातत्कार्याणांद्रव्यादीनांविशेषाधारत्वं भगवतश्चसामान्याधारत्वमिति तत्रोत्तरमुक्त्वामायिन्येनविशेषात्मकत्वेचबाधितमितियत्परइत्येतदवशिष्यते नियामकस्यदर्शनपूर्वमात्म धात्तदूज्ञानेऽपिनियमनंसंभविष्यतीतिविस्मरणशीलैःस्त्र्यादिभिः सुष्ठुअलक्षितागतिर्यस्य यद्यपिसएवैषयःसृष्टा सएवबद्धः तथापि ह्यसौभगवान् एतेचगुणाःभगवतोलिंगभूताः ज्ञापकाःयद्विर्निर्गताधूमवत् दूरादेवपुरुषंज्ञापयंति ननुतेवेष्टयंति अन्येबंधशंकांवारयति एतैरिति एतांश्चतएवते तर्हिबद्धैःकथंनबध्यते तत्राह अधोक्षजइति नेचत्तेपश्यंति क्रियांवाप्राप्नुवंति तदाबध्नंति तच्चतेषामसंभावितेहति अतएवसुष्ठु अलक्षितागतिर्यस्य स्त्रैर्वावज्ञातिरिक्तैःमुक्तैर्वालक्षितागतिर्यस्य वस्तुतस्तुभक्ताःभगवतासहपश्यांद्रासमायांतीतिसर्वत्रनिश्चयः अतएवहि ब्रह्मनूत्वंतादृशः तथापिसर्वेषांममचकारात्तवचभगवानीश्वरोनियंता ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तर्हि त्वं किं करोषीत्यत आह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि । किं स्वेच्छया न हि न हि ईक्षया तस्याज्ञयेत्यर्थः । द्रष्टुरिति । तथापि मम तस्य साक्षित्वे ईश्वरत्वे कूटस्थत्वे सर्व्वान्तर्यामित्वे सत्येव नान्यथेति स्वस्य जीवत्वं तस्य चेश्वरत्वं व्यञ्जितम । तथाच श्रुतयः—एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा । सर्व्वाध्यक्षः सर्व्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च । इति एष भूताधिपतिरेष लोकेश्वरो लोकपाल इति । ब्रह्मादिपिपीलिकापर्य्यन्तसर्व्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्व्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति च ॥ १७ ॥

• ननु कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्यः स प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्त्वमिति त्रिभिःनिर्गुणस्य स्वस्यैवगुणरहितस्यापि त्रयो गुणाभवन्ति केन प्रकारेणेत्यपेक्षायामाह । विभोर्मायया स्थित्याद्यर्थं गृहीता इति तच्छक्तिगुणत्वेन तद्गुणास्त्वमित्यर्थः । तत्र मायया नित्यमेव तद्गुणरूपत्वेऽपि गृहीता इति प्रयोगो नित्यनरविग्रहत्वेऽपि कृष्णस्य तस्येच्छयात्तवपुष इतिवत् प्राकृतलोकोक्त्यनुकारेणज्ञेयः ॥ १८ ॥

'अतएव गुणाः पुरुषं जीवं भगवतस्तटस्थशक्तिवृत्तिरूपं बध्नन्ति । मायिनं मायासङ्गसहितं पूर्व्वोक्तयुक्त्या भगवतः पृष्ठदेशस्थानां जीवानां पृष्ठदेशस्थया मायया स्वत एव सङ्गसम्भवादिति भावः । नित्यमुक्तमिति जीवस्य यथा अनाद्यज्ञानं तथा अनादिज्ञानमप्यङ्गीकृतमान्ते व्यक्तीभविष्यति । क्व बध्नन्ति । कार्य्यमधिभूतं कारणमध्यात्मं कर्त्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं भूतानि

कालं कर्म्म स्वभावञ्च मायेशो मायया स्वया ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥
कालाद्गुणव्यतिकरः परिणामः स्वभावतः ।
कर्म्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥
महतस्तु विकुर्व्वाणाद्रजःसत्त्वोपबृंहितात् ।
तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥
सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेन बध्नन्ति । अत्र ज्ञानक्रिययोर्वैपरीत्येन यथासंख्यं ज्ञेयम् ॥ १९ ॥

अतः स मायाशक्तिमान् एतैर्गुणैर्लिङ्गैर्जीवानामावरकैरुपाधिभिर्हेतुभिः सुष्ठु अलक्षिता अर्थात् तैर्जीवैरज्ञाता गतिस्तत्त्वं यस्य सः यद्वा एतैर्लिङ्गैः करणैः स्वज्ञानिभक्तैः कर्तृभिर्लक्षिता गतिर्यस्य गुणप्रकाशैरनुमीयते भवानित्यादेः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अहंतुतेनैवसृष्टः उत्पादितः तस्यभगवतः अभिद्रष्टुः सर्वज्ञस्येशस्यसर्वनियंतुः कूटस्थस्यसर्वकारणत्वेऽपिनिर्विकारस्वरूपस्यअखिलानां चिदचित्पदार्थानामात्मनः ईक्षयादृष्ट्याऽभिचोदितःप्रवर्त्तितः सृज्यंसृजामितत्कृतमेवकरोमिनतुस्वातंत्र्येणाकिंचित्कर्तुंशक्नोमीत्यर्थः ॥ १७ ॥

नकेवलमस्मदादीनांतत्प्रेर्यत्वमात्रमपितुप्रकृतेस्तद्गुणानांचतन्नियम्यत्वमिति तन्मायागुणैःसर्वेजीवा यद्वास्तद्बंधनिवृत्तिपूर्वकंतत्प्राप्तेस्तद्भजनकर्त्तव्यमितिचाह सत्त्वमितित्रिभिःविभोःचेतनाचेतनरूपस्यप्रकृतिद्वयव्यापकस्वरूपस्यसत्त्वंरजस्तमइतित्रयोगुणाःसंति तेचैकरूपगुणाःनेतिज्ञापयितुंविभुविशिनष्टिनिर्गुणस्येति सत्त्वाद्यऽस्पृष्टस्वरूपस्येत्यर्थः ननुकथंतर्हिविभोः गुणाइत्युक्तमित्यत्रतद्भेचेतनप्रकृतिगुणास्तेनतस्यैवगुणाइत्याह मायया ऽचेतनात्मिकयागुणमय्यास्वप्रकृत्याकार्य्यार्थंविभुनागृहीताः कार्य्योन्मुखीकृताइत्यर्थः ननुकिंतत्कार्य्यमत्राह स्थितिसर्गनिरोधेष्विति स्थित्याद्यभिमुखीकृताइत्यर्थः ननुकिंतत्कार्य्यमत्राह स्थितिसर्गनिरोधेष्वितिस्थित्याद्यभिमुखीकृताइत्यर्थः ॥ १८ ॥

भगवतोमायानियंतृत्वमुक्काजीवस्यपराप्रकृतिलक्षणास्यमायावश्यत्वमाह कार्य्येति पुरुषंजीवात्मानंनित्यदातेगुणाबध्नंति जन्ममरणप्रवाहविषयंकुर्वंतिकथंभूतम्अमुक्तम् "जहात्येनांभुक्तभोगामजोऽन्य" इतिभगवत्याश्रुत्योक्तोयोमुक्तस्तद्भिन्नमकस्तर्हिबद्धइत्याकांक्षायाम् "जोषयमाणोऽनुशेते" इत्येवंभूत श्रुतेः पूर्वभागमुपबृंहयन्नाह मायिनमिति मायाभोग्यत्वेनप्रेप्सुतमायस्यास्तिनतूपास्यत्वादिनाभगवान्स मायी तम् कथंभूताःद्रव्यज्ञानक्रियाश्रयाः द्रव्यंमहाभूतानिज्ञानशब्देनदेवताःक्रियाइंद्रियाणितेषांहेतवः अतएवस्वकार्येष्वधिभूतादिद्युतयश्चंतीत्याह कार्यकारणकर्तृत्वेइति कार्यमधिभूतंभोग्यभोगायतनादिरूपम् कारणमध्यात्मंजीवस्यभोक्तुःरूपादिभोगेचक्षुरादिकरणम् कर्ताऽधिदैवतं जीवस्यचक्षुरादिनारूपादिभोगकर्तृरूपकार्यस्यापकर्तृभूतंचक्षुराद्यधिष्ठातृदैवतम् तेषांभावस्तत्त्वंतस्मिन् ॥ १९ ॥

सएषमायाधिपतिःभगवान् अधोक्षजःत्रिभिःसत्त्वादिभिर्लिंगैराचरकैरुपलक्षितानांतन्मायागुणभूतानांसर्वेषांजीवानांममचकारान्मायागुणवियुक्तानांच ईश्वरोनियंता सचसर्वेनज्ञातगतिर्भवति अपितुस्वानन्यशरणैरित्याह स्वलक्षितगतिरिति स्वेनान्यभक्तेनलक्षितागतिर्यस्य ॥ २० ॥

भाषा टीका ।

उसीद्रष्टा ईशनिर्विकार अखिलात्मा के सृज्य इस जगतको उसी की सृष्टि में उनही की ईक्षासे मोहित सृजताहूं ॥ १७ ॥

सत्व रज और तम निर्गुण के तीन गुण हैं । स्थिति सृष्टि और प्रलय के विभुकी मायासे गृहीतहैं ॥ १८ ॥

द्रव्यज्ञान और क्रिया के आश्रय ये गुण कार्य कारण कर्तृत्वमें नित्यमुक्त मायी पुरुषको बांध लेतेहैं ॥ १९ ॥

वह अधोक्षज भगवान् इन तीनों लिंगोंमें भी अलक्षित गति है (किसी प्रकार अनुमान किया जाताहै) ब्रह्मन् ! वही सबका ईश्वर है और मेराभी ईश्वर है ॥ २० ॥

श्रीधरस्वामिकृत भावार्थ दीपिका ।

तस्य सृष्टिप्रकारमाह कालमिति । कर्म्म जीवादृष्टम् । विबुभूषुः विविधं भवितुमिच्छुः ॥ २१ ॥

गुणानां व्यतिकरः क्षोभः साम्यत्यागः । परिणामो रूपान्तरापत्तिः । पुरुषईश्वरः तेनाधिष्ठितत्वं त्रयाणां विशेषणम् । ब्रह्मणो महत्तत्त्वस्य ॥ २२ ॥

ततो महत्तत्त्वात् विकुर्व्वाणात् विकियमाणात् । तस्य च क्रियाज्ञानशक्तित्वम् त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वात् ।

श्रीधरस्वामिकृत भावार्थदीपिका ।

अहङ्कारस्य स्वावरकत्वात् तमःप्रधानत्वम् । अतएवाहङ्कारकार्य्येषु तामसमाकाशादिकं बहु, राजसं सात्त्विकं चाल्पम् । एवं तदुपाधिषु जीवेष्वपि तथैव तामसाधिक्यम् ॥ २३ ॥

स च विकुर्वन् रूपान्तरं गच्छन् । त्रैविध्यमेवाह । वैकारिकः सात्त्विकः । तैजसो राजसः । यद्विदा यस्य भेदः । द्रव्यशक्तित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि । द्रव्ये महाभूताख्ये शक्तिर्यस्य । क्रियासु इन्द्रियेषु शक्तिर्यस्य । ज्ञानेषु देवेषु शक्तिर्यस्य । हे प्रभो वोढुं शक्त ॥ २४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तात्पर्यणी ।

[कौलमिति । पौराणिकसृष्ट्यादेः प्रकृतेर्महान् महतोऽहङ्कार इत्यादिश्रुत्यन्तरमूलकत्वात् कल्पान्तरप्रसिद्धत्वाच्च वेदान्तोक्तसृष्टिप्रक्रियया सह न विरोधः मायायाः सर्व्वसम्भवादिति प्राज्ञः ॥ २१ ॥ २२ ॥

तस्येति महत्तत्त्वस्येत्यर्थः ॥ २३—२९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवमेकः सृजसीत्यादिप्रश्नस्योत्तरमुत्कायद्रुपामित्यादेः प्रश्नस्योत्तरत्वेनदंस्तावत्सृष्टिप्रकारमाह कालमिति मायेशोमायाधिपतिः स्वया मायया स्वसंकल्पेनयद्वाद्वारभूतयाप्रकृत्यार्थिवुभूषुःप्रकृतिद्वारानानानामरूपभाग्भवितमिच्छुर्यदृच्छयाअहेतुकमपरप्रेर्योऽकर्मपरवशःआत्मन्नात्मानं निप्राप्तसंगतंयुक्तंकालेकर्मस्वभावंचोपादत्ते कालोगुणवैषम्यरूपगुणक्षोभहेतुः कर्मजीवादृष्टं स्वभावःप्रकृतेःपरिणामस्वभावः एतेषामुपादानं नामस्वस्वकार्पेन्मुख्यापादनम् ॥ २१ ॥

कालकर्मस्वभावोपादानफलंदर्शयन्महतःसृष्टिमाह कालादिति कालाद्धेतुभूताद्गुणव्यतिकरात्कालकृतगुणवैषम्यादित्यर्थः परिणामस्वभावतःप्रकृतेःपरिणामस्वभावात्कर्मणोजीवादृष्टाच्चहेतोःपरमपुरुषाधिष्ठितादव्यक्तान्महतोमहत्तत्त्वस्यजन्मोत्पत्तिरभूदित्यर्थः तदाधिष्ठितत्वं तदाहितस्वकार्यजननसामर्थ्यधर्त्तृत्वं अत्राव्यक्तादित्यध्याहारः पुरुषाधिष्ठितत्वाच्चाव्यक्तानुग्रहेणचेतिदर्शनात् व्यतिकरःमिश्रणंसमानांविषमत्वापत्तिः यद्वा गुणानांव्यतिकरोयस्मिन्नितिबहुव्रीहिःअव्यक्तादित्यर्थः ॥ २२ ॥

महतोऽहंकारोत्पत्तिमाह महतस्त्विति विक्रियमाणाद्रजःसत्त्वोपबृंहितान्महतः द्रव्यज्ञानक्रियात्मकःमोहनप्रकाशनप्रवर्त्तनस्वभावःतमःप्रधानःतमोगुणप्रधानःअभवत् महतस्त्रिगुणात्मकत्वेऽपिक्रियाशक्तिज्ञानशक्तिप्रधानत्वाद्रजःसत्त्वोपबृंहितादित्युक्तं एवमहंकारस्यतमःकार्यं प्रधानत्वात्तमः प्रधानइत्युक्तिः अतएवाहंकारकार्येषुतामसंबहुराजसंसात्त्विकंचाल्पमेवंमहत्कार्येषुतामसमल्पंतदितरदुभयंवाह्यतिमंतव्यम् ॥ २३ ॥

तमःप्रधानस्यकिंनामधेयमित्यतआह सइति तस्यत्रैविध्यमाह विकुर्वन्रूपांतरंगच्छन्नहंकारस्त्रिधासमभूत्सम्यगभूत् यद्विदायस्याहंकारस्यभिदाविकारिकस्तैजसश्चतामसश्चेतिसात्त्विकराजसतामसाहंकाराणांक्रमेणानामानि तेषांप्रतिनियतस्वभावानाह द्रव्यशक्तिरिति प्रातिलोम्येनत्रयाणांस्वभावप्रदर्शने द्रव्यशक्तिःविमूढामहाभूताख्यद्रव्योत्पादनेशक्तिःसामर्थ्ययस्यसतथोक्तः सात्त्विकाहंकारानुग्राहकत्वरूपायाक्रियातस्यांशक्तिर्यस्यसतथोक्तः प्रवर्त्तनमेवाहरजःकार्यं ज्ञानशक्तिःशब्दादिविषयज्ञानसाधनेंद्रियोत्पादनेशक्तिर्यस्यसतथोक्तः एकादशानांमिंद्रियाणांसात्त्विकाहंकारकार्यत्वाद्राजसस्यतुतदनुग्राहकत्वात् ॥ २४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सृज्यंसृजामिसृष्टोऽहमितीशमर्थंस्पष्टयितुंसृष्टिप्रकारमाह कालमिति ब्रह्मज्ञाने मुख्यलक्षणं जगज्जन्मादि कारणत्वमेवेतिज्ञापयितुमित्थं तोक्त्वासृष्टिप्रकारमाहकालमिति मायेशोलक्ष्मीपतिःपरनामस्वनिमेषांतेसृष्टिकालेप्राप्तोंवयुभूषुःबहुधाभवितुकामःअनादितएवात्मन्नात्मनियदृच्छयास्वेच्छयाप्राप्तमेवकालं कर्मजीवानांनानाविधादृष्टं स्वभावंसात्त्विकादिलक्षणं चशब्दात्समगुणत्रयांप्रकृतिंस्वमाययास्वशक्त्याधिशेषतउपादत्तेइत्यन्वयः प्रकृतिंप्रविश्यस्वशक्त्याक्षोभयामासेत्युक्तंभवति यत्रान्यहेत्वभावःस्यादीश्वरेच्छादिनाविनां तदिच्छाहियदृच्छास्यादतस्तत्रयदृच्छयेति कालकर्मस्वभावादिनित्ययेशेच्छयासदाप्राप्तमेवाविशेषेणसृष्ट्यादावुन्मयत्यजहतिच ईशोवह्नीःपुरःसृष्ट्यादौवबहुरूपतां तत्तन्नियामकतयाप्राप्तंकालाद्युपाददातिवचनेऽयोनमायामयीसृष्टिरुच्यतइतिसिद्धम् ॥ २१ ॥

गुणव्यतिकरात्मकमूलप्रकृतेर्महत्तत्त्वोत्पत्तिप्रकारमाह कालादिति यदासिसृक्षुर्विष्णुःकालकर्मस्वभावरजोगुणानाविश्यसृष्टयेप्रेरकस्तमोगुणांरजोगुणानचसंयुक्तोऽभूत्सःगुणवैषम्यात्मकोगुणव्यतिकरः तस्मात्कालादितिपंचमीतृतीयार्थेकालेनसृष्टिहेतुना कर्मणःकर्मणाहिरण्मयगर्भादृष्टेनतदुपकृतात् परिणामःस्वभावतइतितसिःसप्तम्यर्थे विकारुस्वभावयामूलप्रकृत्याचसाहितात्पुरुषाधिष्ठितादिति पुरुषेणविष्णुनाधिष्ठायक्षोभमाणान्महतोमहत्तत्त्वस्यचतुर्मुखदेहस्थानीयस्यजन्माभूदित्यन्वयः गुणानांव्यतिकरोविषमावस्थायस्मिन्नुतस्मादव्यक्तादिति वा तदुक्तंगुणकालस्वभावैरयंहरिनाधिष्ठितस्ततः जगदादिर्महत्तत्त्वमभूत्तस्येच्छयाहरेरिति ॥ २२ ॥

तुशब्देनकालादिकमनुकर्षतिकालकर्मस्वभावैरयंविकुर्वाणाद्रजःसत्त्वोपबृंहितात्सत्त्वेनानुस्यूतरजोगुणेनप्रवृद्धान्महत्तत्त्वात्तमःप्रधानस्तस्यविशेषोऽभवदित्यन्वयः द्वितीयस्तुशब्दोमहत्तत्त्वमपेक्ष्यतमःप्रधानत्वेनतरापेक्षयातदपेक्षयासत्त्वप्रधानएवेत्यस्मिन्नर्थे इतोऽपतमःप्रधानस्वमौपचारिकमितिभावेनाहद्रव्येति द्रव्याणिभूतानिज्ञानंज्ञानेंद्रियाणिक्रियाकर्मेंद्रियाणिचात्मास्वरूपंयस्यसतथा ॥ २३ ॥

किंनामकोऽसौपदार्थइतितत्राह सोऽहंकारइति तद्विभागमाह कुर्वन्नितिश्लोकेदर्शयति वैकारिकइति यस्याहंकारस्यभिदाभेदः ॥ २४ ॥